REPRINT FROM THE PANDIT.

अद्वैतदीपिका ।

परमहंसपरिव्राजकाचार्यश्रीमन्नृसिंहाश्रमविरचिता,
तच्छिष्यश्रीमन्नारायणाश्रमविरचितटीकया सहिता ।

तत्र साक्षिविवेको नाम
प्रथमः परिच्छेदः ।

काशीस्थश्रीधर्माधिकारिसंस्कृतपाठशालायां प्रधाना-
ध्यापकेन व्याकरणोपाध्यायपदवीकेन
नेने-इत्युपनामकेन
गोपालशास्त्रिणा संशोधितः

मेडिकल् हाल् नामकयन्त्रालये वाराणस्यां
सन् १९१६ ई० वर्षे मुद्रितः ।

ADVAITA DÍPIKÁ

OF

SRI NARASINHASHARMA

WITH THE COMMENTARY OF
SRI NARAYANASHARMA

VOLUME I. SAKSHI VIVEKA.

Edited by Pandit Gopál Sástri, Nene, Vyákarnopádhyáya, Pradhanadhyapaka of the Dharmádhikári Pathashala, Benares.

Printed and published by Bhagavati Prasad, B A.,
for the proprietors, F. J. Lazarus & Co.,
Medical Hall Press, Benares.
1916.

1st Edition, 1000 Copies.

All rights reserved.

Price Rs. 4-4.

Copyright Registered under Act XXV of 1867.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

REPRINT FROM THE PANDIT.

अद्वैतदीपिका ।

परमहंसपरिव्राजकाचार्यश्रीमन्नृसिंहाश्रमविरचिता,
तच्छिष्यश्रीमन्नारायणाश्रमविरचितटीकयासहिता ।

तत्र साक्षिविवेको नाम
प्रथमः परिच्छेदः ।

काशीस्थश्रीधर्माधिकारिसंस्कृतपाठशालायां प्रधाना-
ध्यापकेन व्याकरणोपाध्यायपदवीकेन
नेने-इत्युपनामकेन
गोपालशास्त्रिणा संशोधितः

मेडिकल् हाल् नामकयन्त्रालये वाराणस्यां
सन् १९१६ ई० वर्षे मुद्रितः ।

ADVAITA DÍPIKÁ

OF

SRI NARASINHASHARMA

WITH THE COMMENTARY OF

SRI NARAYANASHARMA

VOLUME 1. SAKSHI VIVEKA.

Edited by Pandit Gopál Sástri, Nene, Vyákarn-opádyáya, Pradhanadyapaka of the Dharmádhikári Pathashala, Benares.

Printed and published by Bhagavati Prasad, B A., for the proprietors, E. J. Lazarus & Co., Medical Hall Press, Benares.
1916.

1st Edition, 1000 Copies.

All rights reserved. *Price Rs. 4-4.*

Copyright Registered under Act XXV of 1867.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीगणेशाय नमः ।

अद्वैतदीपिका ।

श्रीनृसिंहाश्रमविरचिता ।

श्रीनारायणाश्रमविरचिताद्वैतदीपिका-विवरणाख्यटीकासहिता ।

(टीकाकारस्य मङ्गलम्)

यज्जिज्ञासा यज्ञदानादिभिः स्या-
च्छ्रुत्या मत्या चिन्तया यत्प्रबोधः ॥
यस्मिन् बुद्धे बाध्यते ऽनर्थमूलं
तं भूमानं भावये स्वात्मरूपम् ॥ १ ॥

चेतश्चापलमिन्द्रियार्थविषयं त्यक्त्वा भजस्वाभयं
संसारार्णवतारकं नरहरेः पादाब्जरेणुप्लवम् ॥
यो ध्यातो दितिजेन्द्रबालकमथः सिन्धोर्गतं पर्वते-
राक्रान्तं सितमुखभोगिभिरनायासेन पारे ऽकरोत् ॥ २ ॥

यत्पादसेवा वितनोति पापं पुण्यं रिपुं मित्रमनेकमेकम् ॥
अणुं महान्तं तमचिन्त्यवृत्तं श्रीनारसिंहं गुरुमानतोऽस्मि ॥ ३ ॥

अबोधवार्तापि न यद्विनेयेष्वथाप्यबुद्धं जगदेव येन ॥
शुद्धस्वरूपामलबोधबाधात् प्रबोधपूर्वाभिधमानतोऽस्मि ॥ ४ ॥

गणेशान प्रणौमि त्वां गुणान् भणितुमक्षमः ॥
यत्ते प्रसादाद्वाणीयवीद्याः सफलक्रियाः ॥ ५ ॥

श्री १०८ ... पुस्तकालय, काशी.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मातर्नमामि तव वाणि पदारविन्दं
तीर्थप्रभेदपरिलब्धनिजानुभावम् ॥
गीर्वाणदारकवरीभ्रमरीकुलाढ्यं
विद्यामयामलमनोज्ञपरागपाचम् ॥ ६ ॥
अद्वैतदीपमनवद्यपरात्मबोध-
भासाभवप्रमुखमूलतमः प्रमोषम् ॥
सम्प्राप्य दुर्बलदृशो ऽपि हि मामकीनाः
श्रेयो भजन्त्विति समुल्लसति प्रयत्नः ॥ ७ ॥

(टीकाकर्तुर्ग्रन्था-वतारः ।) प्रारिप्सितस्य प्रकरणस्याविघ्नपरिसमाप्ति-प्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च प्रकरणप्रतिपाद्याद्वितीयात्मतत्त्वस्य चेतस्याविर्भावप्रार्थनालक्षणं मङ्गलं कुर्वन्नर्थात्प्रकरणस्य सम्बन्धाधिकारिविषयप्रयोजनानि दर्शयति । यस्मादिति ।

(मूलकर्तुर्मङ्गलम् ।)

यस्मादभूदभवनानुभवात्सुखाब्धे-
र्विश्वं मरीचिसहवारिरसं मुरारेः ॥
तस्यालयो निखिललोकसुमङ्गलानां
पुण्यं वपुः प्रकटमस्तु ममार्धसिंहम् ॥ १ ॥

अर्धसिंहं तस्य वपुः स्वरूपं मम प्रकटमस्त्विति सम्बन्धः । मायोपाधिकं बिम्बप्रतिबिम्बात्मकमखण्डचैतन्यं बिम्बभावेनेश्वररूपम् । तदिदमुक्तमर्धसिंहमिति । अर्धेन बिम्बरूपेण सिंहमीश्वराकारमित्यर्थः । अर्धाचार्धेन प्रतिबिम्बरूपेण नृशब्दवाच्यं जीवरूपमिति सिद्ध्यति । तथा च श्रुतिः "[1]एष उ एव हि सर्वत्र सर्वदा सर्वात्मा

१ नृसिंहोत्तरतापनीयोपनिषदि । ४ खं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सिंहोऽसौ परमेश्वरोऽसौ हि सर्वत्र सर्वदा सर्वात्मा सन् सर्वमस्ति नृसिंह एवैकल" इति । तस्येति । तच्छब्दापेक्षितमर्थं स्वरूपतटस्थलक्षणाभ्यां दर्शयति । यस्मादिति । न विद्यते भवनं सत्ता अनुभवः स्फुरणं च यस्मादन्यस्य, सोऽभवनानुभवः अद्वितीयः सच्चिद्रूप इति यावत् । तस्मात् सुखाब्धेरपरिमितानन्दादिति यावत् । अनेन सत्यज्ञानानन्दात्मकत्वं ब्रह्मणः स्वरूपलक्षणमुक्तम् । तटस्थलक्षणमाह । विश्वं यस्मादभूदिति । उत्पत्तिस्थितिसंहारहेतुत्वेनाभिन्ननिमित्तोपादानत्वं तटस्थलक्षणमित्यर्थः । ननु ब्रह्मण उपादानत्वे मृदादिवद्विकारित्वेन चिदानन्दरूपत्वं न स्यादित्याशङ्क्य विश्वपरिणामिमायाया एव विकारित्वं ब्रह्मणस्तु मायामयजडप्रपञ्चसत्तास्फूर्तिरूपतयाधिष्ठानत्वेनोपादानत्वमिति न निर्विकारत्वक्षतिरित्यभिप्रेत्य विश्वस्यानिर्वचनीयत्वमाह । मरीचिमरुवारिरसमिति । मरीचियुक्तमरुभूमौ कल्पितं यद्वारि तस्य रसः सत्ता तादृशो रसो यस्य तत्तथा । स्वतः सिद्धलक्षणमप्यधिष्ठानसत्तया सद्भातीति यावत् । तटस्थलक्षणान्तरमाह । मुरारेरिति । मुरशब्दोपलक्षितब्रह्मादिदुर्जयपापिष्ठासुरसहस्रसंहर्तृत्वं परमेश्वरस्यैव स्वेच्छोपात्तलीलाविग्रहस्य सम्भवतीति भवत्येतदपि तटस्थलक्षणम् । अनेन पापफलप्रदत्वमुक्तम् । अन्यदपि तटस्थलक्षणमाह । निखिललोकसुमङ्गलानामालय इति । निखिललोकानां हिरण्यगर्भादिसर्वजन्तूनां यानि सुकृतफलानि तेषामालयो हेतुर्दातेति यावत् । सर्वसुकृतफलप्रदत्वं परमेश्वरस्यैवेति भवत्येतदप्युपलक्षणम् । तदुक्तम् "[1]अज्ञो जन्तुरनीशोऽयमात्मनः सु-

---

१ भगवद्गीताटीकायां १८ अध्याये ६१ श्लोके मधुसूदनसरस्वत्युद्धृतः श्लोकः ।

मातर्नमामि तव वाणि पदारविन्दं
तीर्थप्रभेदपरिलब्धनिजानुभावम् ॥
गीर्वाणदारकवरीभ्रमरीकुलाढ्यं
विद्यामयामलमनोज्ञपरागपावम् ॥ ६ ॥

अद्वैतदीपमनवद्यपरात्मबोध-
भासाभवप्रमुखमूलतमः प्रमोषम् ॥
सम्प्राप्य दुर्बलदृशोऽपि हि मामकीनाः
श्रेयो भजन्त्विति समुल्लसति प्रयत्नः ॥ ७ ॥

(टीकाकर्तुर्ग्रन्थावतारः ।) प्रारिप्सितस्य प्रकरणस्याविघ्नपरिसमाप्ति-प्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च प्रकरणप्रतिपाद्याद्वितीयात्मतत्त्वस्य चेतस्याविर्भावप्रार्थनालक्षणं मङ्गलं कुर्वन्नर्थात्प्रकरणस्य सम्बन्धाधिकारिविषयप्रयोजनानि दर्शयति । यस्मादिति ।

(मूलकर्तुर्मङ्गलम् ।)

यस्मादभूदभवनानुभवात्सुखाब्धे-
र्विश्वं मरीचिमरुवारिसमं मुरारेः ॥
तस्यालयो निखिललोकसुमङ्गलानां
पुण्यं वपुः प्रकटमस्तु ममार्धसिंहम् ॥ १ ॥

अर्धसिंहं तस्य वपुः स्वरूपं मम प्रकटमस्त्विति सम्बन्धः । मायोपाधिकं बिम्बप्रतिबिम्बात्मकमखण्डचैतन्यं बिम्बभावेनेश्वररूपम् । तदिदमुक्तमर्धसिंहमिति । अर्धेन बिम्बरूपेण सिंहमीश्वराकारमित्यर्थः । अर्धाच्चार्धेन प्रतिबिम्बरूपेण नृशब्दवाच्यं जीवरूपमिति सिद्ध्यति । तथा च श्रुतिः "[1]एष ह्येव हि सर्वत्र सर्वदा सर्वात्मा

१ नृसिंहोत्तरतापनीयोपनिषदि । ४ खं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सिंहोऽसौ परमेश्वरोऽसौ हि सर्वत्र सर्वदा सर्वात्मा सन् सर्वमत्ति नृसिंह एवैकल'' इति । तस्येति । तच्छब्दापेक्षितमर्थं स्वरूपतटस्थलक्षणाभ्यां दर्शयति । यस्मादिति । न विद्यते भवनं सत्ता अनुभवः स्फुरणं च यस्मादन्यस्य, सोऽभवनानुभवः अद्वितायः सच्चिद्रूप इति यावत् । तस्मात् सुखाब्धेरपरिमितानन्दादिति यावत् । अनेन सत्यज्ञानानन्दात्मकत्वं ब्रह्मणः स्वरूपलक्षणमुक्तम् । तटस्थलक्षणमाह । विश्वं यस्मादभूदिति । उत्पत्तिस्थितिसंहारहेतुत्वेनाभिन्ननिमित्तोपादानत्वं तटस्थलक्षणमित्यर्थः । ननु ब्रह्मण उपादानत्वे मृदादिवद्विकारित्वेन चिदानन्दरूपत्वं न स्यादित्याशङ्क्य विश्वपरिणामिमायाया एव विकारित्वं ब्रह्मणस्तु मायामयजडप्रपञ्चसत्तास्फूर्तिरूपतयाधिष्ठानत्वेनोपादानत्वमिति न निर्विकारत्वक्षतिरित्यभिप्रेत्य विश्वस्यानिर्वचनीयत्वमाह । मरीचिमरुवारिरसमिति । मरीचियुक्तमरुभूमौ कल्पितं यद्वारि तस्य रसः सत्ता तादृशो रसो यस्य तत्तथा । स्वतः सिद्धलक्षणमप्यधिष्ठानसत्तया सद्भातीति यावत् । तटस्थलक्षणान्तरमाह । मुरारेरिति । मुरशब्दोपलक्षितब्रह्मादिदुर्जयपापिष्ठासुरसहस्रसंहर्तृत्वं परमेश्वरस्यैव स्वेच्छोपात्तलीलाविग्रहस्य सम्भवतीति भवत्येतदपि तटस्थलक्षणम् । अनेन पापफलप्रदत्वमुक्तम् । अन्यदपि तटस्थलक्षणमाह । निखिललोकसुमङ्गलानामालय इति । निखिललोकानां हिरण्यगर्भादिसर्वजन्तूनां यानि सुकृतफलानि तेषामालयो हेतुर्दातेति यावत् । सर्वसुकृतफलप्रदत्वं परमेश्वरस्यैवेति भवत्येतदप्युपलक्षणम् । तदुक्तम् ''अज्ञो जन्तुरनीशोऽयमात्मनः सु-

१ भगवद्गीताटीकायां १८ अध्याये ६१ श्लोके मधुसूदनसरस्वत्युद्धृतः श्लोकः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

खदुःखयोः, ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा" इति । "[1]फलमत उपपत्तेः" इति च । आलयशब्दस्य नित्यपुल्लिङ्गत्वादालयो वपुरिति न विरुध्यते । प्रायश्चित्तादिकर्तॄणां पापक्षयहेतुरपि परमेश्वर एवेत्याह । पुण्यमिति । पावनं शोधकमिति यावत् । यद्यप्याद्योपलक्षणेन सामान्यतः सर्वमुपात्तं तथापि ब्राह्मणपरिव्राजकन्यायेन पृथगभिधानमिति न पुनरुक्तिदोषः ।

(टीकायाम् अनुबन्धचतुष्टयनिरूपणम् ।)

अत्रोक्तलक्षणलक्षितं ब्रह्म विषयः । निरतिशयसुखरूपतदवाप्तिः परमप्रयोजनम् । अर्वाचीनकुतर्कोत्थशङ्कानिवृत्तिरवान्तरप्रयोजनम् । तत्कामोऽधिकारी । यथायोगं सम्बन्धोऽपि द्रष्टव्यः ॥ १ ॥

ननु हिरण्यगर्भादेरपि जगत्कारणत्वं प्राणिकर्मफलदातृत्वं च श्रूयते "[2]विश्वस्य कर्ता भुवनस्य गोप्ता" इत्यादौ । तत्कथं परिपूर्णस्यैश्वरस्य विश्वविवर्ताधिष्ठानत्वं निखिलमङ्गलायतनत्वं चेति शङ्कायां "[3]यो ब्रह्माणं विदधाति पूर्वं यो वेदांश्च प्रहिणोति तस्मै" इत्यादि शास्त्रपर्यालोचनया हिरण्यगर्भादीनामपि परमेश्वरप्रसादाधीनमेव ज्ञानैश्वर्यादिशक्तिमत्त्वमवगम्यते । ततश्च स एव स्वेच्छोपात्तश्रीनृसिंहाकारलीलाविग्रहोपलक्षितो मुमुक्षुभिरुपास्यनीयः । यस्मात् "[4]यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च" इति श्रुतेरिति द्योतयन् तमेव निरतिशयज्ञानैश्वर्यसम्पन्नपरि-

१ ब्रह्मसूत्रम् । ३ अ० । २ पा० । ३८ सू ।

२ मुण्डकोपनिषदि १ मुं. । १ खं. । १ कं. ।

३ श्वेताश्वतरोपनिषदि ६ अ० । १८ कं. ।

४ नृसिंहोत्तरतापनीयोपनिषदि २ खं० । ४ कं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पूर्णसत्यज्ञानानन्दस्वरूपं परमात्मानं पुनरपि प्रार्थयते । यस्येति । यद्वा यथा "[1]सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविज्येते" इति सर्वकामोद्देशेन चोदितयोर्दर्शपूर्णमासयोरावर्तितयोस्तत्तत्फलहेतुत्वमेवं परमात्मस्मरणमपि "[2]स्मृते सकलकल्याणभाजनं यत्र जायते" इत्यादिवचनात्सकलकल्याणहेतुभूतमावर्तितं सद्वाग्देव्यादिप्रसादलभ्यमपि कल्याणं साधयिष्यतीत्यभिप्रायेण तमेव भूमानं चेतसि सन्निधापयति । यस्येति ।

(स्वेष्टदेवताध्यानम् ।)

यस्याज्ञावशवर्तिनोऽनुदिवसं
ब्रह्मादिलोकाधिपा
यस्यानन्दशतांशभागिन इमे
शक्रादयो निर्वृताः ॥
तं सत्यानवधिप्रबोधवपुषं
भूमानमाशास्महे
स्वान्ते श्रीनरसिंहसंग्रहवतां
दूरं सतामन्तिकम् ॥ २ ॥

यस्य भूम्नः आज्ञातिलङ्घने ऽतिभीता ब्रह्मादयो लोकनाथाः प्रत्यहं स्वस्वकार्येषु वर्तन्त इत्यर्थः । तदुक्तं श्रीभगवता, "[3]लोकानां लोकपालानां मद्भयं कल्पजीविनां ब्रह्मणोऽपि भयं मत्तो द्विपरार्धपरायुषः" इति । ननु ब्रह्मा-

१ अधिकरणमालायाम् ४ अ० । ३ पा० । १० अधि० ।
२ महाभारते ऽनुशासनपर्वणि विष्णुसहस्रनामाध्याये ।
३ श्रीमद्भागवते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्यानन्दतारतम्यस्य विषयतरतमभावाधीनतया विषयजन्यत्वं वक्तव्यम् । तथाच नित्यपरमानन्दाभावेनात्मनस्तद्रूपत्वायोगात्तत्प्राप्तिरपुरुषार्थ इत्याशङ्क्य "[1]आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त" इत्यानन्दस्यैव जगत्कारणत्वेन निर्धारितत्वात्तस्योत्पत्त्ययोगाद्ब्रह्माद्यात्मस्वरूपानन्दस्यैव तादृशविषयजन्यान्तःकरणवृत्तितारतम्याधीनाभिव्यक्तितारतम्यमात्रम् "[2]एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेरित्यभिप्रायेणाह । यस्यानन्दशतांशभागिन इति । यस्य परमात्मनः स्वरूपभूतपरमानन्दशतांशाभिव्यक्तिमन्त इन्द्रादयो निर्वृताः कृतार्था वयमित्यभिमन्यन्त इत्यर्थः । षष्ठी च राहोः शिर इतिवदुद्रष्टव्या । आनन्दरूपस्यापि प्रपञ्चवदसत्यत्वे जडत्वे वाऽपुरुषार्थत्वमिति तस्य सत्यज्ञानादिवाक्यसिद्धसदादिरूपत्वमाह । तं सत्यानवधिप्रबोधवपुषमिति । सत्यभूतो निरवधिको ऽपरिच्छिन्नः प्रबोधो वपुः स्वरूपं यस्य तमित्यर्थः । अनवधित्वमुपपादयति । भूमानमिति । "[3]यत्र नान्यत्पश्यति" इत्यादिवाक्यादद्वितीयसुखस्यैव भूमत्वाभिधानादपरिच्छिन्नत्वमित्यर्थः । आशास्महे । अभीष्टफलसिध्यै ध्यायाम इत्यर्थः । स्वान्ते । हृदि । नन्वद्वितीय आत्मतत्त्वे कथं ध्यातृध्येयभाव इत्याशङ्क्य श्रीनृसिंहाकारविग्रहवतः परमेश्वरस्य कल्पितभेदेन ध्येयत्वमित्यभिप्रायेणाह । श्रीनरसिंहमिति । अग्रहवताम् । मूढानां दूरं दुर्विज्ञेयम् । सताम् । विवेकिनामन्तिकं, प्रत्यगात्मतया भातमेतादृशमात्मतत्त्वम् ॥ २ ॥

---

१ तैत्तिरीयोपनिषदि ३ प्र॰ । ६ खं॰ । १ कं॰ ।
२ बृहदारण्यकोपनिषदि ४ प्र॰ । ३ ब्रा॰ । ३२ कं॰ ।
३ छान्दोग्योपनिषदि ७ प्र॰ । २४ खं॰ । १ कं॰ ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यत्प्रसादादवगतं तान् गुरून्प्रणमति । यत्पादेति ।

(गुरोर्वन्दनम् ।)

यत्पादरेणुकलिलं सलिलं निपीय
मूकोऽपि मूकयति पण्डितमण्डलानि ॥
सद्भागधेयममितस्वपदप्रबोधं
निर्धूतमोहविभवं गुरुमानतोऽस्मि ॥ ३ ॥

यस्य श्रीगुरोः पादलग्नरेणुभिः कलिलं कर्दमिलं सलिलं पीत्वा तत्पानात्पूर्वं मूर्खोऽपि पश्चात् प्रज्ञावतां सदसि सर्वोत्कर्षेण व्यवहरतीत्यर्थस्तं गुरुमिति द्रष्टव्यम् । सद्भागधेयम् । सतां विवेकवैराग्यादियुक्तानां प्रत्यक्षभूतं परदैवतम् । अमिते अपरिच्छिन्ने स्वपदे स्वस्वरूपे ब्रह्मणि प्रबोधोऽप्रतिबद्धसाक्षात्कारो यस्य तम् । तत्र लिङ्गमाह । निर्धूतमोहविभवमिति । निःशेषं नष्टो मोहस्तद्विभवश्च रागद्वेषादिर्यस्य तं जगन्नाथाश्रमं गुरुं त्रिविधकरणैर्नमामीत्यर्थः ॥ ३ ॥

इदानीं गीर्वाणेन्द्रसरस्वतीसंज्ञकं मन्त्रगुरुं प्रणमति । कल्याणेति ।

(दीक्षागुरोर्वन्दनम् ।)

कल्याणगुणसम्पूर्णं निर्वाणविभवालयम् ॥
गीर्वाणेन्द्रसरस्वत्याश्चरणं शरणम्भजे ॥ ४ ॥

कल्याणगुणैः शान्त्यादिगुणयुक्तैः शिष्यैः सम्पूर्णं परिवृतं, सेवितमिति यावत् । निर्वाणविभवयोर्मोक्षाभ्युदययोरालयं कारणम् । गीर्वाणेन्द्रसरस्वतीसंज्ञकस्य गुरोश्चरणं शरणं व्रजामीत्यर्थः ॥ ४ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ग्रन्थकरणसामर्थ्यनिदानं प्रदर्शयन् चिकीर्षितं प्रतिजानीते । श्रीमदिति ।

(ग्रन्थनामनिर्देशः ।)

श्रीमद्गुरुपदद्वन्द्वध्याननिर्धूतकल्मषः ॥
कुर्वे तदाज्ञयाद्वैतदीपिकां भेदभेदिनीम् ॥ ५ ॥

गुर्वाज्ञयैवायमारम्भो न ख्यात्याद्युद्देशेनेत्याह । तदाज्ञयैवेति । अद्वैतदीपिकाम् । निरस्तोपप्लवप्रत्यग्ब्रह्मैक्यप्रकाशिकाम् । इयञ्चान्वर्थसंज्ञैवेत्याह । भेदभेदिनीमिति । निखिलभेदनिराकरणे ऽद्वैतात्मतत्त्वप्रतिपादने पटीयसीमित्यर्थः ॥ ५ ॥

उक्तविशेषणविशिष्टग्रन्थकरणप्रतिज्ञया ऽस्मास्वहङ्कारबुद्धिर्न कर्तव्येति द्योतयन् प्रथमपरिच्छेदप्रतिपाद्यमर्थमाह । तत्र श्रेयानिति ।

(साक्षिविवेकप्रतिज्ञा ।)

तत्र—
श्रेयान् स्वधर्मो विगुणो ऽपि यस्मा-
दित्यब्रवीत्पार्थसुहृत्सुरेशः ॥
तस्मादहं साक्षिविवेकमादौ
गुरुप्रसादात्प्रकटीकरोमि ॥ ६ ॥

यस्मात्परमहंसानामात्मविचारः परमो धर्मः, यस्माच्च "[1]श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्" इति श्रीकृष्ण एव वैगुण्येऽपि स्वधर्माचरणं श्रेय इत्याह तस्माद्यथामतिमननात्मकस्य धर्मरूपामद्वैतदीपिकां कुर्व इत्यर्थः । एव-

१ भगवद्गीतायाम् । ३ अ० । ३५ श्लो० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ख्यास्यां कृतावन्येषां वैगुण्यबुद्धावप्यर्थवानेव ममायमा-रम्भः पाण्डित्यप्रकटनभावस्यानुद्देश्यत्वादिति भावः । तत्रापि त्वम्पदार्थविवेकाय संन्यासः सर्वकर्मणामित्यादिवचनात्त्वम्पदार्थे विवेकोद्देशेन च संन्यासस्य कृतत्वात् सर्वेषामप्यहमनुभवप्रसिद्धत्वाच्च त्वंपदार्थस्य तद्विवेक एव प्रथमं क्रियत इत्याह । अहं साक्षिविवेकमिति । तत्राद्वैतदीपिकायामादौ प्रथममहं साक्षिविवेकं प्रकटीकरोमीत्यन्वयः । अहमो ऽहमनुभवविषयाद्दुःखादिधर्मिणः सकाशात्साक्षिणश्चिद्रूपोदासीनजीवस्वरूपस्य विवेकं भेदं गुरुप्रसादबलेन व्यक्तीकरिष्य इत्यर्थः ॥ ६ ॥

(तत्र विप्रतिपत्तिः ।) नन्वद्वैतदीपिकां कुर्व इति प्रत्यग्ब्रह्मैक्यस्य व्युत्पाद्यत्वमुक्तं तदयुक्तम् । तस्मिन् जिज्ञासायोगात् । तदयोगश्च धर्मिज्ञानाभावात् । तथाहि—किं विचारात्प्राक् प्रत्यक्षादिप्रमाणात्तदवगम उतागमादथवा स्वप्रकाशत्वेन ? नाद्यः, ब्रह्मण औपनिषदत्वेन प्रत्यक्षागोचरत्वात् । न द्वितीयः, विचारात्प्राक् तदयोगादन्यथा विचारवैयर्थ्यात् । न तृतीयः, जिज्ञास्यस्य स्वप्रकाशत्वेनाज्ञातांशाभावेन जिज्ञासायोगादित्याशङ्क्याह । अथेति ।

(मूलकर्तुर्ग्रन्थावतरणिका ।) अथाधीतसाङ्गस्वाध्यायस्य साधनचतुष्टयसम्पन्नस्यापातप्रतिपन्नब्रह्मात्मैक्यजिज्ञासोस्तत्प्रतिपादकानि बहूनि वाक्यानि दृश्यन्ते "तत्त्वमसि"[1] "अहं ब्रह्मास्मि"[2] इत्येवमादीनि ।

---

१ छान्दोग्योपनिषदि ६ प्र. ८ खं. ७ मं. ।

२ बृहदारण्यकोपनिषदि १ प्र. ४ ब्रा. १० मं. ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रारम्भार्थो ऽथशब्दः ।

(टीकाकारमतेन अयमभिसन्धिः । नित्येनैवाध्ययनविधिग्रन्थावतारात्रयः ।) नाधीतसाङ्गस्वाध्यायस्य प्राक्कृतसुकृतविशेषपरिपाकवशादिहजन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनेन नित्यनैमित्तिककर्माण्यनुष्ठितवतः शुद्धचित्तस्य पदार्थेषु नित्यानित्यविमर्शतः स्पर्द्धासूयाक्षयिष्णुतादुःखदोषदर्शनेनैहिकामुष्मिकभोगाद्विरक्तस्य शान्त्यादिसाधनसम्पन्नस्य नित्यपुरुषार्थप्रेप्सोरपेक्षितोपायं ब्रह्मात्मैक्यज्ञानमधीतस्वाध्यायादवगतवतो भवति ब्रह्मात्मैक्यजिज्ञासाप्रवृत्तिपर्यन्ता । न च विचारात्प्रागधीतस्वाध्यायानां ब्रह्मावगतौ विचारवैयर्थ्यमिति वाच्यम् । विचारमन्तरेणोत्पन्नस्यानभ्यासदशापन्नजलादिज्ञानवत्सत्तानवधारणात्मकत्वादसम्भावनादिपुरुषापराधप्रतिबद्धत्वाद्वा पुरुषार्थपर्यवसायित्वाभावेन तादृशज्ञानसिद्ध्यर्थं विचारस्यावश्यकत्वात् । न च ब्रह्मणः स्वप्रकाशत्वेनाज्ञातत्वाभावाज्जिज्ञासाऽसम्भवः ? स्वरूपप्रकाशस्याज्ञानाविरोधेन जिज्ञासोपपत्तेरिति । नन्वधीतस्वाध्यायस्यापि जिज्ञासाहेतुभूतब्रह्मात्मैक्यप्रतिपत्तिर्न सम्भवति तद्बोधकाभावात् । न तावत्सत्यादिवाक्यात्तदवगमः । तस्य तत्पदार्थमात्रविषयतया वाक्यार्थागोचरत्वात् । नन्वनन्तपदात्त्रिविधपरिच्छेदराहित्यप्रतिपत्तेर्जीवपराभेदः सिद्ध इति चेत् ? जीवस्य घटादिवद्बाध्यत्वाभ्युपगमे ऽपि ब्रह्मानन्त्योपपत्तेः । न चाधिकारिणो जीवस्यासत्यत्वानुपपत्तिप्रतिसन्धानसहितानन्तपदवद्वाक्यादेतदवगम इति वाच्यम् । अनुपपत्तिप्रतिसन्धानसापेक्षत्वे वाक्यस्य मानान्तरानपेक्षत्वक्षतिप्रसङ्गात् । विचारात्प्राग् जीवस्य सत्यत्वानि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धारणेनासत्त्वानुपपत्तिप्रतिसन्धानायोगाच्च । नन्वस्तु तत्त्वमस्यादिवाक्यात्तदवगम इति चेत् ? न, विकल्पासहत्वात् । किं तत्त्वमादिवाक्यं सत्यादिवाक्यसमानार्थमुतातिरिक्तार्थम् ? नाद्यः, अस्य वैयर्थ्यापातात् । न द्वितीयः, सत्यादिवाक्यप्रमेयब्रह्मानभिधायकतया कल्पितविषयत्वापातात् । अतो वाक्यार्थे ब्रह्मण्यापातज्ञानासम्भवेन तज्जिज्ञासानुपपत्तेरिति । तत्राह । तत्प्रतिपादकानीति । विचारात् प्राक् ब्रह्मात्मैक्यसंशयाद्यनुकूलापातज्ञानजनकानि, सति तु विचारे संशयादिविरोधिसत्तानिश्चायकप्रमाजनकानीत्यर्थः । अयम्भावः । यद्यपि सत्यादिवाक्यात्तत्त्वमादिवाक्यमनधिकविषयमुभयोरप्यखण्डार्थत्वात् तथापीदं न व्यर्थं, सर्वज्ञत्वकिञ्चिज्ज्ञत्वाद्युपलक्षितस्वरूपाभेदावगमस्य तद्विषयाज्ञानसंशयविपर्यासनिवर्त्तकस्य तत्तदुपलक्षितोपस्थापकपदयुक्तवाक्यैकसाध्यत्वात् । तत्तेदन्तोपलक्षितदेवदत्तस्वरूपाभेदावगमस्य सोऽयं देवदत्त इति वाक्यैकसाध्यत्ववत् । न च जीवस्वरूपब्रह्माभेदविषयन्यायानुगृहीतसत्यादिवाक्यादेव तादृशीप्रतिपत्तिः सिध्यतीति वाच्यम् । अभेदविषयन्यायानां तत्त्वमादिवाक्याङ्गत्वात् । अन्यथा रात्रिसत्रपितृयज्ञन्यायानुगृहीतोत्पत्तिवाक्यादेव स्वर्गकामाधिकारसिद्धेः स्वर्गकामो यजेतेत्यस्य वैयर्थ्यप्रसङ्गादिति ॥

एवं प्रत्यग्ब्रह्मैक्यजिज्ञासासम्भवात्तद्व्युत्पादनमर्थवदित्युक्तमिदानीं तदुपयोगित्वेन त्वम्पदार्थविवेकः क्रियत इत्यभिप्रेत्य तज्जिज्ञासाहेतुत्वेन वादिविप्रतिपत्तिं दर्शयति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(त्वम्पदार्थे तार्किकादिमतम् ।) तत्र त्वंपदार्थं देहेन्द्रियमनोबुद्धिप्राणाव्यतिरिक्तं कर्तृभोक्तृस्वभावं मन्यमानास्तद्विलक्षणब्रह्मात्मैकत्वमात्मनोऽसम्भावयन्तस्तार्किकादयो वाक्यमविवक्षितार्थमन्यपरं वा मन्यन्ते ।

(त्वम्पदार्थे तार्किकादिमतनिरासः ।) तत्र त्वंपदार्थमात्मानं श्रुतिन्यायाभ्यामहमनुभवगोचरात्पृथक्कृत्य तत्त्वाक्षितया प्रदर्शयामः । श्रुतिस्तावच्छान्दोग्ये "[1]अथातोऽहङ्कारादेशः" इत्यादिना ऽहङ्कारमुपदिश्य ततोन्यात्मानं दर्शयति "[2]अथात आत्मादेश एवात्मैवाधस्तादात्मोपरिष्टादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मा उत्तरत आत्मैवेदं सर्वम्" इति । नन्विदं ब्रह्मविषयमिति चेत्? न, तस्य वाक्योपक्रमे "[3]स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणतः स उत्तरतः स एवेदं सर्वम्" इति पृथगेव निर्दिष्टत्वात् ॥

तत्रेति । तत्त्वमादिवाक्य इत्यर्थः । ब्रह्मात्मैकत्वमिति । ब्रह्मस्वरूपेणैक्यमित्यर्थः । नन्वध्ययनविधिपरिगृहीतानां

१ छान्दोग्योपनिषदि ७ प्र. । २५ खं. । १ कं. ।
२ छान्दोग्योपनिषदि ७ प्र. । २५ खं. । २ कं. ।
३ छान्दोग्योपनिषदि ७ प्र. । २५ खं. । १ कं. ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत्त्वमादिवाक्यानां कथमङ्गल्यग्रादिवाक्यवदानर्थक्यमित्याशङ्क्य सम्पदाद्युपासनपरत्वं वा भवत्वित्याह । अन्यपरं वेति । एवं विप्रतिपत्तिं प्रदर्श्य तन्निरासार्थं विचार आरभ्यत इत्याह । तत्र त्वं पदार्थमिति । अहमनुभवगोचरात् । दुःखादिधर्मिणोऽहङ्कारात् । तत्साक्षितयेति । अहङ्कारतद्धर्मसाक्षितया सर्वोपप्लवरहितविज्ञानत्वेनेत्यर्थः । श्रुतिन्यायाभ्यामित्युक्तम् । तत्र प्रथमं श्रुतिं दर्शयति । श्रुतिस्तावदिति । नन्वथात आत्मादेश इति श्रुतिः दुःखादिधर्म्यहङ्कारात्मविषयैव किन्न स्यादित्याशङ्क्य तस्याधस्तनवाक्ये उपदिष्टत्वात्तत्साक्षिचिदात्मविषय एवायमुपदेश इत्यभिप्रेत्याह । अथातो ऽहङ्कारादेश इत्यादिना । अहङ्कारमुपदिश्येति । ननु आत्मशब्दस्य ब्रह्मण्यपि सम्भवादथात आत्मादेश इत्युपदेशस्तद्विषय एव । तथा च न जीवस्याहङ्काराद्भेदसिद्धिरिति शङ्कते । नन्विदमिति । भूमाख्यब्रह्मणोऽहङ्कारोपदेशात् प्रागेवोपदिष्टत्वादुत्तरत्र तत्परिग्रहो ऽनुपपन्न इत्याह । न तस्येति ॥

नन्वथातो ऽहङ्कारादेश इत्यत्राहङ्कारपदेन न दुःखादिधर्मिण उपदेशः तस्य प्रसिद्धत्वात् । दकारान्तास्मच्छब्दनिष्पन्नाहम्पदमात्रवाच्यत्वाच्च । किन्तु "जीवस्थस्त्वनिरुद्धो यः सोऽहङ्कार इतीरित" इत्यादिस्मृतिष्वहङ्कारपदार्थत्वेन प्रसिद्धो ऽनिरुद्ध एव निर्दिश्यत इत्यभिनवपक्षोत्प्रेक्षकः कश्चित्प्रत्यवतिष्ठत इत्याह । अत्र नवीन इति ।

(द्वैतमतेनाहम्पदार्थे विप्रतिपत्तिः) अत्र नवीनः, नात्र किलाहमर्थो ऽहङ्कारादेश इत्यनेनोच्यते येनाथात आत्मादेश इत्येतत्ततो ऽन्यात्मतत्त्वविषयं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यात् । किन्त्वनिरुद्ध एव तस्य स्मृतिष्वहङ्कार इति प्रसिद्धेः । अहमर्थे च जीवे ऽहङ्कारपदाप्रयोगात् । तस्य दकारान्तास्मच्छब्दनिष्पन्नकेवलाहंशब्दवाच्यत्वात् । अहमेवाधस्तादित्यत्रापि मकारान्ताव्ययत्वेनादकारान्तत्वात् । किञ्च न केवलं पृथगुपदेश इत्येतावता भेदः सिध्यति । ब्रह्मात्मनोरपि भेदप्रसङ्गात् । अस्ति हि तयोरपि पृथगुपदेशः । तथापि तयोरभेदे किमपराद्धमहङ्कारात्मनोरभेदेन ॥

नन्वथातो ऽहङ्कारादेश एवेत्युक्त्वा ऽनन्तरम् "[1]अहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादहं दक्षिणतो ऽहमुत्तरतो ऽहमेवेदं सर्वम्" इत्यहंशब्दवाच्यस्याहम्प्रत्ययालम्बनस्याभ्यस्यमानत्वादादावपि स एव निर्दिश्यत इति सिद्धान्त्याशयमाशङ्क्याह । अहमेवाधस्तादित्यत्रापीति । अस्मच्छब्दप्रकृतिकस्याहंशब्दस्य प्रयोक्तृवाचकत्वादपौरुषेये च वेदे प्रयोक्तुरभावान्मकारान्ताव्यय एवायमहंशब्दोऽस्य च जीवे प्रयोगाभावादुपक्रमानुरोधेनानिरुद्ध एवाभ्यस्यत इति भावः । अङ्गीकृत्याप्यस्याहमर्थपरत्वं पृथगुपदेशमात्रेणाहङ्कारात्मनोर्भेदो न सिध्यतीत्याह । किञ्चेति । न ह्यत्र मुखतो भेदवाचकपदमस्ति । अथशब्दस्यापि प्रकारान्तरेणोपदेशादारम्भार्थत्वे सम्भवति प्रकृतादर्थान्तरपरत्वकल्पकाभावात् । किन्तु पृथगुपदेशान्यथानुपपत्त्या भेदो-

१ छान्दोग्योपनिषदि ७ प्र । २५ खं. । १ कं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वक्तव्यः । न चानुपपत्तिरस्ति । त्वन्मते जीवब्रह्मणोः सत्यप्यभेदे स एवाधस्तादात्मैवाधस्तादिति पृथगुपदेशदर्शनादित्यर्थः ॥

नन्वनधिगतार्थबोधकत्वेनार्थवत्वाद्वेदवाक्यानां जीवब्रह्मणोः प्रत्यक्षसिद्धभेदयोः समानस्वभावप्रतिपादनद्वारेणाभेदपरः पृथगुपदेशः, एवञ्चोभयोरपि सार्वात्म्यमप्युपपन्नं भवति । अहङ्कारात्मनोस्त्वभेदस्यैव प्रत्यक्षसिद्धत्वात्तयोर्भेदार्थ एव पृथगुपदेश इति शङ्कते । नन्विति ।

ननु भूमात्मनोर्भेदेन प्रत्यक्षसिद्धयोर्भेदेन व्यपदेश ऐक्यार्थः । द्वयोः सार्वात्म्यायोगात् । अहङ्कारस्य त्वात्मत्वेन प्रत्यक्षसिद्धस्य भेदव्यपदेशो भेदार्थ इति चेत्? नाहमर्थादन्यस्यात्मनो भूमाख्यब्रह्मणो भिन्नत्वेन प्रत्यक्षासिद्धत्वात्तयोरुपदेशो भेदार्थः, अहमर्थस्य तु ब्रह्मभिन्नत्वेन सिद्धस्य व्यपदेश ऐक्यार्थ इति वैपरीत्यापत्तेः । सार्वात्म्यञ्च नेह प्रतिपिपादयिषितम् । स एवाधस्तादहमेवाधस्तादात्मैवाधस्तादित्युपक्रमानुसारेणोपसंहारेऽपि स एवेदं सर्वमित्यादेः सर्वगतत्वपरत्वात् । तस्य च भेदेऽप्यविरोधादिति ।

एवं तर्ह्यशनायाद्यतीतजीवस्य ब्रह्मापेक्षया भेदेन प्रत्यक्षसिद्धत्वाभावादहमीश्वराद्भिन्न इति प्रत्ययस्य च दुःखादिधर्म्यहङ्कारविषयत्वात्त्वदभिमतजीवेश्वरयोर्भेदाधस्तयोः पृथगुपदेशः स्यादहमर्थे ईश्वरभेदस्य प्रत्यक्षसिद्ध-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वात्तयोस्तत्र भेदार्थः पृथगुपदेशः स्यादिति वैपरीत्यमापद्येतेत्याह। नाहमर्थादन्यस्येति। अस्मिन् पक्षे जीवपरयोर्भेदेन "[1]स एवेदं सर्वम्" "[2]आत्मैवेदं सर्वम्" इत्युभयोः सार्वात्म्यश्रुतिः पीड्येतेत्याशङ्क्य श्रुतेरन्यपरत्वमाह। सार्वात्म्यश्चेति। स एवाधस्तादित्याद्युपक्रमस्य सर्वदेशसम्बन्धाभिधानेन विभुत्वमात्रपरत्वात्स एवेदं सर्वमित्याद्युपसंहारोऽपि वेदोपक्रमाधिकरणन्यायेनोपक्रान्तविभुत्वपरतया नीयत इत्यर्थः। ननु विभुपदार्थयोः परस्परसम्बन्धाभावात् कथं सर्वगतत्वमित्याशङ्क्य सर्वमूर्तद्रव्यसंयोगित्वमेव विभुत्वं, तच्च भेदे ऽपि न विरुद्धेनेत्याह। तस्य चेति॥

अहङ्कारादेशस्यानिरुद्धविषयत्वनिराकरणाय जीवविषयत्वं सिसाधयिषुः प्रकरणार्थं परिशोधयति। इदं हीत्यादिना।

(द्वैतमतखण्डनम्) अत्रेदमभिधीयते। इदं हि प्रकरणं यदज्ञानाच्छोकः यज्ज्ञानात्तन्निवृत्तिः स एवात्मा सुखं तदेव च भूमा स च निखिलभेदाभावादात्मेति प्रतिपादयति॥

"[3]सोऽहं भगवो मन्त्रविदेवास्मि नात्मवित् श्रुतं ह्येवमेव भगवद्दृशेभ्यस्तरति शोकमात्मवित्" इति सोऽहं स्वास्वरूपाज्ञानाच्छोचामि शोचन्तं मां शोकसागरात्स्वात्मतत्त्वोपदेशेन समुत्तारयत्वित्युपक्रमे नारदेनात्मतत्त्वस्यैव

१ छान्दोग्योपनिषदि ७ प्र. । २५ खं. । १ कं. ।
२ छान्दोग्योपनिषदि ७ प्र. । २५ खं. । २ कं. ।
३ छान्दोग्योपनिषदि ७ प्र. । १ खं. । ३ कं. ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सनत्कुमारम्प्रति पृष्टत्वात्तत्परमेवेदम्प्रकरणमित्याह । यदज्ञानाच्छोक इत्यादिना । दुःखादिधर्म्यात्मज्ञानस्य शोकहेतुत्वात्तद्विलक्षणं सुखात्मज्ञानादेव शोकनिवृत्तिरित्यभिप्रायेणात्मसुखत्वेन निर्दिश्यत इत्याह । स एवात्मा सुखमिति । सुखस्य सातिशयत्वविषयपारतन्त्र्यादिप्रतीतेः कथमात्मरूपत्वमित्याशङ्क्य तस्यान्तःकरणवृत्तिविशेषोपाधिप्रयुक्तत्वात्स्वतोऽपरिमितत्वेन निर्दिश्यत इत्याह । तदेव च भूमेति । भूम्नो लक्षणं चोक्तमित्याह । स चेति । निखिलश्चासौ भेद्यत इति भेदो जडप्रपञ्चस्तदभावस्वरूप इत्यर्थः । आरोपिताभावस्याधिष्ठानव्यतिरेकेण निरूपयितुमशक्यत्वाज्जडप्रपञ्चस्य चित्प्रकाशरूप आत्मनि कल्पितत्वात्तदभावात्मना यत्र नान्यत्पश्यतीत्यादिवाक्यं भूमानं लक्षयतीत्यर्थः ॥

प्रतिज्ञातमर्थं जडप्रपञ्चहेतुत्वेन विशदयति । तरति शोकमात्मविदित्यादिना ।

(प्रतिज्ञातार्थ-विस्तारः ।) "[1]तरति शोकमात्मवित्" इत्युपक्रान्तस्यात्मनो "[2]यः सत्येनातिवदति" इति सत्यशब्देनानुक्तष्टस्य तद्विज्ञानसाधनश्रवणाद्युपन्यासपूर्वकं "[3]सुखन्त्वेव विजिज्ञासितव्यम्" इति सुखात्मतयोपन्यस्तस्य "[4]सुखम्भगवो विजिज्ञास" इति जिज्ञासापूर्वकं "[5]यो वै भूमा तत्सुखं

१ छान्दोग्योपनिषदि ७ प्र. । १ खं. । २ कं ।
२ छान्दोग्योपनिषदि ७ प्र. । १६ खं. । १ कं. ।
३ छान्दोग्योपनिषदि ७ प्र. । २२ खं. । १ कं. ।
४ छान्दोग्योपनिषदि ७ प्र. । २२ खं. । १ कं. ।
५ छान्दोग्योपनिषदि ७ प्र. । २३ खं. । १ कं. ।

२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नाल्पे सुखमस्ति, भूमैव सुखं न परिमितम्" इत्युक्त्वा "[1]भूमानं भगवो विजिज्ञास" इत्याकाङ्क्षामवतार्य "[2]यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा" इति निरस्तनिखिलभेदस्य वस्तुनो भूम्नो लक्षितत्वात् । "[3]अथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पम्" इति वस्त्वन्तरपरिच्छिन्नस्याल्पत्वं सङ्कीर्त्य "[4]अथ यदल्पं तन्मर्त्यम्" इति मर्त्यत्वेन "[5]नाल्पे सुखमस्ति" इत्यसुखत्वेन च वस्त्वन्तरपरिच्छिन्नस्य निन्दितत्वाच्च । न च यत्रेति विषयसप्तमी, अन्यत् कर्तृ यन्न पश्यति शृणोति विजानाति वा स भूमेति वाक्यार्थः किं न स्यादिति वाच्यम् । प्रमाणनिषेधे तदभावप्रसङ्गात् । कर्तृनिषेधे चात्मैकत्वमिति सदिष्टसिद्धिः । न च दुर्विज्ञेयत्वमात्रमत्र प्रतिपाद्यम् । तस्यापदार्थत्वादवाक्यार्थत्वात् ॥

१ छान्दोग्योपनिषदि ७ प्र० । २३ खं० । १ कं० ।
२ छान्दोग्योपनिषदि ७ प्र० । २४ खं० । १ कं० ।
३ छान्दोग्योपनिषदि ७ प्र० । २४ खं० । ५ कं० ।
४ छान्दोग्योपनिषदि ७ प्र० । २४ खं० । १ कं० ।
५ छान्दोग्योपनिषदि ७ प्र० । २२ खं० । १ कं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तद्विज्ञानसाधनेति । यद्यपि श्रवणादीनां पुरुषापराधनिरास एवोपक्षयो, वाक्यार्थज्ञानपर्यवसायित्वे तस्य स्वतस्त्वहानेस्तथापि तत्सत्तावधारणात्मकज्ञानेन प्रतिबन्धनिरासकतयावश्यावेक्षणीयत्वाच्छ्रवणादीनां तत्साधनत्वव्यपदेश इति द्रष्टव्यम् । श्रवणाद्युपन्यासपूर्वकमिति । "[1]यदा वै विजानाति" "[2]यदा वै मनुत" इत्यादिनेति शेषः । भूमैव सुखमित्येवकारार्थमाह । न परिमितमिति । यत्र यस्मिन् वस्तुनि अन्यत् भिन्नं कार्यजातं न पश्यतीत्यादिना नामरूपात्मकभेदप्रपञ्चप्रमाणस्य निषिद्धत्वादद्वितीयवस्तुपरमेवेदं प्रकरणमित्याह । इति निरस्तनिखिलभेदस्येति । भिन्नप्रपञ्चस्य परिमितत्वदुःखहेतुत्वाभ्यां निन्दितत्वेन न चाद्वितीयवस्तुपरमिदमित्याह । अथ यत्रान्यत्पश्यतीत्यादिना । ननु यत्र नान्यदिति वाक्ये यत्रेति विषयसप्तम्या कर्मणो निर्दिष्टत्वादन्यदिति कर्तृपरम् । तथा चान्यत्कर्तृ यन्न पश्यतीत्यादिवाक्यार्थे भेदप्रमाणनिषेधानवगमान्नाद्वैतसिद्धिरित्याशङ्काह । न च यत्रेति । हेतुमाह । शृणोतीति । अयमर्थः, यत्र नान्यत्पश्यतीत्यत्र नञः किं धातुनान्वयः, प्रत्ययेन वा, अन्यदित्यनेन वा ? प्रथमद्वितीययोर्भूम्नि प्रमाणप्रमातृनिषेधेन तदसिद्धिप्रसङ्गादिति । अत्र भावकर्तृसाधनेन प्रमाणपदेन प्रमाप्रमात्रोर्ग्रहणमिति द्रष्टव्यम् । तृतीयं दूषयति । कर्तृनिषेध इति । भूमानं यत्परम्पश्यति तदन्यन्नेत्युक्ते जीवेश्वरभेदनिरासेनात्मैकत्वसिद्धिरित्यर्थः । नन्वस्य वाक्यस्येश्वरदुर्विज्ञेयत्वपरत्वान्नोक्तविकल्पावकाश इत्यत

१ छान्दोग्योपनिषदि ७ प्र० । १६ खं० । १ कं० ।

२ छान्दोग्योपनिषदि ७ प्र० । १७ खं० । १ कं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ग्राह । न च दुर्विज्ञेयत्वमात्रमिति । प्रधानपदार्थस्यैवेतरपदार्थसंसृष्टस्य वाक्यार्थत्वादत्र च तद्वाचकपदाभावान्न तस्यवाक्यार्थत्वं, लक्षणा च न न्याय्येत्याह । तस्येति ॥

किञ्च प्रमाणाभावप्रयुक्तमीश्वरस्य दुर्विज्ञेयत्वमुत मेयस्वभावप्रयुक्तम् ? आद्ये ऽनिर्वचनीयत्वापातेन घटादितुल्यतया श्रुतिप्रतिपाद्यत्वासम्भव इत्यभिप्रेत्य, द्वितीये प्रत्यग्भिन्ने साकारे लोकप्रवादसिद्धे ब्रह्मणि प्राकृतानामप्यसम्भावनाद्यनुदय इत्याह । त्वदभिमतेति ।

त्वदभिमतब्रह्मणः पामरधीविषयत्वेन दुर्विज्ञेयत्वाभावाच्च । न हीश्वरः शरीरी शङ्खचक्रादिमान् हरिरिति श्रुत्वा पामरा अपि विप्रतिपद्यन्ते । भेदे च विभुमात्रे तस्मिन् यो वै भूमेति भूम्नः सुखत्वप्रतिपादनं न ब्रह्मविषयं स्यात् । कालानिरुद्धादेरपि विभुद्रव्यस्य तव मते सत्त्वात् । सुखमिति सामानाधिकरण्यानुपपत्तेश्च । भेदाभेदस्य च विरुद्धत्वेनानुपपत्तेः "[1]सभगवः कस्मिन्प्रतिष्ठित" इत्यादिना ब्रह्मणोप्यधिकरणमस्ति न वेत्याशङ्क्य नाहमेवं ब्रवीमीति "[2]स होवाचान्योह्यन्यस्मिन्प्रतिष्ठित" इति भेदनिषेधेनात्मनः प्रतिष्ठितत्वनिषेधात् । अन्यथा विभुत्वादप्रतिष्ठित इत्येव च ब्रूयात् ॥

१ छान्दोग्योपनिषदि । ७ प्र० । २४ खं० । १ कं० ।

२ ह वे० याचेत्युपनिषत्सु पाठः । छान्दोग्योपनिषदि । ७ प्र० । २४ खं० । २ कं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न चाशुद्धचित्तसाक्षात्कारायोग्यत्वं तदर्थः। नान्यच्छृणोतीत्यादिवैयर्थ्यप्रसङ्गात्। त्रिशूलादि। चिन्हम्। ब्रह्मणो ऽपि तत्सत्त्वेन भेदिनां भूमवाक्यार्थनिर्णयाभावप्रसङ्गाच्चेति भावः। किञ्च भेदिमते स एवाधस्तादित्यादिवाक्यपर्यालोचनया विभुमात्रस्य भूमशब्दार्थत्वात्तदुद्देशेन सुखत्वविधाने ब्रह्मण एव सुखरूपत्वं त्वदिष्टं न सिद्धोदित्याह। भेदे चेति। विवक्षित इति शेषः। तस्मिन् भूमशब्दार्थे-विभुमात्रे च विवक्षिते सतीत्यर्थः। ननु निरङ्कुशैश्वर्य्यस्य भूमपदार्थत्वात्कालानिरुद्धादेश्च तदभावान्नोक्तदोष इत्याशङ्क्य तव मते सुखस्य गुणत्वान्नाभेदाभिधानमुपपद्यत इत्याह। सुखमितीति। न च गुणगुणिनोरभेदस्यापि विद्यमानत्वात्तदुपपत्तिरित्याशङ्क्याह। भेदाभेदस्य चेति। भेदविरुद्धस्याभेदस्य तत्सामानाधिकरण्यानुपपत्तिस्तदविरुद्धस्यत्यभेदे संज्ञायाः पारिभाषिकत्वात् भेदभ्रमनिवर्त्तकप्रमाविषयस्यैवाभेदपदार्थत्वात्तयोश्च नैकत्र सम्भव इति भावः। उत्तरवाक्यपर्यालोचनया ऽपि भेदापवादावगमादद्वैतं ब्रह्मैव भूमशब्दार्थ इत्याह। स भगव इत्यादिना-भगवः हे भगवन् स भूमा कस्मिन्प्रतिष्ठित इति सनत्कुमारम्प्रति नारदप्रश्ने तस्योत्तरं "'स्वेमहिम्नि'"इति, यद्वि तस्य कचित्प्रतिष्ठामिच्छसि तर्ह्यात्मीये माहात्म्ये विभूतौ प्रतिष्ठितो भूमा, यदिवा परमार्थमेव पृच्छसि तर्हि न महिम्नीति महिम्न्यपि न प्रतिष्ठित इति ब्रूमः। क्वचिदप्यनाश्रितो भूमेत्यर्थः।

१ छान्दोग्योपनिषद ७ प्र०। २४ खं०। १ मं०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(गोअश्वमिहेत्यादिछान्दो- कथंतर्ह्यप्रतिष्ठितस्य भूम्नः स्वेमहिम्यश्रुत्यर्थनिरूपणम् । टी० ।) म्नि प्रतिष्ठोक्तेत्याशङ्कायामाह सनत्कुमारः "गोअश्वमिह" इत्यादि, गवाश्वहस्तिहिरण्यदासभार्याक्षेत्रायतनादिसर्वत्र महिमेति प्रसिद्धम् । तद्वांश्चैत्रो यथा तत्र प्रतिष्ठितो भवति तथानाहमेतत् स्वभिन्नमहिमानमाश्रितो भूमेति ब्रवीमि किन्त्वन्यो ह्यन्यस्मिन्प्रतिष्ठित इति ब्रवीमीति सहो वा चेति सम्बन्धः । अन्यः खलु लोके ऽन्यस्मिन्प्रतिष्ठितो भवति भूम्नश्च यत्र नान्यत्पश्यतीत्यादिना द्वैतनिषेधपुरःसरमद्वैतसुखात्मतया लक्षितत्वात्तदन्यपदार्थाभावात् स्वेमहिम्नीत्युक्त्या निरधिकरणत्वमेवाभिप्रेतमिति श्रुत्यर्थः । विभुत्वस्य भूमत्वे ऽधिकरणप्रश्नोत्तरमन्यथैवस्यादित्याह । अन्यथेति ॥

ननु नियम्ये ऽपि प्रतिष्ठितपदप्रयोगादन्यनियम्यत्वविषयः प्रश्नः, उत्तरमपि तदभावपरमित्याशङ्कास्मिन्नपि पक्षे भेदनिषेधपुरःसरमप्रतिष्ठितत्वाभिधानादद्वैतं भूमशब्दार्थ इत्याह । न चेत्यादिना ।

न च बलवर्मेणि राज्यं प्रतिष्ठितमितिनियम्ये प्रतिष्ठितत्वश्रवणाद्ब्रह्मणोऽन्यनियम्यत्वमात्रं प्रतिषिध्यत इति वाच्यम् । अन्यो ह्यन्यस्मिन्प्रतिष्ठित इति काक्वा ऽन्योन्याभावमात्रस्यैव निषेधात् । उत्तरवाक्ये ऽप्यस्यैव प्रतिपादनाच्च । अतः सजातीयादिभेदशून्य एव भूमा स एव विज्ञेय इति गम्यते ।

१ छान्दोग्योपनिषद ७ प्र० । २४ खं० । २ मं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(भूम्नोऽनवच्छिन्नव-स्तुपरत्वम्)। यद्यपि भूमन् शब्दो भावप्रत्ययान्तो बहुत्ववाचकस्तथाप्यत्राल्पत्वनिवृत्तिलक्षणयानवच्छिन्नवस्तुपरः। अन्यथा तल्लक्षणानुपपत्तेः। तस्य सुखत्वामृतत्वानुपपत्तेश्च। न हि केनचिद्बहुत्वमेव सुखममृतं चेत्यङ्गीकृतं, प्रमाणसिद्धं वा। आत्मासुखमिति तु परमप्रेमास्पदतया "[1]आनन्दो ब्रह्म" इत्यादिश्रुत्या च प्रमित इत्यद्वैतब्रह्मप्रकरणे ऽस्मिन्नयमहङ्काराख्यो निरुद्धः स एवाधस्तादित्युपदिष्टभूमाख्यब्रह्मणस्तत्त्वान्तरं सन्नुपदिश्यते उत तदभिन्न एवाभिन्नप्रकारश्च ?

द्वितीयमात्रशब्दः कार्त्स्न्यवाची स चाधस्तादित्युत्तरवाक्यपर्यालोचनयाप्येवमेवेत्याह। उत्तरवाक्येऽपीति। ननु भूमशब्दस्य "[2]बहोर्लोपो भू च बहोः" इति सूत्रपर्यालोचनया भावार्थप्रत्ययान्तबहुशब्दप्रकृतिकत्वेन बहुत्वसंख्यावाचकत्वात् कथमद्वितीयवस्तुपरत्वमित्याशङ्क्य, बहुत्वसंख्यायाः प्रकृतवाक्यार्थान्वयानुपपत्तेर्लक्षणयाप्यन्ययोग्यवस्तुपरत्वं वक्तव्यमित्याह। यद्यपीत्यादिना। संख्यापरत्वे ऽनुपपत्तिं दर्शयति। अन्यथेति। यत्र नान्यत्प-

१ तैत्तिरीयोपनिषदि ३ प्र० । ६ खं० १ कं० ।
२ पाणिनीयसूत्रम् ६ अ० । ४ पा० । १५८ सू० ।

श्यतीति वाक्योक्ताद्वितीयत्वलक्षणस्य बहुत्वानुपपत्तेरित्यर्थः । किं च भूमपदार्थोद्देशेन सुखत्वामृतत्वाभिधानमप्यनुपपन्नं स्यादित्याह । तस्य सुखत्वेति । अनुपपत्तिमेव स्पष्टयति । न हीति । आत्मनोऽपि सुखरूपत्वं नाङ्गीकृतं, न च प्रामाणिकमित्याशङ्क्य कैश्चिदङ्गीकृतत्वादनुमानागमप्रमाणसिद्धत्वाच्च मैवमित्याह । आत्मासुखमिति त्विति । उक्तप्रकारेणाद्वैतवस्तुपरमेवेदं प्रकरणमित्युपसंहरति । इत्यद्वैतब्रह्मप्रकरण इति । सतिसप्तमी । एवं स्थिते यदुक्तं पूर्ववादिना ऽथातोहङ्कारादेश इत्यनिरुद्धादेश इति तद्विकल्प्य दूषयति । अस्मिन्नर्थमिति । अभिन्नप्रकारश्चेति । अभिन्नधर्म इत्यर्थः ॥

भूमानं भगवो विजिज्ञास इत्येतदुपरिष्टादहङ्कारं जिज्ञास इत्यदर्शनेन भूमन्येव जिज्ञासापर्यवसानादजिज्ञासितो ऽनिरुद्धो भिन्नतत्त्वतया न प्रतिपाद्य इत्याह । अजिज्ञासितस्येति ।

(भूमानिरुद्धयोरैक्ये वैकल्पिकदोषयोजनम् ।) नाद्यः, अजिज्ञासितस्य प्रोषिभूमोपदेष्टप्रतिकूलस्य च निर्देशानुपपत्तेः । प्रकरणसमवायायोगाच्च । न द्वितीयः, पृथङ्निर्देशवैयर्थ्यात् । न च भूम्नः सकाशादहङ्काराख्यानिरुद्धस्य भेदभ्रमनिवृत्त्यर्थं पृथगुपदेशः ? अलौकिके अविरुद्धे धर्मिणि प्रतियोगिनि च तथाविधे भूम्नि प्रत्यक्षादितो भेदभ-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मासम्भवात्। अस्तु वा यथाकथञ्चिद्भेदभ्रमस्तथापि नात्र नारायणानिरुद्धयोर्भेदभ्रमनिरासः सम्भवति। उपदेशभेदाद्भेदप्रतीतेः। न चास्मन्मत इवोपदेशभेदे ऽपि तुल्यलक्षणनिर्देशात्तन्निवृत्तिः। त्वदभिमतलक्षणस्य सर्वगतस्य भेदे ऽप्यविरोधात्। तदुभयोपस्थापकपदाभावाच्च॥

नन्वनुमानवाक्ये ऽजिज्ञासितस्य धूमादिलिङ्गस्योपदेशो दृष्ट इत्याशङ्क्य तस्य जिज्ञासितवन्हिप्रतिपत्त्यनुकूलत्वादुपदेशः, इह तु तत्त्वान्तरभूतस्यानिरुद्धस्याद्वितीयभूमप्रतिपत्तिविरुद्धत्वादनुपदेश इत्याह। शेषिभूमेति। वाक्यभेदश्च स्यादित्याह। प्रकरणेति। प्रकरणिनापेक्षितार्थपरत्वं प्रकरणसमवायस्तदयोगादित्यर्थः। अभिन्नो भिन्नधर्मश्चेति पक्षं दूषयति। न द्वितीय इति। ननु सिद्धान्ते यथा भूमात्मनोरभेदे ऽपि भेदभ्रमनिरासार्थं पृथगुपदेशो ऽर्थवानेवं भूमानिरुद्धयोरपि भेदभ्रमनिरासार्थं पृथगुपदेश इति नेत्याह। न च भूम्नः सकाशादिति। तत्र हेतुमाह। अलौकिक इति। धर्मिप्रतियोगिप्रत्यक्षताया भेदप्रत्यक्षताप्रयोजकत्वाद्धर्मिप्रतियोगिनोर्भूमानिरुद्धयोरतीन्द्रियत्वेनाप्रत्यक्षत्वात्तद्भेदो ऽपि न प्रत्यक्षः। नाप्यानुमानिकः। धर्मिग्राहकमानविरोधेनानुमानानुदयात्। तस्माद्भेदभ्रमासम्भवान्न तन्निवृत्त्यर्थं पृथगुपदेश इत्यर्थः। ननु स्मृतौ भूमाहङ्काराद्यपर्यायपदप्रयोगाद्भेदभ्रम इत्याशङ्क्याह। अस्तु वेति। अत्राप्यपर्यायशब्दैरेवोपदेशान्न भेदभ्रमनिवृत्तिरित्याह। तथा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पीति । उपदेशभेदात् । अपर्यायपदैरुपदेशादित्यर्थः । ननु यथा भूमात्मनोरुपदेशभेदे ऽपि तुल्यलक्षणत्वेन परस्परं प्रत्यभिज्ञायमानत्वाद्भेदभ्रमनिवृत्तिस्तवमत, एवं ममापीत्याशङ्क्यास्मन्मते सार्वात्म्यस्योभयलक्षणत्वाद्वस्तुतोऽभेदे तदसम्भवाद्भ्रमनिरासो युक्तस्तत्र विभुत्वस्यैव वाक्यार्थत्वेनाङ्गीकारात्तस्य च भेदे ऽप्युपपत्तेर्नैवमित्याह । न चास्मदिति । एवं श्रुतावहङ्कारशब्देनानिरुद्धोपस्थितिमङ्गीकृत्य दूषितमिदानीमङ्गीकारं त्यजति । तदुभयेति । नारायणानिरुद्धावुभयपदार्थौ ॥

ननु स्मृतौ भूमाहङ्कारात्मशब्दैर्नारायणानिरुद्धवासुदेवानामवगतत्वाच्छ्रुतावपि तच्छब्दैस्त एव प्रत्यभिज्ञायन्त इति चोदयति । ननु स्मृताविति ।

(नारायणानिरुद्धयोरभेदशङ्का ।) ननु स्मृतौ "अनिरुद्धो हि लोकेऽस्मिन्महानात्मा" इत्युपक्रम्य "सोऽहङ्कार इतिप्रोक्तः सर्वतेजोमयो हि स" इत्यनिरुद्धस्याहङ्कारत्वेन निर्देशात् । तथान्यत्रापि "भूमा नारायणाख्यः स्यात्स एवाहङ्कृतिः स्मृतः" "जीवस्यस्त्वनिरुद्धो यः सोहङ्कार इतीरितः" "अणुरूपोऽपि भगवान्वासुदेवः परो विभुः, आत्मेत्युक्त" इति स्मृतेश्च श्रुतौ पर्यायत्रयेण त एव निर्दिश्यन्त इति चेत् ?

(तन्निरासः) तन्नाहङ्कारशब्दसाम्ये ऽपि रूपभेदेना-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रत्यभिज्ञानतया श्रुतिस्मृत्योरेकार्थत्वाभावात् । स्मृतौ हि जीवस्यस्त्वनिरुद्ध इति परिच्छिन्नो ऽहङ्कारः प्रतीयते । श्रुतौ तु "[1]अहमेवेदं सर्वम्" इति सर्वात्मको ऽहङ्कारः । स्मार्तक्रमबाधादप्यात्मादेशो न स्मार्तवासुदेवस्यादेशः । न च स्मृतिमनुसृत्य सर्वात्मत्वश्रुतिपीडा युक्ता । अनाकाङ्क्षितत्वादपि नायं स्मार्तादेशः । अत्र हि "[2]स एवेदं सर्वम्" इति ब्रह्मणः सर्वात्मत्त्वमुपदिश्यते । न च तत्र भेदनिर्देशो ऽपेक्ष्यते । विरुद्धत्वात् । न च भेदानुवादेन तस्योपाधिकत्वमेवापेक्षितं प्रतिपाद्यत इति युक्तम् । उपाध्यनिर्देशात् । जीवस्तु तया सर्वात्मत्वश्रुत्यापेक्षितः ॥

यूनश्चैत्रस्य वृद्धचैत्रेण नामसाम्ये ऽपि यथा रूपभेदान्न प्रत्यभिज्ञा एवं श्रौतस्मार्तयोरपीति दूषयति । तत्राहङ्कारेति । रूपभेदमेव दर्शयति । स्मृतौ हीति । किं च सर्वस्मृतिषु वासुदेवस्य प्रथमपाठात्तृतीय आत्मादेशस्तद्विषयो न भवति । उदाहृतस्मृतिरपि श्रौतक्रमविरुद्धा भवतीत्याह । स्मार्तक्रमेति । अपिशब्देन रूपभेदः समुच्ची-

---

१ छान्दोग्योपनिषदि ५ प्र० । २ खं० । ६ कं० ।

२ छान्दोग्योपनिषदि । ७ प्र० । २५ खं० । १ कं०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यते। किं च स एवेदं सर्वमित्यादिना श्रूयमाणं सर्वात्मत्वं स्मार्तप्रसिद्ध्यनुसारेणान्यथा नेतुमशक्यम्। विरोधाधिकरणन्यायेन श्रुतिविरोधे स्मार्तस्यानपेक्षत्वादित्याह। न च स्मृतिमिति। एकवाक्यताप्रयोजकाकाङ्क्षायाः स्मार्तार्थे ऽभावान्न तन्निर्देश इत्याह। अनाकाङ्क्षितत्वादिति। अनाकाङ्क्षामेव प्रकटयति। अत्र हीति। ननु स एवेदं सर्वमिति भूम्नः स्वविभूत्यनिरुद्धाद्यात्मकत्वमेवोच्यते। तथा च भिन्नत्वेन प्रसिद्धानामेतेषां कथमेकत्वमिति वीक्षायां भेदानुवादेन तस्यैवौपाधिकत्वमाकाङ्क्षितमुत्तरवाक्ये निर्दिश्यत इत्याशङ्क्य इदं सर्वमिति सर्वनाम्ना प्रसिद्धमात्रपरामर्शान्मैवमित्याह। न च भेदेति। उपाधेरश्रवणाच्च नानिरुद्धभेदस्यौपाधिकत्वमेतदर्थं इत्याह। उपाध्यनिर्देशादिति। तव मते औपाधिकस्यापि परमार्थत्वान्न तत्राप्याकाङ्क्षेति भावः। सिद्धान्ते वा कथमाकाङ्क्षितपरत्वमस्येत्याशङ्क्याह। जीवस्त्विति। अपेक्षित इति। ब्रह्माभेदेनेति शेषः॥

ननु ब्रह्मणः सर्वात्मत्वश्रुत्यानन्तरं यथा घटाद्युपदेशो नापेक्षितः एवं जीवोपदेशोपीत्याशङ्क्य जडस्य ब्रह्मकार्यत्वेनारम्भणाधिकरणन्यायेन तदात्मकत्वमुपपन्नम्। जीवस्य त्वनादेस्तदकार्यस्य ततो भेदेन प्रसिद्धत्वात्सार्वात्म्यश्रुतिरनुपपन्ना स्यात्, तच्चायुक्तम्। तथा च जीवस्य तदभिन्नलक्षणतया तद्भेदस्यौपाधिकत्वापादनेन तदभेदो वक्तव्य इत्यपेक्षित एव जीवोपदेश इत्याह। अकार्यस्वरूपस्येति॥

(जीवस्य पृथगुपदेशाज्जीवब्रह्मभेदशङ्कानिरासः।)

अकार्यस्वरूपस्य प्रत्यक्षादिसिद्धभेदस्य तस्य ब्रह्मणो भेदे आत्यन्तिक

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एव भेदः स्यादिति ब्रह्मणः सार्वात्म्यश्रुतिरुन्मत्तप्रलापवत्स्यात्, तच्चायुक्तम् । तुल्यसम्प्रदायत्वादिति जीवस्य ब्रह्माभेदं सार्वात्म्यश्रुतिरपेक्ष्यत इति स एव तत्तुल्यलक्षणतयाऽहङ्कारादेश इत्यत्र निर्दिश्यते । अतस्तस्याकाङ्क्षितार्थपरत्वं सिध्यति। आत्मादेश इत्यनेनैव तद्ग्रहणसिद्धौ किमहङ्कारादेशेनेति चेत् न? आत्माह्यहम्प्रत्यविषयः कर्ता भोक्तेति लौकिकैर्निश्चीयत इति तत्रैव प्रथममात्मशब्दाद्बुद्धिः स्यात् । तयोश्च विरुद्धत्वान्नाभेदमवगमयितुं शक्नोति । शक्नोति त्वहं पदार्थं पृथङ्निर्दिश्य ततो ऽन्य एवात्मेति प्रतिपादिते जीवपराभेदं प्रतिपादयितुमिति सार्वात्म्यश्रुत्यपेक्षयैवाहमात्मानमादौ निर्दिशति ॥

तुल्येति। वाक्यान्तरसमाननियमाध्ययनवत्त्वादित्यर्थः । स्वमते अपेक्षितपरत्वमुपसंहरति । इति जीवस्येति । एवं तर्ह्यात्मादेशादेवापेक्षितार्थसिद्धेर्मध्ये ऽहङ्कारादेशो व्यर्थः स्यादिति शङ्कते । आत्मादेश इतीति । पूर्वमात्मोपदेशे प्राकृतानामात्मशब्दाद्दुःखादिधर्मिण एव बुद्धिः स्यात्तस्य चाभेदायोग्यत्वाच्छ्रुतिरपेक्षितार्थबोधनसमर्था न स्यात् । अहमर्थोपदेशे तु तस्य परिच्छिन्नत्वादनात्मत्वशङ्कायामनन्तरं केवलात्मोपदेशे ऽहन्त्वसमानाधिकरणकर्तृत्वादिकं नात्मधर्म इति निश्चयो भवति । ततश्च जीवे-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्वराभेदबोधनं सुकरमित्यभिप्रेत्यादावहङ्कारादेश इत्याह । न आत्माह्यहमिति ॥

एवमप्यहमर्थोपदेशानुपपत्तिं शङ्कते । नन्वहङ्कारस्येति ।

(पुनरपि जीवोपदेशानुपपत्तिस्तन्निरासश्च ।)

नन्वहङ्कारस्य तदवच्छिन्नचैतन्यस्य वा ऽऽत्मनो भिन्नत्वादसर्वगतत्वाच्च कथं सर्वगतत्वं सर्वात्मत्वं चेति चेत् न? असौ ह्यहङ्कारशब्दो ऽहमिति कृतिः करणं यस्मिन्नित्यवयववृत्त्यान्तःकरणावच्छिन्नं चैतन्यमभिधत्ते। समुदायशक्तेर्लोके क्वचिदप्यक्लृप्तत्वात्। स्मार्तप्रसिद्धेश्च पौरुषेयतया अपौरुषेयवेदार्थाव्यवस्थापकत्वात्। तथात्वे वा शोकहर्षभयक्रोधलोभमोहस्पृहादयो ऽहङ्कारस्य दृश्यन्ते इत्यादिस्मृतावन्तःकरणावच्छिन्नजीवे एव तत्प्रयोगाच्च। शोकादेः कृतेश्च केवलजडधर्मत्वानुपपत्तेरित्युभयथाप्यन्तःकरणावच्छिन्नचैतन्यमेवाहङ्कारपदार्थः सार्वात्म्यश्रुत्यपेक्षितः प्रकृते ग्राह्यः। तथा च तत्रोपाधिपरिच्छेदात्परिच्छिन्ने तद्भिन्ने च तस्मिन् सर्वगतसर्वात्मब्रह्माभेदप्रतीतिर्न भवतीति दहरपुण्डरीकवेष्टितस्य परमात्मनो "[1]यावा-

१ छान्दोग्योपनिषद् । ८ प्र० । १ खं० । ३ मं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वा अयमकाशस्तावानेषोऽन्तर्हृदय आकाश" इत्युपाधिकृतात्मत्वनिवृत्तिपराकाशोपमोपदेशवदहमर्थस्याप्युपाधिकृतपरिच्छिन्नत्वनिवृत्त्यावास्तवसर्वात्मत्वादिपरा श्रुतिर्न विरुध्यते। एवं चापेक्षिताहमर्थविषयत्वादहङ्कारादेशस्य न तद्विरुद्धस्मार्तार्थपरत्वं कल्प्यम् ॥

दुःखादिधर्मिणस्तदवच्छिन्नस्य वा ऽहमर्थस्य परिच्छिन्नत्वाच्छिन्नत्वाच्चाहमेवाधस्तादित्यादिनोच्यमानं सर्वगतत्वमहमेवेदं सर्वमिति सर्वात्मत्वं चानुपपन्नमित्यर्थः। अनित्यो घट इत्युक्ते यथा घटपदार्थैकदेशव्यक्तेरेवानित्यत्वान्वय एवमहमर्थैकदेशचिदात्मन एव सर्वगतत्वं सर्वात्मत्वं नानुपपन्नमित्यभिप्रायोऽयमुपदेश इति वक्तुमहङ्कारशब्दस्य शबले व्युत्पत्तिं दर्शयति। न असौ अहङ्कारेति। व्यापारः करणशब्दार्थो यस्मिन्नित्यधिकरणसप्तमी। अन्तःकरणावच्छिन्नमिति। केवलस्य जडस्याविकारिचैतन्यस्य वा ज्ञानव्यापारायोगादिति वक्ष्यति। ननु स्मृतावनिरूढ रूढ इत्याशङ्क्याह। स्मार्तेनेति। स्मार्तप्रसिद्धेनियामकत्वमङ्गीकृत्याहमर्थे ऽपि सास्तीत्याह। तथात्वे वेति। जन्ममृत्युश्च नात्मन इति श्लोकशेषः। तत्प्रयोगादिति। अहङ्कारपदप्रयोगादित्यर्थः। कृतेश्चेति। अहमिति कृतिकरणमित्युक्तकृतेरित्यर्थः। व्युत्पत्तिबलात् स्मार्तप्रसिद्धिबलाच्च चिदचिदचिद्ग्रन्थिरेवाहङ्कारशब्दार्थ इत्याह। इत्युभयथापीति। ननु स्मार्तप्रसिद्धेरन्यत्रापि सत्त्वादतः कथं जीवस्यैव परिग्रहस्तत्राह। सार्वात्म्यश्रुत्यपेक्षित

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति। एवं शबलेव्युत्पत्तिं प्रदर्श्य तस्य सर्वगतत्वादिसङ्कीर्तनस्याभिप्रायमाह । तथा चेति । तत्रेति । अहङ्कारादेशवाक्यार्थस्तस्मिन्नहमर्थे उपाध्यवच्छिन्नचैतन्यस्य परिच्छेदादेरवास्तवत्वसिद्धये सर्वगतत्वादिसङ्कीर्तनमिति सदृष्टान्तमाह । दहरपुण्डरीकेति । "[1]ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाश" इति हृदयपुण्डरीकावच्छिन्नस्य परमात्मनो दहरत्वस्य परिच्छिन्नत्वस्य प्रतीतेस्तद्व्यावृत्तये यावान्वायमाकाश इत्युपमोपादीयते। अयं बाह्याकाशो यावान् तावानन्तर्हृदय आकाश इति पुण्डरीकसम्बन्धप्राप्तं दहरत्वं व्यावर्त्यते न त्वाकाशसाम्यं ततो ऽपि महत्त्वाद्ब्रह्मणः, एवमत्राप्यवच्छिन्नचैतन्यस्य परिच्छेदादि व्यावर्त्यते सर्वगतत्वादिसङ्कीर्तनमुत्तरवाक्ये तु ब्रह्मसमानस्वभावतया तदैक्यमुच्यत इति श्लिष्टतरमिति भावः । स्मार्तार्थस्य सर्वात्मत्वश्रुतिविरुद्धतयेह न परिग्रह इत्युपसंहरति । एवं चेति । किं चाहमर्थे ऽवयववृत्तेरुभयवादिसम्प्रतिपन्नत्वादर्थान्तरे च लोकवेदाप्रसिद्धतया रूढेः कल्प्यत्वात् स्मार्तप्रयोगस्याहङ्काराधिष्ठातर्यनिरूढलक्षणयाप्युपपत्तेरिह न तस्य वार्तापीति भावः ॥

पूर्ववादिना सार्वात्म्यश्रुतेरन्यपरत्वमुक्तमनुवदति दूषयितुम् । यच्चोक्तमिति ॥

(सार्वात्म्यश्रुतेरन्यपरत्वखण्डनम् ।)

यच्चोक्तमस्मिन्वाक्ये न ब्रह्मणः सर्वात्मत्वं प्रतिपिपादयिषितं, किं तु स एवाधस्तादित्युपक्रमानुरोधेन सर्वगतत्वमेव तच्च भेदे ऽपि न विरुद्धमिति । तदसत् । अत्र

१ छान्दोग्योपनिषदि ८ प्र० । १ खं० । १ छं० ।

हि सावधारणैः सप्तभिर्वाक्यैर्भूम्नः सर्वात्मत्वमेव प्रतीयते न तु सर्वगतत्वम् । एवकारासामञ्जस्य-प्रसङ्गात् । सामानाधिकरण्यश्रुतेर्लोके तादात्म्ये प्रसिद्धत्वादुपक्रमस्याव्यवस्थितत्वाच्च । श्रुत्यन्तरे च “इदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीदं सर्वं यदयमात्मा”इति स्पष्टं सर्वात्मत्वप्रतिपादनात् । सर्वगतत्वमात्रपरत्वेऽपि स एवाधस्तादहमेवाधस्तादात्मैवाधस्ता-दिति प्रतिपर्यायमवधारणाच्च जीवपरभेदः प्र-त्येतुं शक्यते । तस्मादहङ्कारादेशोऽपि निष्कृष्टा-हङ्कारचैतन्यमात्रस्यादेश इति श्लिष्टतरम् ॥

स एवाधस्तात्स एवेदं सर्वमित्याद्यन्तवाक्ययोः श्रूयमाणमवधारणं सन्दंशन्यायेन मध्यस्थवाक्येष्वप्यनु-षज्यते । तथा च कञ्चनपदार्थमवधिं कृत्वा तस्याधश्चोर्ध्वं च चतुर्दिक्षु च यत्किञ्चिदस्ति तत्सर्वं स एवेति षड्भिर्वाक्यैः प्रतीयते स एवेदं सर्वमित्यवधिभूतपदार्थात्मकत्वम् । वि-भुत्वपक्षे तु अन्यनिषेधकाम्यस्य मानावधारणश्रुतिपीडा-स्यादित्याह । तदसदिति । यच्चोक्तं वेदोपक्रमाधिकरणन्या-येनोपक्रमानुरोधेनोपसंहारो नेतव्य इति । तदयुक्तम् । तत्र हि निर्णीतोपक्रमस्यैवोपसंहारनियामकत्वं व्युत्पादितमि-ह तु साधारणोपक्रमे विभुत्वानिर्णयान्नायमुपसंहारनिया-

१ बृहदारण्यकोपनिषदि २ प्र० । ४ ब्रा० । ६ कं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मक इत्याह । उपक्रमस्येति । किं चात्मनः श्रुत्यन्तरेषु स्पष्टं सर्वात्मत्वप्रतिपादनाद्गतिसामान्यन्यायेन सार्वात्म्यश्रुतिर्नान्यपरेत्याह । श्रुत्यन्तरे चेति । इदं ब्रह्म प्रसिद्धब्राह्मणजातिः, क्षत्रं क्षत्रियजातिः, लोका भूरादयः, भूतानि पृथिव्यादीनि, किं बहुना यदिदं सर्वं तदयमात्मेति निरङ्कुशं सर्वात्मत्वश्रवणादित्यर्थः । सार्वात्म्यश्रुतेः सर्वगतत्वाभिप्राये ऽपि जीवेशभेदो न सिद्ध्यतीत्याह । सर्वगतत्वमात्रेति । विशेष्यगतैवकारस्यान्ययोगव्यवच्छेदार्थत्वात् पर्यायत्रयस्याप्येकार्थ्यमित्यर्थः । स्वमतमुपसंहरति । तस्मादिति । निष्कृष्टेति । निष्कृष्टः पृथक्कृतो ऽहङ्कारो यस्मात्तन्निष्कृष्टाहङ्कारं तच्च चैतन्यं च तथोक्तम् ॥

ब्रह्माहङ्कारभेदप्रसिद्धेस्तयोरभेदार्थः पृथगुपदेशः स्यादिति यदुक्तं तद्दूषयति । एतेनेति ॥

(पृथगुपदेशो ब्रह्माहङ्कारयोर्नैक्यबोधकः) एतेन यद्वैपरीत्यमापादितं तन्निरस्तम् । अध्यस्तोपाधिकल्पितस्याहमात्मनो वास्तवब्रह्माभेदानुपपत्तेः । यदप्युक्तमहङ्कारातिरिक्तस्यात्मनो न ब्रह्मभेदः प्रतीयते तदुपदेशो भेदार्थ इति, तन्नात्मनो ब्रह्मभेदे सार्वात्म्यानुपपत्तेरुक्तत्वात् । अहमिति प्रत्ययस्य चिदचिदुभयविषयताया वक्ष्यमाणत्वेन तत्प्रत्याय्यभेदस्याप्युभयधर्मिकत्वादात्मनो ब्रह्मभेदाप्रतीत्यसिद्धेश्चेति । तथा तैत्तिरीयके

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"[1]ब्रह्मविदाप्नोतिपरम्"इत्युपक्रम्य "[2]यो वेद निहितं गुहायाम्"इति तस्य बुद्ध्यनुप्रवेशेन प्रत्यक्त्वमुक्त्वा तं प्रत्यगात्मानं स्थूलसूक्ष्मतरसूक्ष्मतमोपाधिविवेकेन दर्शयन्ती श्रुतिः पञ्चकोशानवतार्य "[3]विज्ञानं यज्ञं तनुते, कर्माणि तनुतेति च"इति श्लोकेन विज्ञानमयस्याहंबुद्धिविषयस्य निखिलकर्मकर्तृत्वमुक्त्वा ततो ऽन्यत् स्वरूपं तस्य रूपान्तराभिप्रायेणाह "[4]अन्यो ऽन्तरात्मानन्दमय"इति। अतो न कर्ताहमनुभवगोचर एव जीवः॥

अध्यस्तोपाधिरविद्या तत्कल्पितस्येत्यर्थः। यद्यप्यनधिगत एव वाक्यार्थस्तथापि स श्रुत्यन्तराविरुद्ध एव ग्राह्य इत्यभिप्रेत्याह। तत्रात्मन इति। ब्रह्मात्मभेदस्यानधिगतत्वमपि नास्तीत्याह। अहमिति प्रत्ययस्येति। यथा शुक्तिं रजततया गृहीतवदिदं रजतं शुक्तिर्नेति बुद्धिरधिष्ठानस्यापि शुक्तिप्रतियोगिकभेदं गृह्णाति। एवं ब्रह्मस्वभावमात्मानं चिकार्य्यहङ्कारात्मतया गृहीतवतो ऽहं ब्रह्म न भवामीति बुद्धिरधिष्ठानात्मनो ऽपि ततो भेदं गृह्णातीत्यर्थः। तैत्तिरीयकश्रुतिपर्यालोचनयाप्यहङ्कारा-

---

१ तैत्तिरीयोपनिषद्यानन्दवल्ल्याम् १ अनु०।
२ तैत्तिरीयोपनिषद्यानन्दवल्ल्याम् ५ अनु०।
३ तैत्तिरीयोपनिषद्यानन्दवल्ल्याम् ५ अनु०।
४ तैत्तिरीयकोपनिषद्यानन्दवल्ल्याम् ५ अनु०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्मभेदसिद्धिरित्याह। तथा तैत्तिरीयक इति। प्रत्यक्त्वमुक्त्वेति। अहम्प्रत्ययप्रकाशमानत्वमुक्त्वेत्यर्थः। अहम्प्रत्यये प्रकाशमानत्वस्य देहादिसाधारणत्वात्ततो विवेकार्थं पञ्चकोशावतरणमित्याह। तं प्रत्यगात्मानमिति। पञ्चकोशानवतार्य दर्शयन्ति दर्शयिष्यन्तीति योजना। अतः कर्त्तुरहङ्कारादन्यत्स्वरूपं तस्य जीवस्य रूपान्तराभिप्रायेणाविद्योपाधिकरूपाभिप्रायेणेत्यर्थः। फलितमाह। अत इति। अन्यस्यानन्दमयस्य ब्रह्मत्वात्।

कर्त्ता विज्ञानमय एव जीव इति शङ्कते। नन्वानन्दमय इति।

(विज्ञानमयस्य जीवस्य कर्तृत्वे आक्षेपपरिहारौ) नन्वानन्दमयो न जीवः, किं तु ब्रह्मैव, अन्नमयादेरिवानन्दमये पर्यवसानादन्यस्यानिर्देशात्। आनन्दमयस्यैव प्रकरणित्वादिति चेत्? न ह्येदं प्रकरणमानन्दमये पर्यवसितम्। उपक्रमोपसंहारपरामर्शेष्वानन्दमयस्याप्रतीतेः। न च "[1]रसं ह्येवायं लब्ध्वा ऽऽनन्दी भवति" "[2]यदेष आकाश आनन्दो न स्यात्" इत्युपक्रान्तस्यानन्दमयस्य परामर्शोऽस्तीति वाच्यम्। आनन्दप्रकृत्यर्थस्यैवाभ्यस्यमानत्वात्। लक्षणायाश्चान्याय्यत्वात्। उपक्रमे ह्यानन्दमयशब्द-

१ तैत्तिरीयोपनिषदि २ प्र. । ६ खं. । १ कं. ।
२ तैत्तिरीयोपनिषदि २ प्र. । ७ खं. । १ कं. ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यादन्नमयादिविकारप्रायपाठेन विकारवाचिनो ब्रह्मणि वर्त्तितुमनर्हत्वात्। आनन्दप्रकृत्यर्थैकरसे ब्रह्मणि प्राचुर्यवाचिनोऽपि मयटः प्रयोगानुपपत्तेः। न हि सैन्धवघने सैन्धवमय इति प्रयोगः सङ्गच्छते। प्रकृत्यर्थविरोधिनो मात्रयाऽनुवृत्तावेव प्राचुर्यार्थमयटः प्रयोगदर्शनात्। यथा ब्राह्मणमयो ग्राम इति। तथा च यदि ब्रह्मानन्दमयः स्यात् तर्हि दुःख्यपि स्यात्, न च परस्मिन्दुःखानुवृत्तिरुपपद्यते॥

ब्रह्मविदाप्नोति परमित्युपक्रान्तब्रह्मण एव प्रकरणित्वात्तत्पर्यवसायित्वादेतस्य प्रकरणस्यानन्दमये च पर्यवसितत्वात्स एव ब्रह्मेत्यर्थः। आनन्दमयस्य प्रकरणित्वमसिद्धं तज्ज्ञापकाभावात्, किं त्वनन्तरनिर्दिष्टपुच्छब्रह्मैव प्रकरणि तस्यैवोपक्रम्यमाणत्वादानन्दमयस्य प्रकरणित्वमाशङ्क्याह। न च रसमिति। उपक्रान्तस्येति। "[1]अथोऽन्तर आत्मानन्दमय" इत्युपक्रान्तस्येत्यर्थः। आनन्दपदेन आनन्दमयस्याप्रतीतेर्न तस्याभ्यास इत्याह। आनन्दप्रकृत्यर्थस्येति। मुख्यतः प्रतीत्यभावेऽपि लक्षणया प्रतीभागत्यागलक्षणाङ्गीकारेण मुख्यार्थैकदेशग्रहणान्न श्रुतित्वहानिः। यथा "[2]एतस्यैव रेवतीषु वारवन्तीयमि"ति वार्पदात्तच्छन्दस्य प्रकृतधर्मविशिष्टधर्मिवाचकस्य धर्म-

१ तैत्तिरीयोपनिषदि २ प्र०। ५ खं०। १ कं०।
२ अधिकरणन्यायमालायाम् २ अ.। २ पा०। १२ अधि०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मात्रलक्षकत्वे ऽपि न श्रुतिस्वहानिः । तव तु मयडर्थस्यानन्दस्य लक्ष्यत्वाच्छ्रुतिहानिरिति भावः । आनन्दमयशब्देन ब्रह्मोपक्रमोऽप्यसिद्ध इत्याह । उपक्रमे ऽपीति । विकारप्रायपाठेनेति । विकारार्थमयडन्तानेकपदैः सहपाठेनेत्यर्थः । नन्वस्य मयटः प्रकृत्यर्थप्राचुर्यवाचित्वाद्ब्रह्मपरत्वमित्याशङ्क्याह । आनन्दप्रकृत्यर्थेति । सैन्धवघनो लवणपिण्डः । कुत्र तर्हि प्राचुर्यार्थमयट्प्रयोग इत्यत आह । प्रकृत्यर्थविरोधिन इति । मात्रया लेशेनेत्यर्थः । प्रकृत्यर्थविरोधिनो ऽपि ब्रह्मण्यनुवृत्तिरस्त्वित्याशङ्क्य दुःखस्यैवानन्दविरोधित्वात्तस्य च पापफलत्वाद्ब्रह्मण्यनुपपत्तिरित्यभिप्रेत्याह । तथा च यदीति ।

निरवयत्वश्रुतिविरोधाद्ब्रह्मणि दुःखापादनमयुक्तमित्युक्ताभिप्रायानभिज्ञः शङ्कते । नन्विति ॥

ननु परस्मिन्नागमविरोधेन दुःखापादनमयुक्तमिति चेन्न । आपादने प्रमाणविरोधस्यालङ्कारत्वात् । न च वयं परस्मिन्नापादयामो दुःखं किन्तु आनन्दमयो ब्रह्म जीवो वेति संशयदशायां न्यायानुगृहीतश्रुत्यर्थो ग्राह्यो न तु न्यायातिक्रम इति ब्रूमः । न चाल्पत्वनिवृत्तिलक्षणयानन्दमयशब्दः परमात्मनीति वाच्यम् । मनुष्यानन्दादेरुत्तरोत्तरशतगुणाधिक्यप्रतिपादनेनैव ब्रह्मानन्दे तत्सिद्धेः । जीवे मुख्यार्थे संभवति लक्षणायोगाच्च । ननु जीवो ऽपि दुःख-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रचुरो ऽन्नादिष्वेति नानन्दमय इति चेत् । न अविद्यायामानन्दात्मकब्रह्मप्रतिबिम्बस्य ब्रह्माधीनाग्निमत्तणसत्ताकतया तद्विकारत्वात् । किं चानन्दमयस्य ब्रह्मत्वे "[1]ब्रह्मपुच्छं प्रतिष्ठा" इति निर्दिष्टब्रह्मपुच्छत्वं तस्यानुपपन्नम् । न ह्येकमेव पुच्छं पुच्छवच्च भवति । तस्मात्प्रतिष्ठापदसन्निधानादाधारलक्षणया सर्वाधारो ब्रह्मैव ब्रह्मपुच्छं प्रतिष्ठेति वाक्यार्थः । तदेव ब्रह्म प्रकरणे "[2]ब्रह्मविदाप्नोति परम्" इत्युपक्रमे "[3]असन्नेव स भवति" "[4]असद्ब्रह्मेति वेद चेत्" इत्यादिपरामर्शादौ च तस्यैव प्रतीतेः । अत आनन्दमयः कर्त्तुरहमनुभवगोचरादन्यो जीव एव ।

आपादनस्य तर्कतया प्रमाणविरोधो ऽनुकूल एवेत्याह । न आपादन इति । किं च ब्रह्मणो निर्दुःखत्वायैवानन्दमयशब्दार्थत्वं त्याज्यमित्येव ब्रूम इति स्वाभिप्रायमाह । न च वयमिति । न तु न्यायातिक्रम इति । न्यायस्यातिक्रमो यस्मिन् सो ऽर्थो न गृह्यत इत्यर्थः । ननु भूमशब्दवदानन्दमयशब्दो ऽप्यल्पत्वनिवृत्तिलक्षणया ब्रह्म-

---

१ तैत्तिरीयोपनिषदि २ प्र० । ८ खं० । १ कं० ।
२ तैत्तिरीयोपनिषदि २ प्र० । ५ खं० । १ कं० ।
३ तैत्तिरीयोपनिषदि २ प्र० । ६ खं० । १ कं० ।
४ तैत्तिरीयोपनिषदि २ प्र० । ६ खं० । १ कं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

णि वत्स्यतीत्याशङ्क्यते । "'ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्द" इत्यादिवाक्यैरेव तत्सिद्धेर्मैवमित्याह । न चाल्पत्वेति । किञ्च भूमपदस्य मुख्यार्थासम्भवाद्युक्ता लक्षणा प्रकृते नैवमित्याह । जीव इति । जीवे ऽपि प्राचुर्यार्थस्य विकारार्थस्य वा मयटो नुपपत्तिरिति चोदयति । ननु जीवो ऽपीति । विकारप्रायपाठादानन्दमयशब्दो ऽपि जीवे प्रयुज्यमानो विकारार्थ एव जीवस्याप्यानन्दात्मकब्रह्मप्रतिबिम्बतया तदधीनाग्रिमक्षणसत्ताकत्वेन तद्विकारत्वात् घटादेरपि मृदधीनसत्ताकतया मृद्विकारत्वादित्यभिप्रेत्य परिहरति । न अविद्यायामिति । एवं स्वमते दोषं परिहृत्य परमते दोषान्तरमाह । किं चेति । निर्दिष्टब्रह्मपुच्छत्वमिति बहुव्रीहिः । आनन्दमयशब्दस्य जीवविषयत्वात् पुच्छवाक्यमेव ब्रह्मविषयमित्युपसंहरति तस्मादिति । यद्यपि मतद्वये ऽपि पुच्छपदे लक्षणा तुल्या तथापि प्रतिष्ठापदसन्निधानादाधारलक्षणैवेत्याह । प्रतिष्ठेति । तथा च सर्वाधारभूतं ब्रह्म आनन्दमयस्य प्रतिष्ठापर्य्यवसितं रूपमिति ब्रह्मैवोच्यत इत्यर्थः । आनन्दमयस्य जीवत्वप्रसाधनफलमाह । अत इति ॥

इदानीमानन्दमयस्य स्वशब्देनाभ्यासाभावे ऽपि ब्रह्मशब्देनाभ्यस्यमानत्वात् प्रकरणित्वमित्यश्रुतमीमांसावृत्तान्तस्य वादिनो मतमुत्थापयति । यत्त्विति ॥

(जयतीर्थमतोत्थापनम् ।) यत्त्वत्र जयतीर्थेनोक्तमानन्दमयो ब्रह्मैव । असन्नेव स भवति असद्ब्रह्मेति वेद चेदित्यादिनानन्दमयब्रह्मशब्दाभ्यासा-

१ तैत्तिरीयोपनिषदि २ प० । ८ खं० । १ कं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्प्राचुर्ये ऽपि मयट्प्रयोगात् । यथाश्रुताभिधाने च ब्रह्मण्यनानन्दस्यापि प्राप्तिः । प्रचुरानन्द इति विपरीतसमासेन पूर्णानन्द इति प्रतीतेः । अन्नमयादिपर्यायेष्वपि ब्रह्मण एव निर्देशादाकाशादिकारणत्वेनोक्तस्य तस्यैवान्नमयत्वादिपस्वरूपप्रतिपादनात् । "[1]ये ऽन्नं ब्रह्मोपासते" "[2]प्राणं ब्रह्मोपासते" "[3]आनन्दं ब्रह्मणो विद्वान्" "[4]विज्ञानं ब्रह्म चेद्वेद" "[5]अस्ति ब्रह्मेति चेद्वेद" इत्यन्नमयादीन् प्रत्युदाहृतश्लोकेषु तद्विषयत्वेन ब्रह्मशब्दश्रवणादिति ॥

(जयतीर्थमतखण्डनम् ।) तदसत् । अभ्यासस्य पुच्छब्रह्मविषयत्वेनानन्दमयाविषयत्वात् । न हि तदनभिधायकेन शब्देन तदभ्यासो ऽस्ति । न चानन्दमयप्रकरणे श्रुतं ब्रह्मपदं तस्यैव वाचकमिति वाच्यम् । किमानन्दमयस्य प्रकरणित्वमभ्याससामर्थ्यात् किं वान्यतः । नाद्यः, परस्पराश्रयत्वप्रसङ्गात् । ब्रह्मपदेनानन्दमयस्य कल्प्योप-

१ तैत्तिरीयोपनिषदि २ प्र० । ५ खं० । १ कं० ।
२ तैत्तिरीयोपनिषदि २ प्र० । १ खं० । १ कं० ।
३ तैत्तिरीयोपनिषदि २ प्र० । ६ खं० । १ कं० ।
४ तैत्तिरीयोपनिषदि २ प्र० । ६ खं० । १ कं० ।
५ तैत्तिरीयोपनिषदि २ प्र० । ३ खं० । १ कं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्थितिकत्वात् । न द्वितीयः, अभ्यासादिति सौत्रहेतुवैयर्थ्यापातात् । न चानन्दमयस्य "[1]ब्रह्मविदाप्नोति परमि"त्युपक्रमे "[2]सत्यं ज्ञानमनन्तं ब्रह्मे"ति मन्त्र "[3]आत्मन आकाश" इत्यादिब्राह्मणे स्वशब्देनापरामृष्टस्य प्रकरणित्वं मान्त्रवर्णिकत्वं वा कल्पयितुं शक्यते ।

प्राचुर्यार्थत्वे उक्तानुपपत्तिमुद्भाव्य परिहरति । यथा श्रुतेति । प्रायपाठपरित्यागो ऽपि नास्तीत्याह । अन्नमयादीति । न चान्नमयादिवाक्ये ब्रह्मोपस्थापकपदाभावात्कथं तन्निर्देश इत्याशङ्क्य "[4]स वा एष पुरुष" इत्यादितच्छब्देन प्रकृतब्रह्मण एव ग्रहणादस्ति तदुपस्थितिरित्याह । आकाशादीति । अन्नमयादिषु ब्रह्मशब्दप्रयोगादपि तेषां ब्रह्मरूपत्वमित्याह । ये ऽन्नं ब्रह्मेति । असद्ब्रह्मेति वेद चेदित्यादि ब्रह्मशब्दाभ्यासस्यान्यविषयत्वादानन्दमयस्याभ्यस्यमानत्वमसिद्धमिति दूषयति । तदसदिति । ननु तस्यैवायमभ्यास इति नेत्याह । न हीति । आनन्दमयप्रकरणे श्रुतस्य तदनभिधायकत्वमयुक्तमित्यत आह । न चेति । तत्र हेतुं विकल्पमुखेन दर्शयति । किमानन्दमयस्येति । प्रसङ्गमेवोपपादयति । ब्रह्मपदेनेति । ब्रह्मपदेन प्रकरणित्वादानन्दमयाकारप्रतीतेः कल्प्यत्वादित्यर्थः । द्वितीये तव "[5]आनन्दमयो ऽभ्यासात्" इति

१ तैत्तिरीयोपनिषदि २ प्र० । २ ख० । १ कं० ।
२ तैत्तिरीयोपनिषदि २ प्र० । १ खं० । १ कं० ।
३ तैत्तिरीयोपनिषदि २ प्र० १ ख० । १ कं० ।
४ तैत्तिरीयोपनिषदि २ प्र० ८ खं० । १ कं० ।
५ ब्रह्मसूत्रम्–१ अ० । १ पा० । १२ सू० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सूत्रासामञ्जस्यं स्यादित्याह । न द्वितीय इति । अन्यतोऽपि प्रकरणित्वं दुःसम्पादमित्याह । न चानन्दमयस्येति । मान्त्रवर्णिकत्वं वेति । मन्त्रवर्णप्रमितस्यैव ब्राह्मणवाक्ये प्रतिपाद्यमानत्वान्मन्त्रवर्णिकत्वेनापि प्रकरणित्वं सिध्यति तदपीह नास्तीत्यर्थः ।

ब्रह्मणि दुःखाभावार्थं विपरीतसमास इत्युक्तमनूद्य दूषयति । यत्त्वित्यादिना ।

(श्रुतौ प्राचुर्यपदाप्रयोगः) यत्तु प्रचुरानन्द इति विपरीतसमास इति । तदसत् । श्रुतौ प्रचुरपदाभावात् । मयट्प्रत्ययस्य प्रकृत्या समासासम्भवात् । आनन्दमयस्य ब्रह्मत्वे तस्यैव तदवयवत्वानुपपत्तिः । न चैकत्वेन ब्रह्मण्यवयवावयवित्वनिराकरणमनुपपन्नं, तस्य तर्कागोचरत्वात् । अनवयवत्वप्रकरणाभावाच्चेति वाच्यम् । विचारानारम्भप्रसङ्गात् । ब्रह्मानवयवमात्मत्वाज्जीववत् "[1]अकायमव्रणम्" "[2]निष्कलं निष्क्रियं शान्तम्" "[3]अपाणिपाद" इत्याद्यनुमानश्रुतिभिरनवयवत्वप्रमितेश्च । न चेश्वरशक्त्याऽवयविनोऽप्यवयवत्वमविरुद्धं तस्याचिन्त्यप्रभावत्वादिति

१ ईशावास्योपनिषदि ८ कं० ।
२ श्वेताश्वतरोपनिषदि ६ अध्या० । १९ कं० ।
३ श्वेताश्वतरोपनिषदि ३ अध्या० १९ कं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

साधु । ईश्वरशक्तेरपि शक्यस्वभावानुरोधाद-शक्त्यभावात् ।

(अवयवित्वखण्डनम्) किं चेदमवयवित्वम् । न तावद-वयवारब्धद्रव्यत्वम् । आनन्दमयस्य ब्रह्मणो ऽनारब्धत्वात् । अत एव न स्वावयवविशिष्टत्व-मपि । अन्यावयववैशिष्ट्ये चावयवब्रह्मण आन न्दमयादन्यत्वेन तदेकत्वं न स्यात् । आनन्द-मयो वा ब्रह्म न स्यात् । पुच्छं तु ब्रह्मैव, स्वश-ब्दात् । न च शरीरित्वमवयवित्वम् । अशरी-रश्रुतिविरोधात् । तस्य निरसिष्यमाणत्वाच्च ॥

प्राचुर्य्यवाचकमयट्प्रत्ययोस्तीत्याशङ्क्य समर्थः पद-विधिरिति पदाधिकारात्केवलप्रकृतेः प्रत्ययस्य वा अपद-त्वान्न समास इत्याह । मयट्प्रत्ययस्येति । किं च ब्रह्मपु-च्छं प्रतिष्ठेति ब्रह्मण आनन्दमयपुच्छत्वाभिधानमनुपपन्नं स्यादित्याह । आनन्दमयस्येति । अन्यत्रैकस्यावयवावय-विभावाभावे ऽपि ब्रह्मण उपपद्यत इत्याशङ्क्याह । न चेति । तर्कागोचरत्वे मीमांसानारम्भप्रसङ्गः स्यादिति दूषयति । विचारेति । द्वितीयहेतुरप्यसिद्ध इत्याह । ब्रह्मा-नवयवमिति । निष्कलं निरवयवम् । ननु जीवस्य तादृश-शक्त्यभावादनवयवत्वमीश्वरस्याचिन्त्यशक्तिमत्तयाव-यवावयविभावो न विरुध्यत इत्यत आह । न चेश्वरेति । किमीश्वरावयवी जन्यः उताजन्यः । नाद्यः, अनित्यत्वप्र-सङ्गात् । न द्वितीयः, तत्र शक्तेरयोगादित्याह ईश्वर-शक्तेरिति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

किमिदमानन्दमयस्यावयवित्वं किमवयवान्तरद्रव्यत्वमुत स्वावयवविशिष्टत्वमाहो स्विदन्यावयवविशिष्टत्वमथवा शरीरित्वमित्यभिप्रेत्याह । किं चेदमिति । आद्यं दूषयति । न तावदिति । द्वितीयं दूषयति । अत एवेति । अनारब्धत्वादेवेत्यर्थः । स्वावयवो वा नाम स्वारम्भकावयवः स न सम्भवतीत्यर्थः । तृतीयं दूषयति । अन्यावयवेति । ब्रह्मणोऽन्यावयवत्वे स्वावयविनैवैक्यमित्यानन्दमयेनैक्यं न सिद्ध्यतीत्यर्थः । किं चान्यावयवस्याब्रह्मत्वे तदभेदे आनन्दमयस्याप्यब्रह्मत्वं स्यादित्याह । आनन्दमयो वेति । ननु पुच्छशब्देन ब्रह्मणोऽवयवत्वप्रतीतेः कथं तन्निरास इत्याशङ्क्य तेन स्वप्रधानब्रह्मशब्दसमभिव्याहारात्सर्वाधारभूतं ब्रह्मोच्यत इत्याह । पुच्छमिति । चतुर्थं दूषयति । न च शरीरित्वमिति ॥

अन्नमयादिवाक्यमपि ब्रह्मविषयमित्युक्तमनूद्य दूषयति । यत्त्वित्यादिना ।

(अन्नमयादिवाक्यं न ब्रह्मविषयम्) यत्त्वन्नमयादिपर्यायेष्वप्यन्नमयादिशब्देन ब्रह्मैवाभिधीयत इति । तदयुक्तम् । स वा एष पुरुषोऽन्नरसमय इति वाक्ये स एषः प्रत्यक्षः शिरः पाण्यादिमानाकृतिविशेषः स वै योऽन्नात्पुरुष इति सर्ववाक्ये ऽन्नविकारत्वेन निर्दिष्ट एव तच्छब्देनाव्यवहितान्नविकारस्यैव परामर्शात् । ब्रह्मणश्च व्यवहितत्वात्सर्वनाम्नः सन्निहिताभिधानेनैव पर्यव-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सानात् । अथवास्य प्रकरणस्य परमात्मविषयत्वेन स इत्यनेन तस्यैव परामर्शे ऽपि स एव जीवभावनानुप्रविष्टोऽन्नरसमयो न तु केवलात्मा, तत्र विकारप्राचुर्यार्थयोरन्यतरस्याप्यसम्भवात् ॥

यत्त्वत्र तेनैवोक्तमाकाशादिपुरुषान्तैः ? शब्दैरुक्तमाकाशादिसारभूतं ब्रह्म स वा इति तच्छब्देनैष पुरुष इत्येतच्छब्देनापि परामृश्यत इति ।

तत्तुच्छम् । अन्यवाचकेनान्याभिधानासम्भवात् । अनेकार्थत्वस्यान्याय्यत्वात् । प्रथमावगतव्युत्पत्तिविरोधाच्च । लक्षणायाश्चायुक्तत्वात् । आकाशादेः कार्यत्वासिद्धिप्रसङ्गाच्च ॥

(जयतीर्थाभिमत- सारभूतत्वखण्डनम्) किमिदं सारभूतत्वम् । वियदाद्युपादानत्वं, तन्नियन्तृत्वं, तत्सत्तात्मकत्वं, वा । आद्यद्वये ब्रह्मणो नाकाशादिशब्दवाच्यता । न हि गोपालादि मृद्वा गोघटादिशब्दैरभिधीयते । तृतीये तु सृष्टकार्यस्य मिथ्यात्वम् । अन्यसत्तया वियदादेः सद्बुद्धिगोचरत्वात् ॥

१ पुरुषान्तशब्दैरिति युक्तः पाठः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ननु सन्निधेः प्रकरणस्य बलीयस्त्वात्प्रकरणिनो ब्रह्मण एव तच्छब्देन परामर्श इत्याशङ्क्यैवमपि जीवरूपेण ब्रह्मणो ऽन्नमयादित्वं न स्वरूपेणेत्याह। अथ चेति। तच्छब्देनाव्यवहितपरामर्श इत्यत्र जयतीर्थेनोक्तं यत्सर्गवाक्येष्वाकाशादिपदैर्ब्रह्मणोऽभिधानात्तदेवाव्यवहितमिति।

अत्राद्यं हेत्वसिद्ध्या दूषयति। यत्त्वत्रेति। शक्तिभेदेन सम्भवमाशङ्क्याह। अनेकार्थत्वस्येति। ननु तर्हि ब्रह्मण्येवाकाशादिपदशक्तिरस्तु नेत्याह। प्रथमेति। तर्हि लक्षणया ब्रह्माभिधानमित्याशङ्क्य सैव दोष इत्याह। लक्षणायाश्चेति। किं च लक्षणया ब्रह्माभिधाने आकाशादेरनभिधानात्तस्य कार्यत्वासिद्धिः स्यादित्याह। आकाशादेरिति। किं चास्मिन्पक्षे सम्भूतपदानन्वयप्रसङ्गो 'भूतसारत्वादिति[1] हेतुवैयर्थ्यं चेति चशब्दार्थः। ब्रह्मणो भूतसारत्वमपि दुर्निरूपमित्याह। किमिति। गवां नियन्ता गोपालः। घटस्योपादनं मृत्। अनयोर्गोघटपदवाच्यत्वं न दृष्टमिति। हेतुमाह। न हीति। तृतीयं तु तथासिद्धमित्यभिप्रायेणाह। तृतीयेत्विति॥

"[2]ये ऽन्नं ब्रह्मोपासत" इत्यादिनान्नमयादिषु ब्रह्मशब्दः श्रूयत इति चोद्यमनुवदति। यत्त्वन्नमयादीति।

(अन्नमयवाक्ये ब्रह्मपदेनान्नावच्छिन्नजीवाभिधानम्।)

यत्त्वन्नमयादिविषयश्लोकेषु ब्रह्मशब्दश्रवणादन्नमयादिरपि ब्रह्मैवेति। तन्न। यथा मनसि ब्रह्मशब्दश्रवणेऽपि मनो न ब्रह्म एवमन्नं ब्रह्मेति सामा-

१ सम्भूतत्वादिति शोभनः पाठः।

२ तैत्तिरीयोपनिषद्यानन्दवल्ल्याम् २ अनु०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नाधिकरणमात्रेण नान्नस्य ब्रह्मत्वं, किन्त्वन्न-
रसविकारस्यैव, तदवच्छिन्नो जीवो वा तथोपा-
स्यः। किं चान्नमयादेरपि ब्रह्मत्वे "[1]अन्यो ऽन्तर
आत्मा प्राणमय" इत्यादिना तदन्यस्य तदान्त
रत्वव्यपदेशो न स्यात्। न हि ब्रह्म बाह्या-
भ्यन्तरभूतमनेकमस्ति। न चैकस्याप्यनेकरूपभा-
वादुपपद्यत इति वाच्यम्। रूपान्तरविशिष्टस्य
वस्तुनो रूपान्तरविशिष्टाद्भेदे ब्रह्मैकत्वावधार-
णश्रुतिविरोधात्। अभेदे आन्तरत्वस्यानुपपत्तेः।
भेदाभेदस्य विरुद्धत्वात्। तस्मान्मन्त्रे प्रतिज्ञा-
तम् "[2]आत्मन आकाशः सम्भूत" इत्यादिना-
"[3]अन्नात्पुरुष" इत्यन्तेनारम्भणाधिकरणन्याये-
न समर्थगुहाप्रवेशेन प्रतिज्ञातं सर्वान्तरत्वं, श-
रीरप्राणादिभ्यो बाह्याभ्यन्तरभावेन स्थितेभ्यो-
ऽप्यान्तरताप्रदर्शनेन प्रतिपादयितुं, शाखाचन्द्र-
न्यायेनान्नमयादीन् कोशान् "[4]स वा एष" इत्या-
दिनोपन्यस्य, बाह्यात्मबुद्धिनिरासार्थं तत्तत्को-

१ तैत्तिरीयोपनिषद्यानन्दवल्ल्याम् ३ अनु०।
२ तैत्तिरीयोपनिषद्यानन्दवल्ल्याम् २ अनु०।
३ तैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्याम् १ अनु०।
४ तैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्याम् १ अनु०।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ध्येष्वात्मबुद्धिं द्रढयितुं, ये ऽन्नं ब्रह्मोपासत इत्यादिनान्नाद्यवच्छिन्नब्रह्मोपासना विधत्त इति भगवत्पादव्याख्यैव प्रख्यातबहुगुणेति ॥

उपास्तिश्रवणात्तेषु ब्रह्मदृष्ट्यभिप्रायं ब्रह्मपदं न तु ब्रह्मत्वपरमिति सदृष्टान्तमाह । तत्र यथेति । किञ्च तेषां ब्रह्मत्वे ऽन्यान्तरपदयोरानर्थक्यं स्यादित्याह । किञ्चेति । स्वरूपेणैकत्वे ऽपि तत्तदुपाधिविशिष्टत्वाकारेण नानात्वमित्याशङ्क्या ऽह । न चेति । विशिष्टानामपि ब्रह्मत्वमुताब्रह्मत्वम् । द्वितीये मदिष्टसिद्धिः । आद्ये ऽपि किं तेषां वस्तुतो भेद उताभेदो भेदाभेदो वा । न सर्वथापीत्याह । रूपान्तरेति । एवं परपक्षे तैत्तिरीयकश्रुतेरसामञ्जस्यमुक्त्वा स्वपक्षे सामञ्जस्यमाह । तस्मादिति । मन्त्रे, "[1]सत्यं ज्ञानमि"ति सङ्ग्रहवाक्ये । आरम्भणाधिकरणान्यायेनेति । "[2]तदनन्यत्वमारम्भणशब्दादिभ्य" इत्यधिकरणेनोक्तेन सतो वा असतो वा भिन्नस्य वा ऽभिन्नस्य कार्यस्योत्पत्तेरयोगात् "[3]वाचारम्भणं विकार" इत्यादिशब्दैः स्वतःसत्त्वनिषेधात् कारणसत्तयैव सद्वत्प्रतीयमानं कार्यमनिर्वचनीयमतो न वस्तुतः कार्यकारणभेद इति न्यायेन प्रतिपाद्येत्यर्थः । सर्गवाक्येनैवानन्त्यसिद्धेः "[4]स वा एष पुरुष" इत्यादिकिमर्थमित्याशङ्क्य प्रतिज्ञान्तरोपपादकत्वेनोपयोगमाह । गुहाप्रवेशेनेति । बुद्धिर्गुणशब्दार्थः । शाखाचन्द्र-

१ तैत्तिरीयोपनिषदि २ प्र० । १ खं० । १ कं० ।
२ वेदान्तसूत्रम् । अ० २ । पा० १ । सू० १४ ।
३ छान्दोग्योपनिषदि ६ प्र० । १ खं० । १ कं० ।
४ बृहदारण्यकोपनिषदि ४ प्र० । ४ ब्रा० । २२ कं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्यायेनेति । चन्द्रलेखामपश्यन्तं प्रति शाखाग्रं पश्येति तदुपलक्षणं शाखाग्रमुपदिश्य पश्चाद्यथातत्स्वरूपमुपदिश्यते तद्वदित्यर्थः । अन्नमयादिषु ब्रह्मशब्दप्रयोगस्याभिप्रायमाह । बाह्यात्मबुद्धीति ॥

वृहदारण्यकश्रुतिरप्यहङ्कारानात्मत्वे प्रमाणमित्याह । तथा योऽयमिति ।

(अहङ्कारादीनामनात्मत्वम्)

तथा "[1]योयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष" इति प्राणान्तःकरणाख्याहङ्कारलक्षणिकविज्ञानातीतमनवच्छिन्नज्योतिरात्मकं जीवस्वरूपं दर्शयति । सूत्रकारोप्यहमनुभवविषयातिरिक्तं जीवस्य ब्रह्माख्यं रूपं न षष्ठप्रपाठके प्रतिपाद्यमुपक्रमादेरहमनुभवगोचरमात्रनिष्ठत्वादित्याशङ्क्य सुषुप्त्युत्क्रान्तिकालयोः "[2]प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद, [3]प्राज्ञेनात्मनान्वारूढ उत्सर्जन्याति" इत्यादिना संसारिणः पारमार्थिकब्रह्माख्यस्वरूपान्तरनिर्देशात् "[4]योऽयं विज्ञानमय" इत्याद्य-

---

१ वृहदारण्यकोपनिषदि ४ प्र० ३ । ब्रा० । ८ कं० ।
२ वृहदारण्यकोपनिषदि ४ प्र० । ३ ब्रा० । २१ कं० ।
३ वृहदारण्यकोपनिषदि ४ प्र० । ३ ब्रा० । ३ कं० ।
४ मुण्डकोपनिषदि ३ मुं० । १ खं० । १ कं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सङ्गोदासीनजीवस्वरूपपरमित्याह । सुषुप्त्युत्क्रा-न्त्योर्भेदेनेति । एवं "[1]तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति" इत्यभोक्तारं जीवं दर्शयति । नन्वयं मन्त्रः परमात्मन एवानशनं दर्शयति जीवस्य तु पिप्पलं स्वाद्वत्तीति भोक्तृत्वमेव दर्शयतीति चेत् । न एवं सति "[2]ब्रह्मवेद ब्रह्मैव भवति" इति वाक्यशेषावगतस्य विदुषो ब्रह्मभावस्योपक्रमगतैकविज्ञानात्सर्वविज्ञानप्रतिज्ञानस्य च बाधप्रसङ्गात् । भोक्तृभोक्त्रोरभेदायोगात् ॥

हृद्यन्तर्ज्योतिरिति जडान्तःकरणात्मकाहङ्कारतद्वृत्त्यज्ञानेभ्यो भेदः प्रतीयते, पुरुष इति क्षणिकविज्ञानात् सर्वासु पूर्षु शेत इति पुरुषशब्दार्थत्वात् । अत एवानवच्छिन्नमस्याः श्रुतेरुक्तमर्थं भगवान् बादरायण आचार्योऽपि न्यायपुरःसरं निर्णयामासेत्याह । सूत्रकारोऽपीति । षष्ठप्रपाठके षष्ठाध्याये । उपक्रमादेरिति "[3]स वा अयं पुरुषो जायमान" इत्यादिना जन्ममरणावस्थात्रयादेरुपन्यासादित्यर्थः । सुषुप्तिकाले प्राज्ञेन परमेश्वरेणात्मना स्वस्वरूपेण सम्परिष्वक्तो भेदबुध्यभावमात्रेणैक्यं गत उत्क्रान्तिकाले प्राज्ञेनात्मनान्वारूढ अधिष्ठित उत्सर्जनं हिक्कादि-

१ मुण्डकोपनिषदि ३ मुं० । २ खं० । ८ कं० ।
२ मुण्डकोपनिषदि १ मुं० । १ खं० । ३ कं० ।
३ मुण्डकोपनिषदि १ मुं० । १ खं० । १ कं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शब्दं कुर्वन्यातीत्यर्थः । अत्रात्मनेति विशेषणात्प्राज्ञस्य जीवरूपेण सम्परिष्वक्तस्याहमनुभवे प्रकाशमानस्यैवात्मपदार्थत्वादिति भावः। जीवरूपस्य भोक्तृव्यतिरेके आथर्वणश्रुतिमपि प्रमाणयति। एवं तयोरिति। अनश्नन्नन्य इत्यस्य परमात्मविषयत्वं शङ्कते। नन्वयं मन्त्र इति। भिन्नजीवेश्वरपरत्वेन व्याख्यानं पूर्वापरवाक्यविरुद्धमिति दूषयति। न, एवं सतीति । उपक्रमगतेति । "[1]कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति" इति श्रुतेरित्यर्थः ।

अनश्नन्वाक्यस्य जीवविषयत्वेऽन्यस्य भोक्तुरभावादशनवाक्यमनर्थकं स्यादिति चोदयति। कथं तर्हीति।

(जीवो न भोक्तास्वरूपतः) कथं तर्हि पिप्पलं स्वाद्वत्तीति श्रुतिरिति चेत्। सा हि ब्रह्मस्वरूपस्य सतो जीवस्य बुद्ध्युपाधिकृतं भोक्तृत्वमनुभवसिद्धमनुवदति केवलस्वरूपेण तस्यैवाभोक्तृत्वं दर्शयितुं न तु भोक्तृत्वपरा। अत एवायं मन्त्रो पैङ्गिरहस्यब्राह्मणेनास्मदुक्ताभिप्रायेण व्याख्यातः। तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वं, अनश्नन्नन्यो अभिचाकशीतीत्यनश्नन्नन्यो ऽभिपश्यति ज्ञः तावेतौ सत्त्वक्षेत्रज्ञाविति। ननु तत्रापि सत्त्वशब्दो जीवं क्षेत्रज्ञशब्दश्च परमात्मानमभिदधातीति चेत्। न तदेतत्सत्त्वं येन स्वप्नं पश्यति अथ योयं शारीर उपद्रष्टा क्षेत्रज्ञ इति ब्राह्मणेन सत्त्वक्षेत्रज्ञ-

[1] मुण्डकोपनिषदि । १ मु० । १ खं० । १ कं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पदयोरन्तःकरणशरीरपरतया व्याख्यातत्वात् । येनेति यच्छब्दवाच्यस्य तदित्यत्र तच्छब्देनाभिधानाज्जीवस्यैव स्वप्नोपद्रष्टृत्वात् ।

(जीवक्षेत्रज्ञौ न भिन्नौ) एवं पाञ्चरात्रे परमात्मसंहितायाम् ।

परक्षेत्रज्ञयोरैक्यमात्मनः श्रुतिचोदितम् ।
क्षेत्रज्ञस्य बहुत्वं हि देहभेदात्प्रतीयते ॥
एकस्यैव तु बिम्बस्य दर्पणेषु तथा भिदा ।
भूतपञ्चकसङ्घातः क्षेत्रं तत्र व्यवस्थितः ॥
जीवो यस्तं विदुः प्राज्ञाः क्षेत्रज्ञं परसंज्ञितम् ।
इति परव्यावृत्तजीवं क्षेत्रज्ञं दर्शयति ॥

स्फटिकलौहित्यवदौपाधिकं जीवस्य भोक्तृत्वं तदर्थे इति परिहरति । सा हीति । यत एतस्य भोक्तृत्वमनीश्वरत्वं वान्यतः सिद्धत्वान्न श्रुतिगम्यमत एवायं मन्त्रो ब्राह्मणवाक्येनाज्ञातजीवपरमार्थस्वरूपपरतया व्याख्यात इत्याह । अत एवेति । ज्ञश्चिद्रूपः । पर्यवसितमन्त्रार्थं श्रुतिः संक्षिप्य दर्शयति । ताविति । इदं व्याख्यानं जीवेशभेदपक्षेपि न विरुध्यत इति चोदयति । ननु तत्रापीति । एतच्चोद्यं श्रुत्यैव निरस्तमित्याह । न तदेतदिति । नन्वत्रापि यः स्वप्नं पश्यति तत्सत्वं य उपद्रष्टा स क्षेत्रज्ञ इति जीवेशावेवोक्ताविति तत्राह । येनेति । यत्तदोरेकार्थत्वात्करणे च यच्छब्दप्रयोगात्तदेव तच्छब्दसमानाधिकरणसत्वशब्दार्थः । उपद्रष्टृत्यत्रापि स्वप्नस्य सन्निहितत्वात्तदुद्रष्टा जीव एव क्षेत्रज्ञ-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पदेनोच्यते शारीरत्वं च तस्यैव सम्भवति "[1]शारीर आत्मा" "[2]प्राज्ञेनात्मना"इत्यत्र जीवस्यैव शारीरत्वेन प्रसिद्धेरित्यर्थः। वस्तुतो ब्रह्माभिन्न एव क्षेत्रज्ञपदार्थ इत्युक्तमागमसम्मत्या द्रढयति। एवं पाञ्चरात्रे इति। आत्मन इति। स्वकीयशाखागतश्रुत्युक्तमित्यर्थः । अथवा परक्षेत्रज्ञयोरात्मनः स्वरूपस्यैक्यमित्येवं योजना आत्मनोरिति पाठेऽस्तिचेत् सुबोधः। श्रुत्युक्तं सदृष्टान्तमुपपादयति। क्षेत्रज्ञस्येति। परसंज्ञितमिति। वस्तुतः पराभिन्नमित्यर्थः। परव्यावृत्तमिति। औपाधिकेभेदेन भिन्नमित्यर्थः ॥

अशनवाक्यमन्तःकरणविषयमित्युक्तं तदाक्षिपति। नन्विति।

(चेतनस्याभोक्तृत्वम्) ननु कथमचेतनस्यान्तःकरणस्य भोक्तृत्वमिति चेत्। न, नह्ययं श्रुतिरचेतनस्य भोक्तृत्वं वदति, तथा सत्युभयपरत्वेन वाक्यभेदप्रसङ्गात्। अपि तु चेतनस्याभोक्तृत्वमेव प्रतिपादयन्ती चैतन्यसमानाधिकरणभोक्तृत्वप्रतीतिस्तर्हि कथमित्याशङ्क्य चैतन्याभोक्तृत्वप्रमित्यर्थमेव चिच्छायापाद्यन्तःकरणगतमनुवदति। तथाच [3]द्वा सुपर्णेति मन्त्रेण जीवः परमात्मभावाभिप्रायेणाभोक्तेति प्रतिपाद्यते। एवं तत्र तत्र परमात्मन

१ बृहदारण्यकोपनिषदि ४ प्र० । ३ ब्रा० । ३५ कं० ।
२ बृहदारण्यकोपनिषदि ४ प्र० । ३ ब्रा० । ३४ कं० ।
३ छान्दोग्योपनिषदि ५ प्र० । खं० । २ कं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एव बुद्धावनुप्रवेशश्रुतिरपि जीवो वस्तुतः कर्त्ता ऽभोक्तेति मते प्रमाणम् । न चान्तर्यामिरूपेणा- नुप्रवेशो न तु जीवरूपेणेति वाच्यम् । अनुप्रवि- ष्टस्य "[1]स एष इह" इत्यादौ तत्र तत्र भोक्तृ- त्वश्रवणात् । "[2]अनेन जीवेन" इत्यनुप्रविष्टे जीवशब्दश्रवणाच्चेति ॥

अचैतन्यस्यापि चैतन्यतादात्म्याद्भोगपरिणाम इति वक्तुं श्रुत्यभिप्रायं तावदाह । न हीयमिति । उभयपरत्वे- नेति । सत्त्वस्य भोक्तृत्वं क्षेत्रज्ञस्य तदभाव इत्यर्थद्वयपर- त्वेनेत्यर्थः । जीवो वस्तुतो ऽभोक्तैव तस्मिन्प्रतीयमानो भोगः स्फटिकलौहित्यवदौपाधिकः । उपाधिश्च क इत्या- काङ्क्षायां चित्प्रतिबिम्बाश्रयतया लब्धचेतनभावो दुःखा- दिपरिणाम्यन्तःकरणमेवेति तयोरन्य इति श्रुतिरनुवद- तीत्याह । अपि त्विति । मन्त्रार्थमुपपादितमुपसंहरति । तथा चेति । किं च सर्वशाखास्वपि "[3]स एष इह प्रविष्ट आनखाग्रेभ्यः" "[4]तत्सृष्ट्वा तदेवानुप्राविशत्" "[5]अनेन जीवेनात्मनानुप्रविश्य" "[6]सर्वाणि रूपाणि विचिन्त्य धीरो नामानि कृत्वाभिवदन्यदास्ते" "[7]स एष भूतानीन्द्रि- याणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते" "[8]माययैव तस्मादद्वय एवायमात्मा"

१-३ बृहदारण्यकोपनिषदि १ प्र० । ४ ब्रा० । ७ कं० ।

२-५ तैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्याम् । ५ प्र० । ३ खं० । २ कं० ।

४ तैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ल्याम् । ६ अ० । १ कं० ।

६ तैत्तिरीयपुरुषसूक्तम् । मं० । ७ नृसिंहोत्तरतापनीयोपनिषदि । ९ कं० ।

८ नृसिंहोत्तरतापनीयोपनिषदि । ९ कं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"[1]पुरश्चक्रे चतुष्पादः पुरः स पक्षी भूत्वा पुरः पुरुष आविशत्" "[2]रूपं रूपं प्रति रूपो बभूव" इत्यादिकाः श्रुतय उक्तार्थे मानमित्याह । एवं तत्रेति । प्रवेशश्रुतेरन्यथोपपत्तिमाशङ्क्याह । न चेत्यादिना । भोक्तृत्वश्रवणादिति । "[3]पश्यन् शृण्वन्मन्वान" इति श्रुतेरित्यर्थः ॥

एवं श्रुतितोऽहङ्कारात्मनोर्भेदं प्रसाध्येदानीं न्यायतः साधयितुमुपक्रमते । इदानीमिति ।

(अहङ्कारातिरिक्तात्मानुमानम्) इदानीं युक्तितोप्यहङ्कारातिरिक्तश्चित्स्वभाव आत्मा निरूप्यते । अहङ्कारो, नात्मा, दृश्यत्वात्, तस्मिन्प्रतीयमानेप्यप्रतीयमानत्वाद्वा । घटवत् ॥

तत्र विवरणाचार्य्योऽनुमानं प्रयुङ्क्ते अहङ्कारो नात्मेति । आत्मा तच्छब्दार्थः ॥

अत्र पक्ष एव तावद्दुर्निरूप इत्याह पूर्ववादी । स्यादेतदिति ।

(पक्षासिद्धिप्रदर्शनं पूर्ववादिनः) स्यादेतदहङ्कारो यद्यन्तःकरणं तदा सिद्धसाधनम् । अथ तदतिरिक्तोऽहमिति व्यवहारविषय स्तदाबाधः । अन्तःकरणातिरिक्ताहमितिव्यवहारविषयस्य चैतन्यस्य तव मत आ-

१ बृहदारण्यकोपनिषदि ४ प्र० । ५ ब्रा० । १७ कं० ।
२ बृहदारण्यकोपनिषदि ४ प्र० । ५ ब्रा० । १६ कं० ।
३ बृहदारण्यकोपनिषदि । ३ प्र० । ४ ब्रा० । ७ कं० । यदन्यात्र पश्यंश्चक्षुः शृण्वन् श्रोत्रं मन्वान इति श्रुतौ पाठः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्मत्वात् । देहोऽपि तद्व्यवहारविषय इति चेत्तर्हि सिद्धसाधनम् । अथाहमिति पदार्थो ऽहङ्कारः । न, तस्यापि भवन्मते उभयात्मकत्वेन बाधात् । न चान्तःकरणमेवाहम्पदार्थः । भागत्यागलक्षणाभ्युपगमविरोधात् । चेतनवाचिनो ऽहंशब्दस्य केवलान्तःकरणवाचकत्वायोगात् । तथात्वे वा सिद्धसाधनत्वात् । न चाहमिति ज्ञानविषयः सः । चैतन्यस्याप्यहमिति वृत्तिविषयत्वात् । तदतिरिक्तज्ञानस्य परम्प्रत्यसिद्धेः । नापि ज्ञानाद्याश्रयः पक्षः । त्वदभिमतात्मनो वृत्तिज्ञानाश्रयत्वाच्चैतन्यानाश्रयत्वात् । नापि तदुपादानं पक्षः । सर्वोपादानचिद्रूपब्रह्मणोऽपि तत्त्वात् । परिणामित्वस्य परं प्रत्यसिद्धेः । तत्समवायित्वस्य सिद्धान्तेऽन्तःकरणेऽप्यभावात् । ज्ञानाद्युपादानस्यान्यत्वेन बाधाच्च ॥

अत्र पक्षीकृताहङ्कारः किमन्तःकरणं, तदतिरिक्तो ऽहमिति व्यवहारविषयो वा, अहमिति पदार्थो वा, अहमिति ज्ञानविषयो वा, ज्ञानाद्याश्रयो वा, ज्ञानोपादानं वा, ज्ञानपरिणाम वा, ज्ञानसमवायी वेति विकल्पं मनसि निधायाद्यमनूद्य दूषयति । अहङ्कारो यदीति । द्वितीयं निराकरोति । अथ तदतिरिक्तेति । बाधमेवोपपादयति । अन्तःकरणेति । देहस्यापि तादृशत्वेन पक्षत्वेन बाध इति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शङ्कते । देहो ऽपीति । तर्ह्यन्यद्दूषणमित्याह । तर्हीति । तृतीयमनूद्यांशतो बाधेन दूषयति । अथाहमिति । उभयात्मकत्वेनेति । चिदचिदात्मकत्वेनेत्यर्थः । अचिदंश एव तदर्थ इत्याशङ्क्याह । न चेति । भागत्यागेति । अहंब्रह्मास्मीति वाक्ये ऽहमर्थस्य ब्रह्माभेदविरुद्धमचिदंशं परित्यज्य चिदंशेऽहंपदं न लक्ष्यत इत्यभ्युपगमविरोधः स्यादित्यर्थः केवलान्तःकरणवाचित्वं व्युत्पत्तिविरुद्धं चेत्याह । चेतनवाचिन इति । अङ्गीकृत्याप्याह । तथात्वे वेति । चतुर्थं दूषयति । न चाहमिति । सः पक्षः । ज्ञानपदेन किं जन्यज्ञानं विवक्षितमुताजन्यम्, आद्ये बाध इत्याह । चैतन्यस्यापीति । द्वितीये पक्षासिद्धिरित्याह । तदतिरिक्तेति । पञ्चमं दूषयति । नापीति । अत्रापि ज्ञानं जन्यमजन्यं वेति विकल्प्य क्रमेण दूषयति । त्वदभिमतेति । षष्ठं दूषयति । नापि तदुपादानमिति । सप्तमाष्टमावन्यतरासिद्ध्या दूषयति । परिणामित्वस्येत्यादिना । उत्तरकल्पचतुष्टये दूषणान्तरमाह । ज्ञानाद्युपादानस्येति ॥

साध्येऽपि किमनात्मत्वमात्मत्वाभाववत्वमात्मत्ववदन्यत्वं वा । उभयत्रापि किमात्मत्वं जातिः, ज्ञानाद्याश्रयत्वं वा, ज्ञानत्वं वेति विकल्प्य, सर्वथाप्ययुक्तमित्याह । साध्यमपीति ।

(साध्यासिद्धिप्रदर्शनम्) साध्यमप्यात्मत्वाभाव आत्मान्यत्वं वा न सम्भवत्यात्मत्वजातेः सिद्धान्ते ऽभावात् । ज्ञानाद्याश्रयत्वमात्मत्वं चेत्तदभावसाधने बाधः । ज्ञानत्वं चेत्सिद्धसाधनम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(हेत्वसिद्धिः) दृश्यत्वमपि दर्शनविषयत्वं वा, वृत्तिविषयत्वं वा, स्वव्यवहारे चैतन्यापेक्षत्वं वा, न सम्भवति । ब्रह्मणि व्यभिचारात् । ब्रह्मणः प्रकाशविषयत्वाभावे व्यवहारविषयत्वासम्भवात् । नापि स्वव्यवहारे स्वातिरिक्तज्ञानापेक्षत्वम् । ब्रह्मव्यवहारे ऽपि तदतिरिक्तवृत्तिज्ञानापेक्षणात् । न च चैतन्यं ज्ञानशब्दार्थः । ब्रह्मव्यवहारस्यापि तद्भिन्नजीवचैतन्यवृत्तिचैतन्यापेक्षणात् । न च वस्तुतो ऽतिरिक्तत्वं विवक्षितमिति वाच्यम् । सिद्धान्ते तदभावात् । द्वितीये ऽपि हेतावप्रतीयमानत्वमसिद्धम् । अहमिति प्रतीयमानत्वात् । न च सुषुप्तावहङ्कारो न प्रतीयत इति वाच्यम् । सुखमहमस्वाप्समिति तत्परामर्शदर्शनेन तदापि तत्प्रतीतेः । न चाहङ्कारस्य तदाश्रयाभेदात्तथानुभवो न तु स परामर्शविषय इति वाच्यम् । निर्विषयपरामर्शायोगात् । अहङ्कारांशज्ञाने ऽपि परामर्शत्वानुभवाच्च ॥

प्रथमं हेतुं विकल्प्य दूषयति । दृश्यत्वमपीति । ननु ब्रह्मणः स्वप्रकाशस्वरूपस्य दर्शनविषयत्वाभावाच्चायं हेतो-

स्तत्र व्यभिचार इत्यत आह । ब्रह्मण इति । व्यवहारस्य स्वसमानविषयप्रकाशजन्यत्वनियमादित्यर्थः । प्रकारान्तरेण दृश्यत्वनिरुक्तिमाशङ्क्य दूषयति । नापीति । किमत्र ज्ञानपदेन वृत्तिर्विवक्षिता उत तदतिरिक्तं चैतन्यम्, आद्ये व्यभिचारमाह । ब्रह्मव्यवहारेऽपीति । द्वितीयमपि व्यभिचारेण दूषयति । न च चैतन्यमिति । जीवचैतन्येति । प्रमातृतया जीवचैतन्यस्य प्रमाणतया वृत्त्यभिव्यक्तचैतन्यस्यचापेक्षणादित्यर्थः । ननु ज्ञानस्य स्वातिरिक्तत्वं वास्तवं विवक्षितम् । प्रमातृप्रमाणचैतन्ययोर्ब्रह्मापेक्षया न वास्तवातिरिक्तत्वमिति न व्यभिचार इत्याशङ्क्य तव मते वास्तवभेदस्य कुत्राप्यभावादसिद्धिः स्यादिति दूषयति । न च वस्तुत इति । तस्मिन्प्रतीयमानत्वादिति हेतौ किं सर्वदाप्रतीयमानत्वं विवक्षितमुत कदाचित् । आद्ये ऽसिद्धिमाह । द्वितीये ऽपीति । द्वितीयं दूषयति । न चेति । सौषुप्तिकाहङ्कारस्य परामर्शनेन तदा तदनुभवो वाच्यः । तथा चात्रापि पक्षे हेतुरसिद्ध इत्याह । सुखमहमिति । नन्वस्य परामर्शस्य नाहङ्कारो विषयो येन सुषुप्तौ तदनुभवः कल्प्येत, किन्तु तस्य परामर्शस्याश्रयभूतचिदात्माभेदारोपादहमंशो परामर्शो ऽनुभव एव । तथा च सुषुप्तावप्रतीयमानत्वान्नासिद्धिरित्यत आह । न चाहङ्कारस्येति । अत्र सुखस्वापयोर्विशेषणतया भानादहमर्थस्य विशेष्यत्वेनाविषयत्वे निर्विषयकपरामर्श एव न स्यादित्याह । निर्विषयेति । यदुक्तमहमंशे परामर्शो ऽनुभव एवेति तत्तदंशे ऽपि स्मृतित्वानुभवो विरुद्ध इत्याह । अहङ्कारांशेति ॥

ननु परामर्शविषयात्मचैतन्याभेदारोपादहङ्कारे परामृश्यमानत्वभ्रमस्तथा च न विरोध इत्यत्राह । न च परामृश्यमानेति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(अहङ्कारे परामृश्यमानत्वभ्रमनिरासः ।)

न च परामृश्यमानात्माभेदारोपादहङ्कारस्य तथात्वमिति वाच्यम् । तद्भेदासिद्धेः पूर्वं तदभेदानुभवस्य भ्रमत्वासिद्धेः । एतेन सुषुप्तावहमर्थप्रकाशो स्मर्य्यंत ह्यस्तन इवाहङ्कार इति निरस्तम् । स्मर्यमाणत्वात् । सुखमहमस्वाप्समिति परामर्शस्य तद्विषयत्वात् । अहमित्यभिमन्यमानएवास्वाप्समिति परामर्शः स्यादिति चेत् । न, अहमर्थप्रकाशे तदभिमानपरामर्शोपादनस्य व्यधिकरणत्वात् । किं च सुषुप्तावहङ्कारो ऽस्ति न वा । आद्ये न तदा तदननुभवः । तस्य भवन्मते केवलसाक्षिवेद्यत्वात् । द्वितीये तस्य स्मर्तृत्वानुपपत्तिः । अन्यानुभूते ऽन्यस्यस्मरणायोगात् । चैतन्याभेदमात्रस्यातिप्रसक्तत्वात् । अहमर्थस्य सुषुप्तावभावे ऽहं निर्दुःखः स्यामिति सुषुप्त्यर्थिप्रवृत्त्ययोगात् । यो ऽहं सुप्तः सो ऽहं जागर्मीति प्रत्यभिज्ञानविरोधात् । अहङ्कारव्यक्तिभेदात् कृतहानाकृताभ्यागमश्च । कर्तुरन्यत्वाद्भोक्तुरभिन्नचैतन्यस्य कर्तृत्वाद्यभावात् । अहङ्करोमीत्येव प्रतीत्याहमर्थान्यात्मनि कर्तृत्वाद्ययोगाच्च । न च जाग्रत्येव कदाचिदप्रतीयमानत्वान्नासिद्धिः । तथाप्यात्मनि प्रतीयमाने तदप्रतीतेरसिद्धेः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रकाशाभावस्याविद्याविषयत्वस्य वा अप्रकाश्यमानत्वस्यासिद्धेश्च । किं चाहमर्थस्यानात्मत्वेऽहं करोमि जानामीति प्रतीत्यनुपपत्तिः । कर्तृत्वादेरात्मधर्मत्वात् । अहं मुक्तः स्यामिति प्रवृत्त्यनुपपत्तेश्च । अहमर्थस्यान्तःकरणगर्भितत्वे मम मन इतिप्रतीत्ययोगाच्च । मम मनःस्फुरति मनोऽस्तीति ज्ञानादहमिति ज्ञानस्यावैषम्यप्रसङ्गाच्च । ज्ञानानाश्रयत्वं चोपाधिः । अहमर्थ आत्मा ज्ञानाश्रयत्वादित्य ईश्वरात्मवद्व्यतिरेकेण घटवद्वेति सत्प्रतिपक्षत्वाच्चेति ॥

अहङ्कारात्मभेदस्यासिद्धत्वेन परामृश्यमानात्माभेदस्यारोपितत्वमसिद्धमित्याह । तद्भेदासिद्धेरिति । सुषुप्तावहमर्थप्रतीतेः साधितत्वादाचार्योक्तबाधकतर्कोऽपि निरस्त इत्याह । एतेनेति । ह्यस्तन इति । पूर्वदिनवर्तीत्यर्थः । तर्हि ह्यस्तनवदभिमानोऽपि परामृश्येतेति शङ्कते । अहमितीति । अभिमानस्याननुभवान्न तत्परामर्श इत्यभिप्रेत्याह । न, अहमर्थेति । किं च सुषुप्तावहमर्थस्यावश्यकत्वात्तस्य केवलसाक्षिवेद्यत्वान्न तदनुभव आवश्यक इत्याह । किं च सुषुप्ताविति । स्मरणस्याहङ्कारधर्मत्वादनुभवकाले तदभावे तस्य स्मर्तृत्वानुपपत्तिरित्याह । द्वितीय इति । आत्मानुभवबलात्तदुपपत्तिमाशङ्क्याह । अन्यानुभूतेति । अनुभवितृचैतन्यतादात्म्यात्तदुपपत्तिमाशङ्क्यातिप्रसङ्गमाह । चैतन्येति । दुःखिन एव हि दुःखाभावः पुरुषार्थस्ततश्च दुःख्यह-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ङ्कार एव सुषुप्तौ तदभाववत्तया वक्तव्य इत्याह । अहं निर्दुःख इति । किं च सुषुप्तकालीनाहङ्कारेणेदानींतनस्यैक्यानुभवान्न तदा तदभाव इत्याह । योऽहं सुप्त इति । किं च सुषुप्तावहङ्कारनाशे तत्कृतकर्मणामानर्थक्यमन्यस्योत्पन्नस्याकस्माद्भोगश्च स्यादित्याह । कृतहानेति । नन्वनादिचैतन्यस्यानुगतत्वान्नोक्तदोष इत्याशङ्क्य तस्य कूटस्थत्वेन कर्तृत्वाद्यनुपपत्तिरित्याह । अभिन्नेति । चैतन्यमात्रस्य कर्तृत्वाद्यभिधानमनुभवविरुद्धं । चेत्याह । अहं करोमीति । एवं सुषुप्तावहङ्कारस्य सत्त्वात् प्रतीयमानत्वाच्च विशेष्यासिद्धो हेतुरित्युक्तमिदानीं जाग्रत्येव घटादिज्ञानसमये तदप्रतीतेनासिद्धिरित्याशङ्क्य तवमते तदापि तस्य केवलसाक्षिवेद्यत्वाद्विशेष्यासिद्धिः, मम मते तु विशेषणासिद्धिरित्यभिप्रेत्याह । न च जाग्रत्येवेति । किं च किमिदमप्रकाशमानत्वं प्रकाशाभाववत्त्वमविद्याविषयत्वं वा, नोभयथापि, तत्प्रकाशकस्य साक्षिणो नित्यत्वाज्जडस्याविद्याविषयत्वायोगाच्चेत्याह । प्रकाशमानस्येति । अनुमानस्य प्रत्यक्षविरोधमप्याह । किं चेति । प्रतिकूलतर्कविरोधं चाह । अहं मुक्तः स्यामिति । अनात्ममुक्त्यर्थं प्रवृत्त्ययोगादित्यर्थः । किं चाहमर्थस्यानात्मत्वमात्रमत्राभिप्रेतमुतान्तःकरणरूपत्वमपि । आद्ये दूषणमुक्तम् । द्वितीये मनसस्ततो भेदग्रहविरोधोऽपीत्याह । अहमर्थस्येति । अहङ्कारमनसोरभेदे तदुभयविषयप्रतीत्योर्वैलक्षण्यं न स्यादित्याह । मम मत इति । व्याप्यत्वासिद्धश्चायमित्याह । ज्ञानानाश्रयत्वं चेति । प्रतिप्रयोगपराहतिं चाह । अहमर्थ इति । ईश्वरस्य ज्ञानाश्रयत्वमसिद्धमित्यत आह । व्यतिरेकेणेति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उक्तदोषगणपरिहारम्प्रतिजानीते । अत्रेति ।

(वादिमत-निरासः) अत्रोच्यते । अहमनुभवविषयो ऽन्तः करणाधर्मातिरिक्ताहमिति ज्ञानविषयो वा, स्वप्रकाशान्यो वा, न स्वद्रष्टा स्वव्यतिरिक्तद्रष्टको वा, दृश्यत्वात् स्वप्रकाशत्वानधिकरणत्वाद्वा । घटादिवत् ।

अहमनुभवो ऽहमिति व्यवहारहेतुप्रकाशः स चास्मन्मते वृत्त्युपहितं चैतन्यं परमते ऽहङ्कारधर्मस्तद्विषयः पक्षः । स चास्मन्मते जडांश एव परमते देहाद्यतिरिक्तस्तदभिमतात्मैवेति न बाधो न वा सिद्धसाधनम् । न च पराभिमतात्मत्वेन सिद्धसाधनम् । पक्षतावच्छेदकधर्मावच्छेदेन साध्यसिद्धेरनुमानफलत्वमतोंऽशतः सिद्धसाधनस्यादोषत्वात् । मतान्तरे तु विषयपदस्यविशेष्यपरत्वान्न सिद्धसाधनम् । वृत्तिविशिष्टचैतन्यं ज्ञानपदार्थ इति मतेन पक्षान्तरमाह । अन्तःकरणेति । ज्ञानविषय इत्युक्ते घटादेः पक्षतास्यात्तद्व्यावृत्तये ऽहमित्यहमिति वृत्तिज्ञानविषयचिदात्मव्यावृत्तये ऽन्तःकरणाधर्मातिरिक्तेति । ज्ञानविशेषणम् । गुरुमतानुसारिणं प्रति पक्षान्तरमाह । स्वप्रकाशेति । स्वशब्दः, समभिव्याहृतपरः स्वव्यवहारजनकप्रकाशाश्रयो नेत्यर्थः । साध्यमाह । न स्वद्रष्टेति । प्रकाशश्रयो नेत्येतावत्युक्ते प्रदीपादिप्रकाशानाश्रयत्वेन सिद्धसाधनं स्यात्तन्निवृत्तये [1]स्वव्यवहारजनकेति । स्वव्यव-

---

१ स्वप्रकाशान्यो वेति मूले पाठः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हारजनकाश्रयो न भवतीत्युक्ते बाधस्ताहशाहशाश्रयत्वात्तन्निवृत्त्यर्थं प्रकाशेति । ननु सिद्धान्ते ऽहङ्कारव्यवहारहेतुप्रकाशस्य साक्षिणो ऽनाश्रितत्वेन तदाश्रयाप्रसिद्धेस्तन्निषेधानुपपत्तिरिति चेत् । न शून्यवत् परप्रसिद्धिमात्रेणापि निषेधसम्भवात् । ताहशप्रकाशात्यन्ताभावो वा साध्यः । तथाचाहमनुभवगोचरस्य स्वद्रष्टृत्वाभावसिद्धेस्तस्य दृश्यत्वमहिम्नात्मान्तरसिद्धिरिति भावः । इदानीं मुखत एवात्मान्तरं साधयति । स्वव्यतिरिक्तेति । अहङ्कारव्यतिरिक्तदृग्रूपात्मनोऽपि वृत्तिकृतभेदेन दर्शनवत्त्वमस्तीति न बाधः । नैयायिकादीन्प्रति हेतुमाह । दृश्यत्वादिति । प्रभाकरं प्रति हेतुमाह । स्वप्रकाशत्वेति ॥

आद्यं हेतुं निरूपयन् ब्रह्मणि व्यभिचारमुक्तं परिहरति । दृश्यत्वं चेति ।

(व्यभिचारोद्धरणपूर्वकमाद्यहेतुनिरूपणम्) दृश्यत्वं च प्रकाशविषयत्वं, तच्च मतद्वयसाधारणं, ब्रह्म च न प्रकाशविषयस्तद्व्यवहारादेरन्यथाऽपि सम्भवादिति वक्ष्यते । च न ज्ञानानाश्रयत्वाधिकमुपाधिः । वृत्तिज्ञानानाश्रयत्वादेरन्तःकरणे साध्याव्यापकत्वात् । प्रकाशस्याऽस्मन्मते निरधिकरणत्वेन तदनाश्रयत्वाप्रसिद्धेः । न च प्रकाशात्यन्ताभावाश्रयत्वम् । साधनव्यापकत्वात् । ज्ञानाश्रयत्वस्यात्मत्व इव तदनाश्रयत्वस्याप्यनात्मत्वे ऽप्रयोजकत्वात् । न चाहमनुभवातिरिक्तप्रकाशमात्रविषयत्वमुपाधिः । साधनविशेषितत्वात् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यदुक्तं ब्रह्मणः प्रकाशविषयत्वाभावे व्यवहारविषयत्वं न स्यादिति तत्राह । तद्व्यवहारादेरिति । आदिपदेन संशयादिनिवृत्तिर्गृह्यते । अन्यथेति । ब्रह्मव्यवहारे तत्प्रकाशमात्रं हेतुर्न तु तद्विषयप्रकाश इति वक्ष्यत इत्यर्थः । अत्र पूर्वोक्तमुपाधिं दूषयति । न चेति । ज्ञानशब्देन वृत्तिर्विवक्षिता, उत चित्प्रकाशः, आद्ये आह । वृत्तीति । अन्तःकरणस्य मतद्वयेऽप्यनात्मत्वस्य निश्चितत्वात्तत्रोक्तोपाधेरभावात्साध्याव्यापकत्वमित्यर्थः । द्वितीये, किं प्रकाशाश्रयभिन्नत्वमुपाधिरुत प्रकाशात्यन्ताभाववत्त्वम् । आद्ये, प्रतियोग्यप्रसिद्ध्या तदसिद्धिरिति दूषयति । प्रकाशस्येति । द्वितीयं निराकरोति । न चेति । तव मते ऽपि ज्ञानादेरव्याप्यवृत्तित्वेन पक्षेऽपि तदभावसत्त्वात् साधनव्यापकत्वमित्यर्थः । किंच सुषुप्तौ ज्ञानाश्रयत्वाभावेप्यात्मत्वदर्शनाद्यथा तदात्मत्वेऽप्रयोजकमेवं तद्व्यतिरेको ऽपि तद्व्यतिरेके न प्रयोजकस्तथा च नायमुपाधिरित्याह । ज्ञानाश्रयस्येति । नन्वनात्मत्वे ऽहमनुभवातिरिक्तप्रकाशमात्रविषयत्वं प्रयोजकं, स एव चोपाधिः, प्रकाशविषयत्वमात्रं पक्षे ऽप्यस्तीति साधनव्याप्तिः स्यात्तद्व्यावृत्त्यर्थमहमनुभवातिरिक्तेति । मात्रपदाभावे ऽहमनुभवातिरिक्तपरोक्षप्रकाशविषयत्वात् पक्षस्योक्तदोषः स्यात्ततो मात्रपदम् । तथा च पक्षस्याहमनुभवस्यपि विषयत्वात्तदतिरिक्तप्रकाशमात्रविषयत्वाभावाद्भवत्ययमुपाधिरिति तत्राह । न चाहमनुभवेति । देहादौ साध्याव्यापकत्वादिति भावः । दूषणान्तरमाह । साधनविशेषितत्वादिति । साधनमिश्रितत्वादित्यर्थः ॥

किन्ततस्तत्राह । लाघवेनेति ।

लाघवेन प्रकाशविषयत्वस्यैवोक्तसाध्यव्या-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्यत्वात् । अत एव नाप्रयोजकत्वम् । लाघवतर्कस्य सत्त्वात् ।

(अहमनुभवस्यात्मत्वे गौरवम्) किं चाहमनुभवविषयस्यात्मत्वे प्रतिशरीरं सुखदुःखादिधर्मिणस्तस्य भेद आवश्यक इति गौरवं, तदतिरिक्तस्य भेदे प्रमाणाभावाल्लाघवम् । न चातिरिक्तात्मकल्पनागौरवम् । त्वयाप्यन्तःकरणात्मभेदस्वीकारात् । अहमनुभवगोचरस्यात्मत्व एव परं विवादात् । न चैवमहमनुभवगोचरस्य ज्ञानाद्याश्रयत्वानुभवविरोधः । ज्ञानाद्याश्रयस्यात्मत्वनियमग्राहकप्रमाणाभावात् । आत्मग्राह्यस्य रूपादिवदतद्धर्मत्वनियमात्तस्यानात्मधर्मत्वात् । न चैवं दुःखाद्याश्रयस्य चैतन्यसम्बन्धानुभवविरोधः । चैतन्यतादात्म्यारोपात्तदुपपत्तेः । न चात्मभेदे सिद्धे दुःखाद्याश्रयस्य तदभेदारोपविषयोऽयमनुभवस्तद्भेदस्त्वनुभवविरोधान्नानुमानात्सिध्यतीति वाच्यम् । तथा सति गौरोऽहमित्यनुभवविरोधाद्देहातिरिक्तात्मनोऽप्यसिद्ध्यापातात् ॥

उपाध्येकदेशस्य साधनस्य लाघवेनोक्तसाध्यप्रयो-
ऽजकत्वेन व्याप्यत्वनिश्चयात्पक्षसाध्यस्य निर्णयात्तत्रैवो-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पाधेः साध्यव्यापकत्वभङ्ग इत्यर्थः। तदुक्तमनुकूलेन तर्केण सनाथे सति साधने साध्यव्यापकताभङ्गात्पक्षे नोपाधिसम्भव इति। प्रमेयलाघवं चानुकूलतर्क इत्याह। किं चेति। दुःखादिधर्म्यहङ्काराद्भिन्नस्यात्मन एकत्वाल्लाघवमित्याह। तदतिरिक्तस्येति। उभयवादिसंमताहङ्कारातिरिक्तात्मकल्पनमेव गौरवग्रस्तमित्याशङ्क्याह। न चातिरिक्तेति। तर्हि मतद्वयेऽप्यन्तःकरणमात्मा चेति पदार्थद्वयाभ्युपगमान्न विप्रतिपत्तिरित्याशङ्क्य त्वदभिमतात्मन एवान्तःकरणत्वेन तदतिरिक्तचैतन्यस्यात्मत्वेन च मयाभ्युपगमान्न मतसाम्यमित्याह। अहमनुभवेति। यदुक्तं ज्ञानाद्याश्रयस्यानात्मत्वेऽनुभवविरोध इति, तदयुक्तमनात्मत्वेऽपि तदाश्रयत्वसम्भवादित्याह। न चैवमिति। प्रत्युत वैपरीत्ये मानमस्तीत्याह। आत्मग्राह्यस्येति। बुद्ध्यादिकं, नात्मधर्मः, आत्मग्राह्यत्वात्, रूपादिवत्, न चात्मत्वादौ व्यभिचारः, पक्षसमत्वादितिभावः। दुःखद्रष्टुस्तदाश्रयादन्यत्वे तदभेदानुभवो विरुध्येतेत्याशङ्कायां दहतीति वदुपपद्यत इत्याह। न चैवमिति। नन्वभेदानुभवस्य नारोपितविषयत्वम्। बाधकाभावात्। न चोक्तानुमानमेव बाधकम्। परस्पराश्रयप्रसङ्गादित्याशङ्क्य प्रतिबन्द्या दूषयति। न चात्मभेद इति। असिद्ध्यापातादिति। देहः, स्वव्यतिरिक्तद्रष्टकः, दृश्यत्वादित्याद्यनुमानादिति शेषः॥

नन्तु शरीरस्य भोक्तृत्वे तस्यानित्यत्वेन कृतहानादिप्रसङ्ग इत्यादियुक्तिसहकृतभेदप्रत्यक्षमेवाभेदप्रत्यक्षबाधकं, ततश्च नानुमानाद्देहात्मभेदसिद्धिरिति शङ्कते। मम शरीरमिति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(मम शरीरमिति प्रत्यक्षं न देहाभेदप्रत्यक्षबाधकम्।

मम शरीरमिति प्रत्यक्षं युक्तिसहकृतं देहाभेदप्रत्यक्षबाधकमिति, चेत्तर्हि दुःखिनो ममात्मेति प्रत्यक्षं तद्दृष्टकस्य दुःखादेरतद्धर्मत्वनियमग्राहकयुक्तिसहकृतं दुःखाद्याश्रयस्यात्माभेदप्रत्यक्षबाधकमस्तु । दुःखाद्याश्रयस्यैव ममेति प्रतीतिविषयत्वादन्तःकरणावच्छिन्नचैतन्यस्यापि मम प्रतीतिविषयान्तःकरणादन्यत्वात्। न चैवं ममान्तःकरणमिति प्रतीत्यनुपपत्तिः। तव मते ममात्मेति प्रत्ययवद्राहोः शिर इति वद्भेदोपचारात्। न च वैपरीत्यापतिः। आत्मनोऽहमनुभवगोचरदुःखाद्याश्रयाभेदगौरवस्य बाधकत्वात् ।

ममात्मा ममान्तःकरणमिति प्रतीत्योरयथार्थत्वम्)

अथ वा ममात्मा ममान्तःकरणमिति प्रतीतिद्वयस्य भेदांशे बाधकाभावादयथार्थत्वम् । न च ममताधिकरणत्वादुभयोरपि भेदानुपपत्तिः। ममता ह्यन्तःकरणचैतन्ययोरविद्ययैकतामापन्नयोर्धर्मः, तद्भेदमेव ममान्तःकरणमात्मेति प्रतीत्या विषयीक्रियत इति न बाध्यते ॥

तुल्यमुत्तरमित्याह । तर्हीति । ननु ममात्मेति शरी-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रात्मनोर्भेदः प्रतीयत इत्यत आह । दुःखाद्याश्रयस्येति । ननु चिदचित्समुदायस्याहमर्थतया ममप्रतीतेरपि तद्विषयत्वेनात्मनस्ततोभेदानुभवो भ्रम एवेति तत्राह । अन्तःकरणावच्छिन्नेति । मतद्वयेप्यहमिति प्रकाशविषयस्यैव ममताधिकरणत्वान्मम मते चान्तःकरणस्यैव तादृक्त्वान्ममात्मेति तद्भेद एवात्मनः प्रतीयत इति मुख्य एवायमनुभव इत्यर्थः । नन्वन्तःकरणस्यैव ममताधिकरणत्वे ममान्तःकरणमित्यन्तःकरणस्य तद्भेदानुभवो नुपपन्न इत्याशङ्क्यान्यथोपपत्तिमाह । न चैवं ममेति । नन्वस्यौपचारिकत्वे ममात्मेत्यनुभव एवौपचारिको ऽस्तु, ममान्तःकरणमिति तु मुख्य एव किन्न स्यादित्याशङ्क्य ममताधिकरणस्यात्मत्वे गौरवात्तद्भेदानुभवो मुख्य इत्याह । न च वैपरीत्येति । किं चाहङ्कारात्मभेदवादे ऽनुभवद्वयस्यापि प्रामाण्यमुपपद्यत इत्याह । अथ वेति । नन्वात्मनो ऽन्तःकरणस्य वैकस्य ममताधिकरणत्वात्ततः कथमुभयाभेद इत्याशङ्क्य ममताया उभयधर्मत्वात्तदधिकरणप्रतियोगिकभेद उभयोरप्यविरुद्ध इत्याह । न च ममेति । आत्मेति । ममात्मेति प्रतीत्यर्थः ॥

ममताया उभयधर्मत्वेप्युभयप्रतियोगिकभेद एकस्यानुपपन्नः, स्वप्रतियोगिकभेदस्य स्वस्मिन्नसम्भवादित्याशङ्क्यानुभवद्वयस्याप्येकैकप्रतियोगिकभेदविषयत्वेनोपपत्तिमाह । नचैवमिति ।

नचैवं सम्पिण्डितोभयस्यैव ममताधिकरणत्वात्कथं तदेकदेशभेदप्रतीतिरबाधिता स्यादिति वाच्यम् । सामान्यतोदृष्टानुमाने वस्तुतो ऽबाधितविषयस्येव सामान्येन सामान्य-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भावाभाववादे विशेषभेदस्यैव सामान्येन ममेत्यनेन रूपेण तदधिकरणैकदेशभेदस्यैव तद्बुद्धिविषयत्वाद्विनिगमनाभावेनानयोः प्रतीत्योर्गत्यन्तराभावात् । अत एवाहमर्थस्य द्विरूपत्वमाहुः । निपुणतरञ्चैतदुपपादयिष्यते । न च ममान्तःकरणमिति धीरहङ्कारातिरिक्तान्तःकरणविषया, ममात्मेति बुद्धिस्तूपहिताहङ्कारात्मभेदविषयेति वाच्यम् । परमते कथमपि तत्प्रतियोगिकतदधिकरणभेदाभावाच्छबलस्यैवाहम्पदार्थत्वप्रसङ्गाच्च । ममात्मा दुःखीति दुःखाश्रयतयानुभूयमानस्यौपाधिकात्मप्रदेशादन्यत्वायोगाच्चौपाधिकात्मप्रदेशस्यैव दुःखाद्याश्रयत्वात् ।

(ममात्मेति बुद्धि-नैश्वरविषया) अत एव ममात्मेति बुद्धिरीश्वरविषयेति निरस्तम् । ममात्मा दुःखी तवात्मा सुखीत्यन्योन्यं व्यावृत्ततयानुभूयमानस्यानौपाधिकत्वाच्च ॥

यथा शब्दो द्रव्याश्रितः । गुणत्वादित्यनुमानेन वस्तुत आकाशस्यैव सामान्याकारेण विषयत्वम् । यथा वा रूपं न भवति रस इत्यनुभवे नीलरूपादीनामेव रूपत्वेन भेदप्रतियोगित्वमेवं ममात्मेति भेदप्रतीतौ ममत्वसामा

न्याकारेणान्तःकरणस्यैव प्रतियोगितया विषयत्वं, ममान्तःकरणमित्यत्र त्वात्मन एवेति न विरोध इत्याह। सामान्यत इति। अन्यतराप्रामाण्ये कारणाभावादेवमेवोभयप्रामाण्यं निर्वहणीयमित्याह। विनिगमनेति। अभियुक्तानामहम्पदार्थस्य द्विरूपत्वाभिधानमुभयप्रामाण्यलिङ्गमित्याह। अत एवेति। नन्वहङ्कारात्मवादेऽप्यनुभवद्वयस्य प्रामाण्यमुपपद्यते, ममात्मेति प्रतीतेः शरीरावच्छिन्नाहङ्कारप्रतियोगिकतदनवच्छिन्नतद्धर्मिकभेदविषयत्वेन याथार्थ्यादिति तत्राह। न च ममेति। औपाधिकभेदस्य पारमार्थिकत्वस्यासम्भवादनिर्वचनीयस्य त्वयानङ्गीकारात्त्वन्मते अप्रामाण्यमेव स्यादित्याह। परमत इति। किं च देहाद्यवच्छिन्नस्य मम प्रतीतिगोचरत्वे तस्यैवाहम्पदार्थत्वेन तस्यानेकार्थत्वापात इत्याह। शबलस्यैवेति। किं च ममात्मेति प्रतीयमानभेदधर्मिणो ऽनुपहिताहङ्काररूपत्वे तस्य दुःखित्वानुभवो विरुध्येतेत्याह। ममात्मेति। भेदधर्मिणि दुःखानुभवादेवेश्वरविषयत्वेन प्रामाण्यं दुर्घटमित्याह। अत एवेति। भेदधर्मिणो नानात्वादीश्वरस्यैकत्वान्न तद्विषयो ऽयमनुभव इत्याह। ममात्मेति ॥

एवं भेदप्रत्यक्षेण दुर्बलाभेदानुभवस्य बाधितत्वेन भ्रमत्वात्प्रकृतानुमानस्य साम्राज्यमित्याह। तस्मादिति।

(प्रत्यक्षस्य नात्मानुमानबाधकत्वम्) तस्मात्प्रत्यक्षत एव दुःखाद्याश्रयादात्मभेदानुभवः कल्पिताभेदविषय इत्यनुमानं न बाधते। अनुमानमप्युक्तयुक्तिसहकृतं गगननीलिमप्रत्यक्षस्येव दुःखाद्याश्रयात्माभेदप्रत्य-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षबाधकम् । अत एवाहङ्कारस्यानात्मत्वेऽप्यहं मुक्तः स्यामिति प्रवृत्तिर्न विरुध्यते । अहमनुभवे प्रकाशमानस्य चिदात्मनो मुक्त्यर्थप्रवृत्त्युपपत्तेः । दुःखाद्याश्रयाहङ्कारस्यैवात्मत्वे निरतिशयसुखार्थिनो मुमुक्षोः प्रवृत्त्यसम्भवः । दुःखाभावस्यापुरुषार्थत्वात् । आत्मातिरिक्तनित्यसुखे प्रमाणाभावात् ॥

किं च तर्कोपोद्बलितस्यानुमानस्य प्रत्यक्षबाधकत्वं गगननीरूपत्वानुमाने दृष्टं, प्रकृतानुमानस्यापि लाघवादितर्कानुगृहीततया प्रबलत्वेनात्माभेदप्रत्यक्षबाधकत्वमित्याह । अनुमानमपीति । यदुक्तमहमर्थस्यानात्मत्वे तन्मुक्त्यर्थप्रवृत्त्यनुपपत्तिरिति । तदप्यहमर्थस्य द्विरूपाभिधानादेव निरस्तमित्याह । अत एवेति । प्रत्युत तव मत एव मुमुक्षुप्रवृत्त्यनुपपत्तिः । निरतिशयसुखस्य मुमुक्ष्वभिलपितत्वात्, दुःखाद्याश्रयाहङ्कारे तदयोगादित्याह । दुःखाद्याश्रयेति । ननु दुःखाभावार्थमेव प्रवृत्तिः किन्न स्यादिति तत्राह । दुःखाभावस्येति । दुःखस्य सुखाभिव्यक्तिविरोधित्वेन तदभावः सुखाभिव्यक्तिशेषतया कचिदिष्यते इतरथोभयोरपि पुरुषार्थत्वे गौरवादित्यर्थः । तर्ह्यहङ्कारधर्मनित्यसुखाभिव्यक्तिरेव मुक्तिरिति भट्टमतमाशङ्क्याह । आत्मातिरिक्तेति । एतच्चानन्दवादे निपुणतरमुपपादयिष्यते ॥

हेतूच्छित्तिरपि विपक्षे बाधकस्तर्क इति वक्तुं प्रथममहङ्कारस्य दृश्यत्वमनुभवसिद्धमित्याह । किं चेति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(अहङ्कारस्य दृश्यत्वमानुभविकम्) किं च मामहं जानामीति ज्ञानविषयत्वमहङ्कारस्यानुभूयते । तच्च न ताव त्स्वसमवेतजन्यज्ञानविषयत्वम् । निरवयवात्मनि संयोगाभावेन सामग्र्यभावात् । नाप्यहङ्कारधर्मो नित्यं ज्ञानमस्ति । आत्मातिरिक्तनित्यज्ञाने प्रमाणाभावात् । न च विषयस्य स्वप्रकाशत्वं सम्भवति । स्वविषयत्वं स्वप्रकाशत्वमित्यस्य निरसिष्यमाणत्वात् । अत एव न द्वितीयहेत्वसिद्धिः । तथाद्यहेतूच्छित्तिरपि बाधिका ॥

एतच्चाहङ्कारस्य दृश्यत्वं मानसप्रत्यक्षविषयत्वेनोत, स्वसमवेतनित्यज्ञानविषयत्वेन, किं वाहङ्कारस्य स्वप्रकाशत्वेनेति विकल्प्य क्रमेण दूषयति । तच्च न तावदित्यादिना । निरवयवेति । संयोगस्य प्रदेशवृत्तित्वान्निरवयवात्ममनसोस्तदभावादिति वक्ष्यमाणन्यायेनेत्यर्थः । दृश्यत्वादेव स्वप्रकाशत्वानधिकरणत्वादिति हेतुः सिद्ध इत्याह । अत एवेति ॥

उक्तसाध्ये एव पुनरपि हेतुद्वयमाह श्लोकेन । किं चेति ।

(उक्तानुमाने एवान्यहेतुनिरूपणम्) किं चाहमिति बोधस्य विषयो न स्वबोधकः । विनाशप्रतियोगित्वान्मितत्वाच्च घटादिवत् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न चासिद्धिः । "[1] स्वमपीतो भवति" इति श्रुत्या सुषुप्तौ तस्य लयश्रवणात् । अपि पूर्वस्येतेर्लयार्थत्वात् । न च ज्ञानस्यैव लयः । "[2] यत्रैतत्पुरुषः स्वपिति नाम" इति प्रक्रान्तपुरुषप्रतियोगिकत्वात्तस्य । न च जीवस्य स्वरूपेण विलयोऽस्ति । प्रत्यभिज्ञानविरोधात् । कृतहानाकृताभ्यागमप्रसङ्गात् । सत्सम्पत्तिविरोधाच्च । उपाधिलये तु जीवस्य तदभेदाभिमानिनोऽपि लयो भवति । सत्सम्पत्तिवाक्यानुसारेण पुरुषलयवाक्यस्य तथैवार्थवर्णनात् । उपाधिश्चाहमनुभवगोचर एवेति तस्य विलयः । अन्यथा जाग्रतीव सुषुप्तावप्यहमाकाराधीः स्यात् । न च सास्ति । अन्यथाहमित्यभिमन्यमान एव स्वाप्समिति तदभिमानपरामर्शप्रसङ्गात् । तस्यानुभवनियमात् ॥

मितत्वात्परिमितत्वादित्यर्थः । अहङ्कारस्य नित्यतायां हेतुरसिद्ध इत्याशङ्क्याह । न चासिद्धिरिति । ननु स्वमपीतो भवतीति स्वरूपप्राप्तिरेवोच्यते न तु लय इति तत्राह । अपिपूर्वस्येति । इतेः, इणगताविति धातोः । "[3] यदा

---

१ छान्दोग्योपनिषदि ६ प्र० । ८ खं० । १ कं० ।
२ छान्दोग्योपनिषदि ६ प्र० । ८ खं० । १ कं० ।
३ छान्दोग्योपनिषदि ४ प्र० । ३ खं० । १ कं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वा अग्निरुद्वापयति वायुमेवाप्येति" इत्यादिषु लयार्थत्वदर्शनादित्यर्थः । ननु सुषुप्तौ विज्ञानस्यैव लयो न तु कर्त्तुरित्याशङ्क्याह । न ज्ञानस्यैवेति । एवमपि कथमहङ्कारस्य विलय इत्यत आह । न च जीवस्येति । प्रत्यभिज्ञानेति । यो ऽहं सुप्तः सो ऽहं जागर्मीत्यादिविरोधादित्यर्थः । किञ्च जीवस्य स्वरूपनाशे "[1]सता सोम्य तदा सम्पन्नो भवति" इति श्रुतिविरोध इत्याह । सत्सम्पत्तीति । कथं तर्हि पुरुषलयाभिधानं तत्राह । उपाधिलय इति । यथा कलाक्षय एव चन्द्रक्षयशास्त्रार्थ एवं पुरुषलयशास्त्रस्यापि तदुपाधिलय एवार्थः । ननु चन्द्रस्यामावास्यायां सूर्य्यसङ्गत्यभिधानात् क्षयवचनं कलाविषयमित्याशङ्क्य तुल्यमुत्तरमित्याह । सत्सम्पत्तीति । वर्णनादिति । वर्णनस्य युक्तत्वादित्यर्थः । तथापि तटस्थस्य कस्यचिदुपाधेर्लयः किं न स्यादित्याशङ्क्य तटस्थोपाधिलयेऽप्युपहिते लयबुद्ध्यदर्शनाज्जीवतादात्म्यापन्न एवोपाधिर्वक्तव्यः, स चाहङ्कार एवेत्याह । उपाधिश्चेति । स्थूलदेहस्य जाग्रत्स्वप्नयोरैक्याभावान्न स उपाधिरित्याह । एवेति । अहङ्कारलयानङ्गीकारे बाधकमाह । अन्यथेति । सुषुप्तावप्यहमनुभवाङ्गीकारे तस्यापि परामर्शः स्यादित्याह । अन्यथाहमित्यभिमन्यमान इति । अनुभवन्नेवेत्यर्थः ॥

नन्वनुभवस्याजातत्वान्न तत्परामर्श इत्याशङ्क्य तस्यानुभवनियमादिति तदुपपादयति । जाग्रतीति ।

(परामर्शस्यानुभवपूर्वकत्वम् ।) जाग्रति तदनुभवतया निर्णीतचैतन्यस्य तदादि सत्त्वात्, सुषुप्तौ चैतन्याभावे सुखादि

[1] छान्दोग्योपनिषदि ६ प्र० । ८ खं० । १ मं० ।

परामर्शस्याप्यभावापातात् । न चैवं प्रत्यभिज्ञा-विरोधः । अहमनुभवे प्रकाशमानचैतन्यस्य तद्विषयस्यावस्थात्रयेप्यनपायात् । उपाधावहङ्कारे प्रत्यभिज्ञानस्य वर्णध्वनिविषयप्रत्यभिज्ञानवज्जातिविषयत्वात् । व्यक्तिविषयत्वे बाधकस्योक्तत्वात् । न चैवमधिकरणविरोधः । तस्य सूक्ष्मरूपेण तदा तदवस्थानविषयत्वात् । अन्यथोदाहृतश्रुत्या सुषुप्तिकाले सकले विलीन इति कार्यमात्रविलयश्रुत्या च विरोधप्रसङ्गात् । अहं निर्दुःखः स्यामिति प्रवृत्तिरप्यहमनुभवे प्रकाशमानस्य चिदात्मनोऽध्यासाद्दुःखाश्रयस्य दुःखाभावार्थमिति न विरुध्यते । किं च दुःखाभावस्यापि सुखशेषत्वादहङ्कारे सुषुप्तौ दुःखाभावजन्यसुखासम्भवान्नित्ये धर्मरूपे तस्मिन्मानाभावाच्च । स्वरूपसुखाभिव्यक्त्यर्थमेव दुःखाभावकामनया सुषुप्तौ प्रवृत्तिः, स चाहङ्कारात्मवादे नोपपद्यते । न चानुभवस्मरणयोर्वैयधिकरण्यं, कृतहानाकृताभ्यागमो वा । सुषुप्तावपि सूक्ष्मरूपान्तःकरणावच्छिन्नचैतन्यस्य सत्त्वात्, तावतैवातिप्रसङ्गविरहात् । सर्वज्ञेश्वरस्यसङ्कीर्णफलदातृत्वोपपत्तेश्च ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वैशेषिकादिमतानुसारिणं प्रत्याह । सुषुप्ताविति । सुषुप्तावहङ्कारनाशे तदुपहितस्य सोऽहमिति प्रत्यभिज्ञाविरोध इत्यत आह । न चैवमिति । तद्विषयस्य । प्रत्यभिज्ञाविषयस्य । तर्ह्यहङ्कारांशे निर्विषयः स्यादिति तत्राह । उपाधाविति । यथा वैशेषिकादिमते स एवायं गकार इति प्रत्यभिज्ञा जातिविषया, अथवा भट्टमते ध्वनिविषया, तथा सावपीत्यर्थः । व्यक्तिविषयत्वे सुषुप्तौ लयश्रवणाद्यनुपपत्तिरित्याह । व्यक्तीति । ननु "[1]तदापीतेः संसारव्यपदेशात्" इत्यधिकरणे मोक्षपर्यन्तं लिङ्गदेहस्यानोक्तेः कथं स्वापे लय इति तत्राह । न चैवमिति । श्रुतिसूत्रयोर्विरोधे श्रुत्यनुरोधेन सूत्रं नेयमित्यभिप्रायेणाह । अन्यथेति । यदुक्तं सुषुप्तावहमर्थस्य नाशे तद्दुःखाभावार्थप्रवृत्त्यनुपपत्तिरिति तत्राह । अहं निर्दुःख इति । ननु चिदात्मनो दुःखानाश्रयत्वात्तस्य दुःखाभावो नार्थनीय इत्याशङ्क्य दुःख्यहङ्कारतादात्म्यारोपाद्दुःखप्रसक्तेस्तदभावप्रार्थनेत्यभिप्रेत्याह । अध्यासादिति । अपि च दुःखेन विना सुखी स्यामिति कामनादर्शनात्सुखशेषतयैव दुःखाभावे प्रवृत्तिः, सा च त्वन्मत एवानुपपन्नेत्याह । किं चेति । यच्चोक्तं निश्यहङ्कारनाशेऽस्मर्तृत्वाद्यनुपपत्तिरिति तत्तदापि सूक्ष्मरूपाङ्गीकारान्निरस्तमित्याह । न चानुभवेति । ननु सूक्ष्माद्भिन्नस्य स्थूलस्य तदनुभूतार्थस्मर्तृत्वेऽतिप्रसङ्ग इत्यत आह । तावतैवेति । स्थूलसूक्ष्माकारभेदेऽपि धर्म्यैक्यान्नातिप्रसङ्ग इत्यर्थः । स्थूलरूपस्य नाशात्तत्कृतकर्मनाशेऽपि तदुपहित एव जीवे कालान्तरेऽपि सेवादिफलवदीश्वरदातृकं नियतं भविष्यतीत्याह । सर्वज्ञेति ॥

[1] ब्रह्मसूत्रम् अ० । ४ । पा० । २ । सू० ८ ।

ननु किमिदं सूक्ष्मत्वं ? कारणात्मतापत्तिरिति चेत्, कोर्थः ? किं कारणमेव वर्तते कार्यमपि ? आद्ये नान्तःकरणसत्त्वं, द्वितीये न जाग्रदवस्थातो विशेष इति तत्राह । सूक्ष्मता चेति ।

(अनिर्वचनीयत्वेऽपि सूक्ष्मता कार्यमात्रस्य) सूक्ष्मता च विशिष्य निर्वक्तुमशक्याप्यसत उत्पत्त्यनुत्पत्त्या "[1]असद्वा इदमग्रआसीत्" इति श्रुत्या च कार्यमात्रस्यावश्याभ्युपेया । अनभिव्यक्तरूपस्यैवासच्छब्दार्थत्वात् । अन्यथासीदिति विरोधात् । अत एवानिर्वचनीयं विश्वमिति तत्त्वविदां स्थितिः ॥

सूक्ष्मताया अनिर्वचनीयत्वेन भेदाभेदाभ्यां दुर्निरूपत्वमनुकूलमेव । न च तत्र मानाभावः । सतो ऽसतोवोत्पत्त्यनुत्पत्त्या ऽसद्वा इदमिति श्रुत्याच तदवगमादित्यर्थः। नन्वसदिति कार्यस्यासत्त्वमेवोच्यते न तूक्तसूक्ष्मरूपत्वं तत्राह । अनभिव्यक्तेति । तुच्छत्वपक्षे बाधकमाह । अन्यथेति । अग्र आसीदिति पूर्वकालसम्बन्ध इदमसदित्यस्य कार्यस्यासदैक्यं चानिर्वचनीयसूक्ष्मरूपमन्तरेणानुपपन्नमित्यर्थः । दुर्निरूपत्वादेव कार्यरूपमप्यनिर्वचनीयमित्याह । अत एवेति ॥

एवमहङ्काराविच्छिन्नात्मनः परामर्शाश्रयत्वमिति मते सुषुप्तिकालीनानुभवसामानाधिकरण्यं परामर्शस्योपपादितमिदानीमविद्यावच्छिन्नस्येति मते तस्याश्रयस्यात्रयेप्यनपायान्न चोद्यावकाश इत्याह । परामर्श इति ।

[1] तैत्तिरीयकोपनिषदि । २ प० । ७ खं० । १ कं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(अविद्यावच्छिन्नस्य परामर्शः) परामर्शो ऽविद्यावच्छिन्नस्यैवेति केचित्, अहमिहैवास्मीत्यनुभवात्, परिच्छिन्नत्वस्यापि नासिद्धिः। न चैतस्याप्रयोजकत्वम्। परिच्छिन्नस्यात्मशब्दार्थत्वव्याघातात्। न चात्मत्वमेव तदर्थः। आत्मनानात्वसिद्धेः पूर्वं तज्जातेरसिद्धेस्तस्य चाद्याप्यसिद्धत्वात्। नानात्मकल्पने गौरवाच्च ॥

मितत्वहेतोरसिद्धिं परिहरति। अहमिहेति। न च देहपरिच्छेदविषयो ऽयमनुभव इति वाच्यम्। अहमिहैवास्मि जानन इति परिच्छिन्नस्य ज्ञानाश्रयत्वानुभवादिति भावः। आत्मनो ऽणुत्वात् परिच्छिन्नत्वमात्मत्वेप्युपपद्यत इत्यत्राह। न चेति। यच्चास्य सन्ततो भावस्तस्मादात्मेति गीयत इति वचनाद्युत्पत्तेश्च परिच्छिन्नस्यात्मशब्दार्थत्वं व्याहतमित्यर्थः। आत्मत्वजातेरात्मपदार्थत्वान्न विरोध इत्याशङ्क्यासिद्ध्या दूषयति। न चात्मत्वमेवेति। गौरवाच्च न जातिरर्थ इत्याह। नानात्मेति ॥

स्वमते परामर्शमुपपाद्य परमते तस्यानुपपत्तिं वक्तुमनुवदति। यत्तु सुखमिति।

(परमते परामर्शानुपपत्तिः) यत्तु सुखमहमस्वाप्समिति परामर्शो ऽहङ्कारविषय इति। तदसत्। सुषुप्तौ कादाचित्काहङ्कारानुभवस्यासम्भवात्। नित्यस्यात्मान्यस्याभावात्। विषयस्य चास्वप्रकाशत्वादि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्युक्तत्वात् । न चानुभवादृते परामर्शः सम्भवति । सुषुप्तावहङ्कारानुभवे जाग्रतीवाहमित्यनुभूयेताविशेषात् । चिद्रूपात्मात्वावृतत्वादभिव्यञ्जकान्तःकरणाभावाच्च न तदा विशिष्य प्रकाशते । तस्मादहमिति ज्ञानविषयो न स्वद्रष्टा, तस्मिन्प्रकाशमानेप्यप्रकाशमानत्वात्, घटादिवत् । न चासिद्धिः । अहमाकारानुभवस्य सुषुप्तावननुभवपराहतत्वात् । सुखमहमस्वाप्समिति चाहङ्काराश्रय एव विषयात्माभेदारोपाद्विषयतया प्रतीयते । अहङ्कारांशज्ञानस्मृतित्वे कारणाभावस्य बाधकस्योक्तत्वात् । न चास्याभाससमता । अनुकूलतर्कयुक्तत्वात् । अहङ्कारातिरिक्तात्मनः सिद्धसिद्धिपराहतत्वात्तस्य ॥

सुषुप्तावहङ्कारानुभवेन तत्परामर्शःस्यात्तदनुभवश्च किं जन्यज्ञानमुत नित्यमथवा स्वप्रकाशरूपो ऽहङ्कार एव सर्वथाप्यसम्भव इत्याह । तदसदित्यादिना । सुषुप्ताव हङ्कारानुभवो ऽनुपलब्धिपराहतश्चेत्याह । सुषुप्ताविति । ननु स्वप्रकाशचिद्रूपात्मनस्तदा सत्त्वात्त्वन्मते ऽहमेतादृश इत्यनुभवः किं न स्यादिति तत्राह । चिद्रूपेति । एवमाचार्यानुमानमपि निरवद्यमित्याह । तस्मादिति । अत्र प्रकाशमानत्वं प्रकाशप्रयुक्तसंशयाद्यगोचरत्वं तदभावो ऽप्रकाशमानत्वं सुषुप्तौ चाहङ्कारसंशयाभावो न तत्प्रकाशप्रयुक्तस्तदा तदभावात्तन्निरूपितप्रकाशस्याप्य-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भावात्, किं तु धर्मिज्ञानादिविरहादिति न विशेष्यासि-द्धिः । न च ब्रह्मणि व्यभिचारः । स्वव्यवहारहेतुप्रकाशाना-श्रयत्वस्य प्रकाशात्मकब्रह्मण्यपि सत्त्वात् । न च विशेषण-वैयर्थ्यम् । अहङ्कारस्यात्माभेदे तत्प्रकाशदशायामप्रका-शमानत्वस्यायोगादिति हेतोरप्रयोजकत्वनिरासार्थत्वा-दिति पराभिमतात्मत्वनिषेधान्न निषेध्याप्रसिद्धिर्दोषायेत्युक्तमित्यहङ्कारस्याननुभवे कथं परामर्शविषयत्वप्रती-तिरित्याशङ्क्य विषयात्माभेदारोपादित्याह । सुखमह-मिति । अहङ्कारश्चासौ परामर्शस्याश्रयो ऽहङ्काराश्रयः । कारणाभावस्येति । पूर्वानुभवाभावस्येत्यर्थः । ननु त्वद-भिमत आत्मा स्वव्यतिरिक्तद्रष्टको वस्तुत्वादित्याभास-समता भेदानुमानस्येत्याशङ्क्य वैषम्यमाह । न चास्येति । आभासानुमानस्य धर्मिग्राहकबाध आश्रयासिद्धिर्वा दोषः, स चात्र नास्तीत्याह । अहङ्कारेति ॥

अहङ्कार आत्मा ज्ञानाश्रयत्वादिति यदुक्तं, तदप्य-प्रयोजकं, भेदानुमानस्यानुकूलतर्कयुक्तत्वादित्याह । अत-एवेति ।

(अहङ्कारस्यात्मत्वसाधकानुमान-प्रतिक्षेपः) अतएव प्रतिपक्षानुमानमप्यप्रयोजकम् । अस्मन्मते सपक्षे ब्रह्मणि हेतोरभावेनासाधारण्यमसिद्धिर्वा । न च द्वितीये साध्ये जीवान्तरेणेश्वरेण वार्थान्तरता । तद्भेद-निराकरणार्थत्वादेतस्य । अहमनुभवे प्रकाश-मानः स्वव्यतिरिक्तद्रष्टक इति वा साध्यम् । अपि चास्ति तावन्नीलोत्पलपलाशश्यामलमरविन्द-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लोचनमिन्दिरारमणमनवरतमनुचिन्तयतामा-प्रहरं घटादिज्ञानधारावतामपि तावत्कालीन-चित्तवृत्तिगोचरं तावत्कालीनात्मगोचरञ्चानुस-न्धानमेतावन्तं कालमिदमनुभवन्नेवासमिति । तत्कथमहङ्कारात्मवादे सङ्गच्छताम् । धाराम-ध्यपतिततत्तद्विज्ञानानां तत्तत्कालीनात्मनश्च पूर्वकालीनानुभवगोचरत्वेनेदानीमनुसन्धानानु-पपत्तेः । न च सामान्यप्रत्यासत्त्या तदनुभवः । तदाश्रयव्यक्तेरसन्निकर्षात् । न च स्मरणानुव्य-वसाय एव तदाश्रयो ऽस्तीति वाच्यम् । अद्रा-क्षमित्यादौ तदभावात् । अतिप्रसङ्गात् सामा-न्यप्रत्यासत्तेर्निरसिष्यमाणत्वात् । इदानीमसतां च तेषामनुव्यवसायायोगाच्च ॥

किञ्च ज्ञानपदेन जन्यं ज्ञानं विवक्षितमुताजन्यम् । आद्ये ऽसाधारणता, द्वितीये पक्षे ऽसिद्धिरित्यभिप्रेत्याह । अस्मन्मत इति । स्वव्यतिरिक्तद्रष्टृक इति साध्यमात्म-नानात्वेप्युपपन्नमित्याशङ्क्य लाघवतर्कविरोधान्मैवमि-त्याह । न च द्वितीय इति । देवदत्तो ऽहमनुभवविषयस्त-स्यैवाहमनुभवे प्रकाशमानस्य व्यतिरिक्तद्रष्टृक इति विव-क्षितत्वाद्वा नार्थान्तरतेत्याह । अहमनुभव इति । एवम-हङ्कारातिरिक्तमात्मानं प्रसाध्य तस्यावस्थात्रयसाक्षिचै-तन्यात्मकतां वक्तुं ज्ञानधारानुसन्धानानुपपत्त्या स्वतन्त्र-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानं निरूपयति । अपि चेति । मानसस्य चाक्षुषस्य वा बाह्यविषयस्य धारावाहिकज्ञानस्य तत्कालीनाहमर्थस्य वानुसन्धानं दृश्यते, एतच्च तत्तत्कालीनस्वसमानविषयानुभवमन्तरेणानुपपन्नं, तदनुभवश्च वेद्यज्ञानवादे ऽनुपपन्नस्तस्माद्धाराकालीनः स्वतन्त्रो ऽनुभव एषितव्य इत्यर्थः । ननु धारान्तिमज्ञानगतघटज्ञानस्य सामान्यप्रत्यासत्तिजन्यमिदं ज्ञानं तावज्ज्ञानगोचरमनुव्यवसायरूपं न तदनुसन्धानमित्याशङ्क्य घटिकादिव्यवधानेप्यस्यदर्शनान्नायमनुभव इत्याह । न च सामान्येति । समयान्तरे घटस्मरणे सति तदनुव्यवसायो जायते । तत्र घटानुभवत्वस्य सत्त्वात्तत्प्रत्यासत्त्या धारानुभव इति तत्राह । न च स्मरणेति । अद्राक्षमिति स्मरणानुव्यवसाये चाक्षुषत्वाभावाद्धारागतचाक्षुषत्वानुसन्धानं न स्यादित्यर्थः । किञ्च जन्मान्तरीयघटज्ञानस्यापि प्रत्यासत्त्याश्रयत्वात्तस्याप्यनुसन्धानप्रसङ्गः । न चेष्टापत्तिः । एतावन्तं कालमिति विशेषणायोगादित्यभिप्रेत्याह । अतिप्रसङ्गादिति । सामान्यस्य प्रत्यासत्तित्वमपि नास्तीत्याह । सामान्येति । असन्निकृष्टानुव्यवसायं निराकरोति । इदानीमिति ॥

ननु तत्तज्ज्ञानानां तत्तदनन्तरभाविमानसज्ञानविषयत्वात्समयान्तरे ऽनुसन्धानमिति चोदयति । नन्विति ।

(समयान्तरे ऽनुसन्धानस्य चोद्यपरिहारौ) ननु तत्तज्ज्ञानानन्तरमेवोत्पन्नानुव्यवसायात्मज्ञानाभ्यां संस्काराधानादिदानीमनुसन्धानं स्यादिति चेन्न । तथासति विजातीयज्ञानव्यवधानेन ध्यानत्वादेरनुपपत्तेः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेद्यज्ञानवाद उत्पन्नस्य ज्ञानस्यावश्यवेद्यत्वाभावेन मध्ये ऽनुव्यवसायकल्पनायोगाच्च । जिज्ञासितश्रीवेङ्कटाचलनायककमनीयलीलाविग्रहबुद्धिधारासामग्र्यां सत्यामपि मानसज्ञानकल्पनायां सर्वत्र बाह्यज्ञानविलोपप्रसङ्गात् । ज्ञानधारानुपरमप्रसङ्गाच्च । ननु यज्ज्ञानमुद्भूतं तदेव ग्राह्यमनुद्भूतं त्वयोग्यत्वादग्राह्यमिति ज्ञानधाराविच्छेद इति चेन्न । ज्ञानानुद्भूतत्वे प्रमाणाभावादनुद्भूतत्वस्य मूर्तविशेषगुणमात्रवृत्तित्वाच्च । एकव्यक्तेर्गुणत्वावान्तरजात्यैकजातिमदुद्भूतानुद्भूतानाश्रयत्वनियमेनात्मन उभयविधज्ञानानुपपत्तेश्च । न च निर्विकल्पकमेवानुद्भूतं ज्ञानं, तर्हि तद्विषयविशिष्टज्ञानमावश्यकं सामग्रीसत्त्वात् ॥

धारानुपपत्त्या दूषयति । नेति । ज्ञायमानसत्ताकत्वनियमाभावान्मध्ये ऽनुव्यवसायनिगमे प्रमाणाभाव इत्याह । उत्पन्नस्येति । किञ्च जिज्ञासितबाह्यज्ञानसामग्रीस्थले मध्ये आन्तरज्ञानकल्पने आन्तरज्ञानसामग्रीत्वेनैव बलवत्त्वं वाच्यं, तथा च धाराविच्छेदो ऽनुव्यवसायानुपरमश्च स्यादित्याह । जिज्ञासितेति । अनुव्यवसायोपरम इति शङ्कते । ननु यज्ज्ञानमिति । किमनुद्भूतत्वमुद्भूतत्वाभावो जातिविशेषो वा निर्विकल्पकत्वं वा । आद्य

उद्भूतत्वस्य मूर्तविशेषगुणमात्रनियततया तदभावस्य शब्दादिसाधारणतया प्रत्यक्षत्वाप्रतिबन्धकत्वात् । न द्वितीयः सविकल्पकज्ञानमात्रस्य प्रत्यक्षत्वयोग्यतया तादृशजातिसत्त्वे मानाभावादित्याह । न ज्ञानेति । अनुद्भूतत्वस्य जातित्वे ऽपि रूपादिनिष्ठमेवेत्याह । अनुद्भूतत्वस्येति । किञ्च यस्मिन्नात्मन्यनुद्भूतं ज्ञानं वर्त्तते तस्मिन्नुद्भूतज्ञानसमवायो न स्यादित्याह । एकव्यक्तेरिति । प्रदीपप्रभादेर्गुणत्वेन सजातीयोद्भूतानुद्भूतगुणद्वयाश्रयत्वं दृष्टं तद्व्यावृत्त्यर्थं गुणत्वावान्तरेति । न चैकस्मिन् परमाणौ तादृशगुणद्वयमस्तीति वाच्यम् । परमाणूनामेवासत्त्वात्, सत्त्वे च तद्गुणेष्वनुद्भूतत्वे मानाभावात्, तदप्रत्यक्षत्वस्यान्यथाऽपि सम्भवादिति भावः । तृतीयं दूषयति । न चेति । ज्ञानविषयनिर्विकल्पकाङ्गीकारे ज्ञानविषयसविकल्पकमावश्यकं तत्सामग्रीसत्त्वादन्यथा निर्विकल्पकस्याप्यभावापातादित्याह । तर्हीति ॥

असमवायिकारणोपरमादनुव्यवसायोपरम इति शङ्कते । ननु संयोगेति ।

(संयोगविशेषस्यानुव्यवसायहेतुत्वखण्डनम्) ननु संयोगविशेषो ऽनुव्यवसायहेतुरिति तद्विच्छेदादेव तद्विच्छेद इति चेत्, किं संयोगविशेषोजातिरुत वाह्यज्ञानजननायोग्यत्वमुपाधिः । नाद्यः, साह्यन्यतरकर्मप्रयोज्या वाच्या, आत्ममनः संयोगे ऽन्यस्या असम्भवात् । सा च सर्वात्ममनः संयोगसाधारण्येवेति न तद्विरहाद्विज्ञानविरहः । नापि तद्व्याप्यजाति-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विशेषः। तत्प्रयोजकाभावान्मानाभावाच्च। द्वितीयेऽनुव्यवसायमात्रोच्छेदप्रसङ्गः। घटादिज्ञानोत्पादकसंयोगान्यसंयोगजनिपूर्वमेव घटादिज्ञानस्य विनष्टत्वात्। न च तावत्पर्यन्तं ज्ञानं स्थायि। धारास्थलेऽपि ज्ञानैकत्वापत्तेः। न च विनश्यदवस्थसंयोगनिष्पन्नव्यवसायस्य स्वसज्ञानक्षणोत्पन्नसंयोगादनुव्यवसाय इति वाच्यम्। विशेषणज्ञानकाले तस्यापि नष्टत्वात्। न चानुव्यवसायस्य न विशेषणज्ञानजन्यत्वमिति वाच्यम्। अन्यस्यापि तदभावप्रसङ्गात्। न चानुव्यवसाये विषयो विशेषणं तज्ज्ञानं च व्यवसाय एवेति वाच्यम्। विशिष्टज्ञानस्य विषयीभूतयावद्विशेषणज्ञानजन्यत्वाभावेऽन्यत्रापि तत्प्रसङ्गात्॥

विशेष एव दुर्निरूप इति दूषयति। किमिति। आद्येऽपि सा किं संयोगत्वस्य साक्षाद्व्याप्यजातिः, व्याप्यव्याप्या वा। आद्य आह। सा हीति। अन्यस्येति। उभयकर्मादिप्रयोज्याया इत्यर्थः। ततः किमित्यत आह। सा चेति। द्वितीयं पक्षं दूषयति। नापि तद्व्याप्येति। व्यञ्जकाभावाज्जातिसाधकानुगतबुद्धेरभावाच्चेति हेतुमाह। तत्प्रयोजकेति। विशेषस्योपाधित्वपक्षे बाह्यज्ञानजनकसंयोगादनुव्यवसायानुपपत्तेस्तदर्थमनसि क्रियादिपूर्वं संयोगा-

न्तरमारभ्भणीयं, ततः पूर्वं व्यवसायनाशादनुव्यवसाया-योग इत्याह । द्वितीय इति । ज्ञानस्य चतुः पञ्चक्षणावस्थायित्वान्नोक्तदोष इत्याशङ्कापसिद्धान्ताद्धारायां एकज्ञानत्वापतेश्च नेति दूषयति । न च तावदिति । ननु व्यवसायस्तज्जनकसंयोगनाशश्चैकक्षण एवोत्पद्येते, व्यवसाय-स्थितिक्षणे ऽनुव्यवसायहेतुसंयोगान्तरमुत्पद्यते, व्यवसायस्यतृतीयक्षण एवानुव्ययसाय इति नोक्तदोष इत्याशङ्क्य ज्ञानत्वविषयनिर्विकल्पकोत्पत्तिसमये तस्य नष्टत्वान्नानुव्यवसाय इत्याह । न च विनश्यदिति । विशेषणज्ञानस्यानपेक्षितत्वान्न तेन व्यवधानमित्यत आह । न चेति । अन्यस्येति । व्यवसायस्येत्यर्थः । व्यवसायस्यैव विशेषणज्ञानत्वान्न तन्निर्विकल्पापेक्षेत्यत आह । न चानुव्यसाय इति । अनुव्यवसाये ज्ञानत्वस्यापि विशेषणतया भानात्तज्ज्ञानमपि वक्तव्यमन्यथानेकविशेषणवति वस्तुन्येक-विशेषणज्ञाने तावद्विशेषणविशिष्टप्रत्ययापातादित्याह । विशिष्टज्ञानस्येति ॥

नन्वनुव्यवसाये ज्ञानत्वं स्वरूपेण भासते न तु विशेषणतया, ततस्तज्ज्ञानानपेक्षितमित्याशङ्क्य तथात्वे मयि घटविषयं किञ्चिदिति प्रतीत्यापात इत्याह । न चेति ।

(अनुव्यवसाये ज्ञानत्वस्य स्वरूपतो भाने ऽपि दोषः) न च ज्ञानत्वांशेऽनुव्यवसायो निर्विकल्पक एव, न हि तदैवं भवान्मयि ज्ञानमिति तत्र हि ज्ञानत्वं प्रकारस्ततो विलक्षज्ञानत्वप्रकारकज्ञानादर्शनात् । निर्विकल्पकत्वसविकल्पकत्वयोर्विरुद्धयोरेकत्र वृत्तित्वानु-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पपत्तेश्च । समवायिनोप्यविनश्यदवस्थस्यैव जनकत्वादेवमपि संयोगस्थितिक्षणोत्पन्नव्यवसायस्यानुव्यवसायप्रसङ्गात्। संयोगस्य स्वरूपविशेषाभावे किञ्चिद्बाह्यज्ञानजननयोग्यं किञ्चिन्नेत्यस्यैव दुर्वचत्वात्। ननु बुभुत्सितं ज्ञानं गृह्यते नानुबुभुत्सितमिति चेन्न । बुभुत्साया अपि बुभुत्सितसामान्यज्ञानाधीनतयान्योन्याश्रयादिप्रसङ्गात्। बुभुत्साहेतुधर्मिभावेन बुभुत्सितज्ञानस्य विनष्टत्वेन तदनुव्यवसायायोगात्। उत्पन्नायां बुभुत्सायां तद्विषयज्ञानसामग्र्याः सत्त्वेन बुभुत्सितज्ञानानुपपत्तेः। बुभुत्साघटितज्ञानसामग्रीबलवतीति चेन्न। तथासत्युदाहृतस्थले तद्घटितबाह्यज्ञानसामग्र्याः सत्त्वेनानुव्यवसायप्रसङ्गात् । अबुभुत्सितज्ञानग्रहणाच्च ॥

ज्ञानत्वांश इति। निर्विकल्पत्वस्य साक्षात्त्वव्याप्यजातित्वादव्याप्यवृत्तित्वापात इत्याह । निर्विकल्पकत्वेति । तन्तुवत्तन्तुसंयोगस्याप्यविनश्यदवस्थस्यैव जनकत्वाद्विनश्यदवस्थसंयोगाद्व्यवसायोत्पत्तिरपि न सम्भवतीत्याह । समवायिनोपीति । द्रव्यासमवायिन एवायं नियम इत्याशङ्काङ्गीकारेण धारायां द्वितीयादिज्ञानानुव्यवसायप्रसङ्ग इत्यभिप्रेत्याह । एवमपीति । योग्यता-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वच्छेदकानिरूपणादपि नायमुपाधिरित्याह। संयोगस्येति। बुभुत्सोपरमादनुव्यवसायोपरम इति शङ्कते। नन्विति। ज्ञानबुभुत्साया ज्ञानविषयधर्मिज्ञानादिसाध्यत्वात्तस्य बुभुत्साधीनत्वे परस्पराश्रयादिकं स्यादिति दूषयति। न बुभुत्साया इति। बुभुत्सोत्पत्तिसमये ऽनुव्यवसायस्य नाशान्न तयापि तदनुव्यवसाय इत्याह। बुभुत्साहेत्विति। सत्यां बुभुत्सायां तद्विषयज्ञानोदयान्नान्यस्यावकाश इत्याह। उत्पन्नायामिति। बुभुत्साज्ञानसामग्र्या दुर्बलत्वान्न तज्ज्ञानमिति चोदयति। बुभुत्सेति। एवं सति वेङ्कटाधिपतिलीलाविग्रहस्यैव बुभुत्सितत्वात्तद्धारासमये तदनुव्यवसायायोग इत्याह। न तथासतीति। दुःखादिज्ञानस्याबुभुत्सितस्यापि गृह्यमाणत्वान्न तस्याः ज्ञानग्रहणकारणतापीत्याह। अबुभुत्सितेति॥

जिज्ञासितज्ञानात्पूर्वमेव धर्मिज्ञानजिज्ञासयोरुत्पत्तेर्न ताभ्यां व्यवधानमितीयमपि कुकल्पनानुपपन्नेत्याह। एतेनेति।

एतेन सामान्याकारेण सर्वज्ञानं कदाचिज्ज्ञातमिति तद्गोचरा स्मृतिस्ततो जिज्ञासाज्ञानमात्रविषया जायते ततो घटज्ञान मुत्पद्यते तच्च जिज्ञासागोचर एवेति द्वितीयक्षण एव तद्विषयानुव्यवसाय इति नान्योन्याश्रयादिरिति प्रत्युक्तम्। जिज्ञासां विना तस्यैवानुपपत्तेः। ज्ञानजिज्ञासानन्तरमजिज्ञासितबाह्यज्ञानानुत्पत्तौ तत्र जानामीत्यनुव्यवसायानुपपत्तेश्च।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ननु वयं नियमं न ब्रूमः क्वचिज्जिज्ञासितं गृह्यते क्वचिद्विपरीतं क्वचिच्च नैव गृह्यत इत्यभ्युपगम्यत इति चेन्न। त्वदभ्युपगमस्य व्यवस्थापकाभावेन निर्मूलत्वात्। अजिज्ञासितस्यापि ग्रहणे क्वचिद्विरहः कथमिति वर्ण्यताम्। न च वाह्यज्ञानसामग्रीप्रतिवन्धात् कदाचिद्वित्तिधाराविरम इति वाच्यम्। वाह्यविषयत्वेन तस्या बलवत्त्वे जाग्रत्यनुव्यवसायमात्रविलोपप्रसङ्गात्। सर्वदा वाह्यज्ञानसामग्रीसम्भवात्प्रवर्त्तकवाह्यज्ञानसामग्री बलवतीति चेन्न। तादृशज्ञानसामग्र्यां सत्यामेवेदमहञ्जानामीत्यनुव्यवसायदर्शनात्।

तस्यैवेति। ज्ञानमात्रविषयप्रथमज्ञानस्येत्यर्थः। किन्त्वोक्तप्रकारेण ज्ञानमात्रजिज्ञासाजनकस्मरणज्ञानस्यापि तज्जिज्ञासाविषयत्वात् स्मरणज्ञानसामग्र्या जिज्ञासाघटिततया बलवत्त्वातज्ज्ञानमेव स्यान्नाजिज्ञासितवाह्यविषयज्ञानं, तथाचोक्तानुव्यवसायायोग इत्याह। ज्ञानजिज्ञासेति। जिज्ञासायाः सर्वत्राकारणत्वान्नान्योन्याश्रयादिरिति चोदयति। ननु वयमिति। त्वदभ्युपगमस्य नियामकाभावाद्धेयतेत्याह। न त्वदभ्युपगमस्येति। अनियमपक्षे ऽप्यनुव्यवसायानुपरम इत्याह। अजिज्ञासितस्येति। सामग्र्यां सत्यामपि प्रतिबन्धकदशायामनुव्यवसायोपरमात्तदुपरम इत्याशङ्क्याह। न च वाह्येति। किं वाह्यज्ञान-

सामग्रीत्वेन प्रतिबन्धकत्वमुत प्रवर्तकज्ञानसामग्रीत्वेन । आद्ये आह । बाह्यविषयत्वेनेति । सर्वदेति । त्वगिन्द्रियस्य स्पर्शवद्द्रव्येण संयोगस्य जाग्रत्यवर्जनीयत्वाच्छरीरव्यापि त्वचो मनःसंयुक्तत्वाच्चेत्यर्थः । द्वितीयं शङ्कते । प्रवर्तकेति । इन्द्रियस्येष्टवस्तुसंयोगे सत्यपि तदनुव्यवसायदर्शनान्न तदित्याह । न तादृशेति ॥

नन्वदृष्टस्यापि ज्ञानकारणत्वात्तदभावादेव वित्तिधारोपरम इति चेन्न । दृष्टसामग्रीसम्पादनेनैवादृष्टस्य कार्यहेतुत्वादित्यभिप्रेत्य साक्षाद्धेतुत्वे दोषमाह । अदृष्टस्येति ।

(अदृष्टस्य न साक्षाज्ज्ञानहेतुता) अदृष्टस्य च नियामकत्वे सहकारिवैकल्यात्कदाचिदपि ज्ञानाभावानुभवायोगात् । नियामकं विनापि नियमाङ्गीकारे सहकारिवादविलोपप्रसङ्गाच्च । किञ्च प्रत्यक्षं हि स्वसमानकालीनं विषयीकरोति घटोऽस्ति जानामीति प्रत्यक्षयोर्विषयस्य वर्त्तमानतावभासनात् । न चानुव्यवसायकाले व्यवसायस्य वर्त्तमानतास्ति । ननु विषयस्य प्रत्यक्षनिमित्ततया पूर्वक्षणवर्त्तित्वमेवापेक्ष्यते न तु तत्कालीनत्वमपि, वर्त्तमानताऽवभासस्तु स्थूलोपाधिमादायापि भवतीति चेन्न । प्रत्यक्षविषयस्य तत्काले वर्त्तमानत्वनियमाभावे क्वचिदपि निष्कम्पप्रवृत्त्यनुप-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पत्तेः । विषयस्य वर्तमानतानिश्चयस्य तद्धेतुत्वात् । स्थूलकालमादाय प्रयोगसाधुत्ववर्णनेऽपि प्रत्यक्षस्य तथा विवक्षानुपपत्तेः । तस्मादनुव्यवसायासम्भवाद्धारान्तःपातिप्रथमादिज्ञानानां विनष्टानामनुव्यवसायायोगाच्च कथमपि वेद्यज्ञानवादे ऽभिहितानुसन्धानं सङ्गच्छते । अनुमेयं ज्ञानमिति वादे तु नतराम् ॥

सहकारिवैकल्यादिति । सहकारिणो ऽदृष्टस्य वैकल्यमभावो यस्मिन्ननुपलम्भे स तथा तस्मादित्यर्थः । अयमर्थः । अभावाधिकरणे तर्कितप्रतियोगिसत्त्वविरोध्यनुपलम्भस्याभावधीहेतुत्वाज्ज्ञानानुपलम्भस्य चात्मनि सत्यपि ज्ञाने तदुपलम्भकादृष्टवैकल्यादप्युपपत्तेरित्यन्यथासिद्धिशङ्कया ततो ज्ञानाभावनिश्चयो न स्यादिति । ननु स्वभावादेव किञ्चिज्ज्ञानं गृह्यते किञ्चिच्च न गृह्यत इति तत्राह । नियामकमिति । किञ्च प्रत्यक्षज्ञानकाले विषयसत्त्वनियमादनुव्यवसाये च तदसम्भवान्नासावङ्गीकार्य इत्याह । किञ्चेति । प्रत्यक्षज्ञानकाले विषयसत्त्वनियमाभावे बाधकाभावान्नोक्तदोष इति शङ्कते । ननु विषयस्येति । बाधकाभावो ऽसिद्ध इत्याह । न प्रत्यक्षेति । यच्चोक्तं स्थूलकालमादाय वर्त्तमानतावभास इति तत्राह । स्थूलेति । कालमिति विवक्षायाः शब्दधर्मत्वादनुभवे यथावभासं विषयसत्ताया अभ्युपेयत्वादित्यर्थः । उक्तानुसन्धानस्यान्यथोपपत्त्यभावमुक्तमुपसंहरति । तस्मादिति । भेदमते ऽप्यनुसन्धानानुपपत्तिरित्याह । अनुमेयमिति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तन्मते पक्षाद्यनेकज्ञानव्यवधाने धाराविच्छेदादेः सत्त्वादित्यर्थः ॥

एवं मध्येऽनुव्यवसायाङ्गीकारे धाराविच्छेदो दूषणमुक्तमिदानीं मध्ये ऽनुव्यवसायकल्पने संख्यानुसन्धानानुपपत्तेर्न तत्कल्पनमित्याह । किञ्चेति ।

(अनुव्यवसायाङ्गीकारे संख्यानुपपत्तिः) **किञ्च नैरन्तर्येण द्वादशनामानि**

शृण्वतो द्वादशनामानि क्रमेण श्रौषमिति यत्रानुसन्धानं तत्र न मध्ये ऽनुव्यवसायः कल्पयितुमपि शक्यते । अनुव्यवसायसामग्रीमात्रोत्पन्ननाम्नो ऽनुभवासम्भवेन द्वादशत्वानुसन्धानानुपपत्तेः । ननु द्वादशनामानुभवानन्तरं द्वादशनामगोचरा स्मृतिर्जन्यते स्मृत्याच तत्कारणमनुभवमनुमाय तद्गोचरानुसन्धानमेवं बुद्धिधारास्थलेऽपि चेन्न । मध्ये ज्ञानकल्पने प्रमाणाभावाङ्गीरवाच्च । ज्ञानान्तरस्य स्मृतित्वानुसन्धानाभावेन ततो मूलानुभवानुमानानुपपत्तेः । परिशेषात्स्मृतित्वावधारणमिति चेन्न । एवम्प्रणाडीमविदुषोपि वर्णितप्रतिसन्धानदर्शनात् । अनुभवस्य स्मृतिहेतुत्वाज्ञानसंशयविपर्यासदशायामप्यनुसन्धानदर्शनादनुमानानुपपत्तेः । एवमिष्टविषयंज्ञानानन्तरमेव सुखं जायते न तु तदनुव्यवसा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यात् । इष्टज्ञानस्यैव तद्धेतुत्वात् । सुखं चोत्पन्नमवश्यं ज्ञातव्यमिति कथमिष्टज्ञानानुसन्धानं भवेत् ॥

अयमर्थः । केशवादिद्वादशनामसु नैरन्तर्येण पठ्यमानेषु तव मते आद्यवर्णस्थितिसमये तद्विषयकत्वादिनिर्विकल्पज्ञानं द्वितीयवर्णोत्पत्तिश्च । तत्सविकल्पसमये द्वितीयस्य स्थितिः । तदनुव्यवसायसमये द्वितीयस्य नाशः । तदनन्तरं द्वितीयग्रहणायोगात्तृतीयस्य चतुर्थस्य वा ग्रहो वक्तव्यः । एवमुत्तरत्रापि केषांचिद्वर्णानां तत्संख्याया वा ग्रहणायोगान्मध्ये ऽनुव्यवसायकल्पने द्वादशनामश्रवणानुपपत्तिस्तदकल्पने चाश्रौषमित्यनुसन्धानानुपपत्तिरिति कष्टां दशामापन्नोयमनुसन्धानतपस्वो हि । न च नैरन्तर्येण वर्णानामुत्पत्तिरसम्भविनी । बहुवक्तृकेषु तत्सम्भवात् । मध्ये मध्ये ऽनुव्यवसायाभावेपि सर्ववर्णज्ञानानुभवोऽनुमानात्सिध्यतीति शङ्कते । ननु द्वादशेति । घटादिधारायां अप्येवमेवानुसन्धानमित्याह एवमिति । अनुसन्धानात्पूर्वमनुमितिज्ञानमनुपलब्धिपराहतमिति दूषयति । न मध्य इति । पक्षाद्यनेकज्ञानकल्पने गौरवञ्चेत्याह । गौरवाच्चेति । अनन्तरं स्मरामीत्यनुभवाभावाल्लिङ्गज्ञानमपि नास्तीत्याह । ज्ञानान्तरस्येति । अनन्तरभाविनामज्ञानस्येन्द्रियाद्यजन्यत्वात्स्मृतित्वज्ञानमिति शङ्कते । परिशेषादिति । परिशेषमजानतो हि प्रतिसन्धानसत्वान्मैवमित्याह । न, एवमिति । ज्ञातेपि स्मृतित्वे व्याप्तिनिश्चयस्यानियतत्वान्न नियमेनानुमितिरित्याह । अनुभवस्येति । इष्टज्ञानसुखयोः कार्यकारणभावमहानुप

पत्तिरप्यलौकिकानुभवे मानमिति वक्तुं परमत इष्टज्ञानानुभवो न सम्भवतीत्याह । एवमिति ॥

नन्विष्टज्ञानमेवानुव्यवसायानन्तरं सुखमुत्पादयतीति शङ्कते । ननु सुखादिति ।

ननु सुखात्पूर्वमिदमिष्टज्ञानानुसन्धानमिति चेन्न । अनुव्यवसायकाले विनष्टस्येष्टज्ञानस्य सुखाहेतुत्वात् । इष्टज्ञाने सत्यपि सुखानुत्पत्तौ तस्य तदहेतुत्वप्रसङ्गात् । न च सुखानन्तरं विनश्यदवस्थेष्टविषयज्ञानात्तदनुव्यवसाय इति वाच्यम् । सुखस्यावश्यवेद्यत्वनियमेन तज्ज्ञानात्पूर्वं तस्य नष्टत्वात् । न च ज्ञानसुखयोः समूहालम्बनम् । तयोः सहोपस्थितिनियमे पौर्वापर्य्यस्य दुर्ग्रहतया कार्यकारणत्वस्य दुर्ग्रहत्वात् । परिशेषस्य दुरवधारणतयेष्टदर्शनार्थिप्रवृत्त्यनुपपत्तेः । न च सुखमिष्टज्ञानजन्यम् । तद्विषयकृतिजन्यत्वात् संयतवदित्यपि । एवमपि कृत्यनन्तरभावीष्टज्ञानस्य कारणत्वासिद्धेः । व्यभिचारादप्रयोजकत्वाच्च । कृतिपूर्वज्ञानस्यापि कृतिकार्ये न हेतुत्वमिति वक्ष्यते । एतेन सुखानुमितेष्टज्ञानमनुसन्धीयत इति निरस्तम् ॥

इष्टज्ञानस्य निर्विकल्पद्वारेणानुव्यवसायोत्पत्तिसमये नष्टस्यानन्तरं न सुखजनकत्वमित्याह । न, अनुव्यवसा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

येति। किञ्चेष्टज्ञानस्य सुखं प्रति चरमकारणत्वात्तदनन्तरक्षण एव तदनुत्पत्तौ तत्कारणत्वमेव न स्यादित्याह। इष्ट ज्ञानमिति। इष्टज्ञानं द्वितीयक्षणे सुखमुत्पाद्य तृतीयक्षणेऽनुव्यवसायविषयो भविष्यतीत्याशङ्क्य तदा सुखज्ञानस्यावश्यम्भावित्वान्नानुव्यवसायावकाश इत्याह। न च सुखेति। नन्विष्टज्ञानमपि विषयीकृत्योत्पद्यमानं सुखज्ञानं समूहालम्बनरूपं भविष्यतीत्याशङ्क्य तथासति सव्येतरविषाणवत्सहोपस्थितत्वात् कार्यकारणभावग्रहायोग इत्याह। न च ज्ञानेति। ननु सुखं सकारणकं कार्यत्वादिति सामान्यतस्तत्सिद्धौ परिशेषादिष्टज्ञानमिति सिध्यतीत्याशङ्क्याह। परिशेषस्येति। इष्टज्ञानस्य तव मतेऽनुपस्थितत्वाद्वस्तुतस्तद्धेतोरेव कारणत्वसम्भवान्न परिशेष इत्यर्थः। तर्हि सुखत एवेष्टज्ञानस्य कारणत्वमनुमीयत इत्याशङ्क्याह। न च सुखमिति। सम्मनवदिति। तन्तुविषयकृतिजन्यस्य पटस्य तन्तुज्ञानजन्यत्ववदित्यर्थः। कृतिजनकज्ञानस्य कृतिकार्यकारणत्वं कुत्रापि नास्तीत्यङ्गीकृत्याप्याह। एवमपीति। कृत्यनन्तरभावितन्त्वादिविषयज्ञानस्य पटकारणत्वाभाववत्कृत्यनन्तरभाविस्पर्शनचन्दनादिज्ञानस्य सुखहेतुत्वं न सिध्येदित्यर्थः। किञ्च तव मते कृतिविषयज्ञाने व्यभिचारस्तदतिरिक्तत्वे सतीत्युक्तेऽप्रयोजक इत्याह। व्यभिचारादिति। अङ्गीकारं परित्यजति। कृतिपूर्वेति। वक्ष्यत इति। ईश्वरवादे इत्यर्थः। सुखस्येष्टज्ञानकार्यत्वानिश्चयादेव सुखेन तदनुमाने तदनुसन्धानमिति प्रत्युक्तमित्याह। एतेनेति॥

अहमर्थसमवेतज्ञानस्य ज्ञातृज्ञानज्ञेयप्रकाशात्मकत्वाद्वाराद्यनुसन्धानोपपत्तिरिति प्राभाकरः प्रत्यवतिष्ठते। नन्वस्त्विति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(प्राभाकरस्य पूर्वपक्षः) नन्वस्तु तर्ह्यहङ्कारसमवेतं ज्ञानं स्वप्रकाशं धारानुसन्धानादिकस्य सर्वस्योपपत्तय इति चेन्न । जानामीति तस्य ज्ञानविषयत्वानुभवात् । घटादेरपि विषयत्वेऽनुभवस्यैव मानत्वात् । न चेदं ज्ञानं भ्रमः । बाधकाभावात् । चक्षुरादिजन्यज्ञानं, न स्वप्रकाशं, कार्यत्वात्, रूपवत्, विपक्षे च जानामीत्यनुभवायोगो बाधकः ।

(स्वविषयत्वं स्वप्रकाशत्वमिति स्वीकर्तुं मतानुवादः) अत्र नवीनः । ननु ज्ञानस्य विषयत्वानुभवो धीस्वप्रकाशत्वेन न विरुध्यते । स्वविषयत्वस्यैव स्वप्रकाशत्वेऽविरोधात् । अन्यथा स्वव्यवहारहेतुत्वसंशयविरोधितादेरयोगात् । न च ज्ञानस्य स्वस्मादन्यत्र व्यवहारजनने स्वविषयत्वं तन्त्रं, स्वस्मिंस्तु स्वाभेद एवेति युक्तम् । पक्षादन्यत्रैवायं नियम इत्यस्य सर्वत्र सुवचत्वात् । दुःखादिविषयस्य द्वेषस्य स्वाभेदे सत्यपि स्वविषयत्वव्यतिरेकेण दुःखादाविव स्वस्मिन्निवृत्तिहेतुत्वस्य स्वेच्छाविरोधित्वस्य चादर्शनात् । स्मरणरूपस्य परोक्ष-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नुभवस्य च वृत्तिज्ञानस्य स्वाभेदे सत्यपि स्ववि-षयत्वव्यतिरेकेण स्वविषय इव स्वस्मिन्नपि व्यवहारादिहेतुताया अदर्शनाच्च । वृत्तेरपि स्वव्यवहारहेतुत्वे स्वप्रकाशत्वापत्तेः ॥

अवेद्यस्य स्वप्रकाशत्वादस्य च वेद्यत्वान्न स्वप्रकाशत्वं नापि त्रिपुटीप्रकाशत्वं चेत्यभिप्रेत्य दूषयति । न जानामीति । ज्ञाने हि ज्ञानमाकारः, आकारश्च विषय एवेत्यर्थः । जन्यज्ञानस्यास्वप्रकाशत्वे ऽनुमानमपि मानमित्याह । चक्षुरादीति । ननु नावेद्यत्वं स्वप्रकाशत्वं, किन्तु स्वविषयत्वं, तथा च जन्यज्ञानं स्वविषयत्वात्स्वप्रकाशमिति नवीनमतमनुवदति । अत्रेति । ज्ञानस्य स्वविषय एव संशयादिविरोधित्वं व्यवहारहेतुत्वं घटादिविषये दृष्टं स्वस्यापि विषयत्वाभावे स्वस्मिंस्तदुभयं न स्यादित्याह । अन्यथेति । ज्ञानादन्यत्रैव व्यवहारः स्वसमानविषयज्ञानजन्यः, ज्ञाने तु नैवमित्याशङ्क्यानुमानमात्रोच्छेदापातान्नैवमित्याह । न च ज्ञानस्येति । किं च द्वेषस्य स्वाभेदे सत्यपि स्वविषयत्वाभावादेव स्वस्मिन् स्वप्रयुक्तकार्याभावो दृष्टः, एवं ज्ञानेऽपि स्यादित्याह । दुःखादीति । किं च तव मतेऽपरोक्षस्थले स्फुरणस्य व्यवहारजनकत्वेऽपि परोक्षस्थले वृत्तेरेव व्यवहारहेतुत्वं स्वविषय एवाङ्गीकृतं न तु स्वस्मिन् तत्कस्य हेतोः स्वविषयत्वाभावादेव, एवमन्यत्रापि स्यादित्याह । स्मरणेति । परोक्षवृत्तेः स्वविषयव्यवहारहेतुत्वे को दोषस्तत्राह । वृत्तेरपीति । तथा च साक्षिरूपानुभवो न सिध्यतीति भावः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एकस्य विषयविषयिभावो विरुद्ध इति चोदयति । नन्विति ।

(एकस्य विषयविषयिभावो विरुद्धः)

ननु स्वस्य स्ववेद्यत्वं विरुद्धमिति विरुद्धं किं साक्षात्कारस्य विषयजन्यत्वात् स्वस्य च स्वजन्यत्वायोगात्, किं वा साक्षात्कारे स्वजनकेन्द्रियसन्निकृष्टस्यैव स्वविषयत्वात् स्वजनकेन्द्रियसन्निकर्षकाले च स्वस्याभावात्, यद्वा विषयविषयिभावस्योभयनिष्ठत्वादेकस्मिंस्तदयोगात् । नाद्यद्वितीयौ, स्वप्रकाशस्यात्मस्वरूपज्ञानस्य तयोरभावात् । न तृतीयः, अतीतारोपितात्यन्तासतां ज्ञानदर्शने तस्योभयानिष्ठत्वात् । ननु ज्ञानस्यैव ज्ञेयत्वं क्रियाकर्मत्वादिविरोध इति चेन्न । कृतिविशेषस्य कार्यत्ववदुपपत्तेः । ननु परसमवेतक्रियाफलशालित्वं कर्मत्वं, तत्कथमेकस्मिन्नेव क्रियात्वं कर्मत्वं च, कृतिस्तु कृत्यन्तरस्यैव कर्मेति चेन्न । क्रियाविषयत्वस्यैव कर्मत्वात् । ननु कर्त्तुः कर्मत्वं विरुद्धमिति चेन्न । ज्ञानस्याकर्तृत्वात् । विषयिणो विषयत्वं विरुद्धमिति चेन्न । अज्ञानसाक्षिणो ब्रह्मणोऽज्ञानविषयत्वात् । "तदात्मानमेवावेत्"[1] इति श्रुतेश्च ॥

[1] बृहदारण्यकोपनिषदि । १ अ० । ४ ब्रा० । १० कं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विरोधप्रयोजकं विकल्पयति । तत्किमिति । साक्षिप्रत्यक्षविषयाहङ्कारादेस्तज्जनकत्वतज्जनकेन्द्रियसन्निकृष्टत्वयोरभावेऽपि तद्विषयत्वाङ्गीकारान्नेमौ नियमाविति दूषयति । नाद्यद्वितीयाविति । जन्यप्रत्यक्षविषयस्यायं नियम इति चेत्तर्हि स्वव्यतिरिक्तप्रत्यक्षविषयस्यैवायं नियमोऽस्त्विति भावः । तृतीये अतीतादिज्ञानानां निर्विषयत्वप्रसङ्ग इत्याह । न तृतीय इति । ज्ञानं स्वकर्मकं न भवति क्रियात्वात् गमनादिवदिति चोदयति । नन्विति । परिस्पन्दलक्षणक्रियात्वं ज्ञानेऽसिद्धं, धात्वर्थलक्षणक्रियात्वमनित्यकृतौ व्यभिचारीति दूषयति । न कृतीति । ननु कर्मलक्षणपर्यालोचनायां नैकस्य क्रियाकर्मत्वमुपपद्यते अनित्यकृतेस्तु नित्यकृतिं प्रति कर्मत्वान्न व्यभिचार इति चोदयति । ननु परेति । अस्तीत्यादावुक्तलक्षणसम्भवादन्यदेव कर्मलक्षणमित्याह । न क्रियेति । कर्तुगुणत्वात्कर्मणः प्राधान्यादेकस्य तदुभयरूपत्वं विरुद्धमिति शङ्कते । ननु कर्त्तुरिति । ज्ञानस्य स्वाश्रयत्वानङ्गीकारान्न कर्तृत्वमित्याह । न ज्ञानस्येति । विषयित्वे विषयत्वं न स्यादिति शङ्कते । विषयिण इति । एकमज्ञानं प्रत्येकस्यैव ब्रह्मणो विषयत्वं विषयित्वं च दृष्टमिति परिहरति । न, अज्ञानेनेति । ननु विषयोऽस्यास्तीति विषयीत्युच्यते, एकस्य तु स्वेन सम्बन्धाभावेन षष्ठ्यर्थाभावान्न स्वविषयत्वमिति चेन्न । अभेदसम्बन्धसम्भवादिति भावः । श्रुतिरेव ब्रह्मणः स्वविषयत्वं दर्शयतीत्याह । तदात्मानमिति । तद्ब्रह्म आत्मानमवेत्, ज्ञातवदित्यर्थः ॥

यत्कार्यं तत्सकारणकमित्यादिव्याप्तिग्रहे स्वस्यापि कार्यत्वाद्विषयत्वं वक्तव्यं, प्रपञ्चो मिथ्येत्यनुमाने

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वस्यापि पक्षत्वेन विषयत्वं वक्तव्यमन्यथा दोषमाह । ज्ञानस्येति ।

(स्वप्रकाशत्वो-पसंहारः) ज्ञानस्य विषयत्वाभावे सर्वोपसंहारेण व्याप्तेर्मिथ्यात्वानुमितेश्च स्वविषयत्वं न सिध्येत् । तस्माच्चैत्रसमवेतमयं घट इति ज्ञानं चैत्रापरोक्षानुभवविषयः, चैत्रस्यापरोक्षव्यवहारविषयत्वात्, घटवदित्यनुमानात्, ज्ञानामीत्यनुभवाच्च परिशेषाज्ज्ञानं स्वविषय इति ॥

तर्किते ऽर्थे प्रयोगमाह । तस्मादिति । चैत्रपरोक्षज्ञानस्य पक्षत्वे बाधः स्यात्तन्निवृत्त्यर्थमयं घट इति विशेषणम् । मैत्रज्ञानव्यवच्छेदार्थं चैत्रसमवेत इति । ईश्वरज्ञानविषयत्वेनार्थान्तरतानिवृत्तये साध्ये चैत्रपदम् । चैत्रपरोक्षज्ञानविषयत्वेन सिद्धसाधनतानिवृत्तये परोक्षपदम् । मैत्रसुखे चैत्रव्यवहारपदे व्यभिचारपरिहारार्थं हेतौ चैत्रपदमपरोक्षपदं च । ननु चैत्रानुव्यवसायविषयत्वेनार्थान्तरतेत्याशङ्क्य तस्य निरस्तत्वादनवस्थापत्तेश्च स्वविषयत्वसिद्धिरित्याह । परिशेषादिति ॥

नवीनमतं दूषयितुमुपक्रमते । अत्रेति ।

(स्वविषयत्व-रूपस्वप्रकाश-त्वखण्डनम्)। अत्रोच्यते । घट इति जन्यप्रत्यक्षं नैतज्ज्ञानविषयः, एतज्जनकसन्निकर्षानाश्रयत्वात्, सम्मतवद्व्यधिष्ठ्यमसन्निकृष्टमपि भा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सत इति मते घटव्यक्तिजन्यप्रत्यक्षं नैतद्विषयः तत एव तद्वत् ॥

तत्र तावदनुमानस्य प्रतिप्रयोगपराहतिमाह । घट इति । घटविषयशाब्दज्ञानस्यापि पक्षत्वे तज्जनकसन्निकर्षाप्रसिद्ध्या तत्र हेतोरसिद्धिः स्यात्तन्निवृत्तये प्रत्यक्षपदम् । ईश्वरज्ञाने ऽप्युक्तदोषपरिहाराय जन्य पदम् । जन्यप्रत्यक्षमित्युक्ते प्रमेयमिति ज्ञानस्यापि पक्षता-स्यात्तथा च तत्र परमते हेतोरसिद्धिस्तज्जनकसन्निकर्षरूपप्रमेयत्वाश्रयत्वात्तन्निवृत्तये घट इतीति । नैतज्ज्ञानविषय इति । पक्षीभूतज्ञानविषयो नेत्यर्थः । न च घटादिविषयाक्षेद इष्ट इति वाच्यम् । एतज्ज्ञानाविषयत्वस्य साध्यत्वात्सविषयकत्वस्याप्यसम्भवात् । पक्षीभूतज्ञानस्यापि वैशेषिकादिमते ऽनुव्यवसायजनकसन्निकर्षाश्रयत्वादित्य-सिद्धिवारणाय हेतावेतत्पदम् । अस्मन्मते च पटादिदृष्टान्तसाधनवैकल्यपरिहारार्थमिति द्रष्टव्यम् । ननु घटे घटत्ववैशिष्ट्यस्यासन्निकृष्टस्यैव विषयत्वात्तत्र व्यभिचार इति चेन्न । तस्यापि सन्निकृष्टत्वात् । अन्यथा तत्र तस्य विषयत्वायोगात् । अङ्गीकृत्यापि व्यक्तग्रहज्ञानस्यैव पक्षत्वान्न दोष इत्याह । वैशिष्ट्यमिति ॥

यदुक्तमसन्निकृष्टस्यापि विषयत्वं साक्षिविषयवदुपपद्यत इति तत्राह । न चाप्रयोजक इति ।

(असन्निकृष्टस्य न विषयत्वम् ।) न चाप्रयोजकः । वैशिष्ट्यातिरिक्तस्य जन्यप्रत्यक्षविषयत्वे तज्जनकसन्निकर्षाश्रयत्वस्यैव प्रयोजकत्वात् । अन्यथातिप्रसङ्गात् । घटजन्यं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानं नैतद्विषयः एतदजनकत्वादिति वा पक्षा-दन्यत्रैवायं नियम इति सर्वत्र वक्तुं शक्यत्वा दित्युक्त्वाज्ञानान्यविषयत्वे ज्ञानस्य तत्सन्निकर्ष-जन्यत्वं प्रयोजकं ज्ञाने तु तदभेद एवेति वदितुं कथं न लज्जसे। न चानुभवविरोधः। अनुभवो-ह्यहङ्कारधर्मज्ञानस्य विषयत्वे साक्षी न तु स्व-विषयत्वं च ज्ञानान्तरवेद्यत्वेऽपि सम्भवति। तच्च ज्ञानमनुव्यवसायो. नेत्युक्तमित्यनुभवानुमा-नाभ्यामेवाहङ्कारधर्मातिरिक्तं ज्ञानं तत्साक्षी सिध्यति। अत एव त्वदुक्तानुमानमपि सिद्धसाध नम्। न च चैत्रजन्यानुभवविषय इति साध्यम्। अप्रयोजकत्वात्। व्यवहारस्यानुभवविषयत्वमा-त्रेणोपपत्तेः। अत एव परोक्षवृत्तिमिथ्यात्वानु-मित्यादेश्च न स्वविषयत्वं, न वा तदसिद्धिः। तदभिव्यक्तसाक्षिण एव तत्सिद्धेः। नन्वलौकिक-ज्ञानाभ्युपगमे गौरवमिति चेन्न। त्वदभ्युपगत-परमात्मचैतन्यस्यैवास्माभिरहङ्कारतद्वृत्तिसाक्षि जीवस्वरूपतयाभ्युपगमात्॥

प्रयोगान्तरमाह। घटजन्यमिति। ननु ज्ञानाति-रिक्तस्य जन्यमत्यक्षविषयत्वे तज्जनकसन्निकर्षाश्रयत्वं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रयोजकं ज्ञानस्य तु स्वाभेद एवेत्युक्तमित्याशङ्क्य तदुक्त-दोषं तस्मिन् पातयति । पश्चादन्यत्रेति । तर्हि जानामीति तस्य ज्ञानविषयत्वानुभवविरोध इत्यत आह । न चेति । जन्यज्ञानस्य वेद्यत्वमात्रमनुभूयते न तु स्ववेद्यत्वम् । वेद्यत्वं च साक्षिविषयत्वेऽप्युपपद्यत इत्याह । अनुभवो हीति । साक्षिप्रमाणमिति यावत् । अनुव्यवसायातिरिक्तं जन्य-ज्ञानविषयजीवप्रत्यक्षं तद्भिन्नमस्मदभिमतसाक्षी ज्ञान-मेवेत्युपसंहरति । इत्यनुभवेति । यदुक्तं चैत्रसमवेतं ज्ञानं चैत्रापरोक्षानुभवविषय इति तत्र किं साध्यं यथाश्रुतमेवो-त चैत्रजन्यमिति विवक्षितम् । आद्ये चैत्रस्वरूपसाक्षि-विषयत्वमिष्टमित्याह । अत एवेति । द्वितीये हेतुरप्रयो-जक इत्याह । न च चैत्रेति । यच्चोक्तं व्याप्तिज्ञानमिथ्यात्वा-नुमित्यादेः स्वविषयत्वं वक्तव्यमिति तदपि साक्षिविषय-त्वाभ्युपगमादेव निरस्तमित्याह । अत एवेति । ननु स्व-विषयत्वनिराकरणेन नित्यज्ञानविषयत्वसाधने ऽलौकि-कज्ञानकल्पनागौरवमित्याशङ्क्योभयवादिसिद्धनित्यज्ञा-नस्य जीवस्वरूपत्वमात्रसाधनान्नैवमित्याह । नत्वित्या-दिना ॥

ननु साक्षिव्यवहारः स्वेनैव भवति, उतान्येन । द्वितीये ऽनवस्थेत्यभिप्रेत्याद्यमपि विकल्प्य दूषयति । ननु-तदपीति ।

(स्वेनैव साक्षिव्यवहारे विकल्पयोजनम्)

ननु तदपिज्ञानं स्वविषयं न वा । न चेत् तद्विषयव्यवहारो न स्यात् । प्रथमे तत्सन्निकर्षानाश्रयस्य तद्विषयत्वविरोध इति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चेन्न । तदनाश्रयस्यापि तद्विषयत्वे तवेश्वरज्ञानवदविरोधात् । किं च व्यवहारमात्रे व्यवहर्तव्यज्ञानं प्रकाशत्वेन हेतुर्न तु व्यवहर्तव्यविषयप्रकाशत्वेन । गौरवेण तस्य तेन रूपेणाप्रयोजकत्वात् । ज्ञानव्यवहारविशेषे च ज्ञानमेव व्यवहर्तव्यं प्रकाशश्चेति किं तद्विषयत्वेन । ननु ज्ञानं स्वविषयत्वाभावे स्वस्य प्रकाश एव न भवतीति चेत् । किं षष्ठ्यर्थसम्बन्धार्थविषयत्वमपेक्षणीयं किं वा तस्य प्रकाशत्वार्थम् । नाद्यः । भेदाभावेनाभेदस्वरूपातिरिक्तसम्बन्धस्यानपेक्षितत्वात् । कथञ्चिदभेदस्यैव षष्ठ्यर्थत्वात् । न द्वितीयः । न हि ज्ञानस्य विषयत्वप्रयुक्तं प्रकाशत्वं किं तु ज्ञानस्वरूपविशेषप्रयुक्तम् । अन्यथेच्छादेरप्यर्थप्रकाशत्वापत्तेः । तस्याप्यर्थविषयत्वात् । न च स्वविषयत्वमेव प्रकाशत्वं तन्नेच्छादेरिति वाच्यम् । सर्वजिज्ञासायाः स्वविषयत्वात् ॥

तत्सन्निकर्षेति । तज्जनकसन्निकर्षानाश्रयस्येत्यर्थः । साक्षिणः स्वविषयत्वमङ्गीकृत्य जन्यप्रत्यक्षज्ञानविषयस्यैव जनकसन्निकर्षाश्रयत्वनियम इत्यभिप्रेत्याह । न तदनाश्रयस्येति । अङ्गीकारपरित्यागेन सिद्धान्तमाह । किञ्चेति । यथा आलोकस्य स्वाविरुद्धविषयचाक्षुषज्ञानमात्रे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आलोकत्वेन कारणत्वे स्वव्यतिरिक्तस्वाविरुद्धविषयकचाक्षुषज्ञाने विषयसम्बन्ध्यालोकत्वेन स्वविषयज्ञाने तु स्वाभेदेनैव कारणत्वमेवं व्यवहर्तव्यज्ञानं व्यवहारमात्रे प्रकाशत्वेन कारणं स्वव्यतिरिक्तविषयकव्यवहारे तद्विषयकप्रकाशत्वेन स्वव्यवहारे तु स्वाभिन्नप्रकाशत्वेनेति स्वस्मिन्नपि सामान्यक्लृप्तकारणस्य सत्वान्न पक्षादन्यत्रैवायं नियम इत्युपालम्भस्यावसर इत्यभिप्रेत्याह । व्यवहारमात्र इति । ज्ञानस्य स्वविषयत्वाभावे व्यवहर्तव्यप्रकाश इति सामान्यप्रयोजकमपि न सम्भवतीति शङ्कते । ननु ज्ञानमिति । विषयत्वस्योपयोगो नास्तीत्यभिप्रायेण विकल्पयति । किं षष्ठ्यर्थेति । सम्बन्धस्य भेदसमानाधिकरणत्वाद्विषयत्वाभ्युपगमेऽप्यनुपपत्तिस्तुल्येत्यभिप्रेत्याह । नाद्य इति । कथं तर्हि षष्ठीप्रयोग इत्याशङ्क्य स्वयात्युपचाराद्भक्तव्य इत्यभिप्रेत्याह । कथंचिदिति । द्वितीये विरोधित्वज्ञाने स्वरूपविशेषः । द्वितीयेमपि व्यभिचारेण दूषयति । न च विषयत्वमिति ॥

तृतीये विशेषणस्यैव प्रयोजकत्वे सति न विशेष्यस्य प्रयोजकत्वं गौरवादित्याह । न च ज्ञानत्वे सतीति ।

(तृतीयविकल्पे दोषयोजनम्) न च ज्ञानत्वे सति स्वविषयत्वं प्रकाशत्वमिति वाच्यम् । लाघवेन ज्ञानस्वरूपविशेषस्यैव प्रकाशत्वप्रयोजकत्वात् । तथा च स्फुरणमनुभवगोचरः व्यवहारविषयत्वादिति स्फुरणस्य स्वगोचरत्वसाधकमनुमानमप्रयोजकम् ।

(ज्ञानस्य स्वविषयसंशयादिविरोधित्वम्) एतेन ज्ञानस्य स्वविषयसंशय-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विरोधित्वादयोऽपि व्याख्याताः । घटाद्याकार-जन्यज्ञानस्य स्फुरणवेद्यत्वेन संशयविरोधित्वाद्युपपत्तेः स्वरूपज्ञानस्य वृत्तिमहिम्नैव तदुपपत्तेरिति । द्वेषस्तु स्वविषय एव निवृत्तिहेतुस्तथैवान्वयव्यतिरेकदर्शनात् । ज्ञानं तु प्रकाशत्वेन तदभेदेन च ज्ञानव्यवहारहेतुः । विषयत्वं विनापि स्वस्य प्रकाश इत्युक्तम् ॥

जडव्यावृत्तज्ञानस्वरूपस्येत्यर्थः । व्यवहारसामान्यकारणादेव स्फुरणव्यवहारोपपत्तिसाधनफलमाह । तथा चेति । यदप्युक्तं ज्ञानस्य स्वविषयत्वाभावे स्वविषयसंशयादिरिति, तदपि वक्ष्यमाणप्रकारेण निरस्तमित्याह । एतेनेति । तत्र किं वृत्तिज्ञानस्य संशयादिविरोधित्वानुपपत्तिरुतात्मरूपज्ञानस्य । नाद्य इत्याह । घटाद्याकारेति । द्वितीये घटाद्याकारवृत्तिमदन्तःकरणाभिव्यक्तरूपविशेषादेव सत्त्वाप्रकारकसंशयादिविरोधित्वमित्यभिप्रेत्याह । स्वरूपज्ञानस्येति । द्वेषकार्यादर्शनात्तद्विषय एव तत्कार्यमिति वैषम्यमाह । द्वेषस्त्विति । ननु ज्ञानव्यवहारस्य कार्यविशेषत्वात्सामान्यकारणातिरिक्तविशेषकारणजन्यत्वं वाच्यम् । अन्यथा कार्यविशेषस्याकस्मिकत्वप्रसङ्गादित्याशङ्क्य नायमस्तिनियमः सर्वैः स्वतस्त्वादिभिरसति दोषे ज्ञानसामग्रीत एव प्रमारूपकार्यविशेषाङ्गीकारात् । सर्वैरपि वादिभिरसत्यां स्मृतिसामग्र्यां ज्ञानसामान्यसामग्रीत एवानुभवरूपकार्यविशेषाङ्गीकारादित्यभिप्रेत्याह । ज्ञानं त्विति । विशेषकारणेन भवितव्यमित्यभिनिविशमानं प्रति तदप्यस्तीत्याह । तदभेदेन

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चेति । यद्यप्यस्मन्मते शास्त्रगम्यो ऽभेदः प्रकाशस्वरूप एव तथाप्यविद्यादशायां भेदप्रतियोगिकाभेदस्य धर्मरूपस्याङ्गीकाराद्विशेषकारणसिद्धिरिति भावः । सामान्यकारणयुक्तं स्मारयति । विषयत्वमिति ।

स्वविषयत्वस्य निर्वक्तुमशक्यत्वाच्च तदनुमानमयुक्तमित्याह । किञ्चेति ।

स्वविषयत्वस्यानिर्वचनीयत्वम् । किञ्चकिमिदं ज्ञानस्य स्वविषयत्वम् । स्वजन्यव्यवहारविषयत्वमिति चेन्न । ज्ञानातिरिक्ते ज्ञानविषय एव ज्ञानं व्यवहारं जनयतीति व्यवहारहेतुत्वप्रयोजकज्ञानविषयत्वस्य तदभेदानुपपत्तेः । नापि तद्योग्यता । तस्या अपि घटादौ ज्ञानविषयत्वयोग्यतानिर्वाह्यत्वात् । अत एव न ज्ञानजन्यज्ञातताश्रयत्वादिकम् । घटादौ यद्विषयत्वं तदेवेति चेत्, न स्वरूपसम्बन्धविशेषो हि घटादेर्विषयत्वं स च भेदनिष्ठ एव ॥

किं स्वजन्यव्यवहारविषयत्वं स्वविषयत्वमुत तद्योग्यत्वमाहोस्विज्जन्यज्ञानताधारत्वमथवा घटादौ यत्स्वविषयत्वं तदेवेति किं शब्दार्थः । आद्यमनुवदति । स्वजन्येति । अस्माभिरपि स्वजन्यव्यवहारविषयत्वाङ्गीकारात्सिद्धसाधनं स्फुटमिति मत्वा परमत इदमयुक्तं चेत्याह । न ज्ञानेति । व्यवहारविषयत्वप्रयोजकतायास्त्वयैवोक्तत्वात्तदेव तदित्यनुपपन्नमित्यर्थः । द्वितीये ऽपि तद्यो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ग्यतावच्छेदकत्वेन ज्ञानविषयत्वयोग्यता पृथग्वक्तव्येत्यभिप्रेत्याह । नापीति । ज्ञातताधारत्वस्यापि ज्ञानविषयत्वप्रयोज्यत्वान्न तृतीयोपीत्याह । अत एवेति । चतुर्थं शङ्कते । घटादाविति । ज्ञानभिन्नस्वरूपविशेषस्यैव तत्र विषयरूपत्वात्स्वस्मिंस्तदसम्भव इति दूषयति । न स्वरूपेति ॥

अभेदोऽपि स्वरूपसम्बन्धो भवत्वित्याशङ्क्याह । अभेदश्चेति ।

(अभेदस्य न सम्बन्धत्वम्) **अभेदश्च न सम्बन्धः । रूपी घट इतिवद्रूपं रूपीत्यननुभवात् । सर्वजिज्ञासादेरपि विषयिविषयत्वप्रयोजकधर्मभेदेन तेन रूपेण कल्पितभेदसत्त्वात् । अथवा सर्वजिज्ञासादेर्न स्वविषयत्वं तस्य विशिष्यज्ञातत्वात् । न च ज्ञातेऽपि रूपान्तरेण जिज्ञासा । सर्वत्वप्रकारकतज्ज्ञानस्येदानीमपि सत्त्वात् । सुखाहेतोस्तस्येच्छायोगाच्च । विनष्टाया इच्छायाः कालान्तरे प्रत्यक्षत्वायोगात्तदिच्छाया अप्यनुपपत्तेः । प्रमेयत्वाद्याकारावृत्तिरपि न स्वविषया । तत्र प्रमाणाभावात् । प्रत्यासत्त्याश्रयस्य सर्वस्य विषयत्वानियमात् । तदवच्छिन्नसाक्षिण एव तत्प्रकाशनसम्भवात् । प्रमेयत्वादिकमपि न स्ववृत्तीति न तदर्थमप्यभेदः सम्बन्धः । प्रकाशविषयत्वे प्रकाशस्य जडत्वापत्तेश्च । अतो नात्मनः स्वविषयत्वम् ॥**

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अभेदस्य सम्बन्धत्वे रूपे रूपवैशिष्ट्यप्रत्ययः स्यात् । न च रूपे रूपं नास्तीति वाच्यम् । मत्वर्थप्रत्यये सम्बन्धमात्रस्यापेक्ष्यत्वात् । अन्यथा गोमानित्यादिप्रत्ययो न स्यादित्यर्थः । यदुक्तं सर्वजिज्ञासादेः स्वविषयत्वं दृष्टमिति तदङ्गीकृत्य सर्वत्वेच्छात्वरूपभेदेन तदुपपत्तिमाह । सर्वजिज्ञासेति । अङ्गीकारं परित्यजति । अथवेति । इच्छात्वेन ज्ञातेऽपि गुणत्वादिरूपेण जिज्ञासेत्याशङ्क्य तदपि सामान्येन ज्ञातमेवेत्याह । न च ज्ञातेऽपीति । विशिष्य जिज्ञास्यत इत्याशङ्क्य तत्काले नष्टाया इच्छायाः सम्विदभिन्नत्वाभावेन प्रत्यक्षत्वमेवायुक्तमित्याह । विनष्टाया इति । ननु ज्ञानजनकप्रत्यासत्त्याश्रयस्य ज्ञानविषयत्वनियमात् प्रमेयमिति ज्ञानस्यापि प्रमेयत्वाश्रयत्वात् स्वविषयत्वमावश्यकमित्याशङ्क्य यो विषयः स प्रत्यासत्त्याश्रय इत्येव नियमो न तु यः प्रत्यासत्त्याश्रयः स विषय इति चक्षुरादौ व्यभिचारादित्यभिप्रेत्याह । प्रत्यासत्तीति । कथं तर्हि तज्ज्ञानव्यवहारादिरित्यत आह । तदवच्छिन्नेति । यथा प्रमेयत्वस्याभेदसम्बन्धेन स्ववृत्तित्वमेवं ज्ञानस्याप्यभेदसम्बन्धेन स्वविषयत्वमित्याशङ्क्य दृष्टान्त एवासम्प्रतिपन्न इत्याह । प्रमेयत्वादीति । किञ्च ज्ञानस्य प्रकाशविषयत्वेऽप्रकाशत्वमेव स्यात् स्वप्रकाशत्वं तु दूरापास्तमित्यभिप्रेत्याह । प्रकाशविषय इति । अत इत्युपसंहारः ॥

प्रत्यासत्त्याश्रयत्वनियमस्यानित्यज्ञानविषयत्वाभिप्रायत्वान्नित्यज्ञानस्य सर्वविषयत्वेन दोष इत्याशङ्क्याह । एतेनेति ।

(प्रत्यासत्त्याश्रयत्वस्य न नित्यज्ञानविषयत्वम्)

एतेन जन्यज्ञानस्यातिप्रसङ्गपरिहारार्थमस्तु स्वजनकेन्द्रियसन्निकृष्टविषयत्वमनित्यस्य विषयत्वं स्वरूपज्ञानस्य तु

नित्यस्य स्वविषयत्वं किन्न स्यादितिप्रत्युक्तम् । स्वविषयत्वासम्भवात् । [१]"विज्ञातारमरे केन विजानीयात्" [२]"अन्यदेव तद्विदितात्" इत्यादिश्रुतिरप्यात्मनो विषयत्वं पराकरोति । या चात्मनो विषयत्वे श्रुतिरुदाहृतात्मानमेवावेदिति सा नात्मनः स्वविषयत्वपरा । किन्तु ब्रह्मातिरिक्तस्य वेदितव्यत्वाभावपरा । सावधारणवाक्यस्येतरव्यावृत्तिपरत्वात् । अन्यथोदाहृतश्रुतिविरोधाच्च ।

एतेनेत्येतद्विवृणोति । स्वविषयत्वेति । आत्मनो विषयत्वं श्रुतिबाधितं चेत्याह । विज्ञातारमिति । येनेदं सर्वं विजानाति तं केन विजानीयादिति पूर्ववाक्ये स्वव्यतिरिक्तप्रकाशविषयत्वमुक्त्वा विज्ञातारमिति वाक्येन स्वविषयत्वं निषिध्यते, तथा तद्ब्रह्म विदितात्प्रकाशविषयादन्यदेवेत्यवधारणात् प्रकाशविषयत्वमात्रं निषिध्यते, तद्विरोधः स्यादित्यर्थः । अविषयत्वमपि श्रुतिविरुद्धमित्याशङ्काविरोधमाह । या चेति "[३]किमु तद्ब्रह्मावेद्यस्मात् तत्सर्वमभवत्" इति पूर्ववाक्यस्थस्य यद्ब्रह्म ज्ञानात् सर्वात्मको भविष्यति तद्ब्रह्म किं ज्ञात्वा सर्वमभवदित्यर्थः कल्प्येत तर्हि तस्यापि सर्वात्मत्वमस्मदादेरिव ज्ञानाधीनमिति तत्पूर्वं संसारित्वं प्रसज्येत । अतो न यथा-

१ बृहदारण्यकोपनिषदि । २ अ० । ४ ब्रा० । १४ कं० ।

२ केनोपनिषदि । ३ कं० ।

३ बृहदारण्यकोपनिषदि । १ अ० । ४ ब्रा० । ९ कं० ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रुतश्रुत्यर्थौ ग्राह्यः किन्तु ब्रह्म सुतरामसर्वात्मकमतो न तदन्यज्ज्ञातृत्वमस्तीत्येवकारार्थौ ग्राह्य इत्यर्थः । अन्यथा तत्परश्रुतिविरोधश्चेत्याह । उदाहृतेति ॥

"[1]ब्रह्मवा इदम्" इति वाक्ये ब्रह्मशब्देन वस्तुतो ब्रह्मणो जीवस्याभिधानात्तस्य स्वविषयान्तःकरणवृत्तिमत्त्वाद्यथाश्रुते ऽपि न विरोध इत्याह । अथवेति ।

(तद्वात्मानमेवावेदित्यस्या यथार्थत्वे ऽपि न विरोधः)

अथवा वस्तुवृत्त्यपेक्षया जीव एव ब्रह्मशब्देनोच्यते । तस्य च वृत्तिविषयत्वात्तात्मानमेवावेदिति विरोधः ।

तस्मात्

विज्ञातारमरे केन विजानीयादिति स्फुटम् ।
श्रुतिसाटोपमाहस्म तन्मे मतमिदं शुभम् ॥

अतो नाहङ्कारसमवेतं ज्ञानं स्वप्रकाशमिति । एवमप्यन्यज्ञानधाराकालीनज्ञातुरनुसन्धानार्थं तद्धर्मातिरिक्तं ज्ञानान्तरं स्वीकर्तव्यम् । घटज्ञानधाराकाले ज्ञातृविषयानेकज्ञानस्वीकारे तस्यैवावकाश इति घटज्ञानधाराविच्छेदप्रसङ्गात् । अनङ्गीकारे वा एतावन्तं कालं जानन्नेवाहमासमित्यनुसन्धानानुपपत्तिः । रूपादिहीनस्यात्मनश्चाक्षुषज्ञानादिविषयत्वानुपप-

१ बृहदारण्यकोपनिषदि । १ प्र० । ४ ब्रा० । ११ कं ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्तेः । न च विषयज्ञानाश्रयतयात्मा प्रकाशत इति युक्तम् । मामहं जानामीति तस्य विषयत्वानुभवात् । आत्मा न चाक्षुषज्ञानजन्यव्यवहारगोचरः, तदविषयत्वात्, स्पर्शवत् । न च ज्ञानानाश्रयत्वमुपाधिः । व्यवहारं प्रति ज्ञानाश्रयत्वस्यैव तदभावे तदभावस्याप्यप्रयोजकत्वात् ॥

श्रुतिन्यायाभ्यामविषयप्रकाशात्मकमात्मतत्त्वं वैदिकैरभ्युपेयमित्युपसंहरति श्लोकेन। तस्मादिति। साटोपम्। साक्षेपम्। जन्यज्ञानस्य विषयत्वानुभवात् स्वविषयत्वस्य चासम्भवान्न तस्य स्वप्रकाशत्वमिति नित्यसाक्ष्यभावे धारानुसन्धानानुपपत्तिरिति परमप्रकृतमुपसंहरति। अत इति। जन्यज्ञानस्य स्वप्रकाशत्वमङ्गीकृत्यापि धाराकालीनज्ञातुरनुसन्धानाय तत्साक्षिरूपनित्यप्रकाशोऽङ्गीकर्त्तव्य इत्याह। एवमपीति। घटज्ञानधारा च ज्ञातापि विषय इत्याशङ्क्याह। रूपादीति। चाक्षुषज्ञानविषयतया प्रकाशमानस्य द्रव्यस्यैव रूपादिमत्त्वनियम इति ज्ञातुराश्रयतया प्रकाशमानत्वमविरुद्धमित्याशङ्क्य तस्य तद्विषयत्वमप्यनुभूयत इत्याह। न च विषयेति। ननु मां जानामीति व्यवहारमात्रं न त्वयमनुभव इत्याशङ्क्य तस्य तद्विषयत्वाभावे तद्विषयव्यवहार एव न सम्भवतीत्याह। आत्मेति। स्पर्शस्य तज्जन्यव्यवहाराविषयत्वे तदनाश्रयत्वमेव प्रयोजकं न तु तदविषयत्वमित्याशङ्क्याह। न चेति। यदि व्यवहारविषयत्वे ज्ञानाश्रयत्वं प्रयोजकं स्यात्तर्हि तदभावे तदभावः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रयोजकः स्यान्न च तदस्ति ज्ञानानाश्रयस्यापि रूपादेर्व्यवहारविषयत्वादित्यभिप्रेत्याह । व्यवहारम्प्रतीति ॥

ज्ञानाश्रतयात्मा प्रकाशत इत्येतदेव दुर्निरूपमित्याह । किञ्चेति ।

(ज्ञानाश्रयत्वेनात्मप्रकाशस्य दुर्निरूपत्वम्) किञ्च विषयज्ञानाश्रयतयाहमर्थप्रकाश इति पक्षे किं विषयज्ञानाधीनोऽहमर्थप्रकाशोऽन्यः स एव वा । नाद्यः तस्य निर्विषयत्वे ज्ञानत्वानुपपत्तेः । सविषयत्वे वा तस्यात्मविषयत्वापत्तेः।द्वितीये ऽहमर्थो विषयो विषयज्ञानञ्चेत्येतत्त्रितयातिरिक्ताहमर्थप्रकाशाभावात्। तस्य चाबालपण्डितमविशिष्टत्वात् । बालानामिव पण्डितानामपि व्यतिरिक्तात्मनिश्चयाभावेन परलोकार्थप्रवृत्त्यनुपपत्तेः । ननु रूपादिज्ञानमात्मव्यवहारमात्रे हेतुः, तच्च पण्डितापण्डितसाधारणमात्मनो देहादिव्यत्तिरिक्तत्वज्ञानं देहादिव्यतिरिक्तात्मव्यवहारहेतुः, तच्च पण्डितानामेवास्तीति चेत् । न, अहं देहव्यतिरिक्त इति ज्ञानस्य तद्धर्मात्माऽविषयत्वे देहव्यतिरिक्तत्वस्यात्मधर्मत्वासिद्धेः । देहव्यतिरिक्त आत्मेति व्यवहारश्च न स्यात् । एवमहं सुखीत्यादि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बुद्धेरप्यात्माविषयत्वे तेषामपि तद्धर्मत्वं न सिध्येत् । न च देहव्यतिरिक्तो ज्ञानाश्रय इति ज्ञानाज्ज्ञानाश्रयस्य देहव्यतिरिक्तत्वसिद्धिरिति वाच्यम् । देहव्यतिरिक्तत्वसमानाधिकरणाज्ञानाश्रयत्वज्ञानस्याहमर्थाविषयत्वे ऽहमर्थस्य तदुभयधर्मित्वासिद्धेः । अहमर्थाविषयानुभवेन देहव्यतिरिक्तत्वज्ञानाश्रयत्वयोः समानाधिकरणत्वासिद्धेश्च । अहमर्थस्यैव तदधिकरणत्वात् ॥

आद्ये ऽपि किं सविषयो निर्विषयो वा । द्वितीयं दूषयति । तस्येति । आद्ये ऽन्यस्य विषयस्याभावादात्मनो विषयत्वं स्यादित्याह । सविषयत्व इति । अनात्मज्ञानव्यतिरेकेणात्मज्ञानाभावे पण्डितमूर्खवैषम्यं न स्यादित्याह । द्वितीय इति । ज्ञानविशेषात् पण्डितानां व्यवहारविशेष इति शङ्कते । नन्विति । देहादिव्यतिरिक्तत्वज्ञानमिति । देहः स्वव्यतिरिक्तद्रष्टृकः दृश्यत्वादित्याद्यनुमानादिजन्यमित्यर्थः । किमात्मा परोक्षज्ञानस्याप्यविषय उत प्रत्यक्षज्ञानस्यैव । आद्ये देहव्यतिरिक्तस्योक्तानुमानादात्मधर्मत्वासिद्धेस्तद्व्यतिरेकमात्रस्य मूर्खाणामपि घटादौ प्रसिद्धत्वादित्यभिप्रेत्य दूषयति । न, अहं देहेति । आत्मनि तद्वैशिष्ट्यस्याज्ञातत्वात्तद्व्यवहारो ऽपि न स्यादित्याह । देहेति । किं च दुःखविशिष्टज्ञानाविषयस्यात्मनो घटादिवत्तद्धर्मित्वं न सिद्ध्यतीत्याह । एवमिति । ननु पण्डितानां देहव्यतिरिक्तत्वसामानाधिकरण्यप्रत्ययो विशेष इत्यत आह । न च देहेति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अधिकरणस्याविषयत्वे धर्मयोरपि सामानाधिकरण्यं न सिध्यतीत्याह । अहमर्थाविषयेति ॥

देहव्यतिरिक्तत्वविषयकज्ञानाश्रयत्वमात्रेण तद्धर्मित्वसिद्धिरित्याशङ्क्याह । तथा चेति ।

(अहमर्थस्य केवल ज्ञानाश्रयत्वेन तद्धर्मित्वसिद्धिपरिहारः)

तथाचारूपस्याहमर्थस्य रूपज्ञानाश्रयत्ववद्देहादिव्यतिरिक्तत्वज्ञानाश्रयत्वोपपत्तेर्न बालपण्डितयोर्विशेषः स्यात् । प्रत्यभिज्ञागोचरत्वाभावे ऽहमर्थस्य स्थायित्वासिद्धेश्च । तत्कालमात्रावच्छिन्नस्य प्रत्यभिज्ञाश्रयत्वेन पूर्वकालावच्छिन्नात्माभेदस्य ततोऽसिद्धेः । न च प्रत्यभिज्ञया आत्मैक्यसिद्धिरिति न ब्रूमः किं तु स्मर्तृत्वानुपपत्त्यैव, अन्याश्रयानुभवादन्यस्य स्मृत्यनुपपत्तेरिति वाच्यम् । अनुपपत्तिकज्ञानस्याप्यात्माऽगोचरत्वे ऽनुभवितृस्मर्त्रैकत्वासिद्धेः । तत्कालमात्रस्यैव तदाश्रयत्वात् । एवं कर्त्रभेदं विना भोक्तृत्वानुपपत्तिरपि नाभेदसाधिका । नन्वर्थस्य ज्ञाने प्रतीयमानत्वं ज्ञानप्रयुक्ताज्ञानसंशयाद्यगोचरत्वं, तच्च घटादेर्विषयत्वप्रयुक्तं ज्ञानस्य स्वतः, आत्मनस्तदाश्रयत्वप्रयुक्तमिति विशिष्टज्ञाने आत्मापि प्रतीयते । अत एवात्मा ज्ञानाश्रयत्वदेहव्यतिरिक्त-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वसामानाधिकरण्यविषयज्ञाने ऽपि प्रतीयत इति तयोः सामानाधिकरण्यधीरिति पण्डितानां विशेष इति चेत् । न ज्ञानव्यतिरिक्तस्य ज्ञानप्रयुक्ताज्ञानाद्यगोचरत्वे ऽनुगतज्ञानविषयत्वं प्रयोजकं न तु क्वचिज्ज्ञानविषयत्वं क्वचित्तदाश्रयत्वमनुगतप्रयोजके सम्भवत्यननुगतस्याप्रयोजकत्वात् ॥

यथात्मनो रूपज्ञानाश्रयत्वज्ञानमात्रेण न रूपित्व तत्कस्य हेतोः, तद्वत्तयाऽविषयीकृतत्वादेवं देहव्यतिरिक्तत्वज्ञानाश्रयत्वे ऽपि तद्वत्त्वं न सिध्यतीत्यर्थः । किञ्च तवमत आत्मनः स्थायित्वं किं प्रत्यभिज्ञया सिध्यति उत स्मर्तृत्वानुपपत्त्या आहो भोक्तृत्वानुपपत्त्या । आद्ये ऽपि किं तद्विषयत्वेन तदाश्रयतया वा । नाद्यः विषयत्वानङ्गीकारादित्याह । प्रत्यभिज्ञेति । द्वितीयं दूषयति । तत्कालमात्रेति । द्वितीयमनूद्य दूषयति । न च प्रत्यभिज्ञयेति । अत्रापि किमनुपपत्तिजन्यज्ञानस्य विषयतया स्थायित्वसिद्धिरुताश्रयतया । नोभयथापीत्याह । अनुपपत्तिकेति । उक्तदोषं तृतीये ऽप्यतिदिशति । एवमिति । ननु विशिष्टज्ञानविषयत्वाभावे ऽपि तत्र प्रतीयमानत्वमात्रेण धर्मधर्मिभावसिद्धिः। प्रतीयमानत्वं च विषयत्वादन्यदेवेत्याह। नन्वर्थस्येति । ज्ञानप्रयुक्तेति । ज्ञानाधीनाज्ञानसंशयाद्यभाववत्त्वमित्यर्थः । अज्ञानं चात्रविशेषादर्शनम् । अत्रानुगतं प्रयोजकमाह । तद्वेति । आत्मनः प्रतीयमानत्वा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भिधानफलमाह । अत एवेति । विषयत्वाभाव एतदेव प्रतीयमानत्वं सम्भवतीति दूषयति । नेति । यत्प्रकारकज्ञानं तत्प्रकारकसंशयाद्यगोचरत्वं तद्विषयस्यैव । अन्यथा रूपादिप्रकारकज्ञानाश्रयतया रूपित्वादिसंशयाद्यगोचरत्वप्रसङ्ग इति भावः । किं चानुगतमप्यनुपपन्नमिति दोषोपीत्याह । ज्ञानव्यतिरिक्तस्येति ॥

इदानीं स्वमतानुसारेण स्वप्रकाशसंविदाश्रयत्वं निराकुर्वन् तेन रूपेणाहमर्थस्य संशयाद्यगोचरत्वमप्यनुपपन्नमित्यभिप्रायेणाह । किञ्चाहमिति ।

(स्वप्रकाशसंविदाश्रयत्वनिराकरणम्) किञ्चाहमिति व्यवह्रियमाणो ज्ञानाश्रयो घटादिवल्लिङ्गाद्यननुसन्धाने ऽपि व्यवह्रियमाणत्वादपरोक्ष इति तावत्सुप्रसिद्धम् । अपरोक्षत्वं चार्थस्य संविदभिन्नत्वम् । न च संविदतिरिक्तस्याहमर्थस्य संविदभिन्नत्वं वास्तवं भवति । ततः संविदि कल्पितो ऽहमर्थो न संविदाश्रय इति विषयत्वप्रयुक्तमेव घटादिवत्तस्य संविदि भासमानत्वमिति । अस्तु तर्ह्यहमर्थस्य परोक्षज्ञानविषयत्वमिति चेन्न । एवमपि प्रत्यक्षकाल आत्मनः प्रकाशानुपपत्तेः । अहं सुखीत्यादिविशिष्टानुभवाद्विशिष्टज्ञानस्य विशेष्यविषयत्वनियमाच्च । प्रत्यक्षस्याप्यहमर्थविषयत्वात् । प्रत्यक्षविषयत्वे चाहमर्थस्य घटादिवदनात्म-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वापादनम् । परोक्षज्ञानविषयत्वे ऽपि परमाणवादावहमर्थ इति न वैशेषिकादिमतात्मन्युक्तदूषणानिस्तार इति । किञ्च गुरुमते प्येकविषयज्ञानधारानन्तरमेतावन्तं कालमिदमन्वभूमिति वदेतावन्तं कलं नेतः परमद्राक्षमितीतरज्ञानाभावानुसन्धानं सर्वानुभवसिद्धमनुपपन्नम्। घटज्ञानधाराकाले तदितरज्ञानाभावानुभवासम्भवात् ॥

भवतु तर्हि संविदाश्रयतयैवापरोक्ष्यमित्यत आह । अपरोक्षत्वं चेति । एतच्च शाब्दपरोक्षवादे निपुणतरमुपपादयिष्यत इति भावः । इदं च न तव मते सम्भवतीत्याह । न चेति । इदानीं प्रत्यक्षज्ञानस्यैवाविषय इति द्वितीयं पक्षं शङ्कते । अस्तु तर्हीति । तथा च तत एव स्थायित्वदेहव्यतिरिक्तत्वादिसिद्धिरिति परेषामाशयः । आत्मनः प्रत्यक्षज्ञानविषयत्वे येनात्मत्वापातदोषः स परोक्षज्ञानविषयत्वे ऽपि तुल्यः । तदभावमङ्गीकृत्यापि किं परोक्षज्ञानेनैवात्मप्रकाश उत प्रत्यक्षज्ञानेनापि । प्रथमे घटादिप्रत्यक्षकाले तत्प्रकाशानुपपत्तिरित्याह । न, एवमपीति । विषयतया प्रकाशः परोक्षज्ञानेनैवेत्याह । अहं सुखीति । ततः किमित्यत आह । विशिष्टज्ञानस्येति । द्वितीये किं प्रत्यक्षज्ञानस्यापि विषय उत न । आद्ये न विवादः । द्वितीयमङ्गीकारपरित्यागेन दूषयति । प्रत्यक्षाविषयत्व इति । अहमर्थः स्वविषयज्ञानजनकः प्रत्यक्षयोग्यत्वे सतीन्द्रियसंयुक्तत्वाद्घटवदिति वैशेषिकादिमतमवलम्ब्याह । प्रत्यक्षेति । गुरुमते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऽप्यात्मनो विषयत्वसाधनफलमाह । तस्मादिति । त्रिपुटीप्रत्यक्षमङ्गीकृत्यापि घटधाराकालीनतदितरज्ञानाभावस्यानुसन्धानं तन्मतेऽनुपपन्नमित्याह । किञ्चेति ॥

नेतः परमद्राक्षमिति न स्मृतिः येन तदनुभवस्तत्कालेऽन्यः सिध्येत्, किन्तु स्मर्यमाणघटज्ञानेन तदितरज्ञानाभावानुमितिरित्याशङ्क्याह । न च नेदमिति ।

(नेतः परमद्राक्षमित्यस्यानुमितित्वखण्डनम्)

न च नेदमनुसन्धानं किन्तु तत्कालीनज्ञानाभावस्यानुमितिरिति वाच्यम् । एकज्ञानाभावेन व्याप्तिनिश्चयं विनापि तद्दर्शनात् । घटादिविषयज्ञानानुसन्धानशून्यस्यापि तत्काल एतावन्तं कालं पटं नान्वभूवमिति तज्ज्ञानाभावानुसन्धानदर्शनात् । तस्मादहमर्थतद्वृत्तितदभावसाक्षिभूतमहङ्कारसमवेतघटादिविषयज्ञानातिरिक्तं ज्ञानान्तरमभ्युपेयमिति सिद्धम् । नन्वेवं तदेव ज्ञानमस्तु किमहङ्कारसमवेतवृत्त्या, तत एवानुसन्धानवन्निखिलव्यवहारोपपत्तेरिति चेत् । किं प्रयोजनाभावेन वृत्तिज्ञानमाक्षिपसि, किं वा प्रमाणाभावेन, अथवा प्रमितस्य तस्य प्रयोजनं पृच्छसि । नाद्यः जानामीत्यनुभवसिद्धस्यापह्नवायोगात् । न हि प्रयोजनाभावेनानुभवसिद्धं प्रत्याख्यातुं शक्यते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अत एव न द्वितीयः । जानामीत्यनुभवस्य सर्वानुभवसिद्धत्वात् । अनुभवस्य स्वविषयताया निरस्तत्वात् । अनुभवान्यस्य तद्विषयस्य परिशेषाद्वृत्तित्वात् । तृतीये क्वचिदविद्यानिवृत्तिः क्वचिद्व्यवहारः प्रयोजनम् ॥

व्याप्तिनिश्चयं विनापीति । समूहालम्बनज्ञाने व्यभिचारादिति भावः । लिङ्गज्ञानाभावे ऽपि जायमानत्वान्नानुमितिरित्याह । घटादीति । परमते धाराद्यनुसन्धानानुपपत्तेस्तत्प्रयोजकः स्वतन्त्रो ऽनुभवसिद्ध इत्युपसंहरति । तस्मादिति । साधितं स्वतन्त्रमनुभवमङ्गीकृत्याहमर्थधर्ममनित्यज्ञानमाक्षिपति । नन्वेवमिति । आक्षेपबीजं विकल्पयति । किं प्रयोजनेति । प्रयोजनशून्यस्याप्युपेक्षणीयविषयस्य बहुलमुपलम्भान्न प्रथम इत्याह । नाद्य इति । अनुभूयमानत्वात्प्रमाणाभावो ऽसिद्ध इत्याह । अत एवेति । नन्वत्र साधितानुभवविषयतया प्रतीयत इत्यत आह । अनुभवस्येति । तर्हीच्छादिरेव तद्विषय इत्याशङ्क्य तस्य ज्ञानत्वप्रकारकानुभवागोचरत्वाद्वृत्तिरेवेत्याह । परिशेषादिति । प्रयोजनप्रश्नपक्षे अपरोक्षवृत्तेरविद्यानिवृत्तिः प्रयोजनं परोक्षवृत्तेर्व्यवहार एवेत्याह । तृतीय इति ।

अपरोक्षवृत्तिप्रयोजनमाक्षिपति । नन्विति ।

(अपरोक्षवृत्तिप्रयोजनाक्षेपः) ननु चैतन्यमविद्यां निवर्तयतु किमनया वृत्त्या, तस्याः प्रकाशानिवर्त्यत्वात् । वृत्तेश्चाप्रकाशत्वात् । यदि चैतन्यस्याविद्यानिव-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र्तकत्वे तस्याः नित्यनिवृत्तिप्रसङ्गेनाज्ञानमेव न स्यात्। तर्हि मा भूदज्ञानं किन्नश्छिन्नमिति चेत्। मा भूत्तावदज्ञानमिति मा भाषिष्ठाः घटमहं न जानाम्यहमज्ञ इत्याद्यनुभवसिद्धत्वात्तस्य । विभागप्रक्रियायां चैतन्निपुणतरमुपपादयिष्यामः। न च वृत्तेः स्वनिवृत्तावनुपयोगः। व्यासङ्गदशायां सत्यपि चक्षुषः सम्प्रयोगे सति च नित्यानुभवे साक्षिण्यन्तःकरणवृत्तिव्यतिरेकेण घटाद्यज्ञाननिवृत्त्यदर्शनात् । तस्यां च सत्यां तत्रैव तद्दर्शनात्। नन्वनुभवातिरिक्तवृत्तेः स्फुटतरप्रत्यक्षावेद्यत्वेन तस्या नान्वयादिज्ञानं सम्भवति। कार्यानुरोधेन तु कारणकल्पनायां मनस इन्द्रियसम्बन्ध एव कल्प्यताम्। न चाधिकरणः सो ऽज्ञाननिवर्तको न भवतीति वाच्यम्। समनस्केन्द्रियसन्निकर्षस्यैवार्थगतस्याज्ञाननिवर्तकत्वात्। न च वृत्तिनिराकरणे समनस्केन्द्रियसन्निकर्ष एव न सिध्यति तस्य वृत्त्यैककल्प्यत्वादिति वाच्यम् । अविद्यानिवृत्त्यैव तत्कल्पनासम्भवात् । न च ज्ञानैकनिवर्त्यस्याज्ञानस्य कथमिन्द्रियसंयोगनिवर्त्यत्वमिति वाच्यम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्य वृत्तिवर्त्त्यत्वपक्षे ऽपि तुल्यत्वात् । भवन्मते चैतन्यस्यैव ज्ञानत्वात् । न च चैतन्यमेवाज्ञाननिवर्त्तकं वृत्तिस्तत्र सहकारिणीति वाच्यम् । इन्द्रियसम्प्रयोगे ऽपि तस्य तुल्यत्वात् । ज्ञानेनाज्ञानं निवृत्तमित्यनुभवस्य मतद्वये ऽपि तुल्यत्वात् ॥

निवृत्तेर्जडतया विद्यासमानस्वभावत्वात्तस्या न ततो निवृत्तिरित्याह । तस्या इति । चैतन्यस्यानादित्वात्तन्मात्रनिवर्त्यत्वे अविद्यैव न स्यादित्याशङ्क्येष्टापत्तिरित्याह पूर्ववादी । यदीति । भावरूपस्याज्ञानस्यानेकप्रमाणसिद्धत्वान्न तदपह्नवः शक्यो वक्तुमित्याह । मा भूदिति । अहमज्ञ इत्यनुभवस्य ज्ञानाभावविषयतयान्यथासिद्धिरित्याशङ्क्याह । विभागप्रक्रियायामिति । जीवपरभेदनिरूपणपरे द्वितीयपरिच्छेद इत्यर्थः । अविद्यायाः प्रकाशनिवर्त्यत्वाद्वृत्तेरनुपयोग इत्याशङ्क्य तस्या अपि तत्रान्वयव्यतिरेकबलात्सहकारित्वमस्तीत्याह । न च वृत्तेरिति । नन्वर्थप्रकाशाद्भेदेन वृत्तेः स्फुटतरप्रत्यक्षागोचरत्वादन्यथा तत्र वादिविप्रतिपत्त्यभावप्रसङ्गात्तस्या विशिष्य नान्वयादिग्रह इति चोदयति । नन्वनुभवेति । ननु व्यासङ्गदशायामविद्यानिवृत्तिलक्षणकार्याभावः कारणाभावप्रयुक्तो वाच्यः । चक्षुः संयोगादेश्च सत्त्वात्तद्व्यतिरिक्तकारणाभावो वृत्त्यभाव एव । तथा च वृत्तेः कारणत्वसिद्धिरिति नेत्याह । कार्यानुरोधेनेति । नन्विन्द्रियमनः संयोगस्य तदुभयनिष्ठत्वात्ततः कथं विषयचैतन्यस्यावि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

घानिवृत्तिरित्यत आह । न च व्यधिकरण इति । ननु समनस्केन्द्रियसम्प्रयोगस्याप्रत्यक्षतया तत्कल्पिका वृत्तिरभ्युपेयेति नेत्याह । न च वृत्तिनिराकरण इति । अज्ञानमिति । ज्ञानविरोधित्वेन प्रतीयमानस्य कथं ज्ञानान्यसम्प्रयोगनिवर्त्यत्वमित्याशङ्क्य तर्हि वृत्तिनिवर्त्यत्वमप्यनुपपन्नमित्याह । न च ज्ञानैकेति । ज्ञानस्यैवाज्ञान निवृत्तौ कारणत्वाद्वृत्तेरप्युपकरणत्वान्न ज्ञानत्वविरोध इत्याशङ्क्य सम्प्रयोगस्याप्युपकारकत्वात्तुल्यमित्याह । न च चैतन्यमिति । वृत्तेरप्यज्ञानत्वादनुभवविरोधस्तवापि सम इत्याह । ज्ञानेनाज्ञानमिति ॥

ननु परोक्षे विषये स्फुरणाभावात्तद्व्यवहारार्थं वृत्तिरभ्युपेयेति नेत्याह । एव मन्यदपीति ।

एवमन्यदपि वृत्तिकार्यं तया विनैव निर्वाह्यम् । न च जानामीत्यनुभवसिद्धावृत्तिर्न प्रत्याख्यानमर्हतीति वाच्यम् । असत्युपयोगे जानामीत्यस्य स्वप्रकाशानुभवगोचरव्यवहारमात्रत्वादिति चेत् ।

(वृत्त्यभावे ऽपि त उच्यते, अनुगतकार्यं ह्यनुगतमेव त्कार्यनिर्वाहः) कारणमन्वयव्यतिरेकाभ्यां निरूप्यते । तच्चानुगतरूपं चक्षुःसम्प्रयोगादिषु न सम्भवति प्रत्येकं तेषा मननुगतत्वात् । न चेन्द्रियसंयोगत्वमनुगतम् । तस्य व्यासङ्गकालीनेन्द्रियसम्प्रयोगे ऽपि

गतत्वात् । अतिप्रसक्तस्य कारणतानवच्छेदकत्वात् । न च समनस्केन्द्रियसम्प्रयोगत्वमनुगतम् । तथा मनसः सहकारिणस्तत्कार्यनिरूपितकारणतानवच्छेदकत्वात् । असहकार्येव तत्र मन इति चेत् । न व्यासङ्गादौ स्वतन्त्रान्वयव्यतिरेकवतस्तस्य कारणत्वनियमात् । अन्यथा दण्डादिसहितमृदादिः [कारणमित्यसहकारि विश्वं स्यात् ॥

वृत्तिमात्रस्याप्रकाशत्वेन व्यवहारस्य ततो ऽसिद्धेस्तद्व्यतिरिक्तश्चित्प्रकाशो ऽपि वाच्यः । तथाच वृत्तिरूपो ऽनुगतधर्मो मुधेति भावः । ननु प्रयोजनशून्यस्यापि वस्तुनो दर्शनादनुभवसिद्धावृत्तिर्नापन्हवमर्हतीत्युक्तमिति तत्राह । न च जानमीति । काष्ठलोष्टादेरपि यं कंचन जन्तुम्प्रति पुरुषार्थपर्यवसायित्वात्सर्वथाप्रयोजनशून्यस्यानुभव एव न सम्भवतीत्यर्थः ।

अविद्यानिवृत्तित्वरूपानुगतधर्मावच्छिन्ने कार्ये ऽनुगतधर्मावच्छिन्नं कारणं वक्तव्यमन्यथा कार्यकारणभावस्य दुर्ग्रहत्वात् । तच्च वृत्तिव्यतिरेकेण न सम्भवतीति सिद्धान्तयति । उच्यत इति । ननु चक्षुरादिसम्प्रयोगे इन्द्रियसंयोगत्वमनुगतरूपमित्याशङ्क्य तदवच्छिन्ने सत्यपि कार्यादर्शनान्न तस्य कारणतावच्छेदकत्वमित्याह । न चेन्द्रियेति । तर्हि समनस्केन्द्रियसम्प्रयोगत्वमव्यभिचारात्कारणतावच्छेद मित्याशङ्क्य किं मनसो ऽपि तत्र सह-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कारित्वमुत न । आद्ये तस्येतरकारणतावच्छेदकमध्ये ऽनुप्रवेशो न युक्त इत्याह । न च समनस्केति । तथेति । अवच्छेदकमित्यर्थः । अनवच्छेदकत्वादिति । अन्यथा दण्डत्वादिवत्तत्राकारणत्वापातादित्यर्थः । द्वितीयपक्षं शङ्कते । असहकारीति । इन्द्रियसंयोगे सत्यपि तद्व्यतिरेके कार्यव्यतिरेकदर्शनात्तस्य सहकारित्वमावश्यकमित्याह । न व्यासङ्गेति । सहकारिणोऽप्यवच्छेदकत्वे कार्यमात्रमेककारणकं स्यादित्याह । अन्यथेति ॥

नन्वविद्यानिवृत्तिकार्ये बाह्येन्द्रियसंयोगस्त्वत्वेन कारणं मनश्च मनस्त्वेन कारणम् । तथा च व्यासङ्गदशायां मनोव्यापाराभावादेव कार्यविरह इति चोदयति । अस्तु तर्हीति ।

(व्यासङ्गदशायां मनसो व्यापाराभावात्कार्यविरहोपपादनखण्डने) अस्तु तर्हि बाह्येन्द्रियसम्प्रयोगत्वेनेन्द्रियसम्प्रयोगस्तत्र कारणं मनसः सहकारिणो विरहाद्व्यासङ्गे ऽविद्यानिवृत्तिविरह इति चेत् । न, आत्माविद्यानिवृत्तिस्थले तदसम्भवात् । अथ यथा बाह्यप्रत्यक्षे मनस इन्द्रियसहकारित्वमात्मप्रत्यक्षे तु तदेव हेतुः । एवं बाह्याविद्यानिवृत्तौ मनो बहिरिन्द्रियसहकारि, आत्माविद्यानिवृत्तौ तु तदेव हेतुरिति चेत् । न, अनुगतहेतौ सम्भवत्यननुगतस्याहेतुत्वात् । किञ्च जन्मज्ञाना-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नभ्युपगमे इन्द्रियत्वमेव दुर्निरूपं तस्य तद्घटितशरीरत्वात् । न चाविद्यानिवृत्त्यैव तन्निरूप्यते तेन रूपेण तस्य तज्जनकत्वानुपपत्तेः । तत्सम्प्रयोगस्याप्येकस्य दुर्निरूपत्वाच्च ॥

तत्र किमविद्यानिवृत्तिमात्रे बाह्येन्द्रियसम्प्रयोगः कारणमुत बाह्याविद्यानिवृत्तावेव । आद्ये व्यतिरेकव्यभिचारमाह । न, आत्माविद्येति । द्वितीयकल्प आत्माविद्यानिवृत्तेराकस्मिकत्वशङ्काव्युदासाय हेतुं प्रदर्शयन् तं पक्षमनुदति । अथ यथेति । एवं क्वचित् बाह्येन्द्रियसम्प्रयोगः क्वचिदन्य इत्यननुगमदोषस्तदवस्थ इत्याह । न, अनुगतेति । नन्विन्द्रियसम्प्रयोगत्वेनाविद्यानिवृत्तौ मनस इन्द्रियसम्प्रयोगो ऽपि सहकारीति चेन्न । मनसः प्रमातृत्वेनानिन्द्रियत्वादिति भावः । किञ्च शरीरसंयुक्तं ज्ञानकरणमतीन्द्रियमिन्द्रियमिति प्राचाम्मते स्मृत्यजनकज्ञानकरणमनःसंयोगाश्रयत्वमिन्द्रियत्वमित्यर्वाचीनमते च जन्यज्ञानघटितमेवेन्द्रियत्वमिति तदनभ्युपगम इन्द्रियत्वमेव न सिद्ध्येदित्याह । किञ्च जन्येति । नन्विन्द्रियत्वस्य जातित्वान्न जन्यज्ञानापेक्षेति चेत् । न तेजस्त्वादिना साङ्कर्यात् । न च तेजस्त्वादिव्याप्यमन्यदेवेन्द्रियत्वमिति वाच्यम् । श्रोत्रे तव मते तदसम्भवात् । इन्द्रियत्वस्य नानात्वेन तन्निरूपितसम्प्रयोगस्यापि नानात्वादननुगमदोषापरिहारात् । चक्षुष्ट्वादिना तुल्यव्यक्तित्वात् । तथाचेन्द्रियत्वं नजातिः परापरभावरहितजातिसमानाधिकरणत्वात् सम्प्रयोगत्ववदिति भावः । नन्वविद्यानिवर्तकमनःसंयोगाश्रयत्वमिन्द्रियत्वमिति न ज्ञानापेक्षेति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत्राह । न चाविद्येति । तत्र वक्तव्यम् । किमविद्यानिवर्तकं यन्मनः संयोगाश्रयत्वमिन्द्रियत्वमुताविद्यानिवर्तको यो मनःसंयोगस्तदाश्रयत्वं वा । नाद्यः आत्मनोपीन्द्रियत्वप्रसङ्गात् । द्वितीये मनःसंयोगस्य किं चक्षुर्मनःसंयोगत्वादिरूपेण कारणत्वमिन्द्रियमनःसंयोगत्वेन वा । आद्ये कारणतावच्छेदकाननुगमदोषः । द्वितीये इन्द्रियत्वे ज्ञाते तत्संयोगत्वेन जनकज्ञानं, तस्मिन् ज्ञाते च तदाश्रयत्वलक्षणेन्द्रियत्वज्ञानमिति परस्पराश्रयः स्यादित्यभिप्रेत्याह । तेन रूपेणेति । इन्द्रियार्थसन्निकर्षेष्वपि संयोगादिसाधारणं जातिरुपाधिर्वानुगतं सम्भवतीत्याह । तत्सम्प्रयोगस्येति ॥

ननु मन एवाविद्यानिवृत्तिमात्रे ऽनुगतं कारणं रूपाद्यविद्यानिवृत्तौ च चक्षुरादिकमपि विशेषकारणमिति चेन्न । व्यासङ्गे मनसश्चक्षुरादेश्च सत्त्वे ऽपि कार्यादर्शनात् । ननु तदा मनसश्चक्षुरादिसंयोगाभावात् कार्याभाव इति चेन्न । तस्यातीन्द्रियस्य व्यतिरेकग्रहायोगात् । कार्याभावानुपपत्त्या कारणभावकल्पनायां प्रत्यक्षतया झटित्युपस्थितानित्यज्ञानाभाव एव कल्प्यतामित्यभिप्रेत्योपसंहरति । तस्मादिति ॥

(उपसंहारमुद्रयान्तः करणवृत्तिनिरूपणम्) तस्माद्व्यासङ्गे यद्विरहादज्ञाननिवृत्तिविरहो यत्रेन्द्रियाणामन्वयव्यतिरेकौ सान्तः करणवृत्तिरेषितव्या । अन्यथा परमते विज्ञानसाधनादेव व्यवहारोपपत्तौ किं विज्ञानेन । किञ्च युगपदनेकेषु पठत्सु युगपदनेकशब्दावच्छे-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देन श्रोत्रमनःसंयोगे सत्यपि यच्छब्दविषयिणी जिज्ञासा तस्यैवाज्ञानं निवर्त्तते नान्यस्येत्यनुभवसिद्धम्। इच्छा च स्वगोचर एव हेतुः स्वापेक्षया गमनादर्शनात्। न चाविद्यानिवृत्तिविशिष्टमेव चैतन्यं जिज्ञासागोचरः। अविद्यानिवृत्तय एनं ज्ञातुमिच्छामीति जिज्ञासायास्तदगोचरत्वात्। अस्या अविद्यानिवर्त्तकज्ञानगोचरत्वात्। परोक्षजिज्ञासानुपपत्तेश्च। तथाच शब्दान्तरे यद्विरहादज्ञानं न निवर्त्तते तदेवागन्तुकं ज्ञानम् जिज्ञासाजन्यान्वयव्यतिरेकाभ्यां वृत्तिरप्यविद्यानिवृत्तौ साक्षात्कारणं तन्निवर्तते तदेवागन्तुकं ज्ञानं जिज्ञासाजन्यं वृत्तिरित्यन्वयव्यतिरेकाभ्यां वृत्तिरेकयोश्छेदंत्वविषययोरिवावच्छेदकविषयत्वेनाप्युपपत्तेः॥

तद्धेतोरेवास्त्विति नायस्य नात्र प्रसङ्गो जन्यज्ञानासिद्धौ तद्धेतोरेवासिद्धेरित्यभिप्रेत्याङ्गीकृत्यापि परमतेपीदं दूषणं समानमित्याह। अन्यथेति। ननु परमते अनुभूयमानत्वान्न तदपन्हव इति चेत्तर्ह्यस्मन्मतेप्यनित्यविषयत्वाहङ्कारधर्मत्वादिरूपेणानुभवान्नापन्हव इति तुल्यम्। किञ्च समनस्केन्द्रियसन्निकर्षे सत्यपि वृत्तिविरहादेवाविद्यानिवृत्तिविरहो दृश्यत इत्याह। किञ्च युगपदिति। ननु तादृश-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्थले जिज्ञासाया अपि विशेषकारणत्वादन्यत्र तदभावा-द्वाविद्यानिवृत्तिविरहो न तु वृत्तिविरहादित्यत आह । इच्छा चेति। इष्यमाणजनकत्वाज्ज्ञानस्यैवेष्यमाणत्वाच्चाज्ञाननिवृत्तौ कारणतेत्यर्थः । तर्ह्यविद्यानिवृत्तेरपीष्यमाणतया तत्साध्यत्वमित्याशङ्क्य तद्धेतोरेवाऽऽगन्तुकस्येष्यमाणत्वमनुभूयत इत्याह। न चाविद्येति। परोक्षविषयेऽपि जिज्ञासादर्शनात्तत्राविद्यानिवृत्तेरसम्भवाज्जन्यज्ञानाभावे तदनुपपत्तिरित्याह। परोक्षेति । जिज्ञासाया अविद्यानिवृत्त्यहेतुत्वसाधनफलमाह । तथा चेति । निवर्तकचैतन्यावच्छेदकत्वेन वृत्तेरुपयोग इति मतान्तरमाह । तन्निवर्त्तकेति । तर्हि तन्निरूपितवृत्त्यन्वयव्यतिरेकविरोध इत्यत आह । अन्वयेति ॥

वृत्तेर्हेतुत्वाच्छेदकत्वं मतद्वयेप्यावश्यकत्वमित्युपसंहरति । सर्वथेति ।

(वृत्तेरविद्यानिवर्तकत्वोपसंहारः प्रकाशानिवर्त्यत्वं च) सर्वथाप्युपयुज्यतेऽविद्यानिवृत्तौ वृत्तिः । एतेन तस्याः प्रकाशानिवर्त्त्यत्वाद्वृत्तेश्चाप्रकाशत्वादिति निरस्तम् । अविद्यायाः वृत्तिनिवर्त्त्यत्वेऽपि चैतन्यनिवर्त्त्यत्वेन प्रकाशनिवर्त्यत्वानपायात् । प्रकाशमात्रजन्यत्वस्य प्रतियोगिजन्याविद्यानिवृत्तावसम्भवात् । अपि च न प्रकाशत्वेन ज्ञानमज्ञाननिवर्त्तकं, न चावृत्तित्वेन वृत्तिः । परोक्षवृत्तौ तदभिव्यक्तप्रमांशे च भावरूपाज्ञाननि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वृत्त्यदर्शनात् । किंत्वपरोक्षप्रमाणज्ञानत्वेन । तच्च वृत्त्युपसर्जनचैतन्यस्य चैतन्यवृत्त्योर्वाविद्यानिवर्त्तकत्त्वे ऽविशिष्टम् । एतेन न जानामीति ज्ञानविरोधित्वमज्ञानस्यानुभूयते न वृत्तिविरोधित्वं, ज्ञानं च स्वरूपमेवेति प्रत्युक्तम् । वृत्तिशबलचैतन्यं वृत्त्युपहितं वा ज्ञानपदार्थ इति सिद्धान्तद्वये ऽप्यविद्यानिवृत्तौ वृत्तेरपेक्षितत्वात् । नञर्थस्य विरोधित्वस्य तत्सम्बन्धिपदार्थप्रतियोगित्वनियमात् ॥

किञ्च तरति शोकमात्मवित् ज्ञानेन तु तदज्ञानं येषां नाशित मात्मन इत्यादिश्रुतिस्मृतिष्वात्मविषयज्ञानादेवाविद्यानिवृतिश्रवणात्स्वरूपज्ञानस्य वस्तुविषयत्वाभावात्तदतिरिक्तवृत्तिरभ्युपेयेति भावः । चैतन्यस्याप्यविद्यानिवर्तकत्वाङ्गीकारात्पूर्वोक्तचोद्यं निरस्तमित्याह । एतेनेति । किमविद्यायाः प्रकाशनिवर्त्त्यत्वमात्रमभिप्रेतमुत प्रकाशमात्रनिवर्त्त्यत्वमाद्यं न विरोध इत्याह । अविद्याया इति । अविद्यानिवृत्तावविद्याया अपि कारणत्वात् द्वितीयमसम्भवीत्याह । प्रकाशमात्रेति । नन्वविद्यानिवृत्तिःप्रतियोग्यतिरिक्तप्रकाशजन्या न भवति तमोवृत्तित्वादन्धकारनिवृत्तिवदित्याशङ्क्यान्धकारस्यापि मन्दप्रकाशेन सहानुवृत्तिदर्शनात् प्रौढप्रकाशेनैव तन्निवृत्तिर्वक्तव्या । तथा चैतन्यप्रकाशस्यापि परोक्षस्थले ऽविद्यया सहैवावस्थाना-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दपरोक्षवृत्त्यभिव्यक्तप्रकाशस्यैव तन्निवर्तकत्वमित्याह । अपि चेति । न वाधवृत्तित्वेनेति दृष्टान्तार्थमुक्तम् । नन्वेवं सत्यज्ञानस्य न जानामीति ज्ञानसामान्यविरोधित्वानुभव-विरोध इति चेन्न । यथा वस्तुतः शक्त्यादिसम्पन्नसुरविनाश्या अपि दैतेया असुरा इति सुरसामान्यविरोधितया प्रतीयन्ते एवमज्ञानमिति ज्ञानमिति ज्ञानसामान्यविरोधितया प्रतीयमानस्यापि वस्तुतो वृत्तिविशेषाभिव्यक्तचैतन्येनैव निवृत्तिरिति भावः । वक्ष्यमाणयुक्तितोऽपि वृत्ति-निवर्त्यत्वपक्षोक्तदूषणमयुक्तमित्याह । एतेनेति । न जानामीति हि ज्ञानपदवाच्येनाज्ञानस्य विरोधः प्रतीयते । तद्वाच्यं च वृत्तिविशिष्टं वृत्त्युपहितं वा चैतन्यमित्युभयथापि वृत्तिविरोधित्वमविद्यायाः प्रतीयत इत्याह । वृत्ति-शबलमिति । तत्र हेतुमाह । नञर्थस्येति । न जानामीत्यत्र नञर्थस्याज्ञानधर्मिकविरोधित्वस्य सम्बन्धिज्ञानपदस्य योऽर्थो वाच्यो वृत्तिकवलीकृतचैतन्यं तन्निरूप्यत्वनियमादित्यर्थः ॥

वृत्तिविरोधित्वेऽपि चैतन्यविरोधित्वानपायादन्यदपि चोद्यं निरस्तमित्याह । एतेनेति ।

(चैतन्याविरोधितया ज्ञानस्य चोद्यान्तरपरिहारः) एतेन चैतन्याज्ञानयोरविरोधित्वे कथन्तयोः प्रकाशत्वाप्रकाशत्वे ज्ञानत्वाज्ञानत्वे च स्यातामिति निरस्तम् । वृत्तिसहकृतचैतन्यस्याज्ञानविरोधित्वाभ्युपगमात् । अत एवेदमपि परास्तम्, अनुमेयादि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गोचरपरोक्षवृत्तौ सत्यामपि नानुमेयादौ भावरू-पाज्ञाननिवृत्तिः, इच्छादौ च वृत्तिमन्तरेणापि स्फुरणमात्रेणाज्ञाननिवृत्तिरित्यन्वयव्यतिरेकव्य-भिचाराद्वृत्तिर्नाज्ञाननिवृत्तौ हेतुरित्यपरोक्ष-वृत्तेरेवाज्ञाननिवृत्तिहेतुतया परोक्षवृत्तेरन्वय-व्यभिचारस्यादूषणत्वात् वन्ह्यनुमानिकाद्विशेष-दर्शनादपरोक्षभ्रमो न निवर्त्तेत इति नापरोक्षम-पि विशेषदर्शनं तत्र हेतुः । इच्छादेश्चानावृतसा-क्ष्यंशाध्यासादेवाज्ञानविरहात्स्फुरणमात्रादज्ञा-ननिवृत्तौ नोदाहरणम् । यच्चोक्तं वृत्तिर्यदर्थप्रकाश-त्वरूपं विहाय जातिविशेषेणाविद्यातत्कार्ये नि-वर्त्तयेत्तदा रागनिवर्त्यद्वेषवत्तयोः सत्यत्वे ऽपि तदुपपत्तिः। अथार्थप्रकाशत्वेन तदा स्वरूपचैत-न्यस्यापि तथात्वात्ततोप्यविद्यानिवृत्तिः स्या-दिति । तन्मन्दमन्वयव्यतिरेकाभ्यामपरोक्षप्र-माणाज्ञानत्वेन तन्निवर्त्यस्यैव मिथ्यात्वात् । केवलसाक्षिणो ऽविद्यासाधनत्वाच्च नाविद्यानि-वर्त्तकत्वम् ।

अत एवेदमिति । स्पष्टोऽर्थः । अपरोक्षप्रमाणहेतोरेव-निवर्त्तकत्वाभिधानात्तत्र नान्वयव्यभिचार इत्याह । अपरो-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्तेति। परोक्षवृत्तेरविद्यानिवृत्तौ व्यभिचारेऽपि नापरोक्षवृत्तेर्व्यभिचार इत्यत्रोदाहरणमाह। न हीति। पीतः शङ्ख इति। भ्रमस्यानुमानिकश्वैत्यज्ञानेनानिवृत्तावपि तदपरोक्षज्ञानस्य तन्निवृत्तौ हेतुत्वदर्शनादित्यर्थः। व्यतिरेकव्यभिचारश्च नास्तीत्याह। इच्छादेरिति। वृत्त्यभावेऽपि यद्यज्ञाननिवृत्तिः स्यात्तर्हि व्यतिरेकव्यभिचारः स्यान्नैतदस्ति इच्छाद्यवच्छिन्नचैतन्यावरकाविद्याभावेन तन्निवृत्तिरपि नेत्यर्थः। वृत्तेः किं जातिविशेषप्रयुक्तमविद्यानिवर्तकत्वमुतार्थप्रकाशत्वप्रयुक्तमाद्ये तन्निवर्त्यस्य रागनिवर्त्यद्वेषवन्मिथ्यात्वं न सिद्ध्येत्। द्वितीये वृत्त्यभावेऽपि चैतन्यप्रकाशादेवाज्ञानं निवर्तेत। कारणतावच्छेदकावच्छिन्ने सति वृत्तिव्यतिरिक्तापेक्षस्य कार्यं स्यादिति वाच्यम्। शुक्तिरजतादावेतादृशज्ञाननिवर्त्यस्य मिथ्यात्वनियमादिति दूषयति। तन्मन्दमिति। ज्ञानस्य स्वविषयाव्युदासकत्वादपि न केवलेति॥

तर्हि कदापि तस्य न निवर्तकत्वमित्याशङ्क्य सहकारिसमवधाने निवर्तकत्वं तस्यैवेति सदृष्टान्तमाह न चैवमिति।

(वृत्तिसहकृता ज्ञानादविद्यानिवृत्तिः)

न चैवं वृत्तिसहकृतादपि तस्मात्कथं तन्निवृत्तिरिति वाच्यम्। साधकस्यापीश्वरज्ञानस्येव सहकारिविशेषान्निवर्तकत्वोपपत्तेः। तस्माद्यथा परमते संशयस्य स्थाणुत्वादिवैशिष्ट्यविषयत्वेऽपि न संशयविरो-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धित्वम् । संशयधाराविलोपप्रसङ्गात् । किं तु निश्चयस्यैव । तथैवान्वयव्यतिरेकदर्शनात् । तत्रापि प्रमेयमिति ज्ञाने सर्वावभासे ऽपि घटत्वादिप्रकारकसंशयदर्शनेन संशयस्य स्वसमानप्रकारकनिश्चयविरोधित्वमास्थितम् । तत्राप्यानुमानिकविशेषदर्शने सत्यपि प्रत्यक्षभ्रमदर्शनादपरोक्षरूपमेव विशेषदर्शनं तन्निवर्त्तकमित्यन्वयव्यतिरेकाभ्यां स्वीक्रियते । एवमस्मन्मते ऽपि स्वप्रकाशसाक्षिणा स्वपरप्रकाशे ऽपि तद्गोचराविद्यानिवृत्तौ चक्षुरादिजन्यज्ञानान्वयव्यतिरेकदर्शनात् वेदान्तविज्ञानसुनिश्चितार्था इत्यादिशास्त्राच्चान्तःकरणवृत्तिरविद्यानिवृत्तौ हेतुरिति। प्रयोगश्च इन्द्रियसंयोगे सत्यप्यजायमानाऽविद्यानिवृत्तिः कादाचित्कहेतुजन्या, कार्यत्वात्, घटवत्, अन्यथा व्यासङ्गदशायामप्यविद्यानिवृत्तिप्रसङ्गात्। तच्च कादाचित्कं कारणं परिशेषादन्तःकरणवृत्तिरिति ॥

ईश्वरज्ञानस्येत्युपलक्षणम् । अस्मदादिघटज्ञानस्यापि मुद्गरादिसहकारिणि सति स्वविषयनिवर्तकत्वदर्शनादित्यर्थः । यत्त्वत्रार्वाचीनेनोक्तं ब्रह्मणः स्वप्रकाशत्वेनाज्ञात-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वमेव नास्ति कुतस्तन्निवृत्तौ वृत्तेरुपयोग इति तन्न । किं स्वप्रकाशत्वमज्ञातत्वाभावे प्रयोजकमुत प्रकाशमानत्वम् । नाद्यः आत्मनोऽन्यत्र तद्व्याप्तिस्थलाभावात् । द्वितीये यदि प्रकाशमानत्वं प्रकाशरूपत्वं तदा पूर्वोक्त एव दोषः । यदि प्रकाशप्रयुक्तताज्ञानाद्यगोचरत्वं तदा प्रयोज्यप्रयोजकयोरभेदः । अथ प्रकाशविषयत्वं प्रकाशमानत्वम् । तदपि न । ब्रह्मणः स्वपरप्रकाशाविषयत्वात् । अङ्गीकृत्यापि विषयत्वं तन्मात्रेणाज्ञातत्वाद्यभावः किं तु वृत्तिविशेषे सत्येवेति सदृष्टान्तमुपसंहारव्याजेनाह । तस्माद्यथेति । वेदान्तजन्यज्ञानस्यानर्थनिवर्तकत्वश्रवणाच्चाविद्यानिवृत्तौ तदुपयोग इत्याह । तरति शोकमिति । तर्कितेऽर्थेऽनुमानमाह । प्रयोगश्चेति । अविद्यानिवृत्तिरित्युक्ते चाविद्यानिवर्तकेन्द्रियसंयोगमादायार्थान्तरतास्यात्तन्निवृत्त्यर्थमिन्द्रियसंयोगेत्यादिविशेषणम् । कादाचित्केति । आदिमत्प्रयोज्येत्यर्थः । तथा च नाविद्ययार्थान्तरता, न वा वृत्त्यवच्छिन्नचैतन्यस्यैवाविद्यानिवर्तकत्वपक्षे बाधः । तन्मतेऽपि वृत्तिप्रयोज्यत्वात् । विपक्षे दण्डं पातयति । अन्यथा व्यासङ्गेति । मनःसंयोगस्य हेतुत्वनिरासात्तस्मिन् सत्यप्यनेकशब्दसमवाये शब्दान्तराविद्यानिवृत्त्यदर्शनाच्चेति भावः ॥

पूर्वं विषयतया अनुभूयमानं ज्ञानमविषयचैतन्यादेवेत्युक्तमिदानीं स्फुरणस्य विषयसम्बन्धित्वेनानुभवाज्ज्ञानस्य च प्रमातृसम्बन्धित्वेनानुभवाच्चदन्यज्ज्ञानमित्याह । किञ्चेति ।

ज्ञानं स्फुरणादन्यत्। किञ्च स्वरूपज्ञानातिरिक्तावृत्तिःस्वीक-

र्त्तव्या। देवदत्तो जानाति घटः स्फुरतीति तयोर्भेदेनानुभवात् । ननु न वृत्तिस्फुरणयोर्भेदः, बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इत्यनर्थान्तरमित्यक्षपादोक्तेरिति चेत्, देवदत्तो जानाति घटः स्फुरतीति तयोर्भिन्नाश्रयत्वेनानुभूयमानयोरेकत्वायोगात्। न हि प्रमातृधर्मस्य ज्ञानस्य प्रमेयतादात्म्यं सङ्गच्छते। अभेदे वा देवदत्तो घटं जानातीति वद्देवदत्तो घटं स्फुरतीति, घटः स्फुरतीति वत् घटो जानातीति च प्रत्ययप्रयोगयोरापत्तेः । ननु जानातीति ज्ञानाश्रयत्वमनुभूयते घटः स्फुरतीति च ज्ञानविषयत्वम्, अतो न स्फुरणज्ञानयोर्भेदो, न वा प्रतीतिवैपरीत्यमिति चेन्न। घटमहं जानामीत्यनुभूयमानज्ञानात्पृथगेव स मे घटः स्फुरतीति स्फुरणस्यानुभूयमानत्वात्। ननु घटं जानामीत्यर्थविशेषणं ज्ञानमात्मन्यनुभूयते, घटः स्फुरति ज्ञानविषयो भवतीति ज्ञानोपसर्जनोऽर्थः प्रतीयत इति विशेषणविशेष्यभाव एव परं भिद्यते न त्वनुभवयोर्विषयभेद इति चेन्न। स्फुरतीति स्फुरणानुभवस्य तदुपसर्जनतया शाब्दवद्व्याख्यानानर्हत्वात् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ननु स्फुरणं नामोपलब्धिः बुद्ध्याद्यभेदस्याक्षपादै-रेवोक्तत्वान्न तयोर्भेद इति चोदयति । ननु न वृत्तीति । प्रमातृप्रमेययोर्भिन्नत्वात्तत्तादात्म्येन प्रतीयमानयोरभे-दायोगान्मूलप्रमाणानपेक्षमक्षपादवचनमनुपादेयमित्यभि प्रेत्याह । न देयदत्त इति । अयोगमेवोपपादयति । न हीति । सुखादौ तददर्शनादित्यर्थः । ननु द्वित्वादिवदुभय-सम्बन्धित्वमुपपद्यतेत्याशङ्क्य तर्ह्युभयत्रोभयसम्बन्धप्र-तीतिः स्यादित्याह । अभेदे वेति । ननु घटः स्फुरतीति न स्फुरणतादात्म्यं प्रतीयते किं तु प्रमातृधर्मस्फुरणविषयत्वं घटस्य, तथा च नोक्तदोष इति चोदयति । ननु जानातीति । सकर्मत्वाकर्मकत्वलक्षणविरुद्धधर्मवत्तयानुभूयमानत्वान्न-तयोरभेद इत्याह । न घटमहमिति । ननु घटः स्फुरतीति सकर्मकज्ञानस्यैवानुभूयमानत्वान्नोक्तवैधर्म्यमिति चोद-यति । ननु घटं जानामीति । घटश्चलतीति वत् घटः स्फुर-तीति तत्तादात्म्यप्रतीतेर्नेदं व्याख्यानमुचितं शब्दस्यैव लक्षणादिवृत्त्यार्थान्तरस्य सम्भवादिति दूषयति । न स्फुर-तीति ॥

व्यवसायतज्ज्ञानज्ञानविषयो भवतीति व्याख्याने ऽपि यज्ज्ञानं प्रति विषयो घटस्तेनैव घटे स्वविषयत्वं गृह्यते किं वा ज्ञानान्तरेणेति विकल्प्य क्रमेण दूषयति । किञ्चेति ।

(स्वोपसर्जनमर्थं स्वस्य ज्ञानान्तर-स्य वा विषयमि-ति विकल्प्य दोष-योजनम्)

किञ्च स्वोपसर्जनमर्थं स्वयं विष-यो करोति ज्ञानान्तरोपसर्जनं वा । नाद्यः वेद्यज्ञानवादे स्वस्य स्वविष-यत्वानुपपत्तेः । न द्वितीयः व्यवसा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यानुपनीतस्य तद्विषयत्वस्यानुव्यवसाये भाना-योगात् । स्वसम्वेद्यज्ञानवादे ऽपि किमुपसर्जनं ज्ञानं ज्ञेयेन सहैव स्वात्मनं विषयीकरोति, किं वा प्रथमं स्वात्मानं विषयीकृत्य ज्ञेयं विषयीक-रोति । नाद्यः विशेषणज्ञानतत्सन्निकर्षयोः प्रथमं वक्तव्यत्वात् । विशेषणभूतज्ञानस्यैव विशिष्ट-ज्ञानत्वे तस्य तज्ज्ञानतत्सन्निकर्षजन्यत्वायोगा-त् । अत एव न द्वितीयः बुद्धेर्विरम्यव्यापारानु-पपत्तेश्च । सकर्मकाकर्मकयोर्ज्ञानस्फुरणयोरभे-दासम्भवात् । ज्ञानेन स्फुरतीति भेदानुभवाच्च । नन्वेवमतीतादावपि स्फुरतीत्यनुभवात्तत्रापि स्फुरणापत्तिस्तत्र चाश्रयाभावेन स्फुरणाभा-वात् । ज्ञानेनैव तद्व्यवहारे प्रकृतेऽपि तथा किं न स्यादिति चेन्न । अतीतादावपि स्फुरणस्य सत्त्वात् । अन्यथा तद्व्यवहारानुपपत्तेः । व्यव-हारस्यार्थप्रकाशजन्यत्वात्, वृत्तिमात्रस्याप्रका-शत्वात् । न चासत्याश्रये कथं स्फुरणं स्यादि-ति वाच्यम् । आश्रयाभावे कार्यमेव व्यावर्तते नत्वकार्यमपि । अन्यथा तव मते ऽपि प्रलये जातिविरहप्रसङ्गात् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्यवसायानुपनीतस्येति । व्यवसायतद्गतधर्मव्यतिरिक्तस्य व्यवसायविषयकत्वस्यैवानुव्यवसायत्वाद्व्यवसायविषयकत्वस्य च व्यवसायाविषयत्वान्न तस्यानुव्यवसायविषयतेत्यर्थः । अस्तु तर्हि स्वप्रकाशवादिमते स्वविषयत्वस्य स्वेनैव ग्रहणमित्याशङ्क्य नागृहीतविशेषणान्यायेन स्वेन स्वस्यापि ग्रहणं वक्तव्यम्, तथा च तस्यापि ग्रहणविकल्पासहत्वमित्याह । स्वसम्बन्धेति । विशेषणज्ञानतत्सन्निकर्षयोरिति मतभेदेनोक्तम् । अस्तु तर्हि स्वस्मात् पूर्वं विशेषणज्ञानादिकमित्याशङ्क्य स्वस्यैव विशेषणज्ञानत्वाद्विशिष्टज्ञानत्वाच्च न पूर्वं तत्सम्भव इत्याह । विशेषणेति । विशेषणज्ञानविशिष्टज्ञानयोरेकत्वादेव पूर्वं विशेषणज्ञानाभावात् क्रमपक्षोऽप्यनुपपन्न इत्याह । अत एवेति । शब्दबुद्ध्यादीनां जन्मातिरिक्तव्यापाराभावेन क्रमेण विषयसम्बन्धश्च न सम्भवतीत्याह । बुद्धिरिति । भवन्मतेऽपि ज्ञानस्फुरणयोरत्यन्तभेद एवेत्याह । सकर्मकेति । विषयागतस्फुरणाभावेऽपि स्फुरतीत्यनुभवान्न तस्य विषयत्वमिति चोदयति । नन्विति । इष्टापत्तिमाशङ्क्याह । तत्र चेति । तर्हि ज्ञानविषयत्वमेव तत्र स्फुरतीति व्यवह्रियत इत्यत आह । ज्ञानेनैवेति । गूढाभिसन्धिरुत्तरमाह । न, अतीतादाविति । स्वमते स्फुरणस्य नित्यत्वादित्यभिसन्धिः । अभिसन्धिमजानानस्य चोद्यमुद्भाव्य तत्प्रकटनेन निराकरोति । न चासतीति । जातिविरहेति पटत्वादिजातिविरामप्रसङ्गादित्यर्थः ।

आश्रितत्वमङ्गीकृत्येदमुक्तम्, वस्तुतस्त्वनाश्रितमेव स्फुरणमित्याह । अस्माकमिति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(अनाश्रितमेव स्फुरणम्) अस्माकं च स्फुरणं नित्यात्मरूपमेवेति वक्ष्यते, तथापि विषयावच्छिन्नचैतन्यमभिव्यक्तं सत्स्फुरणमित्युच्यते । घटः स्फुरतीत्यनुभवात् । अतीतादौ च विषयाभावेन कथं तत्स्फुरणं स्यादिति चेन्न । विषयस्यावच्छेदकत्वं हि तादात्म्येन स्वरूपसम्बन्धेन वा । तत्र प्रत्यक्षे विषयस्य तादात्म्येनावच्छेदकत्वं स्फुरणस्यान्योन्याध्यासेन विषयाभिन्नत्वात् । परोक्षे तु विषयस्य स्वरूपसम्बन्धेनैवावच्छेदकत्वं, तत्क्वचिदविद्यमानस्यापि विषयस्य ज्ञान इव स्फुरणे ऽपि न विरुध्यते। नन्वेवमनुमेयस्यापि फलव्याप्यत्वापत्तिरिति चेन्न । कर्माश्रयस्यैव फलत्वात् । अनुमितौ त्वान्तरमेव चैतन्यं तदाकारवृत्त्या व्यज्यत इति न तत्फलमिति गीयते । किञ्चानुमितिगोचरे ऽपि परमाण्वादौ स्फुरणशून्ये कृतिः, तन्त्वादौ तु स्फुरणाश्रये कृतिरित्यन्वयव्यतिरेकाभ्यां विषयगतं स्फुरणं कृतिहेतुः । न च तत्र विषयस्यातीन्द्रियत्वादेव न कृतिरिति वाच्यम् । तन्त्वादावप्यनुमितिदशायां तदभावात् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्फुरणस्य नित्यत्वेपीदानीमतीतादिविषयावच्छेदकाभावात्कथं तत्स्फुरणं भवेदिति चोदयति । तथापीति । अपरोक्षविषयस्यैव तादात्म्येन स्फुरणावच्छेदकत्वमिति मुख्यसम्बन्धे स्वरूपसम्बधासम्भवात्परोक्षस्य तु नियमेन तदभावात्स्वरूपसम्बन्धेनैव परमते जन्यज्ञानवत्स्फुरणावच्छेदकत्वम् । तथाचातीतादिस्फुरणमिति न विरुध्यत इति परिहरति । न विषयस्येति । अविद्यमानस्यापीत्यपिशब्देन वस्तुत आमोक्षमतीतादिसूक्ष्मरूपेण वर्तत इति द्योतयति । परोक्षविषयस्यापि स्फुरणरूपफलावच्छेदकत्वेऽपसिद्धान्तः स्यादिति चोदयति । नन्वेवमिति । विषयाधिष्ठानचैतन्यस्यैव वृत्त्यभिव्यक्तस्य फलत्वादनुमेयादौ वृत्तिनिर्गमनाभावेन तस्यानभिव्यक्तत्वान्न फलावच्छेदकत्वमित्याह । न कर्मेति । किञ्चाहमर्थधर्मज्ञानस्य कृतिकारणत्वायोगात्तत्कारणं विषयतादात्म्यापन्नं स्फुरणमावश्यकम् । तथाच तयोर्भेदसिद्धिरित्यभिप्रेत्याह । किञ्चानुमितीति । परमाणवादेः प्रत्यक्षायोग्यत्वादेव कृतिविरहो न स्फुरणविरहादित्याशङ्क्य प्रत्यक्षयोग्येऽपि स्फुरणाभावे कृतिविरहो दृष्ट इत्याह । न च तत्रेति ॥

अस्तु तर्ह्यपरोक्षवृत्तिरेवाव्यभिचारिणी कृतिहेतुः, तद्व्यभिचारे स्फुरणस्यापि व्यभिचारात्तदभिव्यक्ताधिष्ठानचैतन्यस्यैव स्फुरणत्वादिति चोदयति । नन्विति ।

ननु प्रत्यक्षज्ञानमेव स्वविषयकृतिहेतुःन तु स्फुरणं तद्विरहात्। प्रत्यक्षाभावे स्फुरणस्याप्यभावादिति। उच्यते अन्वयव्यतिरेकसहकृतकृतिनिरूपितकारणताग्राहकेणानुभवेन, देवदत्तकृति-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देवदत्तज्ञानजन्या, देवदत्तनिष्ठप्रत्यक्षकार्यत्वात्तदिच्छावदित्यनुमानेन वा लाघवोपोद्बलितेन स्फुरणमेव कृतिकारणं विषयीक्रियते न तु प्रत्यक्षज्ञानानि तेषामनन्ततया गौरवेण तदगोचरत्वात् । न च त्वत्पक्ष एव गौरवं ज्ञानातिरिक्तस्फुरणाङ्गीकारादिति वाच्यम् । सर्वसम्प्रतिपन्नात्मन एव स्वयंप्रकाशस्फुरणतया ऽस्माभिः स्वीकारात् । नन्वेवमपि वृत्त्यभिव्यक्तस्फुरणमेव कृतिहेतुरस्तु किं विषयगतेनेति चेन्न । तस्यानुमित्यादिसाधारणत्वात् । ननु विषयावच्छिन्नचैतन्यस्यापि सर्वदा सत्त्वाज्ज्ञानमन्तरेणापि तद्विषयिणी कृतिः स्यादिति चेन्न । अभिव्यक्तचैतन्यस्यैव स्फुरणपदार्थत्वात् । अभिव्यक्तेश्च वृत्तिज्ञानाधीनत्वात् । ज्ञानगतमपरोक्षत्वमपि न विषयस्फुरणं विना निर्वहति । अपरोक्षविषयत्वं हि ज्ञानस्य परोक्षत्वं विषयस्यापरोक्षत्वं प्रमात्रव्यवहितत्वेन । तच्च तदुभयस्फुरणैकं विना न निर्वहतीति शब्दापरोक्षे वक्ष्यामः ॥

लाघवतर्कोपोद्बलितप्रत्यक्षानुमानाभ्यामेकस्यैव स्फुरणस्य कृतिमात्रकारणत्वसिद्धेर्नानन्तापरोक्षवृत्तीनां कारणतोचितेति दूषयति । उच्यत इति । यज्ञदत्तकृतै

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बाधपरिहारार्थं देवदत्तेति पक्षविशेषणम् । ईश्वरज्ञान जन्यत्वेनार्थान्तरतापरिहाराय साध्ये ऽपि तत्पदम् । यज्ञदत्तसुखादौ व्यभिचारवारणाय देवदत्तनिष्ठेति । देवदत्तात्ममनःसंयोगे व्यभिचारवारणाय प्रत्यक्षपदम् । आत्मत्वादौ व्यभिचारवारणाय कार्यपदम् । न च वृत्तिज्ञाने व्यभिचारस्तस्यापि साक्षिण्यध्यासेन तज्जन्यत्वादिति भावः । जन्यज्ञानातिरिक्तस्फुरणं कल्पयित्वा तस्य कारणत्वकल्पने ऽतिगौरवमित्याशङ्क्य स्फुरणस्यात्मस्वरूपत्वेनाकल्प्यत्वात्तस्यैकस्य कृतिकारणताकल्पने लाघवमित्याह । न च त्वत्पक्ष इति । वृत्तिव्यतिरिक्तं स्फुरणं कृतिहेतुरित्यङ्गीकृत्य तस्य विषयतादात्म्यमाक्षिपति । नन्वेवमिति । वृत्त्यभिव्यक्तस्फुरणे सत्यप्यनुमितिगोचरे कृत्यनुदयान्न तेन रूपेण तस्य हेतुत्वमित्याह । न तस्येति । विषयावच्छिन्नस्फुरणे सत्यपि कृत्यनुदयान्न तेन रूपेणापि हेतुत्वमिति चोदयति । ननु विषयेति । अभिव्यक्तस्य तस्य न व्यभिचार इति परिहरति । नाभिव्यक्तेति । नन्वपरोक्षवृत्त्यभिव्यक्तत्वेन रूपेण व्यभिचार इति चेन्न वृत्त्यपरोक्ष्यस्य विषयापरोक्ष्यप्रयुक्तत्वाद्विषयापरोक्ष्यस्य संवित्तादात्म्याधीनत्वाद्विषयाभिन्नसंवित्त्वेन कृतिहेतुत्वे सम्भवति न तत्परम्पराप्राप्तरूपेण हेतुत्वमुचितमित्यभिप्रेत्याह । ज्ञानगतमिति । तच्चेति । तदव्यवहितत्वं वृत्त्यभिव्यक्तप्रमातृचैतन्यस्य विषयावच्छिन्नचैतन्यस्य चैक्यं विना नेत्यर्थः । यदा प्रमातृचैतन्योपाधिभूतमन्तःकरणं वृत्तिरूपेण विषयाधिष्ठानचैतन्यं व्याप्नोति तदा विषयचैतन्यमपि प्रमातृचैतन्याभिन्नं भवति विषय-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चैतन्याभेदेन विषयस्याध्यासात्सोपि भवति प्रमातृऽव्यवहित इति भावः ॥

नन्वेवं सतीष्टो घटो द्विष्टो घट इत्याद्यनुभवादिच्छादिव्यतिरिक्तविषयगतं धर्मान्तरमप्यङ्गीक्रियतामिति चोद्यमयुक्तमित्याह । एतेनेति ।

एतेनेष्टो घटो द्विष्टो घट इत्यादिप्रतिवन्दीपरस्परकृता तत्रेच्छाविषयत्वाद्यतिरिक्तधर्मान्तरानङ्गीकारे बाधकाभावात्तदङ्गीकारगौरवादिति ।

(स्फुरणस्य ज्ञाततापरपर्यायज्ञानजन्यत्वखण्डनम् ।) तच्च स्फुरणं ज्ञातताऽपरपर्यायं ज्ञानजन्यमिति केचित्तन्न । तस्य जन्यत्वे प्रमाणाभावात्तदङ्गीकारे गौरवादिति । नन्विदानीं घटः स्फुरतीति तस्य कालभेदावच्छेदानुभव एव जन्यत्वे प्रमाणमिति चेन्न । इदानीमहमस्मीति वत्तदनुभवस्य वर्तमानकालसम्बन्धित्वमात्रविषयतया प्रक्कालासम्बन्धित्वाविषयत्वात् । पूर्वकालासम्बन्धित्वे सत्युत्तरकालसम्बन्धित्वस्यैव कार्यत्वात् । एतावत्कालं नास्फुरदिदानीं स्फुरतीति तद्ग्राहकानुभवोऽप्यस्तीति चेन्न । तस्या ऽज्ञानाभिव्यक्तस्फुरणविषयत्वे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऽप्युपपत्तेः । अविद्याया एव स्फुरणाभावत्वात् ।
ननु ज्ञानेन ज्ञातता न जायते चेज्ज्ञानस्य विषयनियमो न स्यात् । न ह्यात्मसमवेतस्य विषयेण साक्षात्सम्बन्धोऽस्ति, येन विषयविशेषे व्यवहारस्ततो जायेत ॥

वृत्तिस्फुरणभेदस्यानेकप्रमाणसिद्धत्वेनेत्यर्थः । इष्टत्वादौ तन्नाशनीत्याह । तत्रेच्छेति । ननु स्फुरणस्यात्मरूपत्वमुक्तमयुक्तं तस्योत्पत्त्यादिमत्त्वेनानात्मत्वादात्मभेदायोगादिति वार्तिककाराः प्रत्यवतिष्ठन्त इत्याह । तच्चेति । स्यादेतदेवं यद्युत्पत्त्यादिकमस्य प्रामाणिकं स्यान्न त्वेतदस्तीति दूषयति । नत्वेति । इदानीं स्फुरतीति कालविशेषे प्रतीयमानत्वात्कालान्तरसत्त्वे च मानाभावात्कार्यत्वमिति चोदयति । नन्विति । तर्हि कालान्तरेऽसत्त्वेऽपि मानाभावाद्वर्तमानतयानुभवस्य नित्यत्वेऽपि सम्भवान्न तस्या नित्यत्वमिति दूषयति । नेदानीमिति । वर्त्तमानतावभासमात्रस्यानित्यत्वाप्रयोजकत्वे कस्य तर्ह्यनित्यत्वे प्रयोजकत्वमित्यत आह । पूर्वकालेति । तर्हि पूर्वकालासम्बन्धित्वमप्यनुभूयत इति चोदयति । एतावदिति । नास्फुरदिति । तत्स्फुरणावारकाविद्यैव प्रतिसन्धीयते न तु स्फुरणासत्त्वमिति परिहरति । न तस्येति । नास्फुरदिति नञा तदभाव एव प्रतीयत इत्यत आह । अविद्याया इति । अविद्यानिवृत्तेरधिष्ठानस्फुरणमात्रत्वात्तदभावोऽप्यविद्यैवेत्यर्थः । ज्ञाने नियतविषयकत्वानुपपत्त्या ज्ञानजन्या ज्ञातता विषयनिष्ठा सिध्यतीति चोदयति । ननु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानेनेति । अस्तु तर्हि प्रभाकुम्भयोरिव साक्षात्सम्बन्धोऽपि विषयतानियामक इत्यत आह । न ह्यात्मेति । ज्ञानस्यात्मगुणत्वेन विषयेण संयोगादिकं न सम्भवतीत्यर्थः । तर्हि मास्तु विषयनियम इत्याशङ्क्य व्यवहार नियमोऽपि न स्यादित्याह । येनेति ॥

तर्हि ज्ञानजनकमेव विषयत्वनियामकमित्याशङ्क्य किं जनकत्वमात्रं नियामकमुत समवायाद्यतिरिक्तत्वे सति जनकत्वं विषयतया जनकत्वं वा । आद्यमतिप्रसङ्गेन दूषयति । न च ज्ञानज्ञेययोरिति ।

(ज्ञानजनकस्य विषयत्वनियामकत्वे दोषः ।)

न च ज्ञानज्ञेययोर्जन्यजनकभावसम्बन्ध इति वाच्यम् । आत्मादेरपि घटादिज्ञानजनकस्य तद्विषयत्वप्रसङ्गात् । न च समवायाद्यतिरिक्तं ज्ञानजनकं तद्विषय इतिवाच्यम् । आत्मनः स्वज्ञाने ऽप्यविषयत्वापत्तेः। न च विषयतया जनकं तथेति वाच्यम् । ज्ञानकालीनविषयत्वस्य तत्पूर्वकालीनजनकतानवच्छेदकत्वात् । घटादेः पूर्वविषयत्वे बीजानिरूपणाच्च । अत एव तज्जनकेन्द्रियसम्प्रयुक्तस्तद्विषय इति निरस्तम्। आत्मादावपिप्रसक्तेः । अनियतज्ञानकालीनस्य तस्य नियतज्ञानकालीनविषयत्वाप्रयोजकत्वाच्च । अतो यस्मिन्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विषये ज्ञानाज्ज्ञाततोत्पद्यते स एव तस्य विषयो नान्य इति। ज्ञातताभिन्नं स्फुरणमपि ज्ञानजन्यमेवेति चेत्तर्हि विषयनियमार्थं ज्ञानजन्या ज्ञातताऽऽस्थेया। तव मते परोक्षज्ञान इवापरोक्षज्ञानेप्यन्यत एव नियतविषयभानोपपत्तेः। न च परोक्षज्ञानेनाप्यर्थगता ज्ञातताधीयते। अतीतादिज्ञानविषयस्य तदानीमसत्त्वादनाश्रयकार्यायोगात्। तथा सति विनष्टेऽपि घटे लौहित्याद्युत्पत्तिप्रसङ्गात्॥

द्वितीये समवायिरूपस्यात्मनः स्वसमवेतनाहमिति ज्ञानविषयत्वं न स्यादित्याह। न च समवायीति। तृतीयमसम्भवेन दूषयति। न च विषयतयेति। विषयताया ज्ञानघटितशरीरत्वेन ज्ञानसमकालायास्तत्कालपूर्वकालीनजनकताम्प्रत्यनवच्छेदकत्वादित्यर्थः। किञ्च घटादेर्विषयत्वे सिद्धे तेन रूपेण जनकत्वसिद्धिः, जनकत्वे च सिद्धे विषयत्वसिद्धिरितीतरेतराश्रयः स्यादित्याह। घटादेरिति। अस्तु तर्हि ज्ञानजनकेन्द्रियसन्निकृष्टत्वं विषयत्वनियामकमित्यत आह। अत एवेति। अतः शब्दार्थमाह। आत्मादाविति। गगनादिरादिपदार्थः। सम्प्रयोगस्य निमित्तकारणत्वेन ज्ञानकाले नियतत्वाभावेन तत्काले नियतविषयत्वानियामकतेत्याह। अनियतेति। परिशेषाज्ज्ञानजन्यज्ञातताधारत्वमेव विषयत्वनियामकमित्युपसंहरति। अतो यस्मिन्निति। ज्ञातताया ज्ञानजन्यत्वे ऽपि स्फुरणस्य किमायात-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मित्यत आह। ज्ञातताभिन्नमिति। ज्ञातताभावेऽपि विषयनियमदर्शनान्न ज्ञातताधारत्वं विषयतानियामकमिति दूषयति। तर्हीति। परोक्षेऽपि वध्यादौ ज्ञाततास्त्वित्याशङ्क्यातीताद्यर्थं सा न सम्भवतीत्याह। न च परोक्षेति। अतीतादेरपि कारणात्मना सत्त्वात्तत्र ज्ञातताधीयतामित्याशङ्क्याह। तथा सतीति।

अतीतादिव्यक्तेरभावेऽपि तत्सामान्यस्य सत्त्वात्तत्र ज्ञाततोत्पत्स्यत इत्याशङ्क्य तथापि सामान्यस्यैव तद्विषयतास्यान्न व्यक्तेरित्याह। न चातीतेति।

न चातीताद्यर्थगतसामान्ये ज्ञातता भवत्विति वाच्यम्। अन्यज्ञाततयान्यस्य ज्ञानविषयतानियमानुपपत्तेः। उपपत्तौ वा घटत्वाश्रयनिखिलघटस्याप्ययं घट इति ज्ञानविषयत्वप्रसङ्गात्। ज्ञाततोत्पत्तौ पूर्वज्ञानज्ञेयसम्बन्धाभावेन ज्ञानस्य ज्ञेयविशेषनिष्ठज्ञातताजनकत्वानुपपत्तेश्च। नापि कृतिनियमार्थं ज्ञातताश्रणीया। तव मते निर्विशेषविषये ज्ञाततावत्कृतेरप्युपपत्तेः। नित्यस्फुरणेनापि तदुपपत्तेश्च। कस्तर्हि ज्ञानज्ञेययोः सम्बन्धो येन घटज्ञानं घटीयं भवेदिति चेत्। स्वरूपसम्बन्ध एवेति केचित्। अस्मदाचार्यास्तु प्रत्यक्षज्ञानज्ञेययोर्न स्वरूपसम्बन्धः सति मुख्यसम्बन्धे स्वरूपसम्बन्धकल्पना-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

योगात् । किन्त्वन्तःकरणात्सहकारिसहिता-
द्विषयदेशव्यापिनी काचिद्वृत्तिर्जायते । तया च
वृत्त्या विषयस्य यथायथं संयोगादिः सम्बन्धः ।
वृत्त्यभिव्यक्ततत्तदवच्छिन्नचैतन्येनाध्यासिकता-
दात्म्यं परोक्षे तु तदभावात् स्वरूपसम्बन्ध एवे-
त्यर्थः ॥

जातिव्यक्त्योस्तादात्म्यसम्बन्धात्सामान्याश्रयापि
ज्ञातता व्यक्तिविषयतानियामिकेत्याशङ्क्यातिप्रसङ्गमाह ।
उपपत्तौ वेति । किञ्चज्ञातताधारत्वस्यापि नियामका-
भावान्न तेन विषयत्वनियम इत्याह । ज्ञाततोत्पत्तेरिति ।
अनुमेयादिषु कृत्यदर्शनात्तन्नियामकाज्ञाततास्थेयेत्या-
शङ्क्य ज्ञातताधारत्वनियमवत्तन्नियमो ऽप्यन्यत उपपद्यत
इत्याह । नापीति । अस्मिन्मते च नित्यमपि स्फुरणं विषय-
तादात्म्येनाभिव्यक्तं कृतिहेतुरित्याह । नित्येति । ज्ञातता-
नङ्गीकारे ज्ञानस्य ज्ञेयविशेषेणसम्बन्धाभावाद्व्यवहारवि-
शेषो न स्यादिति चोदयति कस्तर्हीति । वैशेषिकादिमते त
माह । स्वरूपेति । सिद्धान्ते प्रतिकर्मव्यवस्थां दर्शयति ।
अस्मादिति । तुशब्दसूचितं वैषम्यमाह । प्रत्यक्षेति । तत्र
तावद्वृत्तिरूपापरोक्षज्ञानस्य द्रव्येण संयोगः गुणादिना तु
संयुक्ततादात्म्यं विषयनियामकमित्याह । किन्त्वन्तः
करणेति । पञ्चमीचापादाने । अपरोक्षवृत्त्याभिव्यक्ताधि-
ष्ठानचैतन्यात्मकस्फुरणस्य विषयनियामकं सम्बन्धमाह-
वृत्त्यभिव्यक्तेति । विषयदेशसंसृष्टवृत्त्युदये विषयावच्छिन्न-

ऽचैतन्यमपि वृत्तिमदन्तःकरणावच्छेदात् प्रमातृप्रमाणचैतन्याभेदेनाभिव्यज्यते । तथा च प्रमातृतादात्म्याद्विषयस्यापरोक्ष्यं प्रदीपेन प्रकाशत इति प्रदीपस्वरूपप्रकाशविषयत्ववन्मया विदित इति प्रमात्रात्मकफलविषयत्वानुभवादिति भावः। परोक्षस्य तु वृत्त्या संयोगादेरभावाद्वृत्तितदवच्छिन्नचैतन्याभ्यां परेषामिव स्वरूपसम्बन्ध एव नियामक इत्याह । परोक्ष इति ॥

इदानीं वृत्तिस्फुरणयोर्भेदमङ्गीकृत्यारोक्षवृत्तेर्विषयदेशव्यापित्वमुक्तमाक्षिपति । ननु किमिति ।

(वृत्तिस्फुरणयोर्भेदेऽप्यपरोक्षवृत्तेर्विषयदेशव्यापित्वाक्षेपपरिहारः ।)

ननु किं वृत्तिनिर्गमनेन प्रमात्वगतयैव तया निखिलव्यवहारोपपत्तेः, अतस्तन्निर्गमनमप्रमाणमिति चेत् । उक्तं तावत्प्रत्यक्षार्थापत्तिभ्यां प्रत्यक्षविषये प्रमातृसमवायिज्ञानातिरिक्तस्फुरणमाश्रयमिति, तच्च स्फुरणमभिव्यक्तचैतन्यमेव ज्ञातता प्रत्यक्षस्य निरस्तत्वात् । अभिव्यक्तिस्तु चैतन्यस्यावरणाविद्यानिवृत्तिरेव । ततोऽन्यस्य भावस्याभावस्य वानिरूपणात् । अविद्यानिवृत्तिश्चाविद्यासमानाश्रयविषयया वृत्त्या भवति । यज्ञदत्तस्य घटज्ञानेन तदीयपटाज्ञानस्य देवदत्तघटाज्ञानस्याप्यनिवृत्तेः। तस्या लाघवेन प्रतियोगिसामानाधिकरण्यज्ञानजन्यत्वाच्च । विषय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चैतन्यावरणमज्ञानं च विषयावच्छिन्नचैतन्यगतमिति तद्गतया वृत्त्यापि भवितव्यम् । वृत्तेश्च विषयचैतन्यगतत्वं न निर्गमनाद्वृत्तेः सम्भवति । न चैवमनुपलब्धिबाधः । वृत्तेर्बहिरिन्द्रियायोग्यत्वात् ॥

विषयावच्छिन्नचैतन्यस्याविद्यानिवृत्त्यर्थं वृत्तिनिर्गमनमावश्यकमिति वक्तुमर्थं स्मारयति । उक्तं तावदिति । अर्थापत्तिशब्देन धारानुसन्धानाद्यनुपपत्तिर्देवदत्तकृतिर्देवदत्तज्ञानजन्येत्यनुमानं च परिगृह्यते । ज्ञानातिरिक्तस्फुरणं ज्ञाततैवेत्याशङ्क्याह । तच्च स्फुरणमिति । अस्तु तर्हि वृत्तिकृतः प्रकाश एव तदभिव्यक्तिरित्याशङ्क्य स्वप्रकाशचैतन्यस्य प्रकाशान्तराविषयत्वादविद्यानिवृत्तिरेवाभिव्यक्तिरित्याह । अभिव्यक्तिस्त्विति । अस्तु तर्हि प्रमातृसमवेतयैव वृत्त्याविद्यानिवृत्तिरित्यत आह । अविद्यानिवृत्तिश्चेति । भिन्नविषयस्य भिन्नाश्रयस्य वा वृत्तिज्ञानस्य नाज्ञाननिवर्त्तकत्वमिति व्यतिरेकमाह । यच्च-दृत्तस्येति । ननु यदज्ञानं यं प्रति यदा ऽऽवृणोति तदा तद्विषयज्ञानेन तन्निरसनमभ्युपेयं, अन्यथैकघटावच्छिन्नचैतन्यस्य चैत्रमैत्रज्ञानसमानाधिकरणचैत्रघटज्ञानेन तदुभयाज्ञाननिवृत्तिप्रसङ्गात् । तथा च समानाधिकरणत्वमनपेक्षितमित्याशङ्क्याह । तस्या इति । यद्यप्येवं तथाप्यविद्यास्वसाधकप्रमाणे ज्ञाननिवर्त्यत्वेन सिध्यन्ती लाघवेन स्वसमानाधिकरणज्ञाननिवर्त्यत्वेन सिध्यतीति तत्प्रमाणबलात्समानाधिकरणत्वमपि वाच्यमिति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भवतु तर्हि प्रमातर्य्येव विषयावरकमज्ञानमित्याशङ्क्य तस्यावरकत्वात् बाह्यतमोवदावृत्ताश्रितत्वं वक्तव्यमित्याह । वृत्तिविषयचैतन्येति । वृत्तेर्विषयचैतन्याश्रितत्वसाधनफलमाह । वृत्तेरिति । वृत्तेर्बहिर्निर्गमने घटच्छिद्रनिर्गतदीपप्रभावत्सादृश्येनेत्याशङ्क्याह । न चैवमिति ॥

तर्कितेत्थं ऽनुमानं प्रयुङ्क्ते । तथाचेति ।

(उक्तेऽर्थेऽनुमानप्रयोगः) तथा च घटावच्छिन्नचैतन्यस्याविद्यानिवृत्तिः, प्रतियोगिसमानाश्रयज्ञानजन्या, अविद्यानिवृत्तित्वान्मूलाज्ञाननिवृत्तिवत्। न च साध्यविकलो दृष्टान्तः । चरमान्तःकरणवृत्तेरप्यन्तःकरणाभिन्नसदधिष्ठानत्वात् । अपि च विषयापरोक्षार्थमपि वृत्तेर्निर्गमनं वाच्यमन्यथा विषयस्य प्रमात्रव्यवहितत्वलक्षणापरोक्षत्वानुपपत्तेः, वृत्तिद्वारा विषयावच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेद एव तदध्यस्तविषयस्यापि तत्सम्भवात्। तथा च प्रत्यक्षो घटादिः स्वाकारवृत्तिसंयुक्तप्रत्यक्षद्रव्यत्वादात्मवत् । विपक्षे चानुमेयस्येवाप्रत्यक्षत्वापत्तिर्बाधिका । अत एव वृत्तेः संयोगपरिमाणादिद्रव्यत्वव्यवस्थापकगुणसत्त्वाद्द्रव्यत्वसिद्धिः ॥

मूलाज्ञाननिवृत्तौ सिद्धसाधनतापरिहाराय घटा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वच्छिन्नेति विशेषणम् । इन्द्रियसन्निकर्षादिनार्थान्तरवारणाय ज्ञानपदम् । चिन्मात्रस्य मूलाज्ञानाश्रयत्वात्तन्निवर्तकवृत्तेः प्रमातृनिष्ठत्वाद्वैय्यधिकरण्यमित्याशङ्क्याज्ञानाश्रयस्यैव चिन्मात्रस्य सर्वाधिष्ठानतया वृत्तिप्रत्ययस्याश्रयत्वान्नैवमित्याह । न च साध्येति । किञ्चैकान्तःकरणसम्बन्धात्प्रमातृप्रमाणप्रमेयचैतन्यानामेकलोलीभावेनाभिव्यक्तत्वेन तदध्यस्तविषयापरोक्ष्यसम्भवाद्वृत्तिरूपेण परिणातान्तःकरणोपहितत्वं विषयावच्छिन्नचैतन्यस्यावश्यकमित्याह । अपि चेति । अत्राप्यनुमानमाह । तथा चेति । स्वाकारवृत्तिसंयुक्त इति । स्वाकारवृत्त्या स्वरूपसम्बन्धवान्न भवतीत्यर्थः । स्वशब्दः पक्षवाची । तथा च वृत्तौ न व्यभिचारः । न वा दृष्टान्तः साध्यविकलः । स्वरूपसम्बन्धमात्रवत्वे दोषमाह । विपक्षे चेति । ज्ञानघटयोः स्वरूपसम्बन्धनिषेधे परिशेषात् संयोग एव पर्यवस्यति । तथा च बुद्धेर्गुणत्वक्षतिरित्याशङ्क्य इष्टापत्तिरित्याह । अत एवेति ॥

ननु वाचस्पतिमते घटावच्छिन्नचैतन्यावरकमप्यज्ञानं जीवनिष्ठम् । अर्थापरोक्षं चापरोक्षज्ञानविषयत्वप्रयुक्तम् । ज्ञानापरोक्षत्वं च करणविशेषजन्यत्वप्रयुक्तमित्यभिमतम् । वृत्तिनिर्गमनेन विना किमनुपपन्नमिति तत्राह । केचित्त्विति ।

(अत्र वाचस्पति संवादः) केचित्तु घटप्रत्यक्षं घट एव व्यवहारमुत्पादयति न पट इति नियमेन तस्य घटेन सह पटव्यावृत्तसम्बन्धसिद्धौ स्वरूपसम्बन्धस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सम्बन्धिद्वयस्वरूपमात्रात्मकस्य पटसाधारणत्वान्मुख्यसम्बन्धे सम्भवत्यमुख्यसम्बन्धकल्पनायोगाच्च संयोगादिसिद्धौ वृत्तेर्निर्गमनं वाच्यम् । अनुमितेस्तु नैवं निर्गमहेत्विन्द्रियसन्निकर्षाभावात् । व्यवहारनियमस्यानिर्वचनीयवादे अविद्ययैवोपपत्तेः । तस्या अघटितघटनापटीयस्त्वादित्याहुः ॥

ननु स्वरूपसम्बन्ध एव नियतव्यवहारहेतुः, तथा च न वृत्तेर्निर्गमनमपेक्षितमित्याशङ्क्य तस्य चक्षुरादिसाधारणत्वान्न नियामकत्वमित्याह । स्वरूपसम्बन्धस्येति । किञ्च यथा परमते चक्षुषः प्राप्यकारितानिर्वाहाय ध्रुवादिमण्डलेनास्य संयोगस्तदर्थं निर्गमनं च कल्प्यते तत्कस्य हेतोः, सम्भवति मुख्यसम्बन्धे स्वरूपसम्बन्धस्याकल्पनीयत्वात् । एवमत्रापि प्रत्यक्षवृत्तेर्विषयेण संयोगादिसम्भवात्तदभिव्यक्तचैतन्यस्य तादात्म्यसम्भवात्तदर्थं वृत्तिनिर्गमनं वाच्यमित्याह । मुख्यसम्बन्ध इति । तर्हि वृत्तित्वाविशेषादनुमित्यादेरपि निर्गमनं स्यादित्याशङ्क्य क्लृप्तकारणाभावान्नैवमित्याह । अनुमितेस्त्विति । कथं तर्हि ततो व्यवहारनियम इत्याशङ्क्याह । व्यवहारनियमस्येति । अविद्या वा कथमसम्बद्धविषयव्यवहारनिर्वाहिकेत्याशङ्क्यातीतादेरप्यनिर्वचनीयसूक्ष्मरूपेण विद्यमानत्वात्परोक्षविषयमात्रस्याविद्यकस्वरूपसम्बन्धविशेषादेव व्यवहारनियम इत्याह । तस्या इति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वृत्तिनिर्गमनेऽनुपपत्तिर्वक्तुं तत्स्वरूपं विमर्शति । अथ केयमिति ।

(वृत्तिस्वरूपे पूर्वपक्षः) अथ केयं वृत्तिर्यस्या निर्गमनं निरूप्यते? न तावत्पराभिमतज्ञानवदात्मगुणः । तस्य निष्क्रियत्वात् । नापि द्रव्यम् । तस्यात्मसमवयानुपपत्तेः । आत्मनो द्रव्यासमवायित्वात् । नाप्यन्तःकरणसमवेतं द्रव्यम् । कार्यद्रव्यस्य स्वाश्रयं विनान्यत्रागमनात् । स्वाश्रयेण सहैव गच्छतीति चेन्न । मूर्तद्रव्यस्य युगपद्विरुद्धदेशसम्बन्धासम्भवेन पूर्वदेशविश्लेषे मरणप्रसङ्गात् । देहावच्छिन्नात्मनो वियोगस्यैव मरणत्वात् । न च विषयदेश एव वृत्तिरारभ्यत इति वाच्यम् । तदुपादानस्यान्तःकरणस्य तत्राभावात् ॥

किं वैशेषिकाद्यभिमतज्ञानमिव गुणः, उत सांख्याभिमतज्ञानमिव द्रव्यमथवा भट्टाभिमतज्ञानमिव क्रियेति किं शब्दार्थः । आद्ये क्रियारहितत्वान्निर्गमनानुपपत्तिरित्याह । न तावदिति । द्वितीयं निराकरोति । नापीति । तत्र किमात्मसमवेतद्रव्यमुतान्तःकरणसमवेतम् । नाद्यः स्पर्शरहितस्यात्मनो द्रव्यासमवायित्वादित्याह । तस्येति । द्वितीयं दूषयति । नेति । अत्रापि वक्तव्यम्, किं वृत्तिरन्तःकरणेन सहैव विषयदेशं गच्छति उत स्वयमेव, अथवा विषयदेश एवोत्पद्यत इति । न तावत् द्वितीयकल्प इत्याह ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कार्यद्रव्यस्येति । आद्यमनूद्य दूषयति । स्वाश्रयेणेति । प्राणोत्क्रमणाभावान्न मरणमित्याशङ्क्यान्तःकरणगमने । तदपि स्यादित्यभिप्रेत्याह । देहावच्छिन्नेति । तृतीयं दूषयति । न चेति ।

आद्यतृतीयेऽपि किं परिस्पन्दलक्षणा क्रिया, उत परिणामलक्षणा । उभयथापि किमात्मसमवेता, उतान्तःकरणसमवेता । सर्वथाप्यनुपपत्तिरित्याह । अत एवेति ।

अतएव न क्रियापि वृत्तिरात्मनि परिस्पन्दपरिणामयोरसम्भवात् । अन्तःकरणगतयोश्च तयोराश्रयं विना अगमनादिति चेत् ।

(वृत्तिस्वरूपनिरूपणम्) **उच्यते, अन्तःकरणस्य स्वाश्रयस्थस्यैव चक्षुरादेरिव देशान्तरप्राप्तउलूकावस्थावृत्तिरित्युच्यते । सा च चक्षुरादिनिमित्तसम्बन्धात्प्रत्यक्षस्थले विषयव्यापिनी भवत्यनुमेयादौ तु नैवम् । तत्सहकारिण इन्द्रियसम्बन्धस्यैवाभावात् । एतेन यदन्तःकरणं सङ्कोचविकाशशीलं स्वदेशस्थमेव वृद्धिं गतं वृत्तिरित्युच्यते ? कृतं तर्हि चक्षुरादिना, तस्य तेन विनापि सत्त्वात्, वृद्ध्यर्थं च तदपेक्षायां वृद्धेस्ततोऽन्यत्वान्नोक्तदोषपरिहार इति निरस्तम् । कार्यस्य सदसत्त्ववादिमत एवास्योपालम्भस्य प्रसङ्गात् । अनीर्वच-**

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नीयवादे ऽस्यानवकाशत्वात् । कार्यद्रव्यमात्रस्य स्वसमवायिदेशादधिकदेशत्वाच्च । अतो ऽन्तःकरणावृत्तिस्तस्यैवावस्थाविशेषो द्रव्यम् ॥

सावयवमन्तः करणं चक्षुवत्सङ्कोचविकासशीलं तद्वृद्ध्यधीनवृद्धिमच्च । तथा च तस्य विस्तीर्णावृत्तिरिति नोक्तविकल्पावकाश इति परिहरति । उच्यत इति । ननु विस्तीर्णावस्यापि किमन्तःकरणमेव किं वा ततोऽन्या । आद्ये न चक्षुर्वृद्ध्यपेक्षास्यादन्तःकरणस्य तया विनापि सत्त्वात् । द्वितीये पुनर्गुणादिविकल्पप्रसङ्गादिति चोद्यं चक्षुर्दृष्टान्ताभिधानेन निरस्तमित्याह । एतेनेति । किञ्च वृद्धेर्भेदादिना दुर्निरूपत्वं चक्षुरादेस्तत्वतोवृद्धिमङ्गीकुर्वाणस्य तवैव दोषावहमस्माकन्तु कारणस्यैव तत्तद्दुर्निरूपरूपान्तरापत्तिमङ्गीकुर्वतां नायमुपालम्भ इत्याह । कार्यस्येति । यदुक्तं वृत्तेर्द्रव्यत्वे ऽन्तःकरणादधिकदेशत्वं न सम्भवतीति तत्राह । कार्यद्रव्येति । आयतन्त्वारब्धस्य पटस्यान्ततन्तुदेशेऽपि दर्शनादित्यर्थः । न च तत्राप्युपादानान्तरमस्तीति वाच्यमत्रापि ब्रह्मरूपोपादानस्य विषयदेशेऽपि सत्त्वादिति भावः । वृत्तेः संयोगादिमत्वाद्द्रव्यत्वमित्युपसंहरति । अत इति ॥

ननु वृत्तेःक्षिचणावस्थायित्वाच्छब्दवदद्रव्यत्वमनुपपन्नमिति चोदयति । नन्विति ।

(वृत्तेर्द्रव्यत्वे चोद्यपरिहारौ) ननु यदि वृत्तिरन्तःकरणस्यैवावस्थाविशेषो द्रव्यमित्युच्येत, तदा कथं प्रतिक्षणं विष-

यज्ञानानां विनाशः । द्रव्यस्याक्षणिकत्वात् । तद्विनाशहेतोरनिरूपणाच्च । न चोत्तरवृत्त्या पूर्ववृत्तिनिरास इति वाच्यम् । एकद्रव्यवति-द्रव्यान्तरानारम्भादिति चेन्न तु वृत्तिविनाशे वृत्त्यन्तरं हेतुः । सुषुप्तिपूर्वक्षणवृत्तेरपि नाशप्रसङ्गात् ।

किञ्चवृत्तेर्गुणत्वे शब्दवद्विरोधिगुणोदयान्नाशः स्याद्द्रव्यत्वे तु नाशकारणमपि नास्ती त्याह । तद्विनाशेति । गुणत्वपक्ष इव द्रव्यत्वपक्षे ऽपि वृत्त्यन्तरोदयादेव विनाशः किन्न स्यादित्याशङ्क्य पूर्वद्रव्यविनाशमन्तरेण तदाश्रये द्रव्यान्तरोत्पत्तिरेव न सम्भवतीत्याह । न चोत्तर-वृत्त्येति । कारणविनाश एव वृत्तिविनाशे हेतुस्तस्याश्रिच-णावस्थायित्वनियमेप्यसिद्ध इति वक्तुं पराभिमतविनाश-कारणं दूषयति । न तु वृत्तिविनाश इति ॥

उपान्त्यवृत्तिविनाश एव तत्र हेतुरित्याशङ्क्याननुग-मात्कारणविनाशद्वारा वानुगतो वृत्तिविनाशहेतुरित्याह । अपित्विति ।

(वृत्तिविनाशहे-तोरनुगतत्वम्) अपि तु तद्धेतोरिन्द्रियमनःसंयोगादे-र्विनाश एव कारणविनाशत्वेनानुगतो वृत्तिवि-नाशमात्रे हेतुः । न च निमित्तविनाशाद्द्रव्यवि-नाशो न दृष्ट इति वाच्यम् । कारणान्तरानिरू-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पक्षेनान्यत्रादृष्टस्यापि द्वित्वादिनाश इव द्रव्यविनाशे ऽपि तस्य हेतुत्वात् । न चैवं ज्ञानस्य नियतक्षणसत्ता न स्यादिति वाच्यम् । घटादिवद्वृत्तेरपि द्रव्यत्वाद्यावद्विनाशकारणासमवधानमवस्थानस्येष्टत्वात् । ननु वृत्तेः कार्यद्रव्यत्वे कथं तस्यात्मवृत्तित्वमिति चेदात्मन्यध्यासादिति ब्रूमः । तस्मात्प्रत्यक्षानुमानसिद्धं वृत्तिरूपं ज्ञेयात्मकं ज्ञानमेकमन्यच्चाहङ्कारतद्वृत्तितदभावानुसन्धानान्यथानुपपत्तिप्रमेयमिति सिद्धम् ।

स चानुभवो ऽनादिः ।

ननु वृत्तेर्द्रव्यत्वे समवायिनाशाद्वा तन्नाशः स्यान्नि-
मित्तनाशाद्द्रव्यनाशादर्शनादिति चेन्न । कारणत्रैवि-
ध्यानङ्गीकारेणोपादानातिरिक्तकारणमात्रस्य निमित्तत्वा-
त्प्रारब्धकर्मनाशे शरीरनाशदर्शनाच्चेत्यभिप्रेत्याह । न
चेति । कारणत्रैविध्यमङ्गीकृत्यापि गुणनाशवद्द्रव्यना-
शस्याप्यन्यत्रादृष्टं निमित्तविनाशजन्यं क्वचिदगत्याङ्गी-
कर्त्तव्यमित्याह । कारणान्तरेति । एवं तर्हि धारास्थले
यावदिन्द्रियसंयोगमेकस्यैव ज्ञानस्य स्थायित्वापत्ति-
रित्याशङ्क्याह । न चैवमिति । वृत्तेर्द्रव्यत्वे स्पर्शशून्या-
त्मनस्तदाश्रयत्वायोगाद्दृष्टद्वस्यानुपपत्तिरिति चोदयति ।
ननु वृत्तेरिति । वास्तवाधारत्वस्यात्मन्यभावादवास्तवस्य
च जगन्मात्राधिष्ठाने तस्मिन्ननुपपत्त्यभावादिति परिह-
रति । आत्मनीति । वृत्तितत्साक्षिरूपज्ञानद्वयनिरूपण-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मुपसंहरति । तस्मादिति । जानामीत्यनुभवः प्रत्यक्षप-दार्थः । इन्द्रियसंयोगे सत्यजायमानेत्यादिप्रयोगो ऽनुमा-नपदार्थः । साक्षिरूपज्ञानस्यात्माभेदसिद्धये कार्यत्वमपा-करोति । स चानुभव इति । कार्यत्वे प्रमाणाभावादिति शेषः ॥

रूपादिविषयप्रकाशानां प्रागभावप्रतियोगित्वादेरनु-भूयमानत्वात्तत्र मानाभावो ऽसिद्ध इति चोदयति । स्यादेतदिति ।

(अनुभवस्यानादित्वे पूर्वपक्षः) स्यादेतत्, द्रक्ष्यामि श्रोष्यामि चेति प्रागभावप्रतियोगित्वं विज्ञानानामनुभूयते । विद्यमानप्रागभावप्रतियोगित्वस्यैव लृडर्थ-त्वात् । तदेव च कार्यत्वं ज्ञानमुत्पन्नमिति चोत्पत्तिः । न चानुभवोत्पत्तौ कारणाभावः । चक्षुराद्यन्वयव्यतिरेकानुविधानादनुभवस्यैत-स्यैव तत्कारणत्वात् ॥

लृट तशब्दस्य भविष्यदर्थत्वात्तत्प्रयोगमूलानुभव स्यापि स एवार्थ इत्यभिप्रेत्याह । विद्यमानेति । अनु-भवस्य प्रागभावप्रतियोगित्वे ऽपि कथं कार्यत्वमित्यत आह । तदेव चेति । स्पष्टमेवोत्पत्तिरप्यनुभूयत इत्याह । ज्ञानमुत्पन्नमिति । उत्पादकाभावादुत्पाद्यनुभवो भ्रम इत्याशङ्क्याह । न चानुभवेति ॥

ननु यथा गुरुमते रूपं नष्टमित्याद्यनुभवस्य तत्सम्ब-न्धविषयत्वमेवमत्रापीत्यत आह । न चैतत्सर्वमिति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नचैतत्सर्वं ज्ञानविषययोः सम्बन्धस्येति वाच्यम् । सम्बन्धो हि विषयचैतन्येन तादात्म्यं, संयोगो वा । नाद्यः तस्य तदुत्पत्तिसमकालोत्पत्तिकत्वात् । स्थिते ऽपि विषयज्ञाने कादाचित्कत्वादिप्रतीतेः । न हि कश्चित्तटस्थः संस्तदात्मतां गच्छति, श्रुतसिद्धत्वात् । नापि द्वितीयः घटादेः स्वोत्पत्त्यनन्तरमेवाकाशेनेव चैतन्येनापि संयुक्तत्वात् । चैतन्यघटयोः क्रियापूर्वसंयोगे च निश्चले घटे क्रियावतश्चैतन्यस्य परिच्छिन्नत्वादिप्रसङ्गात् । अस्तु तर्हि वृत्तिविषया कादाचित्कत्वादिप्रतीतिरिति चेन्न । वृत्त्यतिरिक्तस्फुरणेऽपि किञ्चित्कालसम्बन्धित्वादिप्रतीतेः । अन्यथान्धादेरपि रूपादिगोचरज्ञातिप्रसङ्गात् । न चाविद्यावृतं स्फुरणं न ज्ञातिहेतुरविद्याया एव तत्प्रतिबन्धकत्वादिति वाच्यम् । तथापि सर्वदा व्यवहारप्रसङ्गात् । स्फुरणात्मकाविद्यानिवृत्तेस्तव मते सर्वदा सत्त्वात् । स्फुरणं कार्यं, अनित्यभावत्वात्, ततो नानादिरनुभव इति ॥

ज्ञानज्ञेययोः सम्बन्धस्य तादात्म्यरूपत्वे तस्य सम्बन्धिना सहैवोत्पत्तिनियमादागन्तुकत्वन्न स्यादित्याह । नाद्य इति । तर्हि विषयेण सहैवोत्पद्यतां तत्राह । स्थिते-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऽपीति। नन्वसंसृष्टसम्बन्धिद्वये स्थित एव पश्चान्निमित्तान्त रात्तादात्म्यं किं न स्यादित्यत आह । न हि कश्चिदिति। युतसिद्धसम्बन्धस्य संयोगत्वपक्षे किं संयोगजः संयोग उत कर्मजः । आद्ये घटादेः स्वावयवचैतन्यसंयोगात्स्वचैतन्यसंयोगस्य स्वस्थितिक्षण एव सिद्धत्वात्तदर्थं चक्षुराद्यपेक्षा न स्यादित्याह । नापि द्वितीय इति । द्वितीये तु चैतन्यकर्माधीनः संयोगो निश्चले विषये वक्तव्यस्तथा च प्रत्यक्षचैतन्यस्य मध्यमपरिणामित्वकार्यत्वादिप्रसङ्ग इत्यभिप्रेत्याह । चैतन्यघटयोरिति । ननु स्फुरणव्यतिरिक्तवृत्तेः साधितत्वात्तद्विषयमेतत्सर्वमिति चोदयति । अस्तु तर्हीति । इदानीं न स्फुरतीति प्रतीतेः स्फुरणस्याप्यनियतत्वमित्याह । न वृत्त्यतिरिक्तेति । स्फुरणनित्यत्वे बाधकमाह । अन्यथेति । अन्धादेः प्रतिबन्धकसत्त्वान्न कृतिरित्याह । न चाविद्येति । तव मते आरोपिताभावस्याधिष्ठानमात्रत्वादन्धादेः प्रतिबन्धकाभावस्य सत्त्वाद्रूपाद्युपादानं स्यादित्याह । तथापीति । अनित्यत्वे प्रत्यक्षमुक्त्वा कार्यत्वे ऽनुमानमाह । स्फुरणमिति ॥

स्फुरणोत्पादकानिरूपणान्न तस्यानित्यत्वादेकं प्रामाणिकमिति दूषयति । न तद्धेतोरिति ।

(तदुत्तरम्) न तद्धेतोरनिरूपणात् । न तावच्चक्षुरादिस्फुरणहेतुः । बाह्यमात्रगोचरचक्षुरादेरहमर्थसाधारणस्फुरणहेतुत्वात् । ज्ञानधाराकालीनस्फुरणस्य युगपदनेकज्ञानाजनकचक्षुराद्यजन्यत्वाच्च । अत एव चक्षुराद्यन्वयव्यतिरेक-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

योर्वृत्तिविषयत्वम् । नापि मनः । असाधारण-प्रमाकरणसहकृतस्यैव मनसो ज्ञानहेतुत्वात् ॥

किं तत्र बाह्येन्द्रियं हेतुरुत मनः किं वोभयम् ? आद्ये त्रिपुटीप्रत्यक्षत्वस्य निरासेनाहमर्थस्फुरणं न स्यादित्याह। न तावदिति। धाराविषयकस्य स्फुरणस्याभावापत्तेस्तत्तदनुसन्धानं च न स्यादित्याह। ज्ञानधारेति। क्व तर्हि बाह्येन्द्रियोपयोग इत्यत आह। अत एवेति। द्वितीयं दूषयति। नापीति। मनसोऽकरणत्वादन्यदसाधारणं कारणं वक्तव्यं तदान्तरज्ञाने न सम्भवतीत्याह। असाधारणेति ॥

तृतीयं शङ्कते नन्विति।

मानसं स्फुरणमपि (बाह्यबाधकम्।) ननु बाह्यविषये तथा, आन्तरज्ञानं मन एव जनयिष्यतीति चेन्न। घटादिस्फुरणस्याप्यहमर्थस्फुरणाभिन्नस्य बाह्यगोचरत्वात्। स्फुरणाभेदश्च धर्मिग्राहकमानसिद्धो घटाद्यपरोक्ष्यान्यथानुपपत्तिसिद्धश्च। वक्ष्यते च विस्तरेण। किञ्च स्फुरणस्यापि मनोजन्यत्वेऽनुसन्धेयज्ञानसमानकालीनत्वानुपपत्तिर्ज्ञानद्वयस्यायौगपद्यायोगात्। ततश्च ज्ञानकादाचित्कत्वाद्यनुभवो वृत्तिविषयो न तु तत्साक्षिस्फुरणविषयः। जन्यज्ञानेऽनुव्यवसायस्य विषयत्वयोः स्वप्रकाशत्वस्य च निरासेनादिज्ञानं

विना ज्ञानमुत्पन्नं कादाचित्कमित्यादिप्रतीत्यनुपपत्तेश्च । न च स्फुरणस्य कादाचित्कत्वानभ्युपगमे ऽन्धस्यापि रूपादिप्रवृत्तिप्रसङ्ग इति वाच्यम् । किं स्फुरणविरहो वृत्त्या गृह्यते स्फुरणेन वा । नाद्यः केवलवृत्तेर्जडतया तदभावाव्यवस्थापकत्वात् । न द्वितीयः । स्फुरणैक्यस्योक्तत्वाद्वक्ष्यमाणत्वाच्च ॥

वाह्यविषयज्ञाने मनःसहकृतं चक्षुरादिहेतुरहमर्थादिस्फुरणे मन एव हेतुरित्यर्थः । वाह्यान्तरविषयस्फुरणाभेदे सत्येवं स्यान्न च सोऽस्ति प्रमाणाभावादिति दूषयति । न घटादीनि । अभेदश्च लाघवानुगृहीतानुसन्धानाद्यनुपपत्त्यादिप्रमाणसिद्ध इत्याह । स्फुरणाभेदश्चेति । अनुभवैकत्ववादे चेदं निरूपयिष्यते इत्याह । वक्ष्यत इति । मनसः करणत्वमङ्गीकृत्यापि स्फुरणस्य तज्जन्यत्वं न सम्भवतीत्याह । किञ्चेति । स्फुरणोत्पत्त्यसम्भवादनित्यत्वाद्यनुभवस्तदविविक्तवृत्तिविषय इत्याह । ततश्चेति । नित्यानुभवानङ्गीकारे ज्ञानोत्पत्त्यादिरेव न सिध्येदनुव्यवसायादेर्निरस्तत्वादित्याह । जन्यज्ञान इति । स्फुरणनित्यत्वे चोक्तं वाधकमपवदति । न च स्फुरणस्येति । किमन्धादेः प्रवृत्त्यापादनेन स्फुरणाभावः सिसाधयिषित उत प्रवृत्त्यभावस्य गतिःपृच्छते । आद्ये तद्ग्राहकं विकल्पयति । किमिति । वृत्तेश्चक्षुरादितुल्यतया तन्मात्रेण नाभावसिद्धिरित्याह । नाद्य इति । स्फुरणभेदाभावान्न द्वितीयोपीत्याह । न द्वितीय इति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्फुरणभेदमङ्गीकृत्यापि किं स्फुरणकादाचित्काभावः प्रतियोगिनैव गृह्यते उतान्येनेति विकल्प्याद्ये अभावप्रतियोगिनोर्यौगपद्यासम्भवान्न तेन तद्ग्रह इत्याह । तद्भेदेपीति ।

(स्फुरणभेदेऽपि न स्वार्थसिद्धिः ।)

तद्भेदेऽपि न तावत्प्रतियोगिस्फुरणेन तदभावग्रहः । तस्य स्वाभावकालेऽसत्त्वात् । स्वसत्ताकाले च स्वाभावस्य विरहात् । नाप्यन्येन । स्वयम्प्रकाशस्फुरणस्य स्फुरणान्तरागोचरत्वात् । घटस्फुरणकालीनतद्भिन्नस्फुरणाभावानुभवस्य कादाचित्कत्वे स्फुरणद्वययौगपद्यप्रसङ्गाच्च । तदानीं तदितरस्फुरणाभावानुभव एव नेति वाच्यम् । अग्रे तत्प्रतिसन्धानदर्शनात् । तस्माद्वृत्तिविरह एव भेदाग्रहात्स्फुरणविरहत्वेनानुभूयते । अबोध एव वान्ध्यादेः । सत्यपि नित्यस्फुरणे तदावरणस्यैव प्रतिबन्धकत्वाच्च प्रवृत्तिः । आत्मैवाविद्यानिवृत्तिरिति मते तस्याः सदा सत्त्वे ऽप्यारोपिताविद्याया अपि सत्त्वेन व्यवहारानुदयात्प्रतिबन्धासहकृततदभाव एव हि कार्यानुकूलः । अन्यथा मण्याद्यन्योन्याभावे ऽपि कार्यं स्यात् । न

चात्मारोपितविद्याविरोधी तस्मिन्सत्यपि तदनुभवात् । अभावस्य स्वसमानसत्ताकप्रतियोगिविरोधित्वाच्च ॥

द्वितीये प्रतियोगिग्रहाभावे ऽभावग्रहायोगात्तस्यापि ग्रहो वाच्यः, स च नोपपद्यते स्वप्रकाशस्फुरणस्य स्फुरणान्तरागोचरत्वादित्याह । नाप्यन्येनेति । न च वित्तिवृत्तिः तत्स्फुरणविषय इति वाच्यम् । तस्य वृत्तिविषयत्वे ऽपि स्फुरणाविषयत्वादिति भावः । किञ्च घटस्फुरणकाले तदितरस्फुरणाभावो ऽनुभूयते न वा । आद्ये स्फुरणद्वये यौगपद्यमसम्भवीत्याह । घटस्फुरणेति । द्वितीये तदभावानुसन्धानानुपपत्तिरित्याह । न च तदानीमिति । कस्तर्ह्येतावन्तं कालं नास्फुरदित्यनुभवविषय इत्याशङ्क्यैतावन्तं कालमहमिह नासमिति ज्ञानस्य देहाभाव इव स्फुरणतादात्म्यापन्नवृत्त्यभाव एव विषय इत्याह । तस्माद्वृत्तिविरह इति । अविद्यायाः स्फुरणाभावत्वात्सैव वा विषय इत्याह । अबोध एव वेति । गतिःपृच्छ्यत इति कल्पस्योत्तरमाह । अन्धादेः सत्यपीति । तर्ह्यात्मरूपाविद्यानिवृत्तेरपि सत्त्वाद्व्यवहारः स्यादित्यत आह । आत्मैवेति । तत्रोपपत्तिमाह । प्रतिबन्धेति । प्रतिबन्धकालान्यकालीन एव तदभावः प्रतिबन्धकार्यानुकूल इत्यर्थः । प्रतिबन्धकालीनस्य तदभावस्यानुकूलत्वे बाधकमाह । अन्यथेति । न च संसर्गाभाव एवानुकूल इति वाच्यम् । प्रागभावाद्यनुगतसंसर्गाभावत्वस्यैकस्याभावात् । प्रतियोगिविरहात्मन एव प्रतिबन्धकाभावस्य कार्यानुकूलत्वोत्पत्ति-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रतिबन्धकदशायां तदभावाच्चेति भावः । नन्वात्मनोऽविद्यानिवृत्तिरूपत्वे ऽविद्यायास्तत्समानकालत्वं तदाश्रितत्वं च विरुद्धमित्याशङ्क्य समानसत्ताकत्वाभावान्न विरोध इत्याह । न चात्मेति ॥

नास्फुरदित्यनुभवस्य वृत्त्यभावविषयत्वो केरनित्यत्वमसिद्धमित्याह । तदसदिति ।

(अनित्यभावत्वादि-त्यनुमानमसत् ।) यच्चानुमानमनित्यभावत्वादितितदसत् । विशेषणासिद्धेः । साक्षिज्ञानस्य च पक्षत्वे बाधः । तद्धेत्त्वनिरूपणस्योक्तत्वात् । वृत्तेः पक्षत्वे सिद्धसाधनम् । एतेन हेतुव्यावृत्तौ ज्ञानमपि व्यावर्तते, अकारणककार्यानुत्पत्तेः । ज्ञानं सहेतुकमेवेति नियमविरोधाच्चेति परास्तम् । कारणव्यावृत्त्या हि कार्य्यमेव व्यावर्तते न त्वकार्यमतिप्रसङ्गात् । नापि ज्ञानस्य सहेतुकत्वनियमः अप्रयोजकत्वात् । उक्तप्रतिकूलतर्कपराहतत्वात् । तस्माच्चक्षुराद्यन्वयव्यतिरेकाभ्यां कादाचित्कत्वानुभवाच्च रूपादिविषयान्तःकरणवृत्तिर्जायते, चक्षुरादिकं च तत्रैव कारणं, तत्साक्ष्यनुभवस्तु न कादाचित्कत्वानुभवगोचरो, न वा चक्षुराद्यन्वयव्यतिरेकानुविधायीति नित्योऽयम-

नुभवः, अनादिभावत्वादात्मवत्, व्यतिरेकेण, घटवद्वा । न चाविद्यायां व्यभिचारः । भावविलक्षणायां तस्यां हेतोरभावात् ॥

किं साक्षिज्ञानं पक्षः, वृत्तिज्ञानं वा । उभयथाप्यनुपपत्तिरित्याह । साक्षीति । स्फुरणस्य नित्यत्वादकारणककार्योत्पत्तिदोषो ऽपि परास्त इत्याह । एतेनेति । स्फुरणं सहेतुकं जैवज्ञानत्वाद्वृत्तिज्ञानवदित्याशङ्क्याह । नापीति । जैवज्ञानत्वं जीवसमवेतज्ञानत्वं चेदसिद्धिः, जीवव्यवहारहेतुभूतज्ञानत्वं चेज्जीवस्वरूपज्ञानस्यापि तदुपपत्तेरप्रयोजकत्वमीश्वरज्ञाने व्यभिचारश्चेत्यर्थः । कारणस्यासम्भवादप्ययुक्तमिदमित्याह । उक्तेति । प्रसाधितस्फुरणानादित्वमुपसंहरति । तस्मादिति । अनादेरप्यनुभवस्याविद्यावदनित्यत्वाशङ्कायामाह । नित्योऽयमिति । परमतानुसारेणान्वयदृष्टान्तः व्यतिरेकदृष्टान्तःस्वमतेनेति दृष्टव्यम् । सत्यत्वस्य भावत्वस्याविद्यायामभावान्न तत्र व्यभिचार इत्याह । न चाविद्यायामिति ॥

उक्तानुमानस्य प्रतिकूलतर्कपराहतिं शङ्कते । स्यादेतदिति ।

(अनुकूलतर्कपराहतमनित्यभावत्वादित्यनुमानम् ।) स्यादेतत्, स्फुरणस्य नित्यत्वे कथमहङ्काराद्यनुसन्धानं संस्कारस्यानित्यज्ञानजन्यत्वनियमात् । न चाहमाकारवृत्तिविनाशात्तत्संस्कार इति वाच्यम् । तस्या घटज्ञानधारा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कालेऽनुदयात् । तथा सति ज्ञानद्वययौगपद्यप्रसङ्गात् । न चान्यकालीनात्मविषयवृत्त्यान्यकालीनात्मानुसन्धानं भवति । न चान्यविषयवृत्त्या तत्कालीनात्मसंस्कारो युज्यते तस्याः स्वविषय एव संस्कारजनकत्वादिति चेत् ।

दुःखयहमास्रमित्यादिप्रत्ययस्य संस्कारजन्यत्ववाच्यम्, संस्कारश्चाहमर्थज्ञानस्य नित्यत्वे ऽनुपपन्नस्तत्स्वरूपस्यैव संस्कारत्वादित्यर्थः । चैतन्यस्य नित्यत्वेऽप्यहमिति वृत्तिविनाशात्संस्कार इत्याशङ्क्य घटधाराकालीनाहमर्थे सापि न सम्भवतीत्याह । न चाहमाकारेति । अस्तु तर्हि धारोपरमानन्तरमहमाकारवृत्तिनाशात्तत्संस्कार इत्याशङ्क्य तेनापि धाराकालीनात्मस्मरणानुपपत्तिरित्याह । न चान्येति । तर्हि घटधारयैव तत्कालीनाहमर्थसंस्कार उत्पद्यतामित्यत आह । न चान्यविषयेति ।

घटविषयवृत्त्यैवाहमर्थविषयः संस्कारो जायत इति वक्तुं संस्कारविषयत्वे ऽनतिप्रसक्तं प्रयोजकमाह । न यद्वृत्तीति ।

(अनतिप्रसक्तं संस्कारसाधकम् ।) न, यद्वृत्त्यवच्छिन्नचैतन्ये यत्प्रकाशते तद्गोचर एव वृत्त्या संस्कारो जन्यते न तु वृत्तिगोचर एवं स्वजनकानुभवे प्रकाशमानत्वप्रयुक्तत्वात्संस्कारगोचरत्वस्य । अन्यथा वृत्तिगोचरसंस्कारस्यापि ततोऽनुदयप्रसङ्गात् । वृत्तेर्व-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्ययगोचरत्वात् । वृत्त्यन्तरस्याप्यनुव्यवसायनिरासेन निरस्तत्वात् । तथा च वृत्तिरूपेण विकसितान्तःकरणाभिव्यक्तचैतन्यप्रतिभास्यत्वादहमर्थवृत्तितद्विषयाणां तदुत्पन्नसंस्कारस्यापि तत्तित्ययगोचरत्वं युज्यते । न चान्तःकरणमात्राभिव्यक्तचैतन्यादेवाहमर्थप्रतिभासम्भवान्न वृत्तिमदन्तःकरणाभिव्यक्तचैतन्यं तत्साधकमिति वाच्यम् । अन्यप्रतिभास्यस्याप्यन्यप्रतिभास्यत्वाविरोधात्पूर्वज्ञानप्रतिभासस्याप्यन्यज्ञानेन विषयीकरणात् ॥

यद्वृत्त्यवच्छिन्नचैतन्यप्रयुक्तसंशयाद्यगोचरत्वं यावतां तद्वृत्तिनाशजसंस्कारस्तावतामित्यर्थः । एवकारार्थमयोगव्यवच्छेदमाह । न त्विति । वृत्तेर्जडतया स्वतःसंस्कारानाधायकत्वात्तदवच्छिन्नप्रकाशप्रयुक्तः संस्कारस्तत्र प्रकाशमानमात्रविषयो न तु विषयतयैव प्रकाशमानविषय इत्याह । स्वजनकेति । स्वयूथ्यान्प्रति विपक्षे बाधकमाह । अन्यथेति । अस्तु तर्हि वृत्तावपि स्वविषयवृत्त्यन्तरेण संस्कार इत्याशङ्क्यानवस्थाप्रसङ्गान्मैवमित्याह । वृत्त्यन्तरेति । तथापि कथं घटज्ञानादहमर्थस्य वृत्त्यभिव्यक्तचैतन्यभास्यत्वमेवासिद्धं स्वजन्ये तदभावे संस्कार इत्यत आह । तथा चेति । चैतन्यप्रतिभास्यत्वादिति । तत्प्रयुक्तसंशयाद्ययोग्यताकत्वादित्यर्थः । अहमर्थस्य वृत्त्यभिव्यक्तचैतन्यभास्यत्वमेवासिद्धं स्वजन्ये तदभावेऽपि तत्प्रतिभासादि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्याशङ्क्य त्वग्ग्राह्यस्य चक्षुर्ग्राह्यत्ववदविरोध इत्याह । न चान्तःकरणेति ॥

एवमप्यहंत्वप्रकारकस्मृतित्वेनुपपत्तिः, संस्कारमूलवृत्तावहंत्वस्याप्रकारत्वादित्याशङ्कामपवदति । न चेति ।

न च तत्प्रकारकस्मृतौ तत्प्रकारकानुभवः कारणं, घटादिवृत्तिश्च नाहंत्वप्रकारिकेति ततो नाहमर्थस्मृतिः स्यादिति वाच्यम् । फलबलात् क्वचिदन्याकारानुभवादन्याकारस्मृतिकल्पने बाधकाभावात् । अननुभूततत्तागोचरस्मृतिवत् गुरुमते ज्ञानगोचरस्मृतिवत्, अस्मन्मते वृत्तिगोचरस्मृतिवच्च वृत्तिमदन्तःकरणावच्छिन्नस्फुरणस्याप्यहमर्थतद्गतवृत्तिसंशयविरोधित्वेन तद्गोचरस्मृतिजनकत्वे तद्गोचरसंशयविरोधिज्ञानत्वस्यैवतन्त्रत्वात्। न तु तद्विषयज्ञानत्वं तत्प्रकारकज्ञानत्वं वा तन्त्रम् । संशयादपि स्मृतिप्रसंगात् । केचित्त्वहमाकारा वृत्तिरस्तु तया चाहमर्थगोचरस्मृतिः । न च ज्ञानयौगपद्याऽनुपपत्तिः । शिरःपादाद्यवच्छेदेनापर्यायोत्पन्नसुखदुःखदर्शनं न समवायिप्रदेशभेदेन युगपद्वृत्तिद्वयस्याविरुद्धत्वात् । न चैवं घटज्ञानधारा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कालेऽप्यहंशब्दोल्लेखप्रसङ्गः । ज्ञाने शब्दोल्लेखस्यानियतत्वात् । अनुसन्धानस्य तदानीमपि तत्कल्पकस्य सत्त्वात् ॥

यद्यपि वृत्तिं प्रत्यप्रकारत्वेऽप्यहंत्वस्य तदभिव्यक्तसाक्षिणं प्रति प्रकारत्वात्तन्मूला स्मृतिस्तत्प्रकारिका युक्ता तथापि स्मृत्यनुभवयोः समानप्रकारकत्वनियमोऽपि नास्तीत्याह। फलबलादिति। तत्तेदन्तयोरखण्डधर्मत्वमते नाननुभूततत्तेत्युक्तम्। किञ्च स्मृतिजनकज्ञाने तत्समानप्रकारकत्वं क्वापि नापेक्षितं किं तु तद्विषयसंशयादिविरोधिज्ञानत्वमेवेत्याह । वृत्तिमदिति । एवकारव्यावर्त्यमाह। न तु तद्विषयेति। तत्र हेतुमाह। संशयादिति। ननु निश्चय एव स्वसमानप्रकारकस्मृतिहेतुरिति चेत्। किं निश्चयत्वं जातिरुत संशयविरोधिज्ञानस्वरूपत्वम् । नाद्यः साक्षात्त्वेन साङ्कर्यात् । द्वितीये स्मृतिसमानप्रकारकत्वं व्यर्थम्, तद्गोचरसंशयविरोधिज्ञाने सति तत्प्रकारकत्वाभावेन स्मृत्यभावादर्शनादित्यभिप्रायः । इदानीं घटज्ञानधाराकालेऽप्यहमाकारवृत्त्यङ्गीकारे बाधकाभावात्तत एव तत्संस्कारोत्पत्तेर्वृत्त्यन्तरविषयत्वेऽनवस्थापातात्स्वाभिव्यक्तचैतन्ये भासमानत्वमात्रेण स्वजन्यसंस्कारविषयत्वमिति वृद्धानां मतं दर्शयति । केचित्त्विति । समवायिप्रदेशेति । चक्षुराद्यवच्छिन्नाहङ्कारदेशे घटाकारवृत्तिः हृदयावच्छिन्ने चाहमाकारवृत्तिरित्यर्थः। ननु घटधाराकालेऽहंशब्दोल्लेखाभावान्न तदाकारवृत्तिरित्यत आह। न चैवमिति। वृत्तिसाधकस्याहमिति व्यवहारस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तदानीमभावात्कथं तत्सिद्धिरित्याशङ्क्याह । अनुसन्धानस्येति ॥

अहमाकारवृत्त्यङ्गीकारे ऽहमर्थस्य कर्तृतया तन्निर्वर्तकत्वाद्गुणत्वं तज्जन्यफलशालित्वेन कार्यत्वात् प्राधान्यं चेति विरुद्धरूपद्वयापत्तिरित्याशङ्क्याह । न चेति ।

न च कर्तृकर्मविरोधः । अन्तःकरणस्य वृत्त्यधीनफलभागित्वाभावेन वृत्तिं प्रत्यकर्मत्वात् ।

(अहमाकारावृत्तिर्न ज्ञानम् ।) वस्तुतस्त्वहमाकारा वृत्तिर्न ज्ञानम् । स्मृत्यतत्कारणाजन्यत्वात्कारणान्तरकल्पने च गौरवात् । ननु मनस्तत्करणमिति चेन्न । मनसस्तदाश्रयस्य तदुपादानतयाऽन्तःकरणत्वात् । अपरोक्षव्यवहारस्तस्या लिङ्गाद्यजन्यत्वात् । लिङ्गादिप्रतिसन्धानशून्यस्याप्यहमित्यनुसन्धानदर्शनात् केवलसंस्कारस्य स्मृतिमात्रहेतुत्वात् । अनुसन्धानहेतुवृत्तिकालीनात्मनःपूर्वमननुभूतत्वात् । अहमर्थगोचरप्रत्यभिज्ञायाश्च तत्रांशे संस्कारजन्यतया ज्ञानत्वात् । अभेदावच्छेदेन ज्ञाने परोक्षत्वापरोक्षत्ववत्प्रमात्वाप्रमात्ववच्च ज्ञानत्वाज्ञानत्वयोरप्यविरोधात् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अहमर्थस्यानावृतत्वेन वृत्तिफलाविद्यानिवृत्तिशालित्वाभावान्न कर्मत्वमित्याह । अन्तःकरणस्येति । अहमर्थस्याकर्मत्वे ऽन्यस्यापि कर्मणोऽभावादहमाकारवृत्तेर्ज्ञानत्वमेव न स्यादकर्मकज्ञानायोगादित्याशङ्क्येष्टापत्तिरित्याह । वस्तुतस्त्विति । किञ्च ज्ञानत्वे प्रत्यक्षाद्यन्यतमेन भवितव्यम् । न च तदुपपद्यते । प्रमाणषट्काजन्यत्वादित्याह । कॢप्तेति । तर्ह्यन्यदेव किञ्चित्प्रमाणमस्तीत्यत आह । करणान्तरेति । मनोजन्यत्वात्प्रत्यक्षमेवेति शङ्कते । ननु मन इति । मनसो वृत्तिमात्रं प्रत्युपादानत्वान्न क्वापि करणत्वमित्याह । न मनस इति । यदवोचाम मनसोऽकारणत्वादिति तदितर एव सिद्धमिति द्रष्टव्यम् । अस्तु तर्हि लिङ्गादिजन्यत्वमित्याशङ्क्य तथात्वे ऽपरोक्षव्यवहारहेतुत्वं न स्यादित्यभिप्रेत्याह । अपरोक्षेति । लिङ्गादिज्ञानाभावेऽप्यहमिति प्रतीतेर्न तर्ह्यन्यत्वमित्याह । लिङ्गादीति । तर्हि संस्कार एव तत्र करणमित्याशङ्क्य तथात्वे ऽनुभवत्वं न स्यादित्याह । केवलेति । पूर्वानुभवाभावादहमर्थसंस्कारो ऽपि न सम्भवतीत्याह । अनुसन्धानेति । कथं तर्हि सोऽहमिति प्रत्यभिज्ञाया ज्ञानत्वमित्याशङ्क्य तस्या अपि तत्तांश एव ज्ञानत्वं न त्वहमर्थांश इत्याह । अहमर्थेति । एकत्र ज्ञानत्वाज्ञानत्वे विरुद्धे इत्याशङ्क्य गुरुमते प्रत्यभिज्ञायां परोक्षत्वापरोक्षत्ववद्वैशेषिकादिमते तद्भ्रमे प्रमात्वाप्रमात्ववदंशभेदेन तयोर्न विरोध इत्याह । अंशभेदेति ॥

अहमाकारवृत्तेरज्ञानत्वे ततोऽर्थप्रकाशो न स्यादिति चोदयति । कथन्तर्हीति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(अहमर्थप्रकाशा-वभासकत्वम् ।) कथं तर्हि ततोऽहमर्थप्रकाश इति चेन्न । वृत्तिकृतप्रकाशो ह्यविद्यानिवृत्तरूपचैतन्याभिव्यक्तिरपरोक्षे न चाहङ्कारावच्छिन्नचैतन्यावरकमज्ञानमस्ति तस्यानावृत्तसाक्षिविषयत्वाभ्युपगमात्। किन्तु स्वप्रतिबिम्बितचैतन्येन वृत्तिरिवाहङ्कारोऽप्यवभास्यते। न चावभासकसाक्ष्यवच्छेदकत्वमात्रेण तज्ज्ञानत्वं इच्छादिवृत्तेरुपासनावृत्तेश्च तदभावात् ॥

इष्टापत्त्या परिहरति। नेति। न कथमपीत्यर्थः। तदेवोपपादयितुमपरोक्षवृत्त्यधीनप्रकाशशब्दार्थमाह । वृत्तिकृतेति। प्रकृते तदवच्छिन्नचैतन्यावरकाज्ञानाभावान्न तन्निवृत्तिलक्षणप्रकाशः सम्भवतीत्याह। न चाहङ्कारेति। वृत्तिकृतप्रकाशाभावे कथमहमर्थस्फुरणमित्यत आह। किं तु स्वप्रतिबिम्बितेति। अहमाकारावृत्तिर्ज्ञानं, अर्थावभासकचैतन्यावच्छेदकत्वात्, घटवृत्तिवदित्यनुमानमिच्छादौ व्यभिचारेण दूषयति। न चावभासकेति। उपासनावृत्तेश्चेति। वाचं धेनुमुपासीतेति विहिताया उपासनाया मानसक्रियारूपायाः स्वावच्छिन्नचैतन्यप्रतिभास्याया ज्ञानत्वाभावादित्यर्थः ॥

अहमाकारान्तःकरणवृत्त्यभावेऽपि तादृशाविद्यावृत्तिनाशादेव तत्संस्कार इति मतान्तरमाह। अस्तु वेति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(अन्तःकरणवृत्त्यभावेऽपिवृत्तिनाशात्संस्कारसाधनम् ।) अस्तु वा अविद्यावृत्तिरेव सन्तन्यमानाहङ्कारादिगोचरसंस्कारहेतुः । तस्या अपि सुषुप्तौ संस्कारजनकत्वकल्पनात् । सर्वथाप्यहङ्कारादिगोचरा स्मृतिर्नित्यसाक्षिण्युपपद्यते।

संस्कारस्यान्तःकरणवृत्तिजन्यत्वनियमात्तदभावे कथं स इत्याशङ्क्य नायमस्ति नियमः सुखमहमस्त्राप्समिति परामर्शहेतुसंस्कारस्य स्वापकालीनान्तःकरणवृत्त्यभावेन तदानीन्तनाविद्यावृत्तिजन्यत्वस्यावश्यकत्वादित्यभिप्रेत्याह । तस्या अपीति । पक्षत्रये ऽप्यहमर्थतद्धर्मसाक्षिनित्यत्वे ऽपि तत्स्मृतिरुपपद्यत इत्युपसंहरति । सर्वथेति ॥

अनुभवनित्यत्वानुमाने बाधकं परिहृत्यानुकूलतर्कमाह । अनुभवेति ।

(तत्रानुकूलतर्कप्रदर्शनम् ।) अनुभवविनाशहेत्वनिरूपणं चानुकूलस्तर्कः । तथा हि वृत्तिविनाश इव स्फुरणविनाशे ऽपि कारणविनाशो न हेतुः स्फुरणस्यानादित्वात् । नन्वविद्याविनाशवत्तद्विनाशोऽस्त्विति चेन्न । तद्वदत्रान्वयव्यतिरेकसिद्धस्य शास्त्रसिद्धस्य वा तद्विनाशहेतोरदर्शनात् ॥

किमनुभवविनाशे वृत्तिवत्कारणनाशो हेतुरुताविद्यावद्विरोधिसंसर्गः । नाद्य इत्याह । वृत्तिविनाश इति । द्वितीयं शङ्कते । नन्विति । अन्वयव्यतिरेकाभ्यां तत्त्व-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विद्यां वितताभित्यादिशास्त्राद्वाविद्याया ज्ञाननिवृत्त-त्ववद्वृत्त्यतिरिक्तानुभवस्य न केनापि प्रमाणेन विरोधिसंसर्गः सिद्ध इत्याह । न तद्वदिति ॥

अनुभवस्य विरोध्यभावो असिद्धः, इच्छादेरेव तद्विरोधित्वादित्याशङ्क्य हेत्वसिद्ध्या दूषयति । न च परेति ।

(अनुभवविरोधाभावासिद्धिः ।) न च पराभ्युपगतज्ञानस्येव विरोधिगुणान्तरादेव तन्नाशः । तस्याहमर्थासमवेतस्य तत्समवेतगुणेनाविरुद्धत्वात् । किञ्च नित्यानुभवानङ्गीकारे ज्ञानाभावोऽपि नानुभूयेत । वेद्यज्ञानवादे ज्ञानस्यावश्यवेद्यत्वाभावेन सत्यपि तस्मिंस्तदनुपलम्भसम्भवात् । अनुपलब्धेरधिकरणनिष्ठप्रतियोगिसत्त्वाप्रतिकूलत्वात् । अन्धकारस्थघटानुपलम्भवज्ज्ञानानुपलम्भस्याप्यभावाग्राहकत्वात् । न चान्धकारे घटानुपलम्भोघटोपलम्भसहकारिविरहात्सति घटेऽपि संगच्छते, इह तु ज्ञानग्राहकसामग्र्या मनःसन्निकर्षादेः सत्त्वात्तदनुपलम्भोऽधिकरणेतत्सत्त्वविरोधीति चेत् ।

विपक्षे बाधकमप्याह । किं चेति । नित्यानुभवानङ्गीकारे जन्यज्ञानानामवश्यवेद्यत्वनियमाभावेनानित्यज्ञानसत्त्वे

ऽपि तदनुपलम्भसम्भवाज्ज्ञानानुपलब्धेर्ज्ञानसत्त्वविरोधित्वलक्षणयोग्यताया गृहीतुमशक्यत्वादन्धकारस्थघटानुपलब्ध्या घटाभाववज्ज्ञानानुपलब्ध्या ज्ञानाभावो ऽपि गृहीतुं न शक्यत इत्याह । वेद्यज्ञानेत्यादिना । नन्वन्धकारे घटसत्त्वे ऽप्यालोकाभावेन तदुपलम्भकसामग्र्यभावादप्यनुपलम्भोपपद्यते, आत्मनि ज्ञानसत्त्वे तु संयुक्तसमवायस्यावश्यम्भावात्तदुपलम्भकसामग्र्याः सत्त्वेनानुपलम्भायोगादिति तत्सत्त्वविरोधी तदनुपलम्भ इति चोदयति । नन्वन्धकार इति ॥

नित्यानुभवानङ्गीकारे ज्ञानग्राहकसामग्रीदुर्निरूपेत्यभिप्रेत्य विकल्पयति । किं मनसेति ।

(नित्यानुभवानङ्गीकारे विकल्पः ।) किं मनःसंयुक्तसमवाय एव ज्ञानग्राहकसामग्री किं वा संयोगविशेषघटिततत्समवायः । अथवा ज्ञानान्तरसामग्रीसहकृतः संयुक्तसमवाय उत बुभुत्सासहकृतः स एव । नाद्यः ज्ञानप्रवाहाविच्छेदप्रसङ्गात् । न हि सत्यां सामग्र्यां किञ्चिज्ज्ञानं जायते किञ्चिन्नेति युक्तम् । न द्वितीयः । संयोगे विशेषस्य निरस्तत्वात् । नापि तृतीयः । सत्यामपि ज्ञानान्तरसामग्र्यां ज्ञानग्रहदर्शनात् । अन्यथा ज्ञानमेव न गृह्येत । ज्ञानान्तरसामग्र्या आवश्यकत्वात् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्यवसायानुव्यवसाये ऽपि संयुक्तसमवायसत्त्वात्तद्विषयज्ञानान्तरं स्यात्, एवं तद्विषयज्ञानान्तरमिति बाह्यविषयज्ञानविलोपः स्यादित्याह । नाद्य इति । द्वितीये संयोगे विशेषो जातिरुपाधिर्वा स्यात् । उभयथाप्यनुपपत्तेरित्युक्तमित्याह । न द्वितीय इति । तृतीयस्त्वसम्भवीत्याह । नापि तृतीय इति । असम्भवमेव व्यतिरेकमुखेनोपपादयति । अन्यथेति । ज्ञानग्रहसामग्रीदशायामात्मग्रहसामग्र्या आवश्यकत्वादित्याह । ज्ञानान्तरेति ।

किञ्चास्मिन्पक्षे ज्ञानाभावग्रहाय ज्ञानान्तरसामग्र्यभावो ऽपि ग्राह्यः, सामग्र्यभावश्च ज्ञानान्तराभावकल्प्यः, ज्ञानान्तराभावग्रहश्च तदितरज्ञानसामग्र्यभावं विनानेत्यनवस्थापात इत्यपि द्रष्टव्यम् । दुःखतत्साधनज्ञानस्याबुभुत्सितस्यापि ग्रहणाद्बुभुत्सा न ज्ञानग्रहे हेतुरित्याह । नापीति ।

(बुभुत्सा न ज्ञानहेतुः ।) नापि तुरीयः । अबुभुत्सितज्ञानस्यापि ग्रहणेन बुभुत्साया ज्ञानग्रहाहेतुत्वादित्युक्तम् । तस्माज्ज्ञानस्य मानसत्वायोगाज्ज्ञानानुपलम्भो नाधिकरणे तत्सत्ताविरोधीति न तदभावः प्रत्यक्षः स्यात् । अनुपलब्धेरन्यथा सिद्धत्वादेव नानुपलब्धिलिङ्गको ऽपि । नापि व्यवहाराभावेनानुमीयते । तस्य तेनानियतत्वात् । नापि शब्दात् । परस्य तद्ग्राहकाभावेन तद्वाचकशब्द-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रयोगायोगात्स्वप्रयोगस्य च स्वधीपूर्वकत्वात् । स्वप्रकाशवादिमते ऽपि समवायस्यानित्यतया पाकरक्ते श्यामसमवायाभावेनैव सत्यपि तस्मिं-स्तदनुपलम्भोपपत्तेः ॥

ज्ञानस्य संयुक्तसमवायमात्रेण मनोग्राह्यत्वायोगा-त्तदनुपलम्भस्य तत्सत्त्वे ऽप्युपपत्तेस्तत्सहकृतप्रत्यक्षेण ना-भावग्रह इत्युपसंहरति । तस्मादिति । ननु ज्ञानमात्मनिष्ठा-भावप्रतियोगी तत्रानुपलभ्यमानत्वादित्यनुमानात्तदभाव निश्चय इत्याशङ्क्यानुपलभ्यमानत्वमात्रस्यातीन्द्रिये व्यभि चारादधिकरणेप्रतियोगिसत्ताविरोधित्वलक्षणयोग्यताया ज्ञानानुपलम्भेप्यभावादित्यभिप्रेत्याह । अनुपलब्धेरिति । अहंज्ञानरहितः व्यवहाररहितत्वात् घटवादित्यनुमानात्तद भावसिद्धिरित्याशङ्क्य मौनिषु व्यभिचारान्नैवमित्याह । नापि व्यवहारेति । तर्हि शब्दाज्ज्ञानाभावधीरित्याशङ्क्य किं परप्रयुक्तशब्दादुतस्वप्रयुक्तशब्दादुभयथापि प्रयोगहे-त्वभावप्रत्ययाभावात्प्रयोग एवानुपपन्न इत्याह । नापि शब्दादिति । एवं वेद्यज्ञानवादे ऽनुभवविरोधमप्रयोजकत्वं च निरस्य स्वप्रकाशज्ञानवादे ऽपि योग्यानुपलब्ध्यभावेन ज्ञानाभावग्रहायोगान्नाशाद्यनुभवस्य तत्समवायविषय-त्वसम्भवान्न तस्यानुभवनित्यतानुमानबाधकत्वमित्याह । स्वप्रकाशेति । यथा गुरुमते श्यामताया नित्यतया तत्स-मवायनाशादेव पाकरक्तघटे तदनुपलम्भः, यथा वा पुरु-षान्तरे घटज्ञानसत्त्वे ऽपि स्वस्मिंस्तत्समवायाभावात्तद-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नुपलम्भ एवं स्वस्मिन्ननुभूतघटज्ञानस्य नित्यत्वे ऽपि कालान्तरे स्वसमवायाभावेनैवानुपलम्भोपपत्तेर्न तदभावसिद्धिरित्यर्थः ॥

नवीनमते ज्ञानस्वप्रकाशत्वसमवायनित्यत्वयोरङ्गीकारादनुपलब्धेः प्रतियोगिसत्त्वविरोधित्वादनुभवाभावो निश्चेतुं शक्यत इत्याशङ्क्य तन्मते ऽप्यनुपलब्धिरन्यथापि सम्भवतीत्याह । यदि चेति ।

(नवीनमतेऽप्यनुपलब्धेरन्यथासम्भवः ।) यदि चार्वाचीनः कश्चित्स्वप्रकाशं ज्ञानं समवायो नित्य इति ब्रूयातन्मते ऽपि न ज्ञानाभावः शक्यते ग्रहीतुं प्रतियोगिसत्ताविरोध्यनुपलम्भस्याभावात् ।

ननु स्वप्रकाशज्ञानग्रहे तत्तत्सम्बन्धातिरिक्तापेक्षाभावात्पटज्ञानकाले घटज्ञानानुपलम्भस्तत्सत्ताविरोध्यस्तीति चेन्न। तन्मते पटज्ञानकालीनस्य घटज्ञानसमवायानुपलम्भस्य तन्निरूपकतज्ज्ञानविरहादिव घटज्ञानानुपलम्भस्यापि तन्निरूपकघटसम्बन्धविरहादप्युपपत्तेः । पटज्ञानकाले ज्ञाने तदीयत्वानुभवाभावे ऽपि ज्ञानमात्रानुभवस्य सत्त्वात् । ज्ञानज्ञेययोः स्वरूपमेव सम्बन्ध इति मते ऽपि यथा च त्वदी-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यघटाभावभूतलयोः स्वरूपमपि सम्बन्धः काल-भेदेन न तु सर्वदा, अन्यथा पटवति घटाभा-वभ्रमस्य विद्यमानाभावभूतलवैशिष्ट्यविषयत्वे-न प्रमात्वापातात् । एवं ज्ञानज्ञेययोरपि काल-भेदेन सम्बन्धस्वभावं स्वरूपमिति सम्बन्धिनोः सतोरपि सम्बधाभावोपपत्तेः ।

तन्मते ज्ञानसत्त्वे तदुपलम्भे ऽपेक्षणीयान्तराभावा-दनुपलम्भो भावमन्तरेण न सम्भवतीति चोदयति । ननु स्वप्रकाशेति । पटज्ञानसमये ज्ञानमात्रानुपलम्भो ऽसिद्ध एव, घटज्ञानत्वेनानुपलम्भस्तु तत्काले घटसम्बन्धाभावे-नैव नित्यस्याप्युपपद्यते । यथा तन्मते तत्काले घटज्ञानस-मवायानुपलम्भः, समवायस्य नित्यत्वे ऽपि घटज्ञानेन स्वरूपसम्बन्धाभावादेव तद्वदिति परिहरति । न तन्मत इति । ननु समवायस्यैकत्वात्तस्य पटज्ञानकाले ऽप्यनुभूय-मानत्वान्नानुपलम्भ इत्याशङ्क्य तुल्यमित्याह । पटज्ञानेति । ननु पटज्ञानसमये घटस्याप्यसत्त्वाभावाद्ज्ञानस्यापि सत्त्वे स्वरूपद्वयात्मकसम्बन्धस्यापि सत्त्येन घटीयत्वेनानुपलम्भो न स्यादित्याशङ्क्य ज्ञानज्ञेययोः स्वरूपसम्बन्धनियमाभा-वास्सदङ्गीकारे ऽपि पटज्ञानकाले विद्यमानस्यापि घटस्य सम्बन्धरूपत्वाभावात्कालविशेष एव स्वरूपस्य सम्बन्ध-रूपत्वात्तदा ज्ञाने घटीयत्वं नास्तीत्याह । ज्ञानज्ञेययोरिति । ननु सिद्धान्ते ऽपि कथं वृत्त्यभावानुभवः । विद्यमानाया-अपि तस्याः कालभेदेन स्वरूपसम्बन्धाभावेनानुपलम्भो-पपत्तेरिति चेन्नैवम् । प्रत्यक्षवृत्तेर्मुख्यसम्बन्धेन यावत्स्व

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रूपं विषयसम्बन्धसत्त्वात्तदनुपलम्भस्तत्सत्त्वविरोध्येव । परोक्षवृत्तेरपि वृत्तित्वाविशेषाद्यावत्स्वरूपं विषयसम्बन्धसत्त्वात्तदनुपलम्भो ऽपि तादृश एव । वस्तुतस्त्वस्मन्मते नानुपलब्ध्या ज्ञानाभावो गृह्यते, किं तु ज्ञानग्राहकसाक्षिणैवानुपलम्भनिरपेक्षेण विद्यमानो वृत्त्यभावो गृह्यत इति नानुपपत्तिरिति भावः ॥

किञ्च जन्यज्ञानस्य स्वप्रकाशत्वमते षष्ठप्रमाणानङ्गीकारात्तदभावग्राहकमपि दुर्निरूपमित्याह । अपि चेति ।

(ज्ञानाभावग्राहकानुपलम्भः) । अपि च ज्ञानाभावः केन ग्राह्यः । मनसेति चेत्, किं मनःप्रतियोगिनमपि गृह्णाति उताभावमात्रम् । चरमे ऽभावमात्रं सिद्ध्येन्न तु तस्य ज्ञानसम्बन्धित्वम् । प्रथमे ज्ञानस्य मानसत्वेन तस्य स्वप्रकाशत्वम् । अविद्यमानज्ञानस्य मानसत्वं न विरुद्धमिति चेत्तर्हि स्वप्रकाशत्वं विद्यमानत्वप्रयुक्तं स्यान्न ज्ञानरूपप्रयुक्तम् । तथा सति घटादेरपि स्वप्रकाशत्वापत्तिः । विद्यमानदशायां ज्ञानं स्वप्रकाशमिति चेत् । किं विद्यमानदशायां ज्ञानस्य स्वप्रकाशत्वे विद्यमानत्वमेव प्रयोजकम्, उत विद्यमानज्ञानत्वं केवलज्ञानत्वं वा । प्रथमे ऽतिप्रसङ्गाद्द्वितीये गौरवात्तृतीयमेव वाच्यम् । तथा चातीतादिज्ञानं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कथं मनसा गृह्येत । ज्ञानाभावस्य मनसा सम्बन्धाभावाच्च । संयुक्तविशेषणता सम्बन्ध इति चेन्न । निरवयवस्य मनसो निरवयवेनात्मना संयोगानुपपत्तेः । संयोगो ह्यव्याप्य वर्त्तते, न च निष्प्रदेशात्मनि मनसि च तस्याव्याप्यवृत्तिता सङ्गच्छते ॥

मनसोऽधिकरणात्मग्राहकतया तत्रत्याभावग्राहकत्वमिति नवीनमतानुरोधेन शङ्कते । मनसेति । विकल्पासहत्वान्नैवमित्यभिप्रेत्य विकल्पयति । किमिति । अभाव इति शब्देनाभावमात्रप्रतीतावपि न ज्ञानप्रतियोगिकत्वसिद्धिर्यथा एवं मनसापि तावन्मात्रे गृहीते न तत्सिद्धिरित्याह । चरम इति । आद्ये ज्ञानस्वप्रकाशत्वभङ्गः घटादिवदैन्द्रियकत्वादित्याह । प्रथम इति । वर्तमानदशायामेव स्वप्रकाशत्वादभावकाले वेद्यत्वमविरुद्धमिति शङ्कते । अविद्यमानेति । अतीतज्ञानादेर्ज्ञानत्वे सत्यपि वर्त्तमानत्वाभावेन स्वप्रकाशत्वे ज्ञानत्वं तत्राप्रयोजकं स्यात् किन्तु वर्त्तमानत्वमेव तथा चातिप्रसङ्ग इत्याह । तर्हीति । अतिप्रसङ्गपरिहारं शङ्कते । विद्यमानेति । अत्रापि स्वप्रकाशत्वप्रयोजकं विकल्प्य दूषयति । किं विद्यमानेति । सिद्धान्तेऽपि पुरुषान्तरीयप्रकाशस्य पुरुषान्तरवृत्तिविषयत्वमेव न प्रकाशविषयत्वमिति भावः । मनसो ज्ञानाभावासन्निकृष्टत्वादपि न तद्ग्राहकत्वमित्याह । ज्ञानाभावस्येति । मनः संयुक्तात्मविशेषणतैव तत्सम्बन्ध इति शङ्कते

संयुक्तेति । आत्ममनसोः संयोगस्यैवासम्भवान्नायं सम्बन्ध इत्याह । निरवयस्येति । निरवयवयोरपि द्रव्यत्वात्संयोगः किन्न स्यादित्यत आह । संयोगो हीति ॥

नन्वव्याप्यवृत्तित्वन्नाम स्वात्यन्ताभावसमानाधिकरणत्वं तस्य निरवयवसंयोगेऽप्यविरोध इत्याशङ्क्य भावाभावयोर्युगपदेकत्र वृत्त्यसम्भवात्प्रदेशभेदेन वृत्तिर्वाच्या, निरवयवत्वे च तदनुपपत्तिरित्याह । न च निष्प्रदेशेति ।

(निरवयवत्वे भावाभावयोर्वृत्त्यसम्भवः) न च निष्प्रदेशोऽप्यौपाधिकप्रदेशो न विरुध्यत इति वाच्यम्।उपाधिर्नु-पधेयेन सम्बद्धस्तमवच्छिन्द्यात्। अन्यथातिप्रसङ्गात् । सम्बन्धश्च निरवयवे संयोगे ऽनुपपन्न एव। तस्याप्युपाध्यन्तरापेक्षायामनवस्था स्यात् ॥

निरवयवे स्वाभाविकप्रदेशभेदाभावे ऽप्यौपाधिकप्रदेशभेद उपपद्यत इत्याशङ्क्याह । न च निष्प्रदेश इति । उपाधिसम्बन्धस्यैवानुपपत्तिं वक्तुं तस्यावश्यकत्वमाह । उपाधिर्हीति । अस्तु तर्हि सम्बद्धस्यैव भेदकत्वमित्याशङ्क्य स किं स्वरूपसम्बन्ध उत संयोगः । नाद्यः स्वरूपद्वयात्मकसम्बन्धस्य सम्बन्धिद्वयव्यापकतया भेदकत्वायोगात् । द्वितीयस्तु निरवयवे प्रदेशभेदमन्तरेण न सम्भवतीत्यभिप्रेत्याह । तत्सम्बन्धश्चेति । उपाधिसंयोगप्रयोजकप्रदेशभेद उपाध्यन्तरसम्बन्धाधीन इत्याशङ्क्याह । तस्यापीति ॥

उपाधिसम्बन्धे उपपत्तिमुक्त्वा तदधीनप्रदेशभेदोऽपि दुर्निरूप इत्याह । किञ्चेति ।

(प्रदेशभेदासम्भवः) किञ्चायमौपाधिकप्रदेशभेदः पारमार्थिक उत न । आद्ये तदेकत्वव्याघातो विरुद्धयोर्धर्मयोरेकत्रासमावेशात् । औपाधिकत्वं ह्युपाधिजन्यत्वात्ताद्व्याप्यत्वादुपाध्यधीनसम्बन्धाद्वा । आद्ये अग्निसंयोगाद्रक्तिमोत्पत्तौ श्यामतेवौपाधिजन्यभेदान्निर्भेदता व्यावर्तेत । न वा कश्चिदुपाधित उपधेयस्वरूपव्यतिरेकेणातज्जन्यो भेदः सम्भवति । एवमप्यणुमनसि प्रदेशभेदासम्भवाच्च । नापि द्वितीयः । स्वाभाविकप्रदेशभेदाभावे उपाधिनापि तज्ज्ञानासम्भवात् । आरोपितप्रदेशभेदज्ञाने वा तव मते ऽर्थाभावेन संयोगस्य प्रदेशवृत्तित्वासिद्धेः ॥

भेदस्य परमार्थत्वे उपहितानुपहितयोरभेदो न स्यात् समानसत्ताकयोर्भेदाभेदयोरेकत्र विरोधादित्याह । आद्य इति । किञ्च प्रदेशभेदस्यौपाधिकत्वं नामाग्निसंयोगजरक्ततावदुपाध्यधीनोत्पत्तिकत्वं किं वा स्फटिकलौहित्यवदुपाध्यधीनज्ञानविषयत्वमथवा उपाध्युत्पत्त्याभाववत्प्रतियोगिकभेदस्य घटादौ विद्यमानस्योपाधिविशिष्टेन सम्बन्धवत्त्वमिति विकल्पयति । औपाधिकत्वमिति । आद्येऽपि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

किं पृथक्त्वं भेदः अन्योन्याभावो वा । प्रथमं दूषयति । अग्नि-संयोगादिति । अन्योन्याभावस्यानादित्वाद्द्वितीयो ऽपि न सम्भवतीत्याह । न वा कश्चिदिति । भेदस्य जन्यत्वमङ्गीकृत्य मनसि तदसम्भवमाह । एवमपीति । एकस्मिन्मनसि भेदे सति भिन्नयोः शकलयोः पूर्वावस्थातः सूक्ष्मतापत्त्या पूर्वमनसो ऽणुत्वभङ्गः स्यादित्यर्थः । द्वितीये ऽपि तद्ज्ञानं प्रमोत भ्रमः । नाद्यः । तत्र तद्भेदाभावे तत्प्रमासम्भवादित्याह । नापि द्वितीय इति । भेदज्ञानस्य भ्रमत्वे वस्तुतो भेदाभावात्प्रदेशभेदसापेक्षसंयोगानुपपत्तिरित्याह । आरोपितेति ॥

तवमते ऽनिर्वचनीयानङ्गीकारादुपाध्यधीनसम्बन्धः पारमार्थिको वक्तव्यः स च नोपपद्यते वस्तुनो द्वैरूप्यायोगादित्याह । न तृतीय इति ।

(वस्तुनो द्वैरूप्यायोगेन परमतनिरासः) न तृतीयः तव मते तत्प्रतियोगिकभेदस्य तस्मिन्नसम्भवात् । अन्यथा तस्मिन्नतद्बुद्धेः प्रमात्वप्रसङ्गात् । नापि प्रथमद्वितीयौ अपरमार्थिकस्यानिर्वचनीयस्य त्वयानभ्युपगमात् । अत्यन्तासतश्च धर्माव्यवस्थापकत्वात् । अस्तु तर्हि संयोगो व्याप्यवृत्तिरिति चेन्न । तस्य स्वात्यन्ताभावसदेशत्वानुभवात् । अत्यन्ताभावप्रतियोगिनोश्च प्रदेशभेदनियमात् । अन्यथा विरोधो दत्तजलाञ्जलिः स्यात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निमित्तसंयोगान्न्यूनानतिरिक्तप्रदेशाविभुविशेषगुणानां सर्वत्रोपलम्भप्रसङ्गाच्च । न च संयोगातिरिक्तः सम्बन्ध आत्ममनसोः सम्भवति । न चानुपलब्ध्या ज्ञानाभावग्रहः । प्रतियोगिग्राहकेन्द्रियेणाधिकरणस्य संयोगलक्षणसहकारिविरहात् । अन्यथा त्वक्संयुक्ते घटे ऽन्धस्याप्यनुपलब्ध्या रूपाभावग्रहप्रसङ्गात् । अतो ज्ञानाभावसाक्ष्यहमर्थधर्मातिरिक्तो नित्यानुभव एषितव्यः । श्रुतिरपि न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इति वृत्तिमदन्तःकरणसाक्षिणां नित्यमनुभवं दर्शयति । तस्मादनुभवो नित्य इति ॥

तस्मिन्नपि तद्भेदे यत्किञ्चिदुपहिते रजते ऽप्यरजतबुद्धिः प्रमा स्यादित्याह । अन्यथेति । पारमार्थिक उत नेति विकल्पे ऽपारमार्थिकत्वं किमनिर्वचनीयत्वं उतासत्त्वं उभयथाप्यनुपपत्तिरित्याह । नापि प्रथमेति । संयोगस्य रूपादिवद्व्याप्यवृत्तित्वान्न प्रदेशभेदापेक्षेति चोदयति । अस्तु तर्हीति । एकस्मिन् भूतले घटसंयोगतदभावानुभवान्न व्याप्यवृत्तितेत्याह । न तस्येति । तर्हि निरवयवे ऽपि संयोगतदभावौ स्तामित्यत आह । अत्यन्ताभावेति । किञ्च संयोगस्य व्याप्यवृत्तित्वे परमते निमित्तसंयोगावच्छिन्नदेशसमवायिनां शब्दसुखादीनां व्याप्यवृत्तित्वं स्यादित्याह । निमित्तेति । षष्ठप्रमाणाङ्गी-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कारेऽपि न तेन ज्ञानाभावग्रहः सम्भवति ज्ञानस्य स्वप्रकाशत्वेनेन्द्रियायोग्यत्वात्प्रतियोगिग्राहकेणेन्द्रियेणाधिकरणग्रहणरूपकारणाभावादित्याह । न चानुपलब्ध्येति । नन्वधिकरणप्रत्यक्षमात्रमनुपलब्धिसहकारि न तु प्रतियोगिग्राहकेणेन्द्रियेणापीत्यत आह । अन्यथेति । ज्ञानाभावस्य प्रमाणतोऽनुभवितुमशक्यत्वात्तदभावो नित्य एवाङ्गीकर्तव्य इत्युपसंहरति । अत इति । अनुभवनित्यत्वे श्रुतिमपि प्रमाणयति । श्रुतिरपीति । न चेयं श्रुतिरीश्वरज्ञानस्यैव विनाशं निषेधतीति वाच्यम् । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इत्युत्तरवाक्यासामञ्जस्यप्रसङ्गात् जीवप्रकरणविरोधाच्चेति भावः ॥

अनुभवनित्यत्वस्य प्रामाणिकत्वादेव चोद्यान्तरमपि निरस्तमिति वक्तुं चोद्यमनुवदति । एतेनेति ।

(अनुभवनित्यत्वेन तद्विरोधाय स्वरूपानुवादस्तस्य ।) एतेन कथं तर्हि घटज्ञानं नष्टमुत्पन्नमिति चानुभवः । न च वृत्तिविषयोऽयमनुभवइति वाच्यम् । तस्य ज्ञानत्वविशिष्टप्रतियोगिकोत्पत्तिविनाशविषयत्वात् । ज्ञानत्वे वा तस्या अपि वृत्तेश्चाज्ञानत्वात् । ज्ञानत्वे वा तस्या अपि स्वयंप्रकाशत्वेन ज्ञानविषयत्वविरोधात् । अन्यथानुभवत्वहेतोस्तत्र व्यभिचारात् । न चौपचारिकं ज्ञानत्वं वृत्तेरस्तीति वाच्यम् । शब्देष्वौपचारिकत्वकल्पना न त्वनुभवे, अनुभूयते च

प्रतियोगिनि ज्ञानत्ववैशिष्ट्यम् । न च भ्रान्त्या ज्ञानत्ववैशिष्ट्यं प्रतियोगिन्यवगत्य तदवच्छिन्नप्रतियोगिकोत्पत्त्यादिरनुभूयत इति वाच्यम् । प्रतियोगिनि ज्ञानत्वांशे बाधकाभावात् । तमन्तरेणापि तत्कल्पने ऽतिप्रसङ्गादिति निरस्तम् ॥

एतेनेत्यस्य निरस्तमित्युत्तरेणान्वयः । नाशाद्यनुभवो वृत्तिविषय इत्युक्तमित्याशङ्क्य वृत्तेर्ज्ञानत्वमस्ति उत न । अन्त्ये तद्विषयत्वमनुपपन्नमित्याह । न च वृत्तीति । ज्ञानत्वपक्षे अभावप्रतियोगितया वेद्यत्वमपि न स्यादित्याह । ज्ञानत्वे वेति । ज्ञानत्वे ऽपि स्वप्रकाशत्वं वृत्तेर्नास्तीत्याशङ्क्य तर्हि स्वप्रकाशत्वानुमाने ऽनुभवत्वहेतोस्तत्र व्यभिचारः स्यादित्याह । अन्यथेति । ननु वृत्तेरौपचारिकज्ञानत्वमादाय नाशानुभवस्तद्विषयो भविष्यति, अनुभवत्वहेतोर्व्यभिचारश्च न स्यादित्याशङ्क्याह । न चौपचारिकमिति । औपचारिकत्वं हि गुणयोगादन्यत्र वृत्तिः शब्दधर्मः तच्चानुभवे न सम्भवतीत्याह । शब्दे हीति । तर्हि मुक्तौ भ्रान्त्या रजतत्वमवगत्य तन्नाशे रजतं नष्टमित्यनुभवाद्वृत्तौ ज्ञानत्वमारोप्य तन्नाशे ज्ञानं नष्टमित्याद्यनुभवो भवत्वित्याशङ्क्याह । न च भ्रान्त्येति । तमन्तरेणेति । बाधकमन्तरेणापि भ्रान्तित्वकल्पने प्रमापि भ्रमः स्यादित्यर्थः ॥

ज्ञानशब्दार्थप्रतियोगिकनाशानुभवस्य वृत्तिविषयत्वं दर्शयितुं ज्ञानशब्दार्थौ मतभेदेन द्विविध इत्याह । अत्र हीति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(मतभेदेन ज्ञानशब्दार्थद्वैविध्यम्)

अत्र ह्युभयं सिद्धान्तवित्संमतं वृत्त्युपहितचैतन्यं ज्ञप्तिर्ज्ञानमिति व्युत्पत्त्या ज्ञानपदाभिधेयं वृद्धानां तत्रैव प्रयोगप्रत्यययोर्दर्शनात् केवले चैतन्ये ऽन्यस्यां च वृत्तौ तदभावात्। केवलं चैतन्यं श्रुतौ ज्ञानपदेन लक्ष्यते तत्र वृत्त्यन्तरकल्पनागौरवात्। वाक्यार्थे तदयोगाच्च। अस्मिन्मते यद्यपि वृत्तेरेव विनाशः सा च न ज्ञानं तथापि ज्ञानपदार्थोपाधितया तत्सन्निकर्षात् ज्ञानमुत्पन्नं विनष्टमिति वृत्तिरेवानुभूयते। यथा गुरुमते श्यामं नष्टं रक्तमुत्पन्नमिति तत्समवायः, भट्टमते च ककारो नष्टो गकार उत्पन्न इति तद्व्यञ्जकध्वनिः नैयायिकादिमते ऽपि गवि शशशृङ्गं नास्तीति शशीयत्वमनुभूयते। न च गुरुमते रूपस्य भट्टमते वर्णस्य नित्यत्वात् न्यायादिमते शशशृङ्गाभावाप्रतियोगित्वात्तदनुभवानामन्यथात्वमिति वाच्यम्। प्रकृते ऽप्यनुभवस्य श्रुत्यनुमानाभ्यां नित्यत्वसिद्धेस्तुल्यत्वात्। वृत्त्यन्तरज्ञानत्वे ऽपि व्यधिकरणधर्मावच्छिन्नप्रतियोगिकाभावाभ्युप-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गमाच्च । अन्यथा गवि शशशृङ्गं नास्तीति शशीयत्वावच्छिन्नशृङ्गप्रतियोगिकाभावानुभवविरोधात् न ज्ञानं नष्टमित्यनुभवानुपपत्तिः । एवं तदुत्पत्त्यनुभवोऽपि ॥

यथा श्रोत्रशब्दार्थो नभ एव कर्णावच्छिन्नं तथा वृत्त्यवच्छिन्नं चैतन्यमेव ज्ञानशब्दार्थो न वृत्तिरित्येकं मतमाह । वृत्त्युपहितेति । तत्र व्यवहर्तृणां ज्ञानशब्दप्रयोगदर्शनादिति हेतुमाह । वृद्धानामिति । अन्यायामिति । चैतन्यसम्बन्धरहितवृत्तावित्यर्थः । तर्हि सत्यं ज्ञानमिति कथं ब्रह्मणि ज्ञानशब्दप्रयोग इत्यत्राह । केवलं चैतन्यमिति । तत्रापि शक्त्यन्तरमेव किं न स्यादित्यत आह । तत्रेति । किञ्च ज्ञानादिपदसमुदायात्मकवाक्यार्थस्य ब्रह्मणस्तदेकदेशज्ञानपदवाच्यत्वे तदितरपदवैयर्थ्यप्रसङ्गात् वृत्तिनिमित्तस्यापि निर्विशेषब्रह्मण्यभावाच्च न शक्तिरित्याह । वाक्यार्थ इति । अस्मिन्मते ज्ञानमुत्पन्नं विनष्टमित्याद्यनुभवः श्रोत्रं छिन्नमित्याद्यनुभववदुपाध्येकविषय इत्याह । अस्मिन्मत इति । अन्याकारनाशानुभवस्यान्यविषयत्वे पराभ्युपेतं दृष्टान्तमाह । यथा गुरुमत इत्यादिना । गुरुमते श्यामत्वादेर्नित्यत्वेन श्यामं नष्टमित्यनुभवस्य यथानित्यसमवाय एव तन्निरूपितो विषयः, यथा वा भट्टमते वर्णानां नित्यत्वेन तन्नाशाद्यनुभवस्य तद्व्यञ्जकध्वनिरेव तन्नाशादिप्रतियोगितया विषयः, यथा वा वैशेषिकादिमते शशशृङ्गस्यासत्त्वेनाभावाप्रतियोगित्वात् शशशृङ्गं नास्तीत्यनुभवे शशीयत्वमेवाभावाप्रतियोगितयानु-

भूयते, तथा ज्ञानं नष्टमित्याद्यनुभवे ऽपि ज्ञानशब्दार्थोपाधिवृत्तिरेव नाशादिप्रतियोगितयाऽनुभूयत इत्यर्थः। उदाहृतानुभवेषु तथाप्रतीतेस्तन्मते बाधकसत्त्वादन्यविषयत्वमित्याशङ्क्येहापि तर्हि ज्ञाननित्यतायाः प्रमाणसिद्धत्वान्नाशाद्यनुभवस्यान्यविषयत्वं तुल्यमित्याह। न च गुरुमत इत्यादिना। किञ्च सिद्धान्ते व्यधिकरणधर्मावच्छिन्नप्रतियोगिकाभावाङ्गीकाराद्वृत्तेरज्ञानत्वे ऽपि व्यधिकरणज्ञानत्वावच्छिन्नतत्प्रतियोगिकनाशाद्यनुभव उपपद्यत इत्याह। वृत्तेरज्ञानत्वे ऽपीति। अभ्युपगमाच्च न ज्ञानं नष्टमित्यनुभवानुपपत्तिरित्युत्तरेणान्वयः। व्यधिकरणधर्मावच्छिन्नप्रतियोगिकाभावानङ्गीकारे बाधकमाह। अन्यथेति। ननु प्रतियोगिनि प्रतियोगितावच्छेदकविशिष्टज्ञानस्याभावधीकारणस्यात्राभावान्नैतादृशो ऽनुभवः सम्भवीति चेत्। प्रतियोगिप्रतियोगितावच्छेदकज्ञानमात्रस्याभावधीकारणत्वात्तद्विशिष्टज्ञानत्वेन तस्य कारणत्वगौरवात्। न चैवं प्रतियोगिनिर्विकल्पकादप्यभावधीः स्यादिति वाच्यम्। धर्मधर्मिमात्रगोचरनिर्विकल्पके मानाभावादिति भावः। तर्ह्युत्पत्त्यनुभवः कथमित्याशङ्क्य सो ऽपि व्यधिकरणधर्मावच्छिन्नप्रतियोगिकोत्पत्तिविषय इत्याह। एवमिति॥

यथा सस्यविशिष्टा भूरुर्वराशब्दवाच्या एवं वृत्तिशबलं चैतन्यं ज्ञानसमुदायशक्त्याभिधीयत इति मतान्तरमाह। अथवेति।

(ज्ञान शब्दस्यार्थान्तरत्वम्) अथवा वृत्तिशबलं चैतन्यं ज्ञानप-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देनाखण्डशक्त्याभिधीयते जन्यस्य घटादि-व्यवहारानुकूलस्य प्रमातृधर्मस्य ज्ञानपदात्प्रतीतेः । तत्र च ज्ञानं नष्टमुत्पन्नमित्याद्यनुभवो मुख्य एव । पदार्थैकदेशनाशादिविषयस्याप्यनुभवस्य रूपं नष्टमित्यादेर्मुख्यत्वात् । एतेन स्फुरणोत्पादविनाशानुभवात्स्फुरणमुत्पद्यते विनश्यतीत्यपि नवीनोक्तं प्रत्युक्तम् । वृत्त्यतिरिक्तत्वेन स्फुरणावगमेतदनुभस्य बाधितत्वात् । वृत्तावेव स्फुरणाभेदारोपेण स्फुरणं नष्टमित्याद्यनुभवात् ।

यस्मादुत्पत्तिविध्वंसविज्ञानं वृत्तिगोचरम् ।
तस्मादनुभवोऽनादिर्नित्यो वेदान्तमानतः ॥

स चानुभव एक एव भेदे प्रमाणाभावात् । अभेदे च प्रत्यक्षानुमितानुभवेऽप्यनुभवानुगतबुद्धेर्मानत्वात् ॥

वृत्तेरप्यभिधेयत्वे हेतुमाह । जन्यस्येति । परमते रूपत्वविशिष्टरूपस्य रूपशब्दवाच्यत्वेऽपि यथा रूपं नष्टमित्याद्यनुभवस्तदेकदेशव्यक्तिविषयो मुख्य एव एवं ज्ञानं नष्टमित्याद्यनुभवो ज्ञानशब्दवाच्यैकदेशवृत्तिविनाशादिविषयोऽपि मुख्य एवास्मिन्मत इत्याह । तत्र च ज्ञानमिति । उत्पत्तिनाशानुभवस्य चैतन्योपाधिविषयत्वाभिधानादेव नवीनचोद्यमपि निरस्तमित्याह । एतेनेति किञ्च वृत्तिभिन्नत्वेन स्फुरणावगमदशायां स्फुरणं नष्ट-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मित्याद्यनुभव उत तद्भेदावगमदशायाम् । आद्ये व्यतिरिक्तस्फुरणस्य धर्मिग्राहकेण नित्यत्वेनैव सिद्धत्वान्नाशाद्यनुभवो भ्रम इत्याह । वृत्त्यतिरिक्तत्वेनेति । द्वितीये वृत्तिमेव स्फुरणतयावगत्य तन्नाशादिकमेवानुभूयत इत्याह । वृत्तावेवेति । अनुभवानित्यत्वे बाधकसद्भावाच्च तन्नित्यत्वं सिद्धमित्युपसंहरति श्लोकेन । यस्मादिति । वृत्त्यतिरिक्तस्फुरणसाधकेन मानेन लाघवानुगृहीतेन सिद्धमप्यनुभवैकत्वं परोक्तदोषनिरासेन दूषयितुमाह । स चेति । उत्पत्त्याद्यनुभववद्भेदानुभवोऽपि वृत्तिविषय इत्याह । भेद इति । प्रत्यक्षस्वकीयानुभवेषु अनुमितपरकीयानुभवेषु चानुभवानुभव इत्येकाकारबुद्धेरेक एवानुभवो विषय इति तदैक्यसिद्धिरित्याह । अभेदे वेति ॥

अनुगतबुद्धेरनुगतधर्मविषयत्वनियमाद्व्यक्तिभेदो वक्तव्य इति चोदयति । स्यादेतदिति ।

(अनुगतबुद्धौ पूर्वपक्षः)

स्यादेतदनुगतबुद्धिर्जातिविषया न व्यक्तिविषया, अनुगतप्रमात्वात्, घटानुगतप्रमावत् । अत एव जलभाजनादिप्रतिबिम्बितचन्द्रानुगतबुद्धौ न व्यभिचारः । घटानुभवो न भवति पटानुभव इति स्वरूपतो भेदप्रतीतेः । देवदत्तोऽनुभवति न यज्ञदत्त इत्याद्याश्रयभेदप्रतीतेश्च । न चानुभवो न स्वसमानधर्मवत्प्रतियोगिकपारमार्थिकभेदवान् उपाधिपरामर्शा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मन्तरेणाविभाव्यमानभेदत्वादाकाशवदितिवाच्यम् । वृत्तिज्ञानस्य पक्षत्वे बाधात्तदन्यस्य चाप्रसिद्धेः हेतोरिच्छादौ व्यभिचाराच्चेति चेत् ।

साध्यान्तराभिप्रायेण व्यक्तिमात्रविषयत्वं निराकरोति । न व्यक्तिविषयेति । हेतुगतप्रमापदव्यावर्त्यमाह । अत एवेति । एकचन्द्रव्यक्तेरेवानेकचन्द्रत्वेन प्रतीतेस्तदनुगतानुभवस्याप्रमात्वान्न तत्र व्यभिचार इत्यर्थः । घटानुगतबुद्धौ प्रामाणिकभेदवद्व्यक्तिविषयत्वमुपाधिरित्याशङ्क्य साधनव्यापकत्वमाह । घटानुभव इति । सर्वानुभवस्यैकत्वे युगपदाश्रयभेदेन विधिनिषेधानुपपत्तिरित्यभिप्रेत्याह । देवदत्तोऽनुभवतीति । प्रतिपक्षपराहतिमाशङ्क्य निराकरोति । न चानुभव इति । घटतद्रूपवृत्तिस्ववाचकाखण्डशब्दप्रवृत्तिनिमित्तवत् प्रतियोगिकस्वसमानसत्ताकतादात्म्यविरोधिभेदरहित इति साध्यार्थः । आकाशानुभवयोः स्ववाचकद्रव्यगुणशब्दप्रवृत्तिनिमित्तद्रव्यत्वगुणत्ववत् । घटतद्रूपप्रतियोगिकतादात्म्यविरोधितद्भेदवत्त्वेन साध्यवैकल्यबाधपरिहाराय घटतद्रूपवृत्तीत्युक्तम् । कर्मशब्दप्रवृत्तिनिमित्तकर्मत्ववत् प्रतियोगिकभेदवत्त्वेनोक्तदोषपरिहारार्थं स्ववाचकेत्युक्तम् । एतदनुभवशब्दप्रवृत्तिनिमित्तैतदनुभवत्ववदेतत्प्रतियोगिकभेदाभावस्यैतन्नास्मिन्नन्यैरप्यङ्गीकारात्सिद्धसाधनतापरिहारायाखण्डपदम् । सिद्धान्तेऽनुभवशब्दप्रवृत्तिनिमित्तानुभवत्वाधिकरणानुभवप्रतियोगिककल्पितभेदस्य पक्षेऽङ्गीकाराद्बाधपरिहारायोक्तधर्मवत्प्रतियोगिकतादात्म्यवि-

रोधीत्युक्तम् । स्वसिद्धान्ते ऽनुभवस्यानुभवान्तरतादात्म्यविरोधिभेदानङ्गीकारान्न वा बाधः । नर्हि परमते ऽप्यनुभवान्तरप्रतियोगिककल्पिततादात्म्यविरोधिभेदाभावात्सिद्धसाधनं स्यात्तन्निवृत्तये स्वसमानसत्ताकेत्युक्तम् । परमते ऽनुभवस्यानुभवत्ववदनुभवान्तरप्रतियोगिकसमानसत्ताकतादात्म्यविरोधितद्भेदवत्वाङ्गीकारान्न सिद्धसाधनमित्यर्थः । उपाधिपरामर्शमन्तरेण तद्भेदवत्वेनाप्रमीयमाणत्वादिति हेत्वर्थः । तथा च परमते कथमपि स्वप्रतियोगिकभेदस्याकाशे ऽभावेन साधनवैकल्यशङ्का निरस्ता । परमते पक्ष ऽसिद्धिपरिहारार्थमुपाधिपरामर्शमन्तरेणेत्युक्तम् । एतदनुमाने वृत्तिज्ञानं पक्षः तदतिरिक्तानुभवो वा, उभयथाप्यनुपपत्तिरित्याह पूर्ववादी । वृत्तीति । घटेच्छा न भवति पटेच्छेत्युपाधिपरामर्शपूर्वकभेदस्य प्रमीयमाणत्वात्तत्र व्यभिचार इत्याह । हेतोरिति ॥

सिद्धान्ती तावदनुभवानुगतबुद्धिर्जातिविषया अनुगतप्रमात्वादिति परानुमाने पक्षं विकल्पयति । किं. वृत्तीति ।

(तदुत्तरं विकल्पनेन) किं वृत्तिविषयानुगतबुद्धिं पक्षीकृत्य जातिविषयत्वं साधयसि किं वा तदतिरिक्तानुभवविषयां यस्या अनुगतबुद्धेर्व्यक्तिविषयत्वमभिप्रेयते तां वा सामान्येन । नाद्यः सिद्धसाभिरिष्यते तां वा सामान्येन । नाद्यः सिद्धसाधनत्वात् । न द्वितीयः सिद्धसिद्धिव्याघातात् । तत्साधकस्य लाघवतर्कसहकृतानुमानात् ।

स्यानुगतबुद्धेश्च तदेकत्वगोचरत्वात् । न द्वतीयः आकाशानुगतबुद्धौ व्यभिचारात् । औपाधिकधर्मविषयानुगतबुद्धौ व्यभिचाराच्च । न चानुगतविषयत्वमात्रं साध्यं विवक्षितम् । अनेकान्तःकरणवृत्त्यनुगतानुभवविषयत्वेन सिद्धसाधनात् । न चानुगतधर्मविषयत्वं साध्यम् । अप्रयोजकत्वात् । तत एव यद्विशेष्यकानुगतबुद्धिः सा तदनुगतविषयेति निरस्तम् । घटत्वमित्याद्यनुगतबुद्धौ व्यभिचारश्च । नानाविशेष्यकानुगतबुद्धित्वं हेतुरिति चेन्न । असिद्धेः । जातिविषयत्वादेव तत्साधने परस्पराश्रयात् ॥

वृत्तावनुगतजात्यङ्गीकारादाद्ये सिद्धसाधनमाह । नाद्य इति । द्वितीये तस्यासिद्धावाश्रयासिद्धिः सिद्धौ वा वृत्तिव्यतिरिक्तानुभवसाधकमानेन तदेकत्वादेरपि सिद्धेर्धर्मिग्राहकमानविरोध इत्यभिप्रेत्याह । न द्वितीय इति । तृतीये किं यथाश्रुतमेव साध्यमुतानुगतविषयकत्वं किं वानुगतधर्मविषयकत्वम् । नाद्यः घटकरकाद्यवच्छिन्नाकाशानुगतबुद्धौ व्यभिचारादित्याह । न तृतीय इति । मृत्तन्त्वादिकारणेषु कारणत्वानुगतबुद्धौ व्यभिचारश्चेत्याह । औपाधिकेति । द्वितीयं सिद्धसाधनेन दूषयति । न चानुगतेति । अप्रयोजकत्वादेव नियमान्तरमप्यनुपपन्नमित्याह । तत एवेति । किञ्च यद्विशे-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्यक्तानुगतबुद्धिः सा तदनुगतविषयेत्यत्र किं बुद्धेरनुगतत्वमनेकविषयकत्वे सत्येकाकारत्वमुतानेकविशेष्यकत्वे सत्येकाकारत्वम् । आद्ये ऽनेकघटविषयकैकघटत्वविशेष्यकानुगतबुद्धौ व्यभिचारमाह । घटत्वमिति । द्वितीयं शङ्कते । नानेति । अस्मन्मते ऽनुभवानुगतत्वबुद्धेरनेकविशेष्यकत्वमसिद्धमित्याह । नेति । विमता अनेकविशेष्यका जातिविषयत्वादित्यनुमानात्तत्सिद्धिरित्याशङ्क्याह । जातीति ॥

ननु यज्ञदत्तानुभवनाशकालीनोत्पत्तिको देवदत्तानुभवस्ततो भिन्नस्तन्नाशकालोत्पत्तिकत्वात्तत्कृतिवदित्यनुमानात्तदनुभवभेदसिद्धिरित्यत आह । एतेनेति ।

(अनुभवभेदासिद्धिः) एतेन समकालोत्पत्तिविनाशवन्तौ देवदत्तयज्ञदत्तानुभवावन्योन्यं भिन्नौ एककालोत्पत्तिविनाशप्रतियोगित्वात्सम्मतवदिति परोक्तं परास्तम्। उत्पत्तिविनाशवद्वृत्तीनां भेदाङ्गीकारात्। तदतिरिक्तज्ञाने च पक्षतावच्छेदकहेत्वोरसिद्धेः। अत एव कारणभेदात्कार्यज्ञानभेदानुमानमपि परास्तम्। नाप्याश्रयभेदात्तदनुमानं जातौ व्यभिचारात्। कार्यत्वे सतीति विशेषणे च संयोगादौ व्यभिचारात्। असिद्धेश्च। अत एव विशे-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षगुणत्वादित्यपि न हेतुः । असमवेतस्यानुभव स्याविशेषगुणत्वात् ॥

यथाश्रुतप्रयोगे एकैकानुभवे समकालोत्पत्तिविनाशवत्त्वाभावात्समुदायस्यं समुदायिव्यतिरेकेणाभावादसिद्धिरिति द्रष्टव्यम् । किमस्मिन्ननुमाने वृत्तिज्ञानं पक्षः, तदतिरिक्तानुभवो वा, उभयथाप्यनुपपन्नमित्याह । उत्पत्तीति । चैत्रानुभवो मैत्रानुभवाद्भिन्नः तद्भिन्नसामग्रीकत्वादित्यनुमानमपि सिद्धसाधनतया ऽसिद्ध्या वा निरस्तमित्याह । अत एवेति । चैत्रानुभवो मैत्रानुभवाद्भिन्नः तद्भिन्नाश्रयत्वादित्याशङ्क्याह । नापीति । कार्यत्वे सति भिन्नाश्रयत्वं हेतुः । तथाच न जातौ व्यभिचार इत्याशङ्क्याह । कार्यत्वे सतीति । वृत्तिव्यतिरिक्तज्ञाने विशेषणविशेष्ययोरसिद्धिरित्याह । असिद्धेश्चेति । चैत्रो ऽनुभवति न मैत्र इति व्यवस्था च मैत्रान्तःकरणोपहितानुभवस्य विषयसम्बन्धाभावादेवोपपद्यत इति भावः । तर्हि भिन्नाश्रयत्वे सति विशेषगुणत्वं हेतुः । तथाच न संयोगादौ व्यभिचार इत्याशङ्क्य पूर्ववदसिद्ध्या दूषयति । अत एवेति ॥

एवमनुभवभेदे ऽनुमानं निरस्य प्रत्यक्षमप्यनूद्य निरस्यति । यत्त्विति ।

(अनुभवभेदे न प्रत्यक्षं प्रमाणम्) यत्त्वनुभवभेदे प्रत्यक्षं प्रमाणमिति तन्न । अनुभवस्यैकत्वे ऽपि घटज्ञानं न भवति पट-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानमित्यनुभवोपपत्तेः । एकस्मिन्नपि ज्ञाने विषयभेदावच्छिन्नप्रतियोगिकभेदाश्रयात् । एकस्मिन्नपि वृक्षे अवच्छेदभेदेन कपिसंयोगवदन्योन्याभावस्य मूले वृक्षः कपिसंयोगवानग्रे नेत्यनुभवात् । परेणापि भ्रान्तिज्ञाने ऽप्येकस्मिन्धर्म्यंशविभ्रमो नेत्यनुभवाभ्युपगमात् । ज्ञानभेदानुभवस्य वृत्तिविषयत्वाच्च । तस्माद्यत्र स्पष्टमन्यतः प्रमाणाद्व्यक्तिभेदः सिद्ध्यति तत्रानुगतत्वबुद्धिर्जातिविषया यत्र तु न तथा किन्तु सन्देहः तत्र लाघवाद्व्यक्तिरेव तद्विषयः । लाघवस्य प्रमाणान्तर इव प्रत्यक्षे ऽपि सहकारित्वादिति ज्ञाने सन्दिग्धभेदे ऽनुगतबुद्धिर्व्यक्तिविषया ॥

घटपटानुभवयोः स्वरूपेणाभेदे ऽपि घटावच्छिन्नानुभवप्रतियोगिकभेदवत्त्वात्पटानुभवस्य तद्विषयत्वेन भेदप्रत्यक्षोपपत्तिरित्याह । अनुभवस्येति । एकस्मिन्नपि अवच्छिन्नस्वप्रतियोगिकभेदवत्त्वे दृष्टान्तमाह । एकस्मिन्नपीति । परमते ऽप्येकत्वेन सम्मतानुभवे धर्म्यंशावच्छिन्ने तस्मिन्प्रकारावच्छिन्नतत्तादात्म्यनिषेधो ऽङ्गीकृत इत्याह । परेणापीति । भेदानुभवस्य वृत्त्यतिरिक्तप्रकाशविषयत्वमङ्गीकृत्याविरोध उक्त इदानीं तद्विषयत्वमेव नास्तीत्याह । ज्ञानभेदेति । तर्ह्यनुभवाभेदे ऽपि न

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रमाणमस्तीत्याशङ्क्यैकविषयानुगतबुद्धिरेव गौरवेण जातिकल्पनानुपपत्तौ तदैक्ये प्रमाणमित्युपसंहरति । तस्मादिति । सामान्येनोक्तमर्थं प्रकृते योजयति । इति ज्ञान इति ॥

अनुगतबुद्धेर्जातिविषयत्वनियमाभावे इच्छाद्यनुगतबुद्धिरपि व्यक्तिविषया स्यात्तथा च तदेकत्वमपि स्यादित्याशङ्क्याह । एतेनेति ।

(अनुगमस्य जातिविषयत्वे ऽपीच्छाव्यक्तिभेदः) एतेनानुगतबुद्धेर्जातिविषयत्वादन्यथेच्छादिव्यक्तिरप्येकैव स्यात्तस्या अनुगतबुद्धिविषयत्वादिति निरस्तम् । अन्तःकरणगतेच्छातिरिक्तेच्छायां प्रमाणाभावात् । तस्याश्च कारणभेदानुविधायित्वादुत्पत्तिविनाशानुभवाच्च स्पष्टो भेद इति तदनुगतबुद्धेर्जातिविषयत्वात् ॥

किमिच्छानुगतबुद्धेरहमर्थधर्मभूतेच्छाया ऐक्यं विषय इत्युच्यत उत तद्व्यतिरिक्तेच्छायाः । न द्वितीय इत्याह । अन्तःकरणेति । न चायमेवानुगतानुभवस्तत्र प्रमाणमिति वाच्यम् । धर्मिकल्पनातो धर्मकल्पनाया लघीयस्त्वेन प्रसिद्धेच्छास्वेव जातिकल्पनया प्रामाण्योपपत्तेः । वृत्तिव्यतिरिक्तानुभवस्य त्वनेकप्रमाणसिद्धत्वान्नास्य न्यायस्यावतार इति भावः । आद्ये व्यक्ति-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भेदस्य निश्चितत्वेन लाघवानवताराज्जातिविषयकत्वं वक्तव्यमित्याह । तस्याश्चेति ॥

संविद्भेदेऽनुमानमपि प्रमाणमित्याह । प्रयोगश्चेति ।

(संविद्भेदेऽनुमानप्रामाण्यम्) प्रयोगश्च वृत्तिव्यतिरिक्ता संवित् स्वप्रतियोगिकस्वसमानसत्ताकयावद्भेदरहिता प्रमाणतोऽविभाव्यमानतद्भेदत्वात् चन्द्रादिवत् । न च दृष्टान्ते साधनवैकल्यम् । तद्भेदवत्तया प्रमीयमाणत्वाभावस्य विवक्षितत्वात् । न चाश्रयासिद्धिः । वृत्त्यतिरिक्तसंविदः पक्षस्य निरूपितत्वात् । न च हेत्वसिद्धिः । संविद्भेदे प्रमाणाभावस्योक्तत्वात् । गौरवं च विपक्षे बाधकस्तर्कः । अयमेव हेतुरुपाधिपरामर्शमन्तरेणाविभाव्यमानभेदत्वादित्यनेन सूचितः ॥

वृत्तिज्ञाने बाधपरिहाराय वृत्त्यतिरिक्तेति । दृष्टान्ते साध्यवैकल्यपरिहाराय स्वप्रतियोगिकेति । स्वशब्दः समभिव्याहृतपरः । पक्षे बाधपरिहाराय स्वसमानसत्ताकेति । व्यक्तिविशेषे स्वप्रतियोगिकभेदाभावेन सिद्धसाधनतापरिहाराय यावदिति चोक्तम् । एतदनुमाननिष्कर्षश्च पूर्वपक्ष एव दर्शित इति नात्र किञ्चिदुच्यते । तद्भेदत्वादिति । स्वप्रतियोगिकभेदवत्त्वादित्यर्थः । तावत्युक्ते

विरोधः स्यात्तन्निरासाय प्रमाणतो विभाव्यमानेति विशेषणम् । चन्द्रादिवदिति । प्रतिबिम्बचन्द्रादिवदित्यर्थः । ननु परमते प्रतिबिम्बचन्द्रे चन्द्रप्रतियोगिकभेदाभावेन साधनविशेष्यविकलो दृष्टान्त इति चेन्न । अपरोक्षतया प्रतीयमानत्वानुपपत्त्या तत्राप्यनिर्वचनीयभेदस्यावश्यकत्वात् । अथवा स्वप्रतियोगिकभेदवत्तया प्रमाणायोग्यत्वस्य हेतुत्वेन विवक्षितत्वान्नायं दोष इत्याह । न चेति । यदुक्तं पूर्वपक्षे तदन्यस्य चासिद्धेरिति तत्राह । न चाश्रयासिद्धिरिति । तर्हि तन्मते संविद्भेदस्य प्रामाणिकत्वादसिद्धो हेतुरित्यत आह । न च हेत्वसिद्धिरिति । संविद्भेदस्य प्रामाणिकत्वात्पारमार्थिकत्वे व्यक्त्यानन्त्यं जातिश्चेत्यप्रामाणिकानेककल्पनागौरवमित्याह । गौरवञ्चेति । आचार्यानुमाने ऽप्युक्तहेतोरेव विवक्षितत्वान्नेच्छादौ व्यभिचार इत्यभिप्रेत्याह । अयमेवेति ॥

यथाश्रुते ऽपि तदनुमाने न दोष इत्याह । अस्तु वेति ।

(यथाश्रुतानुमाने ऽपि न दोषः) अस्तु वा यथाश्रुत एव । न चेच्छादौ व्यभिचारः । तत्र हीच्छैव विषयपरामर्शाधीनपरामर्शा तस्या विषयनिरूप्यत्वान्न तद्भेदः । इच्छाज्ञाने सति तद्विषयपरामर्शं विना तद्भेदा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परामर्शादर्शनात् । धर्मिप्रतियोगितदवच्छेदकव्यतिरिक्तविषयज्ञानस्य भेदज्ञानेऽनुपयोगाच्च । संवित्तु स्वप्रकाशानपेक्ष्यविषयप्रकाशं प्रकाशते तद्भेदस्त्वन्वयव्यतिरेकसहचारदर्शनात् विषयपरामर्शाधीनपरामर्शः । संवित्संवित्प्रतियोगिकभेदवती न, संवित्त्वात्, व्यतिरेकेण घटवत् । न चाप्रयोजकत्वम् । लाघवेनासंवित्त्वे संविदन्यत्वस्यैव प्रयोजकत्वात् संविदद्वितीयत्वसिद्धेः । न चैवमघटत्वे घटान्यत्वं प्रयोजकमिति घटाद्वितीयत्वापत्तिः । प्रमाणप्रतिपन्नभेदघटादौ बाधितस्य लाघवस्यानवतारात् । गुरोरपि घटत्वावच्छिन्नप्रतियोगिकभेदवत्त्वस्य यावत् घटभेदाश्रयत्वस्य वा तत्र प्रयोजकत्वात् । अन्यथाकाशादन्यत्वादेरप्यनाकाशत्वादावप्रयोजकत्वापातादिति ॥

तत्रोक्तं दोषं परिहरति । न चेच्छादाविति । इच्छादिभेदस्योपाधिपरामर्शमन्तरेणाविभाव्यमानत्वं तत्परामर्शाधीनप्रतीतिकत्वे स्यात्, न चैतदस्ति उपाधिपरामर्शस्येच्छाप्रतीतावेव हेतुत्वादित्याह । तत्रहीति । यद्यपि सिद्धान्ते इच्छाप्रतीतेः केवलसाक्षिरूपत्वान्न विषयपरामर्शापेक्षा, तथापि तद्भेदप्रतीतेरपि साक्षिरूपत्वान्न तदपेक्षेति तुल्यम् । व्यतिरेकाभावान्न विष-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यज्ज्ञानस्य भेदज्ञाने उपयोग इत्याह । इच्छाज्ञान इति । किञ्च भेदज्ञाने धर्मिप्रतियोगिज्ञानं तयोरवच्छेदकज्ञानं च कारणं इच्छाप्रतियोगिकभेदे विषयस्य धर्मिप्रतियोगितदवच्छेदकत्वाभावान्न विषयज्ञानं भेदज्ञाने हेतुरित्याह । धर्मीति । न च तत्र धर्म्याद्यवच्छेदको विषय एवेति वाच्यम् । अविद्यमानस्य विषयस्य विद्यमानधर्म्याद्यवच्छेदकत्वायोगात् । घटीयत्वपटीयत्वादेरेवेच्छास्वाभाविकधर्मस्य तदवच्छेदकत्वात् । तस्यैव विषयपरामर्शाधीनज्ञानत्वादेकविषयानेकेच्छायां तदसम्भवादिति भावः । तर्हि इच्छावत्संविदेव विषयपरामर्शाधीनपरामर्शा न तद्भेद इत्यत आह । संवित्त्विति । घटाद्युपहितसंविदः स्वप्रकाशाया एव धर्मिप्रतियोगित्वाद्विषयपरामर्शस्य तत्रोपयोगाभावात्तद्भेदज्ञान एवोपयोग इत्याह । तद्भेदस्त्विति । संविदैक्ये व्यतिरेक्यनुमानमप्याह । संविदिति । संवित्संवित्प्रतियोगिकभेदवत्त्वरहितेति साध्यार्थः । तथाच घटसंविदः पटसंवित्प्रतियोगिकभेदवत्त्वे ऽपि स्वप्रतियोगिकभेदाभावमात्रेण न सिद्धसाधनता । नापि बाधः । संविदः संविदन्यत्वस्यैवासंवित्त्वे प्रयोजकत्वात् । संविदः संविद्भेदवत्त्वे ऽसंवित्त्वमेव स्यादित्याह । लाघवेनेति । तर्हि घटत्वानधिकरणत्वे घटान्यत्वमेव प्रयोजकमिति द्वितीयो घटो न स्यादिति चेन्न। घटभेदस्य प्रामाणिकत्वेन तत्र लाघवानवतारादि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्याह । न चैवमिति । उक्तलाघवानङ्गीकारे शब्दाश्रयत्वराहित्ये प्रकाशान्यत्वमात्रं त्वदभिमतप्रयोजकं न स्यादित्याह । अन्यथेति ।

उक्तानुभवस्य गुणत्वेऽस्मात् स्वरूपतानुपपत्तेरगुणत्वमर्थसिद्धमपि मुखतो निरूपयितुमाह । स चानुभव इति ।

स चानुभवो न गुणः । कस्य चिद्गुणिनोऽनिरूपणात् । जानामीत्यहङ्काराश्रयत्वप्रतीतेश्च वृत्तिविषयत्वात् । स्यादेतत् । अनुभव उपलब्धिरिति पर्यायः । उपलब्धिश्च न वृत्तिरिति तवाभिमतम् । सा चाहङ्काराश्रयये नुऽभूयते अहमुपलभे ऽनुभवामीति प्रतीतेः । किञ्च संविद्गुणः अनित्यत्वे सत्येकेन्द्रियग्राह्यत्वात् । गुणश्च गुण्याश्रयः रूपवत् । गुणी च परिशेषादहङ्कार एव । अहङ्कारस्य संविदनाश्रयत्वे प्रतिसन्धातृत्वप्रवृत्त्याद्यनुपपत्तेः तदाश्रयवृत्तेरर्थाप्रकाशकत्वात् । अन्यानुभवादन्यस्य प्रतिसन्धाने प्रवृत्तौ वाऽतिप्रसङ्गात् । परिशेषाच्च संविद्गुणः । तथा हि न सा द्रव्यम् । तद्व्यवस्थापकगुणाभावात् । संख्यादिपञ्चकमस्तीति चेन्न । तत्र प्रमाणाभावात् । प्रत्यक्षद्रव्यस्य विशेषगुणवत्त्वव्याप्तेश्च ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नापि बुद्ध्यादिकं तद्गुणः । तस्याहमनुभवगोचरधर्मत्वात् । संविदस्त्वमते ऽपि निर्गुणत्वात् । क्रियात्वे चानित्यत्वादिप्रसङ्गात् । अनेकसमवायाभावेनासामान्यात्मत्वात् । प्रत्यक्षत्वेनाविशेषत्वादिति ॥

अहङ्कार एव ज्ञानगुणितया प्रतीयत इत्यत आह । जानामीति । वृत्तिव्यतिरिक्तानुभवस्याप्यहङ्काराश्रयत्वमनुभूयत इति चोदयति । स्यादेतदिति । अनुमानमपि संविदो ऽहङ्कारगुणत्वे प्रमाणमित्याह । किञ्चेति । आत्मनि घटे च व्यभिचारवारणाय हेतौ विशेषणद्वयम् । अत्र चैकेन्द्रियग्राह्यजातिमत्त्वस्य विवक्षितत्वान्न प्रमाविशेषे व्यभिचारः । स्मृतेरहङ्कारधर्मत्वानुपपत्तिरप्यहङ्कारस्याहङ्कारधर्मत्वे मानमित्याह । अहङ्कारस्येति । वृत्तेरहङ्कारधर्मत्वात्तत एव स्मृत्युपपत्तिरित्यत आह । तदाश्रयवृत्तेरिति । स्मृतिजनकसंस्कारस्यार्थप्रकाशाधीनत्वाद्वृत्तेश्चेच्छादिवज्जडतया संस्कारानाधायकत्वान्न तत एव स्मृत्युपपत्तिरित्यर्थः । तह्यहङ्काराश्रिता स्मृतिस्तदनाश्रितानुभवाद्भवत्वित्यत आह । अन्यानुभवादिति । किञ्च सिद्धान्ते ऽपि द्रव्याद्यनन्तर्भावादनुभवस्य गुणत्वं वक्तव्यमित्याह । परिशेषाच्चेति । विशेषगुणाभावे ऽपि सामान्यगुणवत्त्वं शङ्कते । संख्यादीति । रूपादाविव संख्यादिव्यवहारस्यान्यथापि सम्भवा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानुभवे तदस्तीत्याह। न तत्रेति। प्रत्यक्षस्यानुभवस्य द्रव्यत्वे विशेषगुणेनापि भवितव्यं स च नास्तीत्यभिप्रेत्याह। प्रत्यक्षेति। तर्हि वृत्तिज्ञानादिकमेव तद्विशेषगुण इत्यत आह। नापि बुद्ध्यादीति। गुणवत्त्वं सिद्धान्तविरुद्धमपीत्याह। संविद इति। कर्मण्यप्यनन्तर्भावमाह। क्रियात्वे चेति। परमते आत्मत्वेन तुल्यव्यक्तित्वात् सिद्धान्ते आश्रयभेदाभावाच्च न सामान्यमित्याह। अनेक समवायेति। आश्रयभेदाभावान्न समवायोऽपि। अनुभवस्य विशेषत्वं निराकरोति। प्रत्यक्षत्वेनेति। तस्मात्पारिशेष्यादनुभवो गुण इति इति शब्दार्थः॥

गुणत्वेऽपि बाधकं शङ्कते। नन्विति।

(गुणत्वे बाधकपरिहारौ) नन्वहङ्कारसंविदोः सम्बन्धः केन गृह्यताम्। न तावत्स्वेनैव, स्वस्य स्वाविषयत्वेन स्वसम्बन्धाविषयत्वात्। नाप्यन्येन। स्वप्रकाशसंविदो ज्ञानान्तरागोचरत्वादिति चेन्न। विशिष्टज्ञाने हि सम्बन्धिद्वयं सम्बन्धश्च प्रकाशत इति नियमो न तु विषयतया प्रकाशत इति। अन्यथा चैतन्यान्तःकरणतादात्म्यस्याप्यप्रकाशप्रसङ्गात्। ततश्चाहङ्कारस्तस्य संवित्सम्बन्धश्च संविद्विषयतया प्रकाशते। संविच्च स्वयमेव प्रकाशते। न चैवमेकज्ञानवति ज्ञानान्तरं न स्यात् एकरूपव-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वति रूपान्तरमिवेति वाच्यम् । शब्दवदविरोधात् । न चैवमपि ज्ञानद्वयस्य स्थितिरनुपपन्ना तन्नियमस्य जन्यज्ञानविषत्वादिति चेत् ।

यस्यानुभवस्याहङ्कारसम्बन्धो ग्राह्यः स एव तद्ग्राहक उतानुभवान्तरमिति किं शब्दार्थः । आद्यं दूषयति । न तावदिति । स्वसम्बन्धाविषयत्वादिति । स्वविशेषितसम्बन्धाविषयत्वादित्यर्थः । द्वितीये स्वप्रकाशत्वानुपपत्तिरित्याह । नापीति । आद्यं पक्षमादाय परिहरति । नेति । विशिष्टज्ञाने विशेषणादेर्विषयत्वेन भाननियमे बाधकमाह । अन्यथेति । तर्ह्यहमनुभवामीति विशिष्टज्ञाने न को ऽपि विषय इत्याशङ्क्य जडांशस्य विषयत्वमित्याह । ततश्चेति । संविदो ऽहङ्कारधर्मत्वे तत्र कादाचित्कज्ञानानुपपत्तिरित्याशङ्क्य विभुगुणत्वान्नेयमनुपपत्तिरिति शङ्कितं परिहरति । न चैवमिति । एकज्ञानवतीति । ज्ञानान्तरोत्पत्तावपि स्थितिरनुपपन्नेत्याशङ्क्याह । न चैवमपीति ॥

शङ्कितमनुभवगुणत्वं दूषयितुमुक्तमनुस्मारयति । निरूपितन्तावदिति ।

(अनुभवगुणत्वदूषणम् ।) उच्यते । निरूपितं तावत्सकलसंविदामेकत्वं नित्यत्वं च । तत्र यद्यभिन्ना देवदत्तयज्ञदत्तादिसंविदहमर्थेषु समवायेन तादात्म्येन वा वर्तेत

तदा गुणता स्यात् । नित्यत्वे सत्यनेकसमवायात् । न चैकस्मिन्नहमर्थ एव संविद्वर्तत इति वाच्यम् । जीवान्तरस्य व्यवहाराभावप्रसङ्गात् । अहङ्काराश्र-यज्ञानस्योत्पत्तिविनाशानुभवाच्च । नन्वहङ्कारे नित्यानित्यज्ञानाङ्गीकारान्नानुभवविरोध इति चेन्न । अहमर्थसमवेतनित्यानुभवे प्रमाणाभावात् । बाधकस्योक्तत्वाच्च । न च संविदो जातित्वमेवा-स्तु तथाप्यहमर्थातिरिक्तात्मा सिध्येदिति वाच्यम् । तस्या आत्मत्वेन तुल्यव्यक्तित्वात् । अहमर्था-तिरिक्तनित्याद्वितीयसंविदभ्युपगमे सैवाहमनुभ-वगोचराद्यधिष्ठानमस्तु जडाजडयोर्वास्तवतादा-त्म्यानुपपत्तेः । कल्पिततादात्म्यस्यान्यतरकल्प-नां विनाऽयोगात् । चैतन्यस्य कल्पितत्वे जडतया जगदान्ध्यप्रसङ्गात् । तस्याहङ्कारवृत्तित्वायोगात् । एतेन मा भूदहङ्कारतादात्म्यस्य तत्राहङ्कारारोपं विना ऽसम्भवात् ॥

नित्यस्यैकस्यानुभवस्य वहहमर्थधर्मत्वे सामान्य-लक्षणवत्त्वाद्गुणत्वक्षतिरित्याह । तत्र यदीति । ईश्वर-ज्ञानवदेकत्रैव वर्ततामित्याशङ्क्याह । न चैकस्मिन्निति । अहङ्का-नित्यानुभवस्याहङ्कारधर्मत्वमप्यनुपपन्नमित्याह । अहङ्का-

रेति । उत्पत्त्याद्यनुभवस्य वृत्तिविषयत्वाद्व्यतिरिक्तनित्यानुभवो ऽपि तत्र सम्भवतीति चोदयति । नन्वहङ्कार इति । अहमुपलभ इत्याद्यनुभवस्यानित्यज्ञानविषयत्वान्नित्यानुभवस्याहमर्थधर्मत्वे प्रमाणं नास्तीत्याह । अहमर्थेति । तस्याहमर्थधर्मत्वे ऽपि किं गुणत्वमुत जातित्वम् । नाद्यः गुणवैधर्म्यस्योक्तत्वादित्याह । बाधकस्येति । द्वितीयं दूषयति । न चेति । जातित्वे ऽपि बाधकसत्त्वादिति हेतुमाह । तस्या इति । किञ्च समवायस्य निरसिष्यमाणत्वादहमर्थसंविदोस्तादात्म्यमेव सम्बन्धः स्यात्, तथा च तयोर्वास्तवतादात्म्यानुपपत्तेः संविद्येवाहङ्कारो ऽध्यस्त इत्याह । अहमर्थातिरिक्तेति । तर्हि दूरस्थवनस्पत्योरिव स्वतन्त्रस्यैवाहङ्कारस्य तत्तादात्म्यं कल्प्यतामित्याशङ्क्याह । कल्पितेति । वनस्पत्योः पृथक् स्वातन्त्र्येणोपलम्भात्तादात्म्यमात्रं कल्पितमिह तूभयोः पृथक् सत्त्वे मानाभावादन्यतरकल्पनावश्यकीत्यर्थः । तर्हि संविदेवाहङ्कारे कल्पितास्त्वित्यत आह । चैतन्यस्येति । एतेनेति । स्पष्टार्थः ॥

अत्र चिरन्तनदासेनाहमर्थधर्मस्यैवानुभवस्य नित्यत्वमेकत्वं चाभ्युपेत्य प्रतिकर्मव्यवस्थाकारणमुपयोगश्च दर्शितस्तन्मतमनुवदति दूषयितुम् । यच्चात्रेति ।

(चिरन्तनमतखण्डनम् ।) यच्चात्र केनचिदुक्तं नित्यमेकमेवाहमर्थसमवेतं ज्ञानं वृद्धिह्रासाभ्यां विषयसंयोगविभा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गवत् सविषयमुत्पत्तिविनाशवच्चानुभूयते । अत एव जानामीत्यनुभवो ऽपि युज्यत इति तन्न । ज्ञानस्य गुणत्वे सङ्कोचविकाशयोरसम्भवात् । द्रव्यत्वे चानन्तपरिमाणस्य निरवयवत्वान्निष्क्रियत्वाच्च तदसम्भवादणुपरिमाणत्वे जगदान्ध्यप्रसङ्गाच्च । मध्यमपरिमाणत्वं चैके नित्यमित्यभ्युपगमव्याघातात् । कथं तर्ह्यहमुपलभ इति तस्याहङ्काराश्रयत्वानुभव इति चेन्न । स्वतन्त्रोपलब्धेरेव वृत्तिप्रतिबिम्बतया तदाश्रयात्वानुभवात् । यच्च गुणत्वसाधकानुमानं तदसिद्धमुपलब्धेर्नित्यत्वादनुव्यवसायस्य निरस्तत्वाच्च ॥

विकल्पासहत्वान्नैतदपि साध्वित्याह । तन्नेति । किं तन्मते ज्ञानस्य गुणत्वमुत द्रव्यत्वम् । आद्ये निरवयवत्वात्तस्य सङ्कोचादिर्न सम्भवतीत्याह । ज्ञानस्येति । द्वितीये ऽपि किमनन्तपरिमाणमुताणुपरिमाणं किं वा मध्यमपरिमाणम् । आद्ये निरवयवत्वाद्वृद्धिह्रासायोगः, निष्क्रियत्वाद्विषयसंयोगाद्ययोग इत्याह । द्रव्यत्व इति । द्वितीये सङ्कोचाद्ययोगस्तदवस्थः । दूषणान्तरमाह । अणुपरिमाणत्व इति । अहमर्थधर्मस्य तस्य विषयसम्बन्धाभावादित्यर्थः । तृतीयं दूषयति । मध्यमेति । अनुभवस्य स्वातन्त्र्ये कथं पारतन्त्र्यप्रत्यय इति । चोदयति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कथं तर्हीति । स्थलाश्रितजलप्रतिबिम्बितस्य चन्द्रस्य स्थलाश्रितत्वप्रतीतिवदहङ्कारधर्मवृत्तिप्रतिबिम्बितानुभवस्याहमर्थसम्बन्धितया प्रतीतिः स्वतन्त्रस्याप्युपपद्यत इत्याह । न स्वतन्त्रोपलब्धेरिति । अनित्यत्वे सत्येकेन्द्रियग्राह्यत्वादिति हेतुः सर्वथाप्यसिद्ध इत्याह । यच्चेति ।

प्रसङ्गागतानुव्यवसायनिराकरणे युक्त्यन्तरं समुच्चिनोत्यन्यदपि पराभिमतं दूषयितुम् । इतो ऽपीति ।

(युक्त्यन्तरेणानुव्यवसायनिरासः ।) इतो ऽपि ज्ञानं नानुव्यवसायगम्यम्।

ज्ञानभेदे हि मनःसंयोगः संयोगभेद एव प्रयोजकः धारावहनबुद्धौ तथा क्लृप्तत्वात् । ननु धारावहनबुद्धौ सामग्रीभेदाद्भेदस्तद्भेदश्च विशेषणज्ञानप्रागभावभेदात् । न च विशेषणज्ञानं विशिष्टज्ञाने न कारणमिति वाच्यम् । अनुमित्यादौ विशेषणज्ञानस्य हेतुत्वात् । विशिष्टज्ञानमात्रस्य लाघवात्तज्जन्यत्वावधारणात् । न च प्रागभावो न हेतुरिति वाच्यम् । तथा सति दण्डादौ सत्युत्पन्नस्य पुनरुत्पत्त्यापत्तेः सामग्र्याः कार्यजनकत्वनियमात् । न चैका सामग्र्येकमेव कार्यमुत्पादयतीति वाच्यम् । कार्याभावस्य कारणाभावप्रयोज्यत्वनियमात् । प्रागभावः कार्यम्भयातिवर्ती कथं हेतुरिति चेन्न । पूर्ववर्तित्वेन हेतुत्वात् । कार्यसम-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यवर्त्तित्वेन गौरवेणाकारणत्वादिति । उच्यते ।
विशिष्टज्ञाने न विशेषणज्ञानं हेतुः मानाभा-
वात् । अथ जन्यविशिष्टप्रत्यक्षं जन्यविशेषण-
ज्ञानजन्यं जन्यविशिष्टज्ञानत्वात् अनुमितिव-
दिति चेन्न । विशिष्टप्रत्यक्षस्य सर्वसम्प्रतिपन्न-
विशेष्यसन्निकर्षादिजन्यत्वेनाप्रयोजकत्वात् । न
च लाघवेनानुमित्यादौ विशिष्टज्ञानत्वेन विशे-
षणज्ञानजन्यत्वसिद्धेः प्रत्यक्षे ऽपि तथात्वमिति
वाच्यम् । अनुमित्यादेरपि व्याप्तिसंस्कारसहकृत-
लिङ्गज्ञानस्य जनकत्वेन विशेषणज्ञानस्याजनक-
त्वात् । न च व्याप्त्यनुभव एव संस्कारद्वारानुमितौ
हेतुरिति वाच्यम् । तस्यापि व्याप्तिज्ञानत्वेन कार-
णत्वात् । साध्याविषयत्वाच्च । अभावत्वप्रतियो-
गित्वविशिष्टज्ञाने व्यभिचाराच्च । तस्य सविक-
ल्पकैकवेद्यत्वात् । अनुमितिदृष्टान्तेन विशेष-
ज्ञानजन्यत्वस्याप्यनुमातुं शक्यत्वाच्च । अस्तु
तथा निर्विकल्पक उभयोरपि प्रतीतेरिति चेन्न ।
सविकल्पकैकवेद्याभावादेरप्रत्ययप्रसङ्गात् । तस्मा-
न्न विशेषणज्ञानं विशिष्टज्ञाने हेतुरिति न तद्भे-
दात् सामग्रीभेदः ॥

व्यवसायजनकमनःसन्निकर्षादन्य एव तत्सं-
योगो ऽनुव्यवसायजनको वक्तव्यः, तथा च तत्काले
व्यवसायाभावादनुव्यवसायो ऽनुपपन्न इति वक्तुं संयो-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गभेदस्यावश्यकतामाह । ज्ञानभेदे हीति । धारायामपि मनःसंयोगभेदो न ज्ञानभेदप्रयोजक इति चोदयति । नन्विति । सर्वत्र सामग्रीभेदस्यैव कार्यभेदप्रयोजकत्वादत्रापि स एव प्रयोजक इत्यर्थः । ननु धारायां मनःसंयोगभेदादेव सामग्रीभेद इति नेत्याह । तद्भेदश्चेति। उत्तरोत्तरज्ञानानामन्योन्यविशेषणज्ञानजन्यत्वात्तद्भेदात्सामग्रीभेदः स्वस्वप्रागभावभेदाद्वा इत्यर्थः । विशेषणज्ञानस्य कारणत्वमेवनास्ति कुतस्तद्भेदात्सामग्रीभेद इति चेन्न । अनुमित्यादौ व्याप्त्यादिज्ञानस्य विशेषणविषयस्य कारणत्वेन क्लृप्तत्वादित्यत आह । न च विशेषणेति । ननु तत्र परोक्षज्ञानत्वावच्छेदेन विशेषणज्ञानजन्यत्वावधारणान्न प्रत्यक्षधारायां तत्कारणमित्यत आह । विशिष्टेति । ननु प्रागभावस्य कुत्राप्यहेतुत्वात् ज्ञाने ऽपि न हेतुतेति नेत्याह । न चेति । प्रागभावस्याकारणत्वे घटोत्पत्तिसमये ऽपि तद्व्यतिरिक्तकारणवर्गस्य सत्त्वान्न तदनन्तरमपि उत्पत्तिः स्यात् सामग्र्याः स्वानन्तरक्षणे कार्यजनकत्वनियमादित्यर्थः । सामग्रीस्वाभाव्यान्न पुनरुत्पत्तिरिति शङ्कित्वा सामग्र्याः कारणात्मकत्वात्कारणानां च क्रमिकानेककार्यकरत्वदर्शनादुक्तस्वभावाभावात्कारणाभावादेव कार्योत्पत्त्यभावो वक्तव्य इत्याह । न चैकेति । ननु प्रागभावस्य तद्व्यापारस्य वा कार्यसमये ऽभावान्न तस्य हेतुतेति चोदयति । प्रागभाव इति । कार्यसमयावर्त्तिनो ऽपि कारणलक्षणाक्रान्तत्वाद्धेतुतेत्याह । न पूर्वेति । तत्र तावद्विशेषणाभानाभावो ऽसिद्ध इति चोदयति । अथेति । पक्षहेत्वोर्जन्यपदमीश्वरज्ञाने बाधव्यभिचारवारणाय साध्ये च

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तज्जन्यत्वेनार्थान्तरतावारणाय । विशिष्टज्ञानस्य तेन विनाप्युपपत्तेरप्रयोजको हेतुरित्याह । न विशिष्टेति । विशिष्टप्रत्यक्षस्य विशेषणज्ञानजन्यत्वाभावे लाघवानुगृहीतविशेषणज्ञानकारणताग्राहकमानभङ्ग इत्याशङ्क्य तदेवासिद्धमित्याह । न चेति । अनुमित्यादेरिति कर्मणिषष्ठी । व्याप्तिग्रहणजनितोद्बुद्धसंस्कारसहकृतलिङ्गदर्शनादेवानुमितिसम्भवे मध्ये व्याप्तिस्मृतिर्न कल्पनीयेत्यर्थः । ननु संस्कारस्य द्वारत्वाद्व्याप्तिग्रहो ऽनुमितिहेतुः स्यात्, तथा च तदेव विशेषणज्ञानमिति मदिष्टसिद्धिरिति चेन्न । व्याप्तिग्रहस्य हेतुत्वे ऽपि न विशेषणज्ञानत्वेन हेतुता । अगृहीतव्याप्तिकस्य प्रकारान्तरेण विशेषणमवगच्छतः सत्यपि लिङ्गदर्शने ऽनुमित्यनुदयात् । किन्तु व्याप्तिज्ञानत्वेनानुमितिं प्रत्येव हेतुता, तथा च न तवेष्टसिद्धिरित्याह । न च व्याप्त्यनुभव इत्यादिना । किञ्च सामान्यप्रत्यासत्तेर्निरसिष्यमाणत्वात्कतिपयव्यक्तिविषयव्याप्तिग्रहस्य पर्वतविशेषणवह्निविषयत्वमेव नास्तीत्याह । साध्येति । परैरपि सप्रतियोगिकाभावत्वादिविषयनिर्विकल्पकानङ्गीकारात्तद्विशिष्टज्ञानेषु हेतोर्व्यभिचार इत्याह । अभावत्वेति । किञ्च जन्यविशिष्टज्ञानं जन्यविशेष्यज्ञानजन्यं विशिष्टज्ञानत्वात् पक्षज्ञानजन्यानुमितिवदित्यपि प्रसज्येतेत्याह । अनुमितीति । प्रत्यक्षविशिष्टज्ञानस्य विशेष्यज्ञानजन्यत्वमपीष्टमिति चोदयति । अस्त्विति । निर्विकल्पकाविषये ऽपि विशिष्टप्रत्यक्षदर्शनान्न तस्य हेतुतेत्याह । न सविकल्पकेति । विशेषणज्ञानस्य कारणत्वाभावान्न तस्य भेदात्सामग्रीभेद इत्युपसंहरति । तस्मादिति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एवं प्रागभावस्याकारणत्वान्न तद्भेदादपि सामग्रीभेद इत्याह । नापीति ।

(प्रागभावभेदादपि न सामग्रीभेदः ।) नापि प्रागभावभेदात् । प्रागभावस्य प्रतियोग्यजनकत्वात् । न चैवमुत्पन्नस्य घटस्य पुनरुत्पत्त्यापत्तिः तद्धेतोर्दण्डादेः सत्त्वादिति वाच्यम् । प्रागभाववादिनो ऽपि कस्य चित्तदापत्तेः । उत्पन्नघटस्य च पुनरुत्पत्त्यापादनमसङ्गतम् । दण्डादेरुत्पन्नघटाहेतुत्वात् । तैर्विनाप्युत्पन्नघटस्याग्रिमक्षणसत्त्वात्तेन रूपेणातज्जन्यत्वात् । न च तत्सामग्र्युत्तरक्षणस्य तदुत्पत्तिकालत्वनियमात् घटोत्पत्त्यनन्तरकालीनो ऽपि घट उत्पद्येतेति वाच्यम् । उत्पन्नस्यैव प्रतिबन्धकत्वात् । न चैवं प्रागभावस्य कारणत्वप्रसङ्गः । सामग्रीकालीनकार्यानुत्पादप्रयोजकत्वं हि प्रतिबन्धकत्वं, ततो न तदभावः कारणं, अन्यथानुत्पादस्य सामग्रीकालीनत्वायोगात् । न चैवमन्वयव्यतिरेकविरोधः । तयोस्तद्गताऽनुकूलतामात्रविषयत्वात् ॥

प्रागभावस्याकारणत्वे प्रतियोग्युत्पत्तिसमये सामग्रीसत्त्वेनोत्पन्नस्य पुनरुत्पत्तिर्नापादनीया । तत्कारणत्वपक्षे ऽपि प्रतियोगिनः प्रागभावनिवर्तकत्ववादिनां मते प्रतियोग्युत्पत्तिकाले प्रागभावस्यापि सत्त्वात्पुनरुत्पत्तिप्रसङ्गस्य तन्मते ऽपि समत्वादित्याह । न चैवमुत्पन्नस्येति । प्रतियोग्येव प्रागभावनिवृत्तिरिति मते प्रिथक्-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देरुत्पन्नघटं प्रति पूर्वक्षणसत्त्वनियमाभावात्कारणत्वमेव नास्ति, तथा चाकारणात्कार्यापादनमसङ्गतमित्याह। उत्पन्नेति । ननु सामग्र्यनन्तरक्षणे कार्योत्पत्तिनियमादुत्पन्नरूपेण कार्यत्वे ऽपि घटस्वरूपकार्यस्य पुनरुत्पत्तिः स्यादिति चेन्न । उत्पन्नघटेन प्रतिबद्धत्वादित्याह । न च तत्सामग्रीति । तर्हि प्रागभावस्य प्रतिबन्धकाभावतया कारणत्वसिद्धिरित्यत आह । न चैवमिति । उत्तेजकाभावविशिष्टस्य हि प्रतिबन्धकस्याभावः कार्योपयोगी प्रागभावश्च न तद्विशिष्टप्रतियोगिक इति न तस्य प्रतिबन्धकाभावतयापि कारणत्वमिति स्पष्टदोषे सत्येव वस्तुवृत्तं प्रदर्शयन् प्रतिबन्धकलक्षणपरिक्षये ऽपि तद्भावस्याकारणत्वमिति वक्तुं व्यवहारानुपमबाधितं लक्षणमाह । सामग्रीकालीनेति । सामग्रीकालीनो यः कार्यानुत्पादः तत्प्रयोजकत्वव्याप्यत्वं प्रतिबन्धकलक्षणम् । इदं च प्रतिबन्धकाभावस्य कारणत्वे ऽनुपपन्नं तद्घटितसामग्र्यां सत्यां कार्यानुत्पादायोगेन तत्प्रयोजकत्वस्याप्युपपत्तेरित्याह । अन्यथेति । प्रतिबन्धकाभावस्याकारणत्वे तस्य कार्ये ऽन्वयव्यतिरेकावगतिविरोध इत्यत आह । न चैवमिति ॥

अनुकूलत्वं नाम कारणमिति न विवाद इत्यत आह । अनुकूलत्वं चेति ।

अनुकूलत्वं च कारणत्वादन्यदेव । अवच्छेदकस्यापि तत्सत्त्वात् । उक्तबाधकेन कारणत्वानुपपत्तेः । न च कारणीभूताभावप्रतियोगित्वं प्रतिबन्धकत्वम् । प्रतिबन्धकाभावत्वेन

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तदभावस्य कारणत्वे ऽन्योन्याश्रयात् । न च मण्यादिविशेषाभावकूटत्वेन कारणत्वम् । उत्तेजकाभावविशिष्टमण्याद्यभावकूटत्वेन हि कारणत्वं केवलमण्याद्यभावस्य व्यभिचारात् ॥

अन्वयव्यतिरेकाभ्यां तस्य कारणत्वमेव किं न स्यादित्याशङ्क्य तथात्वे प्रतिबन्धकलक्षणानुपपत्तिरित्याह । उक्तेति । अस्तु तर्ह्यभावकारणतानुकूलमेव प्रतिबन्धकलक्षणमित्यत आह । न चेति । तत्र किं मणिमन्त्रौषधाद्यभावस्य प्रतिबन्धकाभावत्वेन कारणताग्रह उत मण्याद्यभावसमुदायत्वेन । नाद्यः । प्रतियोगिनः प्रतिबन्धकत्वसिद्धौ तदभावत्वेनाभावकारणताग्रहः तद्ग्रहे च कारणीभूताभावप्रतियोगितया मण्यादेः प्रतिबन्धकत्वग्रह इति परस्पराश्रयादित्याह । प्रतिबन्धकाभावत्वेनेति । द्वितीयमपवदति । न चेति । उत्तेजकस्थले मण्याद्यभावकूटाभावे ऽपि दाहकार्यदर्शनान्न तेन रूपेण कारणता किन्तु उत्तेजकाभावविशिष्टमण्यादेरभावत्वेन, तथा चोत्तेजकस्थले ऽपि विशेषणाभावप्रयुक्तविशिष्टाभावसत्त्वान्न व्यभिचार इति पूर्ववादिनं शिक्षयति । उत्तेजकेति ॥

अस्त्वेवमेवेति चेन्न । प्रतिबन्धकाभावकारणवादिनोत्तेजकस्यैव दुर्निरूपत्वादित्याह । तत्र चेति ।

(उत्तेजकत्वलक्षणखण्डनम् ।) तत्र चोत्तेजकत्वं न कार्यानुकूलत्वम् । दाह्यसंयोगादेरपि तथात्वात् । व्यभिचारिणस्तस्य मण्याद्यभावकारणताग्रहं विना ऽनुकूलत्वस्याश-

क्यग्रहत्वाच्च । नापि शक्त्यनुकूलत्वम् । त्वन्मते तद भावात् । तस्यास्तदजन्यत्वाच्च । किन्तु सामग्र्यां सत्यां कार्यानुत्पादप्रयोजकाभावप्रतियोगित्वं यदभावविशिष्टत्वेन प्रतिबन्धकत्वं तत्प्रतियोगित्वं वा । आद्ये प्रतिबन्धकाभावस्याकारणत्वम् । सामग्रीपदानुपादाने च सहकारिमात्रसाधारण्यम् । द्वितीये ।

कारणत्वग्रहे जाते प्रतिबन्धकता ग्रहः ।
तत उत्तेजकत्वधीस्ततः कारणता ग्रहः ॥
इत्येवं चक्रकापातो वज्रलेपायते तव ॥

तथात्वादिति । तथा च प्रतिबन्धके सत्यपि कार्यं स्यादित्यर्थः । उत्तेजकाभावविशिष्टस्यैव प्रतिबन्धकत्वात्प्रतिबन्धके सति कार्यानुकूलत्वमुत्तेजकत्वमिति लक्षणमसम्भवीति भावः । दूषणान्तरमाह । व्यभिचारिणा इति । उत्तेजकानामनन्तत्वेनानुगतरूपाभावात्प्रत्येकं चानुकूलत्वस्य व्यभिचारेणाशक्यग्रहत्वादनुकूलता ग्राह्या, तथा च प्रतिबन्धकत्वग्रहे उत्तेजकत्वग्रहस्तद्ग्रहे च तदभावविशिष्टमण्याद्यभावकारणताग्रहपुरःसरं प्रतिबन्धकत्वग्रह इति परस्पराश्रयाच्चेत्यर्थः । उत्तेजकलक्षणान्तरं दूषयति । नापीति । प्रतिबन्धकाभावकारणत्वमते शक्तेरेवाभावादित्याह । त्वन्मत इति । शक्तिवादिमते ऽपि वह्न्यादिशक्तेस्तत्सहभावित्वान्नोत्तेजकस्य तदनुकूलत्वमित्याह । तस्या इति । एतेन कार्याभावव्याप्याभावप्रतियोगित्वमित्याद्युत्तेजकलक्षणं प्रत्युक्तम् । कार्य-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मात्रविवक्षायां व्यभिचारात्प्रतिबद्धकार्यविवक्षायां परस्पराश्रयादिदोषप्रसङ्गादिति द्रष्टव्यम् । ननु सिद्धान्ते उत्तेजकाभावविशिष्टमण्यादिरूपेण सामग्रीकालीनकार्यानुत्पादप्रयोजकत्वं वाच्यम् । तथाच तव मते यदुत्तेजकं तदेव ममापीत्याशङ्क्य स्वाभिमतलक्षणं दर्शयति परस्यानिष्टं दर्शयितुम् । किन्तु सामग्र्यामिति । सामग्र्यनन्तरकालीनो यः कार्यानुत्पादः तद्व्यतिरेकव्याप्यव्यतिरेकप्रतियोगी यो ऽभावः तत्प्रतियोगित्वमुत्तेजकत्वमित्यर्थः । तादृशव्यतिरेकप्रतियोगित्वमुत्तेजकाभावानां तत्तदभावत्वेनेति नानुगतरूपापेक्षा । न चैकोत्तेजकसंयोगे ऽपि प्रतिबन्धकान्तरे सति कार्यादर्शनान्न कार्यव्याप्याभावप्रतियोगित्वं तदुत्तेजकाभावस्येति तत्प्रतियोगिनस्तस्योत्तेजकत्वं तत्र न स्यादिति वाच्यम् । क्वचित्कदाचित्किञ्चिदुत्तेजकमित्यङ्गीकारेण तादृशस्थले तस्योत्तेजकत्वाभावस्येष्टत्वात् । अत्र चाभावपदेनोक्तकार्यानुत्पादप्रयोजकप्रतिबन्धकप्रतियोगिभूततदभावे ऽतिव्याप्तिर्निरस्ता । लक्षणान्तरमाह । यदभावेति । मण्यादेः कार्यानुत्पादकता यदभावविशिष्टप्रयुक्ता तदभावप्रतियोगित्वमुत्तेजकत्वमित्यर्थः । प्रथमलक्षणाङ्गीकारे प्रतिबन्धकाभावकारणताहानिः तत्कारणत्वे कार्यानुत्पादस्य सामग्र्यनन्तरकालीनत्वानुपपत्तिरित्याह । आद्य इति । तर्हि सत्यां सामग्र्यामिति विशेषणं त्यज्यत इत्याशङ्क्य तदभावे कारणमात्रे ऽतिव्याप्तिरित्याह । सामग्रीति । द्वितीयलक्षणाङ्गीकारे तवाभावकारणताग्रहे कारणीभूताभावप्रतियोगितया मण्यादेः प्रतिबन्धकत्वग्रहः तद्ग्रहे च तद्विशेषणीभूताभावप्रतियोगितयोत्तेजकत्वग्रह-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परस्पराश्रयादिदोषप्रसङ्गात्पराभिमतमुत्तेजकलक्षणान्तरमपि निरस्तमित्याह । एतेनेति ।

(उत्तेजकलक्षणान्तरखण्डनम् ।) एतेन कारणीभूताभावप्रयोजकविशेषणाभावत्वमित्याद्यपि प्रत्युक्तम् । विशेषणविशेष्यत्वस्यानियतत्वाच्च । न चोत्तेजकत्वेनाभिमता ये विशेषास्तदभावविशिष्टमण्याद्यभावकूटत्वेन कारणत्वम् । तेषां प्रत्येकव्यभिचारेणाकारणत्वात् ॥

कारणीभूताभावस्य प्रयोजकं निरूपकं प्रतियोगीति
यावत् । तत्र यद्विशेषणं तदभावत्वमुत्तेजकत्वमित्यर्थः ।
आदिपदेन कारणान्यत्वे सति कार्याभावप्रयोजकाभाव-
प्रतियोगित्वं कारणाभावातिरिक्तकार्याभावप्रयोजकाभा-
वप्रतियोगित्वं प्रतिबन्धकाभावेतरसकलसाधनसमवधाने
कार्याभावप्रयोजकाभावप्रतियोगित्वमुत्तेजकत्वमित्यादि-
लक्षणं सूचितम् । तत्र प्रथमलक्षणे किं यत्किञ्चित्कारणा-
न्यत्वं विवक्षितमुत निखिलकारणान्यत्वम् । आद्ये वह्निर-
प्युत्तेजकः स्यात् । द्वितीये प्रतिबन्धकाभावकारणताग्रहा-
त्पूर्वं निखिलकारणान्यत्वस्य गृहीतुमशक्यतया परस्परा-
श्रयात् । अत एव न द्वितीयं लक्षणम् । प्रतिबन्धकारण-
त्वग्रहं विना निखिलकारणाभावान्यत्वस्योत्तेजकाभावे
ग्रहीतुमशक्यत्वात् । किञ्च विशिष्टप्रतियोगिकस्य मण्या-
द्यभावलक्षणस्याभावो विशिष्टयोग्येव विशिष्टं च तन्मते
विशेषणविशेष्यतत्संबन्ध एवेति विशेषणीभूतस्योत्तेजका-
भावस्यापि कारणाभावात्मत्वान्न तदतिरिक्तम् । तथाच

लक्षणाभावः । तृतीयलक्षणे चक्रकापत्तिर्दुर्निवारेति द्रष्टव्यम् । किञ्च विशेषणविशेष्यभावस्यानियतत्वान्मण्यादेरप्युत्तेजकाभावं प्रति विशेषणत्वसम्भवात्तदभावो ऽप्युत्तेजकः स्यादित्यभिप्रेत्याह । विशेषणेति । ननु यस्य मण्यादेर्यावन्त उत्तेजकत्वेनाभिमता विशेषाः सन्ति तावदभावान्यान्यविशिष्टतदभावत्वेन कारणता गृह्यते तथाच नान्योन्याश्रयादिरित्यत आह । न चोत्तेजकेति । उत्तेजकाभावेष्वन्यान्यत्वस्यानुगतस्यैकस्याभावाद्भावे भावान्तरानभ्युपगमात्तत्तात्स्वरूपमेव तदन्यान्यत्वम् । तथाच तत्तदभावविशिष्टमण्याद्यभावस्य व्यभिचारेण कारणताग्रहायोग इत्याह । तेषामिति । किञ्चैकैकस्यापि मण्यादेरुत्तेजकानामनन्तत्वेन दुर्ग्रहत्वात्तत्तदभावान्यान्यत्वमपि दुर्ग्रहमेव । ननु यावदुपस्थितोत्तेजकाभावाभान्यान्यत्वमनुगतं सुग्रहमिति चेन्न । उपस्थितोत्तेजकाभाववत्तया निश्चितस्थले ऽप्यन्योत्तेजकसमवधाने कार्यदर्शनादेकोत्तेजकसमवधाने ऽपि प्रतिबन्धकान्तरे सति कार्यादर्शनाच्च व्यभिचारशङ्कया दुष्परिहरत्वेनोक्तरूपाभावविशिष्टमण्याद्यभावकारणताया दुर्ग्रहत्वात् । नन्वेकप्रतिबन्धस्थल एकोत्तेजकः भावाभावाभ्यां कार्यसत्त्वासत्त्वदर्शनात्तदभावविशिष्टमण्याद्यभावः कारणमिति गृह्यते पुनरुत्तेजकान्तरेण कार्यस्थले पूर्वगृहीतरूपेण व्यभिचारे ऽपि गृहीतकारणत्वापरित्यागेन तदुभयाभावान्यान्यत्वविशिष्टाभावत्वेन तदपि संगृह्यते । एवमन्योत्तेजके सति तदभावोऽपि संगृह्यत इति न कश्चिद्दोष इति चेन्न । अनेकोत्तेजकाभावे ऽनुगतरूपाभावेन कार्य्ये च तत्तदुत्तेजकमयोऽन्ये ऽपि विशेषाभावेन च स्फुटव्यभिचारेण

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चोक्तसङ्ग्रहायोगात् । इतरथा रासभमहिषादियावद्दृष्टपदार्थान्यान्यत्वेन तेषामपि घटकारणताप्रसङ्गात् । विस्तरस्तु सुन्दरराजीये द्रष्टव्यः ।

उत्तेजकत्वग्रहं विनापि प्रकारान्तरेण मण्याद्यभावकारणताग्रहं दूषयति । न च कार्येति ।

(मण्याद्यभावस्य प्रकारान्तरेणाकारणत्वम्) ।

न च कार्यानुत्पादप्रयोजकाभावत्वेन प्रतिबन्धकाभावस्य कारणत्वमतो नान्योन्याश्रय इति वाच्यम् । उत्तेजकस्यापि कारणत्वप्रसङ्गात् । तस्य कार्यानुत्पादप्रयोजकत्वस्य दुर्ग्रहत्वाच् । तेन रूपेणान्यथासिद्धत्वाच्च । प्रतियोगिनः कार्यविरोधित्वे ज्ञात एव यदभावस्यान्वयव्यतिरेकग्रहस्तस्य विरोध्यभावत्वेनान्यथासिद्धिः । न चैतदन्यथासिद्धिलक्षणमेव न भवतीति वाच्यम् । दण्डत्वादिसङ्ग्राहकत्वेन त्वदुक्तान्यथासिद्धिलक्षणस्याप्यभावप्रसङ्गात् ।

उत्तेजकस्यापि कार्यानुत्पादप्रयोजकस्वाभावाभावत्वेन कारणत्वापातादिति हेतुमाह । उत्तेजकस्यापीति । मण्यादिष्वनुगतधर्माभावेन कार्यानुत्पादप्रयोजकत्वमेव दुर्ग्रहमित्याह । तस्येति । किञ्च कार्यानुत्पत्तिप्रयोजकत्वं तद्व्याप्यत्वमुत तद्व्यापकत्वम् । आद्येऽपि किं मण्यादेः स्वरूपेण व्याप्यत्वमुतोत्तेजकाभावविशिष्टत्वेन । नाद्यः । मणौ सत्यपि सत्युत्तेजके कार्यानुत्पत्त्यदर्शनात् । न द्वितीयः । अभावकारणताग्रहात्पूर्वमुत्तेजकत्वस्यैव दुर्ग्रहत्वात् । नापि प्रथमद्वितीयः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कारणाभावप्रयुक्तकार्यानुत्पाददशायां प्रतिबन्धकाभावेन व्यापकत्वायोगादिति भावः । ननु सिद्धान्ते ऽपि सामग्रीकालीनकार्यानुत्पादप्रयोजकत्वमननुगतमण्यादेः कथं गृह्यत इति चेन्न । अत्र ह्युत्तेजकाभावविशिष्टमण्यादेः कार्याभावप्रयोजकत्वं नाम तद्व्याप्यत्वम् । तच्चोत्तेजकाभावविशिष्टाननुगतमणित्वाद्यवच्छेदेनगृह्यते वह्निव्याप्यत्वमिवानेकधूमत्वाद्यवच्छेदेन । उत्तेजकत्वं च सामग्रीकालीनकार्याभावव्याप्याभावप्रतियोगित्वमनुगतमेव । अत्र चोत्तेजकाभावस्य तद्व्याप्यत्वमननुगतेनैव मण्याद्येकैकोपहिततत्तादभावत्वेनावच्छिद्यत इति न कश्चिद्दोष इत्यलमतिविस्तरेण । प्रतिबन्धकाभावस्याकारणत्वे ऽनन्यथासिद्धान्वयव्यतिरेकविरोध इत्याशङ्क्यानन्यथासिद्धत्वमसिद्धमित्याह । तेनेति । सामग्रीकालीनकार्यानुत्पादप्रयोजकाभावत्वेनेत्यर्थः । अन्यथासिद्धलक्षणानाक्रान्तत्वात्कथमेतस्यान्यथासिद्धत्वमित्याशङ्क्य तल्लक्षणमप्यस्तीत्याह । प्रतियोगिन इति । ननु यद्गर्भयैव यस्यान्वयव्यतिरेकावन्यं प्रति पूर्ववर्त्तित्वे ज्ञात एवेत्यादिकमेव तल्लक्षणमित्यत आह । न चैतदिति । किमव्याप्तत्वादिदमलक्षणमुत वाद्यसम्मतत्वात् । नोभयथापि । त्वदुक्तलक्षणानामप्यव्याप्तत्वान्ममासम्मतत्वाच्चालक्षणत्वप्रसङ्गादित्यभिप्रेत्याह । दण्डत्वादीति । दण्डत्वाद्येकैकसङ्ग्राहकत्वेनेत्यर्थः ।

ननु अन्यथासिद्धसामान्यलक्षणाक्रान्तेषु विशेषलक्षणानामव्याप्तिर्न दोषायेति शङ्कते । ननु यस्येति ।

(विशेषलक्षणाव्याप्तेरदूषकत्वपरिहारः ।) ननु यस्य कार्यसम्बन्धित्वं कार-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

णत्वमृतेऽपि निर्वहति सोऽन्यथासिद्ध एव भवति । दण्डत्वादेश्च तत्सम्बन्धित्वमन्यथापि भवतीति तत्सङ्ग्राहकं तल्लक्षणमिति चेत् । तर्हि विरोध्य-भावत्वेन प्रतिबन्धकाभावस्य कार्यसम्बन्ध आव-श्यक इति न कारणत्वं हि सहस्रमपि कारणानि विरोधिनि सति कार्यमुत्पादयितुमीशते । न चैवं दण्डादेरप्यन्यथासिद्धिप्रसङ्गस्तदभावस्य का-र्यविरोधित्वमज्ञात्वैव प्रतिबन्धकाभावत्वेन का-रणत्वमिति निरस्तम् । दण्डाभावादौ प्रतिबन्ध-कलक्षणस्यातिव्याप्तेश्च । न च सोऽपि प्रतिब-न्धक एव । तथा व्यवहाराभावात् । न हि चक्रा-द्यसमवहितायां मृदि प्रतिबन्धात् घटं न जनय-न्तीति व्यवहरन्ति । लक्षणस्य व्यवहारातिपाते जलस्योष्णस्पर्शो लक्षणं किन्न स्यात् । मृदादेरपि प्रतिबन्धकाभावतया कारणत्वप्रसङ्गेन कार्यविशे-षस्याकस्मिकत्वप्रसङ्गात् । मृत्त्वादिनापि कार-णत्वे प्रतिबन्धकाभावत्वेन कारणत्वे प्रमाणाभा-वात् । न च कार्यानुत्पादप्रयोजकाभावत्वं प्रति-बन्धकत्वम् । उत्तेजकाभावे तदभावात् । विनि-गमकाभावेन तस्यापि प्रतिबन्धकत्वात् । तस्मा त्प्रतिबन्धकाभावो न कारणम् ॥

कार्यसम्बन्धित्वं तन्नियतपूर्वक्षणवर्तित्वं तर्हि-

प्रतिबन्धकाभावस्यापि त्वदुक्तसामान्यलक्षणाक्रान्तत्वात्तत्सङ्ग्राहकमपि लक्षणं युक्तमेवेत्याह । तर्हि विरोधीति । सामग्रीकालीनकार्याभावप्रयोजकाभावत्वेनेत्यर्थः । आवश्यकत्वमेव दर्शयति । न हीति । तर्हि दण्डादेरपि कार्यविरोधिस्वाभावाभावत्वेनान्यथासिद्धिः स्यादिति चेन्न । दण्डाभावस्य सामग्रीकालीनकार्यविरोधित्वे ऽपि तद्ग्रहं विना तर्कावतारे ऽन्वयसहकारदर्शनेनापि दण्डादेः कारणत्वग्रहसम्भवादित्यभिप्रेत्याह । न चैवं दण्डादेरिति । ननु प्रतिबन्धकाभावसङ्ग्राहकत्वेन लक्षणान्तरोक्तौ दण्डादिसङ्ग्राहकत्वेनापि यस्य कार्यात्पूर्वकाले येन सम्बन्धस्तत्तेनान्यथासिद्धमित्यादिलक्षणान्तरस्यापि वक्तुमशक्यत्वात्तदप्यन्यथासिद्धं किन्न स्यादित्याशङ्क्याह । कार्यानुत्पादेति । परमते कार्यानुत्पादप्रयोजकत्वस्य निर्वक्तुमशक्यत्वाद्दुर्ग्रहत्वाच्च लक्षणान्तरमप्यनुपपन्नमित्याह । एतेनेति । अस्मन्मत इव तत्प्रयोजकत्वं तद्व्याप्यत्वं चेदतिव्याप्तिरित्याह । दण्डाभावादाविति । तस्यापि प्रतिबन्धकत्वमिष्टमिति तटस्थशङ्कां निराकरोति । न च सो ऽपीति । व्यवहाराभावे ऽपि तल्लक्षणलक्षितत्वात्तथा किन्न स्यादित्याशङ्क्य व्यवहारातिपातिलक्षणमेव न सम्भवतीत्यभिप्रेत्याह । लक्षणस्येति । किञ्च कारणाभावस्यापि प्रतिबन्धकत्वे मृद्दण्डादेः किं प्रतिबन्धकाभावतयैव कारणतोत मृत्त्वादिरूपेणापि । आद्ये तन्त्वादेरपि प्रतिबन्धकाभावतयैव कारणत्वप्रसङ्गेन कारणवैजात्यस्याप्रयोजकत्वेन घटपटवैजात्यानुपपत्तिरित्याह । मृदादेरपीति । द्वितीये मृत्त्वादिनैव कारणत्वे ऽपि तदन्वयव्यतिरेकयो-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्पपत्तेरूपान्तरेण कारणत्वे प्रमाणं नास्तीत्याह । मृत्त्वा-
दिनापीति । कारणाभावे ऽतिव्याप्तिपरिहाराय विशेष-
लक्षणान्तरमाशङ्क्याव्याप्त्या दूषयति । न च कार्यानु-
त्पादेति । विशेषणविशेष्यभावस्यानियतत्वेन मण्यादि-
विशिष्टोत्तेजकाभावस्यापि प्रतिबन्धकत्वात्तत्राव्याप्ति-
रेवेत्याह । विनिगमकेति । ननु मण्यादिकालीनकार्यानु-
त्पादप्रयोजकाभावप्रतियोगित्वमुत्तेजकत्वम् । उत्तेजका-
भावविशिष्टमण्याद्यभावत्वेन कारणत्वं कारणीभूता-
भावप्रतियोगित्वेन प्रतिबन्धकत्वमिति नोक्तदोष इति
चेन्न । मण्यादिकालीनकारणाभावस्यापि तत्कालीनका-
र्याभावप्रयोजकतया कारणस्याप्युत्तेजकतापत्तेः । न च
मण्यादिकालीनत्वेन विशेषितकार्यानुत्पादे कारणाभावः
प्रयोजको न भवतीति वाच्यम् । किं तत्त्वेन विशेषितत-
त्प्रयोजकत्वं तद्व्याप्यत्वमुत तद्व्यापकत्वम् । न द्वितीयः ।
मण्युत्तेजकयोःसतोरपि कारणाभावेन तादृशकार्यानुत्पा-
दे सत्यप्युत्तेजकाभावाभावात् । न प्रथमः । मण्याद्यभाव-
काले उत्तेजकाभावे सत्यपि मण्यादिकालीनकार्यानुत्प-
त्त्यदर्शनात् । न च तत्तन्मण्यादिसहितत्वेनोत्तेजकाभा-
वस्य व्याप्यत्वमिति वाच्यम् । एकोत्तेजकाभावस्य
मण्यादिसकलसहितत्वानुपपत्तेः । न च तत्तन्मण्या-
दिसहिततत्तदुत्तेजकाभावत्वेन व्याप्यत्वमिति वाच्यम् ।
तथासति कार्यानुत्पादस्यापि तत्तन्मण्यादिकालीनत्वे
व्यापकतावच्छेदकनानात्वेन व्याप्यतानाना-
नात्वात्तत्प्रतियोगित्वरूपोत्तेजकत्वनानात्वापत्त्या तद-
भावविशिष्टमण्याद्यभावत्वस्यापि नानात्वेनानुगतरूपाभा-
वाद्व्यभिचारिणां तेषां कारणताग्रहायोगात् । कारणता-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हि व्यापकताविशेषः स चाननुगतेन नावच्छिद्यते । इतरथा रासभत्वादीनामपि तदवच्छेदकत्वप्रसङ्गात् । तस्मात्प्रतिबन्धकाभावस्य कारणत्वमनुपपत्त्योपसंहरति । तस्मादिति । तथा च घटप्रागभावो न प्रतिबन्धकाभावो न वा प्रतिबन्धकाभावत्वेन कारणमिति भावः ॥

किञ्च प्रागभावस्याकारणत्वेन प्रतियोगिन उत्पत्तिसमये सामग्रीसत्वे ऽपि पुनरपि कार्योत्पत्त्यापादनमयुक्तम् । सामग्र्या हि स्वानन्तरक्षणे कार्यसम्बन्धेन व्याप्तिः न तु तदा तस्याद्यक्षणसम्बन्धलक्षणोत्पत्त्यापि गौरवात् । तया विनाऽनुपपत्त्यभावाच्चेत्याह । किञ्चेति ।

(सामग्र्याकार्येण सह-व्याप्तिर्व्युत्पादनम् ।) किञ्च सामग्र्याः स्वानन्तरक्षणे कार्यसम्बन्धेन व्याप्तिः न तु तदुत्पत्त्याद्यक्षणसम्बन्धेन । अप्रयोजकत्वात् गौरवाच्च । न च सामग्रीकार्योत्पत्तौ प्रयोजिका, अन्यथोत्पत्तेराकस्मिकत्वप्रसङ्गादिति वाच्यम् । उत्पत्तिर्ह्याद्यसमयसम्बन्धः । न च सामग्रीसमयस्याद्यत्वे ऽपि प्रयोजिका, कार्यानाधारक्षणाव्यवहितोत्तरक्षणस्य सामग्र्यप्रयोज्यत्वात् । किन्तु कार्यस्योत्तरक्षणसत्त्वे स चेदादिस्तदोत्पत्तिरिति व्यवह्रियते । किञ्च पूर्वक्षणः कारणं तद्विरहाद्वोत्पन्नस्य पुनरनुत्पादः । न च कारणान्तरविलोपप्रसङ्गः । युगपदुत्पन्नकार्यवैचित्र्यार्थं विचित्रकारणस्यावश्यकत्वादिति केचित् । न च कार्यमात्रभेदप्रयोजकत्वेन प्रागभावकार-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

णता । तद्भेदस्य कार्य्यभेदप्रयुक्तत्वादननुगमाच्च ॥

उत्पत्तेरेव सामग्रीप्रयोज्यत्वात्तयैव तद्व्याप्ति-
रित्याशङ्क्याह । न चेति । सामग्र्याः स्यानन्तरक्षणे कार्य-
सम्बन्धे सति तल्लक्षणस्याद्यत्वं तत्पूर्वक्षणानां कार्याना-
धारत्वप्रयुक्तं तदापि कार्यसत्त्वे तदुत्तरस्यैतस्य प्रथमत्वा-
योगात् । तथाच कार्याधारक्षणस्याद्यत्वं न सामग्री-
प्रयोज्यमित्यभिप्रेत्याह । उत्पत्तिर्हीति । स चेदादि-
रिति । कार्यतत्ध्वंसानाधारक्षणाव्यवहितोत्तरक्षणश्चे-
त्यर्थः । सामग्र्यनन्तरक्षणे कार्योत्पत्तिनियमे ऽपि तदु-
त्पत्तिकाले सामग्र्यभावादेव न पुनरुत्पत्तिः । तदभा-
वश्च तदा पूर्वक्षणलक्षणकारणविरहात् । न च पूर्वक्ष-
णस्य कारणत्वकल्पकाभावः । पुनरनुत्पत्त्यनुपपत्तेरेव त-
त्कल्पकत्वादित्यभिप्रेत्याह । किं चेति । पूर्वक्षणस्य कार-
णत्वे तस्मिन्सतीतरस्य व्यतिरेकाभावादकारणत्वप्रसङ्ग
इत्याशङ्क्यैकक्षणोत्पन्नघटपटादिवैचित्र्यानुपपत्तेरन्वय-
मात्रेणापि तर्कावतारे कारणताग्रहसम्भवाच्चेतरेषा-
मपि कारणत्वमित्यभिप्रेत्याह । न च कारणान्तरेति ।
कार्यभेदस्य प्रागभावभेदप्रयोज्यत्वात्तदकारणत्वे तदनुप-
पत्तेस्तत्कारणत्वमित्याशङ्क्याह । न च कार्येति । यस्य
कार्यभेदो ऽस्ति तस्य सामग्रीभेद एव तत्प्रयोजकः कार्य-
भेदे विप्रतिपन्नं प्रति तु प्रागभावभेदात्तद्भेदो वक्तव्य-
स्तथाचान्योन्याश्रय इत्यभिप्रेत्याह । तद्भेदस्येति । किञ्च
तव मते प्रागभावे भावस्याभावस्य वानुगतधर्मस्याभावा-
त्तत्प्रागभावस्य तत्तदुत्पन्नकार्यमात्रे कारणताग्राह्या ।
तथाच प्रवृत्त्यनुपयोगात्तत्कारणत्वमदृष्टार्थमित्यभिप्रेत्या-
ह । अननुगमाच्चेति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एकाग्निसंयोगजरूपरसादीनां भेदप्रयोजकतया प्रागभावभेदो वक्तव्यस्तद्व्यतिरिक्तकारणभेदाभावादित्याशङ्क्याह । एतेनेति ।

(प्रागभावभेदस्य पाकजरूपादिभेदहेतुत्वनिरासः ।) एतेन पाकजरूपादीनां प्रागभावभेदेनैव भेद इति तद्धेतुत्वमिति निरस्तम् । पूर्वरूपादिध्वंसादिनैव तदुपपत्तेः । अपि च प्रागभावस्य प्रतियोगिहेतुत्वे निर्मोक्षो मुमुक्षूणां ब्रह्महत्याद्यनुष्ठानं वा प्रसज्येत । तथा हि प्रागभावो ह्यवश्यं प्रतियोगिजनकः । अन्यथा तत्र मानाभावात्तद्विनाशासम्भवाच्च । प्रतियोग्यजनकेनापि तद्विनाशे पूर्वमपि तत्प्रसङ्गात् । अविनाशे वा न तस्य प्रागभावत्वम् । अदृष्टानाधारसमयानाधाराभावस्यैव प्रागभावत्वात् । ततश्च ब्रह्महत्यादिजन्यदुःखविशेषप्रागभावे सति तत्त्वज्ञानसहस्रेणापि न मोक्षः । दुःखप्रागभावासहकृतस्य दुःखध्वंसस्य सुखस्य वा मोक्षत्वात् । दुःखप्रागभावनिवृत्त्यर्थं मुमुक्षूणां तत्प्रतियोगिजनकब्रह्महत्यादिकं वानुष्ठेयं स्यात् । तेन विना तदसम्भवात् ॥

पूर्वरूपादिध्वंसे सत्येव जायमानत्वात्तद्भेदादग्नितदवयवाद्यनेकतेजःसंयोगभेदाद्वा रूपादिभेदोपपत्तिरित्याह । पूर्वरूपेति । न च परमाणौ तेजःपरमाणुसंयोगादेकस्मादेव रूपादय उत्पद्यन्त इत्यत्र किञ्चिन्मा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नमस्ति परमाणूनामप्रामाणिकत्वाच्चेति भावः । एवं प्रागभावकारणताऽभावे बाधकं परिहृत्य तत्कारणत्वे बाधकमाह । अपि चेति । ब्रह्महत्यादिदुरितसाध्यदुःखप्रागभावानां मुमुक्ष्वात्मगतानां स्वप्रतियोगिदुःखरूपस्वनाशजनकब्रह्महत्याद्यननुष्ठाने नाशायोगात्तन्नाशाभावे दुःखप्रागभावासहकृतदुःखध्वंसादिरूपमोक्षायोगात्तदर्थं तव मते बुद्धिपूर्वकमुमुक्षुभिर्दुरिताचरणं प्रसज्येतेत्यर्थः । उक्तमुपपादयति । तथा हीति । उत्पन्नस्य पुनरनुत्पत्त्यनुपपत्तेरेव तव प्रागभावे मानत्वात्तस्य प्रतियोग्युत्पादकत्वनियमाभावे स्वसिद्धिरेव न स्यादित्याह । अन्यथेति । स्वप्रतियोगिन एव स्वविनाशत्वाच्च तदुत्पत्तिरावश्यकीत्याह । तद्विनाशेति । अन्यस्मात्कर्मणस्तन्नाशमाशङ्क्याह । प्रतियोगीति । नित्यस्य दुःखप्रागभावस्यानर्थत्वाभावत्तन्नाश एव मास्त्वित्याशङ्क्य त्वन्मते सर्वमुक्त्यनन्तरमसत एवाभावास्य प्रागभावत्वान्न तस्य नित्यतेत्याह । अविनाशे वेति । तन्नाशाभावे तव मोक्षासम्भवश्चेत्याह । ततश्चेति । सुखस्य वेति मतभेदाभिप्रायेणोक्तम् । मोक्षापेक्षायां दुरिताचरणं तवावश्यकमित्याह । दुःखप्रागभावेति ॥

अस्तु तर्ह्यन्येन दुःखसाधनेन तन्निवृत्तिरिति चोदयति । नन्विति ।

(अन्यदुःखेन दुःखनिवृत्त्यभावः ।) ननु कण्टकादिनापि तद्दुःखप्रागभावः स्वप्रतियोगिनं जनयत्विति चेन्न । तस्या तत्फलत्वात् । निरतिशयदुःखस्य ब्रह्महत्याजन्यस्यान्यतोऽसम्भवात् । दुःखे च तरतमभावस्य सुख

इव सर्वानुभवसिद्धत्वात् । अन्यथा पिपीलिकादंशक्रकचदारणप्रभूतयोरविशेषप्रसङ्गात् । न च प्रागभावो यत्किञ्चित्प्रतियोगिमात्रमुत्पादयति प्रतियोगिविशेषस्तु भावकारणादिति वाच्यम् । तथा सति पाकजस्थल एकस्मादप्यग्निसंयोगाद्रूपादिवैचित्र्यस्य गन्धप्रागभावश्च न रूपं प्रतिहेतुः रूपप्रागभावश्च न वायावित्यादित्वदभ्युपगतस्य व्याघातात् । उत्पन्नघटस्य पुनरुत्पत्त्यापत्तेश्च । घटकालीनकपाले ऽपि यत्किञ्चित्प्रागभावस्य सत्त्वात् । मृदि घटो भविष्यतीति वत् पटो भविष्यतीति प्रतीतिप्रसङ्गाच्च । न च मुमुक्षूणां ब्रह्महत्यादिजन्यदुःखप्रागभाव एव नास्तीति वाच्यम् । तेन दैवात्सम्पादितब्रह्महत्यातत्प्रायश्चित्तयोरफलत्वप्रसङ्गात् । तत्सन्देहे ऽप्यमुमुक्षापत्तेश्च । ततः प्रागभावो न हेतुः ॥

दुःखेष्ववान्तरवैजात्यस्यानुभवसिद्धत्वाद्दुग्धपानसाध्यसुखस्येव यवागूपानेन ब्रह्महत्यासाध्यदुःखस्य कण्टकादिनोत्पत्त्ययोगादित्याह । न तस्येति । दुःखेषु वैजात्याभावे सन्निहिततत्साधनं परित्यज्य तद्विशेषोपादाने प्रवृत्त्यनुपपत्तिरित्यभिप्रेत्याह । अन्यथेति । क्रकचं नामदारुविदारको लोहविशेषः । नन्वेकस्यापि प्रागभावस्य कार्यमात्रसाधारणत्वात्कार्यवैजात्यस्य तद्व्यतिरिक्तकारणवैजात्यप्रयुक्तत्वाद्दुःखप्रागभावस्यापि यत्किञ्चि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्कार्यजनने नाशे मुक्तिरिति नेत्याह । न च प्रागभाव
इति । रूपादिवैचित्र्यस्येत्यभ्युपगतस्य व्याघातादित्यु-
त्तरेण सम्बन्धः । तत्र प्रागभावव्यतिरेकेण रूपादिषु
विजातीयकारणाभावादित्यर्थः । अभ्युपगतस्य चेति
चकारो द्रष्टव्यः । अस्मिन्पक्षे प्रागभावकारणता मुधैवे-
त्यभिप्रेत्याह । उत्पन्नेति । किञ्च मृन्निष्ठाभावस्यापि
घटजनकत्वाद्भविष्यतीति बुद्धेः प्रागभावविषयत्वस्य
त्वयाङ्गीकारान्मृदि पटो भविष्यतीति बुद्धिरपि प्रमा
स्यादित्याह । मृदीति । ननु मुमुक्ष्वात्मनि तादृशदुःख-
प्रागभाव एव नास्ति तथाच तन्नाशार्थं न पापाचरण-
मिति चेन्न । कृतब्रह्महत्याप्रायश्चित्ते मुमुक्षौ तद्दुःखप्रा-
गभावसत्त्वनिश्चयात् । प्रायश्चित्तस्य दुःखप्रागभावपरि-
पालनफलकत्वेन त्वयाभ्युगमादित्याह । न च मुमुक्षूणा-
मिति । अन्येषामपि मुमुक्षूणां तादृशदुःखप्रागभावसत्त्व-
निश्चयाभावात् फलनिश्चयाभावेन शास्त्रीयप्रवृत्तेरनु-
पपत्तेरित्याह । तत्सन्देहे ऽपीति । साधकाभावाद्बाध-
कसत्त्वाच्च न प्रागभावः प्रतियोगिकारणमित्युपसंहरति ।
तत इति ॥

यदर्थं प्रागभावकारणत्वं भग्नं तद्दर्शयति । एव
च सतीति ।

(संयोगभेद एव धारावाहिकज्ञानभेदप्रयोजकः ।)

एवं च सति धारावाहिकज्ञा-
नभेदो न तद्भेदप्रयुक्त इति संयोगभेद एव प्रयो-
जकः । एवमनुव्यवसाये ऽपि स एव प्रयोजकः ।
क्लृप्तत्वान्न त्वन्यः तस्याक्लृप्तत्वात् । अन्यो
ऽपि न तावत्सामग्रीभेदस्तत्प्रयोजकः । सामग्रीभे-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दाभेदयोः कार्यभेदाभेदप्रयोज्यत्वात् । कारणभेदव्यतिरेकेण सामग्रीभेदानिरूपणाच्च । नापि कारणभेद एव प्रतिकार्यमनेककारणजन्यत्वात् । नापि विषयभेदः । समूहालम्बनविशिष्टज्ञानयोरनेकविषयजन्यत्वात् । तस्मात्प्रतिज्ञानं संयोगभेदजन्यत्वादनुव्यवसायायोगादिन्द्रियग्राह्यत्वघटितो गुणत्वहेतुरसिद्धः । एतेन कार्यत्वे सति विभुसमवेतत्वं सामान्यवत्त्वे सति विभुसमवेतत्वं वा ज्ञानगुणत्वहेतू प्रत्युक्तौ । नित्यानुभवस्य गुणत्वे वा तदाश्रये ऽनित्यज्ञानसमवायो ऽपि न स्यात् । प्रत्यक्षद्रव्य एकजातीयप्रत्यक्षविशेषगुणद्वयस्य युगपदेकावच्छेदेनैकत्रासमवायात् । अत एव न शब्दे व्यभिचारः प्रत्यक्षात्मगुणस्य स्वसमानाधिकरणस्वसमानजातीयगुणस्थितिकालीनास्थितिकत्वनियमाच्च दुःखादिवत् ॥

किञ्च मनःसंयोगभेदव्यतिरेकेण व्यवसायभेदप्रयोजकः किं कारणभेद उत सामग्रीभेदः विषयभेदो वा । न मध्यमो ऽनेककारणात्मकसामग्र्यैक्यस्यैककार्यजनकत्वौपाधिकत्ववत् तदनेकत्वस्याप्यनेककार्यजनकत्वप्रयुक्तत्वादन्योन्याश्रयतापत्तेरित्यभिप्रेत्याह । अन्यो ऽपि न तावदिति । प्रथमे कारणत्रितयजन्यकार्यस्यैकत्वानुपपत्तिरित्याह । नापि कारणेति । तृतीये ऽनेकविषयैकज्ञानानुपपत्तिरित्याह । नहीति । संयोगभेदस्य ज्ञान-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भेदे हेतुत्वसाधनफलमाह । तस्मादिति । अनुव्यवसाया- योगादिति व्यवसायजनकसंयोगातिरिक्तसंयोगस्यावश्य- कत्वात्तत्समये व्यवसायनाशात्तत्कारणकानुव्यवसायानु- पपत्तिरित्यर्थः। अनुभवे कार्यत्वपरतन्त्रत्वादिनिराकर- णेनान्यदपि हेतुद्वयमसिद्धमित्याह । एतेनेति । प्रतिकू- लतर्कपराहतिमप्याह । नित्यानुभवस्येति । साधितनि- त्यानुभवस्य गुणत्वे तस्यानित्यज्ञानसमवाय्यहमर्थगुण- त्वमेव वक्तव्यम् । तथाच तत्रानित्यज्ञानसमवायो न स्यादित्यर्थः । तत्र हेतुमाह । प्रत्यक्षद्रव्य इति । रूपर- सादिव्यावृत्त्यर्थमेकजातीयेत्युक्तम् । गुणत्वव्याप्यैकजा- तीयेत्यर्थः । धर्मादिव्यावृत्तये प्रत्यक्षेति । द्वित्वैकत्व- निरासाय विशेषगुणेति । क्रमभाविदुःखद्वयनिरासाय युगपदिति । हिंसाद्वयमात्रे युगपद्भाविप्रगलद्वयस्य चित्र- रूपस्य वा निरासायैकावच्छेदेनेत्युक्तम् । प्रत्यक्ष इत्यत्र प्रत्यक्षपदंव्यावृत्तिमाह । क्षत एवेति । तत्रैव हेत्वन्तर- माह । प्रत्यक्षात्मगुणस्येति । धारायामुत्तरज्ञानोत्पत्ति- कालीनस्थितिकपूर्वज्ञानव्यावृत्तये स्थितिकालीनेत्युक्तम्॥

ननु विशेषगुणद्वयस्य जन्यत्वप्रयुक्ता युगपदेकत्रा- स्थितिः जन्याजन्ययोस्तु सा किन्न स्यादित्याशङ्क्य तथात्वे जन्यशब्दद्वयस्यैकश्रोत्रदेशे युगपदस्थितिप्रसङ्गा- दित्यभिप्रेत्याह । न च जन्येति ।

(जन्यज्ञानद्वयस्य युगपदेकत्र स्थित्यभावः ।)

न च जन्यविशेषगुणद्वयस्य तथात्वमिति वाच्यम् । जन्ययोरपि शब्दयोर्युग- पदस्थितिदर्शनात्। इतो ऽन्यथाकल्पने गौरवात् । किञ्चाहमुपलभ इति त्यक्षे य आत्ममन्युपलब्धिस-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

म्बन्धो भासते स न तावत्तादात्म्यम् । जडाजड-योर्वास्तवतादात्म्यानुपपत्तेः । नापि समवायः । तस्यैवासिद्धेः । तस्योपलब्धिसम्बन्धाभावाच्च । तत्सम्बन्धमन्तरेण तस्याप्रत्यक्षत्वात् । न च समवायविषयमुपलब्ध्यन्तरमस्तु तत्र च घटादि-रिव समवायो विषयसम्बन्धीति वाच्यम् । उप-लब्धिसमयस्योपलब्ध्यन्तरागोचरत्वात् । एतेन परिशेषादुपलब्धिर्गुण इति परास्तम् । परिशेषा-सिद्धेश्च । उपलब्धेरपि बुद्धितादात्म्येन दुःखा-दिगुणाधिष्ठानतया द्रव्यत्वात् ॥

ननु प्रत्यक्षद्रव्यगतत्वे सति जन्यत्वं तत्प्रयोजक-मिति चेत् । लाघवादुक्तगुणद्वयस्य प्रत्यक्षगतत्वस्यैव तत्प्रयोजकत्वादित्यभिप्रेत्याह । इतो ऽन्यथेति । किञ्च नित्योपलम्भस्याहमर्थेन सम्बन्धाभावादपि न तद्गुण-त्वम् । तथाहि किं तत्सम्बन्धस्तादात्म्यमुत समवायः । नाद्यः तव मते तदयोगादित्याह । स न तावदिति । द्वितीयस्त्वप्रमाणिक इत्याह । नापीति । तदभ्युपगमे ऽपि किं घटोपलब्धिसमवायस्तयैव भासते उपलब्ध्यन्त-रेण वा । नाद्यः तत्सम्बन्धाभावादित्याह । तस्येति । स्वरूपसम्बन्धस्यातिप्रसक्तत्वादिति भावः । सम्बन्धा-भावे ऽपि तद्गोचरत्वे ऽतिप्रसङ्गादित्यभिप्रेत्याह । तत्स-म्बन्धेति । द्वितीयमपवदति । न चेति । उपलब्धिसम-वायगोचरस्योपलब्ध्यन्तरस्य नागृहीतविशेषणन्यायेनोप-लब्धिगोचरत्वमपि वक्तव्यम् । तच्च न सम्भवति स्वप्र-काशत्वविरोधादित्याह । उपलब्धीति । गुणत्वे ऽप्युक्त-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बाधकसत्त्वान्न तस्य परिशिष्टत्वमित्याह । एतेनेति । किं च नित्यानुभवस्य पारिभाषिकद्रव्यत्वसंभवादपि न परिशेष इत्याह । परिशेषेति । ननु गुणसमवायवत्त्वं द्रव्यत्वप्रयोजकमिति चेन्न । तस्यैवाभावात् । भावे वा तस्यैकत्वेन तत्रापि वक्तुं शक्यत्वात् । ननु तत्र दुःखादिसत्त्वं नास्तीति चेन्न । गुणस्य कुत्रापि सत्त्वाभावात् । ननु धर्मिसमानसत्ताकगुणाश्रयत्वमेव द्रव्यत्वप्रयोजकमिति चेन्न । तव मते विशेषणाव्यावर्त्याभावात् । लाघवेन गुणाश्रयत्वस्यैव तत्प्रयोजकत्वादिति भावः ।

किञ्च द्रव्यत्वं नाम किंचिन्नास्त्येव, येन तत्पर्युदासेन गुणत्वमनुभवे स्यादित्याह । वस्तुतस्त्वति ।

द्रव्यत्वलक्षणनिरासः

वस्तुतस्तु न गुणाश्रयत्वं द्रव्यत्वम् । रूपादावतिव्याप्तेः । एकाश्रयरूपादावनेकानुभवव्यवहारयोर्दर्शनात् । अत एव न समवायिकारणत्वम् । नोपि द्रव्यत्वं जातिरेव । तद्व्यञ्जकानिरूपणात् । तत्प्रमाणानुगतबुद्ध्यदर्शनाच्च । न हि मृज्जलघटपटकटादिषु द्रव्यंद्रव्यमित्यनुभवन्ति लौकिकाः । लौकिकानुभवस्यैव जातिसाधकत्वात् । अतो न पारिभाषिकद्रव्यलक्षणलक्ष्यं चैतन्यम् । नचैतावता ब्रह्मात्मकचैतन्यं गुणः । सर्वाश्रयत्वस्वातन्त्र्याभ्यां ततो विलक्षणत्वात् । चैतन्यस्य सर्वावभासकत्वसर्वोपादानत्वाभ्यां सर्वाश्रयत्वात् । सर्वाश्रयानिरूपणेन स्वातन्त्र्याच्चेति सिद्धमगुणम-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नादि नित्यं जाग्रति प्रमातृप्रमितिप्रमेयतदभाव-साक्षि चैतन्यमिति ॥ एवं स्वप्नसाक्षित्वेनापि नित्योऽनुभवो निरूप्यते ॥

रूपादीनामपि संख्यादिमत्त्वादित्यर्थः । ननु रूपादौ संख्यासमानाधिकरणादिकत्वादिबुद्धिर्न संख्याश्रयत्वादित्यत आह । एकाश्रयेति । एकस्मिन् घटे रूपादयो बहव इति प्रतीयमानाया बहुत्वसंख्याया घटे तदभावादित्यर्थः । रूपादावतिव्याप्त्यैव लक्षणान्तरमयुक्तमित्याह । अत एव नेति । तर्हि गोत्वादिवज्जातिरेवेत्यत आह । नापीति । त्वदभिमतद्रव्येषु जातिसाधकप्रमाणमपि नास्तीत्याह । तत्प्रमाणेति । ननु मन्यते व्युत्पन्नानां तत्रानुगतबुद्धिरस्तीत्याशङ्क्याह लौकिकेति । अन्यथा बाह्यमते व्युत्पन्नानां चैत्यवन्दनादावपि धर्मत्वबुद्धिसत्त्वात्तत्रापि धर्मत्वं स्यादित्यर्थः । तस्मात् पारिभाषिकत्वात् द्रव्यलक्षणस्य तदभावो ममापीष्ट इत्याह । अत इति । द्रव्यत्वाभावे परिशेषाद् गुणत्वमित्याशङ्क्याह । नचैतावतेति । सर्वाश्रयत्वादिकमुपपादयति । चैतन्यस्येति । दृक्दृश्ययोर्वास्तवतादात्म्यादेरसम्भवात्, दृशोऽध्यस्तत्वे जगदान्ध्यप्रसङ्गात्, दृश्यैव जडप्रपञ्चोऽध्यस्तोऽवभासत इति सर्वावभासकत्वात्, सर्वाश्रयत्वमित्यर्थः। उपपादितं साक्षिस्वरूपमुपसंहरति। इति सिद्धमिति । जाग्रति प्रमातृतद्धर्मतदभावसाधकतया नित्यसाक्षिणं निरूप्य स्वप्ने कादाचित्कानुभवासंभवात्, तत्कालीनसर्वावभासकतया नित्यसाक्षिणं निरूपयति । स्वप्नेति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वाप्नज्ञानस्य हेत्वभावान्नित्यतां वक्तुं प्रथमं तत्र ज्ञानं साधयति । अस्ति खल्विति ।

स्वाप्नज्ञानस्य नित्यत्वम् । अस्ति खलु स्वप्ने गजादिविज्ञानम् 'अयं गज' इति । उत्थितस्य तदनुस्मृतेः । न च सा दिवसान्तरानुभूतविषया देशविशेषे गजादेः पूर्वमननुभूतत्वात् । स्वप्ने दृष्ट इत्यनुसन्धानाच्च । अत एव न स्वाप्नज्ञानं स्मृतिः । 'स्वप्ने करिणमन्वभूवम्' इति तदनुभवत्वप्रतिसन्धानात् ॥ अस्मार्षमित्यननुभवात् । तद्विषयस्य देशविशेषसंसर्गस्य पूर्वमननुभूतत्वात् । स्मर्यमाणयोरेवासंसर्गाग्रहे जाग्रति गजादेरिव स्वप्नेऽपि तस्यापरोक्षतानुपपत्तेः । अपरोक्षत्वे वा स्वप्नोपलब्धः सर्वोप्यपरोक्षः स्यात् । अनुभवे च तस्मिन् न तावच्चक्षुरादिकं हेतुः । तेषामुपरतत्वात् । नापि मनः । असहायस्य तस्य बहिरप्रवृत्तेः ।

ननूत्थितानुस्मृतेरतीतजाग्रत्यनुभूतगजादिविषयत्वान्न स्वाप्नानुभवाकाङ्क्षेत्याशङ्क्याह । न चेति । स्वमंदिरमध्यवर्तिगजस्कन्धारूढतया स्वस्य स्मर्यमाणत्वात् स्वस्य जाग्रदन्तरे तथाऽननुभवादित्यर्थः । तदनुभवस्य स्वप्नकालीनत्वमपि स्मर्यत इत्याह । स्वप्नेति । पूर्वानुभवादेव न स्वप्नज्ञानस्य संस्कारजन्यत्वमित्याह । अत एवेति । तस्मिन्ननुभवत्वस्यापि प्रतिसन्धीयमानत्वान्न स्मृतित्वमित्याह । स्वप्ने करिणमिति । तस्य स्मृतित्वे 'अस्मार्षम्' परामर्शः

स्यात् । न च सोऽस्तीत्याह । असमार्थमिति । स्मृतिरूपे तस्मिन्ननुभवत्वमारोप्यत इत्याशङ्क्य स्मृतित्वमेव तस्यानुपपन्नमित्याह । तद्विषयस्येति । अत्राख्यातिवादी स्मर्यमाणगजादीनामसंसर्गाग्रहमात्रं न तु संसर्गानुभवोऽस्तीति जल्पति । तदयुक्तम् । अनाप्तवाक्यात् स्मर्यमाणयोरसंसर्गाग्रहे ऽप्यापरोक्ष्याभावादत्रापि तदनुपपत्तिरित्याह । स्मर्यमाणयोरिति । इतरथा स्वप्ने परोक्षत्वापरोक्षत्वविभागो न स्यादित्याह । अपरोक्षत्वे वेति । अस्तु तर्हि जन्य एवानुभव इत्याशङ्क्य किं तत्र चक्षुरादिकं हेतुः, उत मनः ? । नाद्य इत्याह । अनुभवे चेति । द्वितीयं दूषयति । नापीति । बाह्यविशेष्यकानुभवे मनसोऽसमर्थत्वादित्यर्थः ॥

अत्रान्यथाख्यातिवादी चोदयति । अस्तु तर्हीति ।

अन्यथाख्यातिवादिशङ्कानिरासः

अस्तु तर्हि स्मर्यमाणस्य गजादेरारोप इति चेन्न । चक्षुरसन्निकृष्टे बाह्ये तदसम्भवात् । मनःसन्निकृष्टे चाहमर्थे तदारोपे 'अहंगजः' 'मयि गज' इति वा प्रतीतिप्रसङ्गात् । ननु स्मर्यमाणसन्निहितदेशे स्मर्यमाणगजाद्यारोपः । न चाननुभूतस्याप्यसम्भावितस्यापि स्वप्नेऽनुभवान्न स्मर्यमाणारोप इति वाच्यम् । शब्दादिसर्वप्रमाणाविषयस्यस्वप्नेऽनुभवादर्शनात् । न चैवं जाग्रत्यपि तथात्वं किं नस्यात् पूर्वपूर्वभ्रमदर्शितयोर्विशेषणविशेष्ययोः स्मृतिसम्भवादिति वाच्यम् । जाग्रति बाधाभावात्, चक्षुराद्यन्वयव्यतिरेकाच्चेति चेन्न ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

येन हि स्वप्ने यत्र देशे गजादिरनुभूयते तस्य तत्र तदा न तत्संशय इति सर्वसंप्रतिपन्नम् । न चैतद्देशविशेषस्य गजादेश्च स्मर्यमाणत्वे सङ्गच्छते । स्मर्यमाणोभयप्रतियोगिकसंसर्गानुभवस्य तत्सत्तानिश्चयरूपत्वाभावात् । अन्यथाऽन्धादेरपि शब्दादवगत्य धर्मिप्रतियोगिनौ मनसा पुरोदेशे गजादिकमनुभवतस्तदा तत्र गजादिसंशयानुदयप्रसङ्गात् । कारणप्रकारविषयकृतविशेषस्य स्वप्नान्धानुभवयोरविशेषात् ॥

स किं चाक्षुष आरोपः उत मानसः ? । नाद्यः-चक्षुषो विशेष्यसन्निकर्षाभावादित्याह । नचक्षुरिति । द्वितीयेऽपि किं साक्षान्मनःसन्निकृष्टे आत्मन्यारोपः, उत स्मरणद्वारा सन्निकृष्टे बाह्यदेशे ? । आद्ये दोषमाह । मनः सन्निकृष्टे चेति । तादात्म्यारोपे 'अहं गज' इति स्यात् । संसर्गारोपे 'मयि गज' इतीत्यर्थः । द्वितीयं शङ्कते । ननु स्मर्यमाणेति । नन्वाकाशगमनस्वशिरश्छेदादेरननुभूतस्यापि स्वप्नेऽनुभवात् कथं स्मर्यमाणारोप इति चेन्न । आकाशादेः पृथगनुभूतत्वात् स्मर्यमाण आकाशादौ स्मर्यमाणगमनादिसंसर्गारोपोपपत्तिरित्याह पूर्ववादी । न वाऽननुभूतस्येति । तर्हि जाग्रत्यपि विशिष्टानुभवस्योक्तप्रकारेणाऽऽरोपितविषयत्वस्य वक्तुं शक्यत्वात् द्वैत मिथ्यापात इत्याऽऽशङ्क्याह । न चैवमिति । ननु बाधाभावचक्षुराद्यन्वयव्यतिरेकविशिष्टज्ञानानामप्येवंविधत्वान्नारोपितत्वविरोधितेति चेन्न । तथात्वे प्रेक्षावत

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निःशङ्कप्रवृत्त्याद्यनुपपत्तेरित्यभिमानः । स्वाप्नज्ञानस्य स्मर्यमाणारोपरूपत्वे स्वविषयसंशयविरोधित्वं न स्यात् । सामान्यतः शब्दावगतेषु पश्चात्स्मर्यमाणेषु देवगन्धर्वादिष्वस्मदादिवद्भोजनयानाद्यारोपेऽपि तत्संशयदर्शनादिति दूषयति । न येन हीति । सत्तानिश्चयरूपत्वे बाधकमाह । अन्यथेति । धर्मिप्रतियोगिनाविति । पुरोदेशगजावित्यर्थः । नन्वन्धानुभवात् स्वप्नानुभवे विशेषोऽस्तीति चेत् सत्यम् । अन्धस्य पुरोदेशे वृत्तिनिर्गमनाभावात् प्रमातृव्यवहिते गजाद्यारोपः परोक्ष एव । स्वप्नगजादेः स्वप्नप्रकाशसाक्षिण्यध्यस्तत्वात्संविदभेदेनापरोक्षत्वमस्तीति मम मते विशेषः । तव मते तु कारणकृतवैजात्यं वा विषयकृतवैजात्यं वा ज्ञाने विशेषो वाच्यः । तदुभयमपि नास्तीत्याह । कारणेति । प्रकारो विशेषणम् ॥

ननु विषयापरोक्ष्याभावेऽपि संशयविरोधित्वदर्शनात् स्वप्नज्ञानस्यापि त्वदभिमतापरोक्ष्याभावेऽपि संशयविरोधित्वं किं न स्यादिति शङ्कते । नन्विति ।

स्मृतेः संशयविरोधित्वशङ्कापरिहारः ।

ननु स्मृतेरपि संशयविरोधित्वं दृश्यत इति चेत् सत्यम् । अर्थसत्तानिश्चयरूपानुभवमूला सा । न च स्वप्ने संसर्गप्रत्ययः । तथासंसर्गविशेषस्याननुभूतत्वात् गजादिमात्रज्ञानिनोऽपि स्वप्ने जाग्रतीव तदाकारविशेषानुभवस्य कालान्तरीयतथाविधस्मृतिसमर्थस्य दर्शनाच्च । तस्माद्विषयगतं स्फुरणमेव विरोधिकोटयन्तरसंसर्गग्रहप्रतिबन्धकं तया स्वप्ने

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संशयविरोधिकालान्तरीयपटुतरस्मृतिहेतुश्च वाच्यम् । एतेनान्धस्य विरोधिकोटयन्तरोपस्थितिसंभवात् पुरोदेशे तत्संशयः । निद्राणस्य तु सा नेति न संशय इतिप्रत्युक्तम् । स्वप्ने विषयविपरीतस्मृत्यभावस्य नियन्तुमशक्यत्वात् । नच स्वप्नज्ञानस्य प्रामाण्यग्रहान्न तदा तद्विषयसंशय इति वाच्यम् । तस्यभ्रान्तित्वात् । तद्ग्राहकलिङ्गाद्यभावाच्च । स्वत एव तद्ग्रहे ऽन्धस्यापि तत्प्रसङ्गात् ॥

स्मृतेः संशयविरोधित्वमङ्गीकरोति । सत्यमिति तर्हि स्वप्नज्ञानमपि तथाऽस्त्वित्याशङ्क्य संशयविरोधित्वे सत्तानिश्चयत्वं प्रयोजकं तच्च स्मृतेस्तादृशमूलानुभवजन्यत्वप्रयुक्तम्, परोऽक्षानुभवस्य तर्कानुगृहीतकारणविशेषजन्यत्वप्रयुक्तम् , प्रत्यक्षे तु विषयस्य प्रमाणाव्यवधानप्रयुक्तम् । त्वदुत्प्रेक्षितस्वाप्नज्ञानस्य उक्तान्यतमप्रयोजकाभावादन्धादिज्ञानवत् संशयानुकूलतैव स्यादित्यभिप्रेत्याह । ननु स्वप्नज्ञानस्याप्यनुभूतविषयअर्थसत्तानिश्चयेति । न तु विशेषसंसर्गविषयत्वांश त्वांशे सत्तानिश्चयत्वं न तु विशेषसंसर्गविषयत्वाद्यनुइत्याशङ्क्य तदंशेऽपि तदा संशयविरोधित्वादिकमनुभूयत इत्याह । गजादीति । परीत्या सत्तानिश्चयत्वादेरसंभवादनावृतस्वप्रकाशसाक्षिणि सुखादिवदध्यस्तत्वादेव स्वप्नगजादेः संशयागोचरत्वमित्युपसंहरति । तस्मादिति । तव मते निद्रायाः स्मृतिविरोधित्वात् तत्प्रयुक्तं चान्धानुभववैषम्यमयुक्तमित्याह । एतेनेति ।

वैषम्यान्तरं निराकरोति । न चेति । किं प्रामाण्यग्रहः प्रमा उत भ्रमः ? । नाद्य इत्याह । तस्येति । स्वप्नज्ञानस्येत्यर्थः । किं च तत् प्रामाण्यं स्वतो गृह्यते, उत परतः ? । न द्वितीय इत्याह । तद्ग्राहकेति । समर्थप्रवृत्तेस्तत्राभावादित्यर्थः । प्रथमं दूषयति । स्वत एवेति ॥

प्रामाण्यग्रहो भ्रम इति पक्षं शङ्कते । अविद्यमानेति ।

प्रामाण्यग्रहस्य भ्रमत्वनिरासः

अविद्यमानमपि प्रामाण्यमारोप्यत इतिचेन्न । विषयस्फुरणशून्ये रूपादिगोचरमानसज्ञाने अन्धस्येव स्वप्नज्ञाने प्रामाण्यारोपासंभवात् । तस्यानियतत्वाच्च । तथा च स्वप्नानुभूतराजादौ संशयविरोधित्वापरोक्षत्वलक्षणस्पष्टत्वाय विषयगतस्फुरणमेव शरणम् । स्मर्यमाणदेशे स्मृत्युपनीतगजादेरारोपे स्वप्नस्यानुमितपरमाण्वरोपितस्थौल्यवत् पारोक्ष्यप्रसङ्गाच्च । तथा चानुभवविरोधः । स्मर्यमाणे सन्निहि तत्वारोपान्नानुभवविरोध इति चेन्न । सन्निहितत्वारोपे हि 'सन्निहितो गज' इतिप्रतीतिर्भवति । 'स्थूलः परमाणुः' इतिवत्, अन्धादेः शुक्लः सन्निहित इतिवच्च, नतु स्मर्यमाणस्यापरोक्षत्वम्, तस्य विषयावच्छिन्नस्फुरणं विनाऽनुपपत्तेः । विषयावच्छिन्नस्फुरणं च तत्र नित्यसर्वगतानुभवानङ्गीकारे न युज्यत इति नित्यसर्वग-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तानुभवसिद्धिः । एवम् "अहमस्वाप्सम्" इति
सौषुप्तिकाऽऽत्मपरामर्शादपि नित्यानुभवसिद्धिः ।
परामर्शहेत्वनुभवस्य सुषुप्तावन्यस्यासंभवात् ।
परामर्शत्वं चास्य परिशेषादिति वक्ष्यते ।

अन्यथादिज्ञाने प्रामाण्यारोपादर्शनात् तत्तुल्यत्वे तदारोपोऽपि न स्यादित्याह—विपर्ययेति । भ्रान्तिज्ञानमात्रे प्रामाण्यारोपस्य जाग्रत्यदर्शनात्स्वप्नेऽपि स न स्यादित्याह—तस्येति । ज्ञानलक्षणप्रत्यासत्तेश्च निरधिष्ठ्यमाणत्वाच्चास्य मानसत्वायोगाच्च तदपरोक्षतायै नित्यस्फुरणमेषितव्यमित्यभिप्रेत्याऽऽह—तथा चेति । स्मृतेर्मनःप्रत्यासत्तित्वेऽपि तदपरोक्षता न स्यादित्याह—स्मर्यमाणेति । इष्टापत्तिमाशङ्क्याऽऽह—तथा चेति । वस्तुतो व्यवहितेऽप्यव्यवहितत्वं भ्रान्त्या प्रतीयत इति शङ्कते—स्मर्यमाण इति । तथाप्यपरोक्षो गजादिरित्येतादृशानुभवानुपपत्तिः । न चापरोक्षत्वमपि तत्राऽऽरोपितमिति वाच्यम् । स्वप्नज्ञानस्वरूप एव तदा परोक्षेऽपि बाधाभावात् । तथा च जाग्रतीव संविदभेदेनैवापरोक्ष्यं स्वप्नगजादेरावश्यकम् । अनित्यसंविदोऽसंभवात्तन्नित्यत्वसिद्धिरित्यभिप्रेत्याऽऽह—सन्निहितत्वारोपे हीति । स्वप्नवदेव सुषुप्तावप्यनुभवस्याऽऽवश्यकत्वात्तदा जन्यस्यासंभवान्नित्यानुभवसिद्धिरित्याह—एवमहमिति ।

ननु सुखमहमस्वाप्समिति स्वापकालीनदुःखाभावानुमितिरियं, न सुषुप्तिकालीनसुखादिपरामर्शः, येन सुषुप्तावप्यनुभवो भवेदित्यत आह—परामर्शत्वं चेति । वक्ष्यत इति । आनंदवादे इत्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अवस्थात्रयसाक्षिनित्यानुभवचिन्तायाः फलचिन्तामारभते । स चायमिति ।

ज्ञानात्मनो रैक्यप्रतिपादनम् । स चायमवस्थात्रयतदभावसाक्षी नित्यः स्वतन्त्रः सर्वगतोऽनुभव–आत्मा । तद्भेदे प्रमाणाभावात्, तदभेदे च प्रकृतस्य दृश्यत्वहेतोरेव मानत्वात् । "आत्मैवास्य ज्योतिः प्रज्ञानं ब्रह्म" इति श्रुतेश्च । अत्राऽऽह नवीनः—

आत्मनो ज्ञानमात्रत्वनिराशङ्का । आत्मरूपं ज्ञानं सविषयं निर्विषयं वा ?। आद्येऽपि स्वविषयं परविषयं वा ? नाद्यः ! स्ववृत्तिविरोधात् । न द्वितीयः । मोक्षे पराभावात् । अतीतपरोल्लेखे च सुषुप्तिमोक्षयोरतीतविषययोस्तुल्यत्वापातात् । नापि निर्विषयम् । ज्ञानत्वविरोधात् । अर्थप्रकाशस्यैव ज्ञानत्वात् । अन्यथा घटादेरपि तत्त्वापत्तेः । अर्थाप्रकाशात्मकजडव्यावृत्तिरप्यर्थप्रकाशात्मकत्वं विना न युक्ता ।

एवं ज्ञात्रभावादपि न ज्ञानम् । न हि भोक्तृभोग्यरहिता मुक्तिरस्ति । न च ज्ञानस्यानादित्वात्तदनपेक्षा । अनादेः प्रागभावस्य प्रतियोगिनि, जीवब्रह्मविभागस्य धर्मिप्रतियोगिनोः, भावरूपाज्ञानस्याऽऽश्रयविषययोः अनपेक्षाप्रसङ्गात् । ज्ञानस्य ज्ञातृज्ञेयनिरूप्यस्वभावत्वाच्च, इदमहं जानामीत्यनुभवात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उक्तानुभवस्यात्माभेदेऽपि प्रमाणं नास्तीत्यत आह–तदभेदे चेति। अहमनुभवगोचरो, अहमनुभवे प्रका-शमानस्वव्यतिरिक्तद्रष्टृकः, दृश्यत्वादित्यनुमितद्रष्टु-र्जडत्वे दृश्यत्वापत्त्या द्रष्ट्रन्तरापेक्षायामनवस्थापातात् दृग्रूपत्वसिद्धेरित्यर्थः । श्रुतिरपि ज्ञानात्माऽभेदे प्रमा-णमित्याह--आत्मैवेति । अस्य व्यवहर्तुर्व्यवहारसाधन-प्रकाश आत्मैवेत्यर्थः । आत्मनश्चिद्रूपत्वमनादृत्य जडत्वमेव बहुमन्यमानस्याभाग्यस्य नवीनस्य प्रलाप-मनुवदति-अत्राऽऽहेति । भेदसापेक्षविषयविषयिभाव-स्यैकस्मिन्नसंभव इत्याह – नाद्य इति । परविषयत्व-पक्षं दूषयति । न द्वितीय इति । न च मोक्षे द्वैताभा-वोऽस्तीति वाच्यम् । तदानीमाध्यासिकसंबंधाभावेन चैतन्यस्य तद्विषयत्वायोगात्, तस्याप्यात्ममात्रत्वाच्चे-ति भावः । ननु तदाऽप्यतीतविषयेण सविषयमिति चेत् तर्ह्यतीतसंसारेण संसार्यपि स्यादित्याह – अती-तेति । सविषयत्वाभावेऽप्यात्मत्ववत् ज्ञानत्वं किं न स्यादित्यत आह – अर्थप्रकाशस्यैवेति । जडव्यावृत्तस्व-रूपस्यैव ज्ञानत्वान्न जडत्वप्रसक्तिरित्याशङ्क्याऽऽह – अर्थप्रकाशेति ।

आत्मरूपज्ञानस्याऽऽश्रयानिरूपणादपि न तस्य ज्ञानत्वमित्याह – एवमिति । अहमिदं जानामीति ज्ञातृज्ञेयसम्बन्धिन एव ज्ञानत्वानुभवात्तद्रहितस्य ज्ञान-त्वमेवायुक्तमित्याह – न हि भोक्तृभोग्येति । उक्तज्ञान-माश्रयनिरपेक्षमनादित्वादात्मवदित्याशङ्क्य व्यभिचा-रेण दूषयति । न च ज्ञानस्येति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनादित्वे सत्यनन्तत्वस्य हेतुत्वान्न व्यभिचार इत्याशङ्क्य तथात्वे ज्ञानत्वमेव न स्यादित्यभिप्रेत्याऽऽह – ज्ञानस्येति ।

नवीनमतेनैव आत्मनोऽप्रमाभयत्वनिरसनम्

किञ्च न तावदात्मरूपं ज्ञानं प्रमा तद्वद्याविद्यादेस्तात्त्विकत्वप्रसङ्गात् । नापि भ्रमः दोषाजन्यत्वात् । तद्विलक्षणस्य ज्ञानस्याप्रसिद्धेः । यदीदं ज्ञानमज्ञानविरोधि तदा तन्नित्यनिवृत्तं स्यात् । न चेत्--पटादिवत् ज्ञानमपि न स्यात् । स्मृतिपरोक्षज्ञाने विहायापरोक्षज्ञानस्यैवाऽऽत्मत्वे हेत्वभावाच्च ।

किञ्च यस्य ममाज्ञानं सोऽहं दुःखमनुभवामीत्यादिप्रत्यक्षेण "यो वेद इदं जिघ्राणीति स एष हि द्रष्टा श्रोता घ्राता" इत्यादिश्रुतेश्च दुःखादिभोगरूपस्यानर्थस्य मोक्षसामानाधिकरण्यं, संसारस्य च समानाधिकरणज्ञाननिवर्त्यत्वमित्यादियुक्तेश्च जीवस्य ज्ञातृत्वात्कथं ज्ञानमात्रत्वमिति ?—

नवीनकृतशङ्कायाः समर्थनम्

उच्यते । सत्यमर्थप्रकाशो ज्ञानम् । आत्मस्वरूपज्ञानं चार्थप्रकाशः । प्रकाशस्य तद्रूपत्वात् । मुक्तौ तु प्रपञ्चाभावान्न तत्प्रकाशः । न वा तदाऽतीतार्थप्रकाशः । स्वरूपज्ञानस्य स्वसंसृष्टार्थमात्रप्रकाशत्वात् । अत एव मुक्तौ नोपप्लवोऽपि ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

किमात्मरूपं ज्ञानं प्रमा, उत भ्रमः, किं वोभयबहिर्भूतम्? नाद्य इत्याह – न तावदिति । न द्वितीय इत्याह – नापीति। भ्रमस्य दोषजन्यत्वनियमादित्यर्थः। तृतीयं दूषयति। तद्विलक्षणस्येति। प्रमाऽप्रमाविलक्षणस्येत्यर्थः। किमात्मरूपं ज्ञानमज्ञानविरोधि उत न? उभयथाऽप्यनुपपत्तिरित्याह – यदीदं ज्ञानमिति । किं च तव मते किंचित् ज्ञानमात्मा किञ्चिज्ज्ञानात्मेति व्यवस्थायां हेतुं न पश्यामीत्याह – स्मृतिपरोक्षेति ।

यच्चोक्तं 'तद्भेदे प्रमाणाभावात्'इति । तदयुक्तम् । प्रत्यक्षश्रुतियुक्तीनां सत्त्वादित्याह-किञ्च यस्य ममेति । तव मते केवलात्मन एवाज्ञानाश्रयत्वात् दुःखतदनुभवादीनामज्ञानसामानाधिकरण्यप्रतीतेरनुभवस्याऽऽत्मधर्मत्वसिद्धिरित्यर्थः । श्रुतिमाह – यो वेदेति। ननु इदं जिघ्राणीत्येवंरूपेण प्रमेयप्रमाणप्रमातृसमुदायं यो वेत्ति तत्पृतयसाक्षी स आत्मेति साक्षिण एव ज्ञानमात्मत्वं श्रुत्यर्थं, इति चेन्न । यो वेदेति वेदनाश्रयस्यैवाऽऽत्मत्वाभिधानादिति भावः। ज्ञानात्मभेदसाधकयुक्तिमप्याह – दुःखादीति । स्वतः शुक्लस्यापि पटस्य रक्तद्रव्योपरागे रक्तवत् स्वतो निर्विषयप्रकाशस्वभावस्याऽऽत्मनो घटपटाद्युपरागे सविषयत्वं, तदपाये – रक्तद्रव्यापाये पटशौक्ल्यवत्, स्वाभाविकनिर्विषयप्रकाशात्मत्वमेव ।
तया च न सविषयत्वानुभवविरोध इत्यभिप्रेत्य सिद्धांत-
यति । उच्यत इति । मुक्तावतीतार्थविषयोऽनङ्गीकार-
पराहतःअयुक्तश्चेत्याह – न वा तदेति। मुक्तौ निर्विष-
यत्वादेव न संसारप्रसङ्ग इत्याह – अत एवेति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मुक्तौ ज्ञेयाभावे ज्ञानाभावप्रसङ्गात् शून्यतापत्ति-रित्याशङ्क्याऽऽह – न चैवं तस्येति ।

मुक्तौज्ञानाभा-वनिरासः

न चैवं तस्य मुक्तौ निःस्वरूपत्वं स्यादर्थप्रकाशत्वाभावादिति वाच्यम् । अर्थप्रकाशत्वं हि ज्ञानस्योपलक्षणं–व्यावृत्तौ लिङ्गं, न तु स्वरूपं, न वा विशेषणम् । सर्वदाऽर्थप्रकाशत्वस्यैव ज्ञानस्वरूपत्वे तटस्थेश्वरज्ञाने नित्ये सर्वार्थप्रकाशो न स्यात् । तस्य कार्यविरहकाले तदप्रकाशत्वात् । न च घटादिविरहकालेऽपि तस्य तद्गोचरत्वात्तत्प्रकाशत्वमस्तीति वाच्यम् । ज्ञानं हि स्वसंबद्धमेव विषयीकरोति नासंबद्धम् । ननु स्वरूपसम्बन्धोऽस्तीति चेन्न । तत्काले सतोरेव हि स्वरूपसंबन्धः, न सदसतोः निःस्वरूपत्वात् । अतीतादिश्च तव मते निःस्वरूप एव । अन्यथा प्रागभावप्रध्वंसाभ्यां प्रतियोगिन एककालत्वप्रसंगात् । प्रागभावादिकाले तत्सत्तानङ्गीकारे चासत्त्वं नाम निःस्वरूपत्वमेव स्यात् । नन्वभावकाले प्रतियोगी नासन् किन्तु कालांतरे सन्निति चेन्न कालान्तरसत्त्वेऽप्यभावकाले तदसत्त्वात् ॥

ज्ञानस्वरूपस्यार्थघटितत्वाभावात्, तदभावेऽपि ज्ञानस्य न निःस्वरूपत्वमित्यभिप्रेत्याऽऽह – अर्थप्रकाशत्वं हीति । उपलक्षणमित्येतद्विवृणोति । व्यावृत्ताविति । यावद्द्रव्यभाविनोऽपि गन्धत्वादेर्जला-

दिभ्यः स्वाश्रयव्यावर्तकत्वाद्गंधवती पृथिवीत्युच्यते यथा, एवमर्थप्रकाशो ज्ञानमित्युच्यते । तथा च प्रलयादौ गंधाभावेऽपि पृथिवीपरमाणुसत्त्ववत्, अर्थाभावेऽपि मुक्तौ ज्ञानसत्त्वोपपत्तिरित्यर्थः । किंचार्थप्रकाशत्वस्य ज्ञानस्वरूपत्वे तद्विशेषणत्वे वा पराभिमतेश्वरज्ञानस्यास्मदादिज्ञानवैलक्षण्याय सर्वदा सर्वार्थप्रकाशत्वं वक्तव्यम्, तदनुपपन्नम् । इदानीमतीतादिपदार्थाभावेन तद्विषयत्वासंभवादित्याह – सर्वदेति । अतीतादिकमपि तद्विषय एवेत्याशङ्क्य संबंधाभावेन दूषयति–न च घटादीति । संबन्धाभावोऽसिद्ध इति शङ्कते । नन्विति । स्वरूपस्य संबंधिद्वयात्मत्वात्संबधिनोऽभावकाले संबंधोऽपि नास्तीत्याह – न तत्काल इति । प्रागभावादिकाले प्रतियोगिनः सत्त्वेऽसत्कार्यवादहानिः स्यादित्यभिप्रेत्याऽऽह–अन्यथेति । तत्परिपालनाय तदा सत्त्वाङ्गीकारे स्वरूपसंबंधहानिरित्याह – प्रागभावादीति । अभावकालेऽसत्त्वनिषेधेन कालांतरे सत्त्वस्य विवक्षितत्वान्नासत्कार्यवादभंग इति शङ्कते – नन्वभावकाल इति । विवक्षाया अन्यथात्वेऽपि तदा तदसत्त्वमावश्यकमित्याह – न कालान्तरेति ॥

काशकुशावलम्बन्यायेन शङ्कते । तदापीति ।

अभावकालेप्रतियोगिनोऽसत्त्वप्रतिपादनम् ।

तदाप्यभाव एव न तु प्रतियोगिनोऽसत्त्वमिति चेन्न । असत्त्वनिषेधे सत्त्वापत्तेः । तस्य चाभावकालेऽयोगात् । एतेन कालविशेषे प्रतियोगिनोऽभावप्रतियोगित्वमेव न

त्वसत्त्वमिति निरस्तम् । न चाभावसत्ता न प्रतियोगिनस्तदात्नसत्त्वविरोधिनीति वाच्यम् । अभावस्य स्वसमानाधिकरणप्रतियोगिसत्त्वविरोधित्वात् । अन्यथा भावाभावयोर्विरोधो दत्तोदक एव स्यात् । किं चाभावकाले 'प्रतियोगी सन्' इतिवदन् प्रष्टव्यः 'कस्तस्य घटादेर्गुणः, को वा तदाश्रयः, किमिति तदा स न चक्षुरादिना गृह्यते, कथं तदर्थं कारणगवेषणं, कथं वाऽसत्कार्यवादनिर्वाह' इति ? नन्वभावकाले प्रतियोगिनः सत्त्वं वर्त्तते, न स्वरूपमिति नोक्तदोष इति । न, तव मतेऽतिरिक्तपदार्थस्वरूपातिरिक्तसत्तायाः सामान्यादावभावात् स्वरूपस्यैव सत्त्वात् । कार्यस्वरूपाभावे तदुपरक्तसत्ताजातेरप्यभावेन घटादिसत्ताया वर्त्तमानताविरोधात् ॥

त्वया सदसद्विलक्षणानङ्गीकारादसत्त्वनिषेधे सत्त्वमेव स्यादित्याह – न असत्त्वेति । असत्त्वनिषेधे सत्त्वस्याऽऽवश्यकत्वादेवान्योऽपि प्रलापो निरस्त इत्याह – एतेनेति । किञ्चाभावप्रतियोगित्वं हि सद्विरहात्मप्रतियोगिस्वरूपमेव, तस्य चाभावकालीनत्वं विरुद्धमिति द्रष्टव्यम् । ननु विद्यमानप्रतियोगिको ऽभावः स्वकाले प्रतियोगिसत्त्वाविरोधी दृष्टः । एवमविद्यमानप्रतियोगिकाभावोऽपीति चेन्न । तस्यापि स्वाधिकरणे प्रतियोगिसत्त्वविरोधित्वात् । प्रागभावादेरपि तथात्वे प्रतियो-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गिनोऽन्यत्र सत्त्वासम्भवादसत्त्वमेव परिशिष्यत इत्यभिप्रेत्याऽऽह – न चाभावसत्तेति । किञ्चाभावकाले सत्त्वे घटस्य रूपादिरहितत्वे घटत्वाद्यनुपपत्तिः। तत्सत्त्वे वाऽनुपलब्धिविरोधः कार्यकारणभावाद्यनुपपत्तिश्चेत्याह – किञ्चाभावकालेति । नन्वभावस्य प्रतियोगिनैव सह विरोधो न प्रतियोगिसत्तया तस्यास्ततोऽन्यत्वादिति शङ्कते । नन्वभावेति । सदाकारानुगतबुद्धेः परमते सामान्यादिसाधारणैकविषयाभावात्तत्स्वरूपमेव सद्बुद्धिविषयत्वात्सत्त्वं, तथा च घटादिस्वरूपातिरिक्तसत्ताऽभावात्तदभावेऽसत्त्वमेवेति दूषयति – न तव मत इति । किञ्च जातिरूपसत्तायाः सत्त्वेऽपि न घटसत्त्वमस्ति । घटाभावे तत्समवायवत्तत्सत्ताया अप्यभावादित्याह – कार्यस्वरूपेति । किं च तत्सत्तायाः सत्त्वेऽपि तत्स्वरूपस्याभावात् स्वरूपसम्बन्धानुपपत्तिरिति द्रष्टव्यम् ।

ननु सद्बुद्धेः क्वचित्सत्तासमवायो विषयः । क्वचिच्च सत्तासामानाधिकरण्यं सत्तायां स्वरूपमिति परमतेऽपि सद्बुद्धेरनुगतैकविषयत्वसिद्धिरिति चेन्न । एकाकारबुद्धेः क्वचित् सत्तासमवायइत्यादिविषयवैलक्षण्यायोगात्सद्रूपोपादानात्मतादात्म्यादेव 'मृद्घट' इतिवत् 'सन्घट' इति प्रतीत्युपपत्तेरतिरिक्तसत्ताकल्पने गौरवाच्चेत्यभिप्रेत्याऽऽह – अधिष्ठानेति ।

अधिष्ठानसत्ताऽन्यसत्तानिरासः । अधिष्ठानात्मस्वरूपसत्ताऽतिरिक्तसत्ताजातेरभावाच्च । एवमप्यभावकार्यस्योत्पत्तेः पूर्वं सत्त्वायोगाच्च कार्यस्वरूपमभावकाले न सत् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तथापि तत्स्वरूपं ज्ञाने, न संबंधे इति वचनं तवैव शोभते न विदुषाम् । नित्यज्ञानस्य विषयेण सम्बन्धानङ्गीकारे चार्थस्य प्रकाश इति व्याहतम् । कथं तर्हि ईश्वरस्य सार्वज्ञं जगन्निर्माणं वा? । भूतभाविप्रतिसन्धानाभावादिति चेत् स्वात्मानमुपालभस्व । यतस्त्वमीश्वरे अतीताद्याकारामविद्यावृत्तिं न स्वीकुरुषे, कार्यस्य चानिर्वचनीयत्वम् । तस्मात्कदाचिदर्थप्रकाशस्यापि ज्ञानत्वं न विरुध्यते । अत एव जडव्यावृत्तिरपि । तस्य जडस्यानेकरूपत्वात् । स्वरूपलक्षणं तु प्रकाशविशेषः । प्रकाशे च विशेषो न जातिरेकव्यक्तौ तदभावात्, किन्त्वविद्यानिवृत्त्यनुकूलाऽज्ञानव्यक्तिः ।

किं च ध्वंसरूपकार्ये संज्ञाभावात्तस्योत्पत्तेः पूर्वमसत्त्वमेव स्यादित्याह – एवमपीति । स्वरूपाभावेऽपि सत्तावत्संबन्धः किं न स्यादित्याशङ्क्याऽऽह – कार्येति । ननु ज्ञाने विषयसंबन्धोऽतिप्रसङ्गपरिहाराय मृग्यते । ईश्वरज्ञाने चातिप्रसङ्ग इष्ट एव तस्य सर्वार्थप्रकाशकत्वादित्याशङ्क्य षष्ठ्यर्थसम्बन्धाभावे सर्वार्थप्रकाश इत्येतदेवानुपपन्नमित्याह – नित्यज्ञानस्येति – ईश्वर ज्ञानस्यातीतादिविषयत्वाभावे बाधकं शङ्कते--कथं तर्हीति । ईश्वरस्य सार्वज्ञ्यसाधकमतेऽभिनिविशमानं स्वान्तःकरणमेव निन्दयेत्याह – स्वात्मानमिति । नन्वविद्यावृत्तिर्वा कथमसम्बद्धातीतादिकं विषयीकुर्यादित्याशङ्क्याऽऽह--कार्यस्य चेति । अनिर्वचनीयवादे आमोक्ष

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निरन्वयनाशाभावादसत उत्पत्त्यभावाच्च, दुर्निरूपसूक्ष्मरूपेण पदार्थमात्रस्यातीतादिकालेऽपि विद्यमानतया कल्पितसम्बन्धेन सार्वज्ञ्याद्युपपत्तिरिति भावः। अर्थप्रकाशकत्वस्य ज्ञानोपलक्षणत्वमुक्तमुपसंहरति। तस्मादिति। अर्थप्रकाशकत्वस्य तटस्थलक्षणत्वे स्वरूपलक्षणं किमित्यपेक्षायां वदति। स्वरूपेति। तर्हि प्रकाशव्यतिरिक्तविशेषो जातिरेवेत्याशङ्क्याऽऽह — प्रकाशे चेति। स परमते आकाशस्वरूपवद्व्यक्तिस्वरूपमेव तद्विशेषः। स चाविद्यानिवृत्तिस्वपरविषयव्यवहारानुकूलस्वरूपेणोत्तर व्यावृत्तः प्रतीयत इत्यभिप्रेत्याह — किं त्विति।

किञ्च परमतेऽपि ज्ञानत्वं व्यक्तिमात्रे वर्तते, उत व्यक्तिविशेषे ?। नाद्यः। घटादावपि प्रसङ्गात्। द्वितीये स विशेषो ज्ञानत्वम्, उत व्यक्तिस्वरूपमेव ?। नाद्यः। आत्माश्रयापातात् ज्ञाने ज्ञानत्वं च न स्यात्। द्वितीये न विवादइत्यभिप्रेत्याह। जातिवादिनापीति।

ज्ञानस्य व्यक्तिस्वरूपत्वकथनम्

जातिवादिनापि व्यक्तिविशेषस्य वक्तव्यत्वात्। तस्य चार्थसम्बन्धेऽर्थप्रकाशत्वं दीपस्येव। ततोऽर्थाभावेऽपि तस्य ज्ञानत्वं न विरुध्यते। अर्थप्रकाशत्वं ज्ञानत्वमिति लक्षणे त्वर्थपदं व्यर्थम्। यत्तूक्तम्। अहमिदं जानामीत्यानुभवात् ज्ञातृज्ञेयनिरूपं ज्ञानमिति तत्तथैव। न हि यत्र ज्ञानं तथा प्रतीयते तदनाश्रयमविषयमस्माभिरङ्गीक्रियते। अहमर्थधर्मस्य वृत्तिज्ञानस्य साक्षिविषयस्य सविषयत्वाभ्युपगमात्। साक्षिण एवात्मत्वाभ्युपगमात्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यच्च ज्ञानस्यानादित्वेनाश्रयाद्यनपेक्षायां प्रागभावादिविरोधिदृष्टान्तोदाहरणम्। तदयुक्तम्। प्रागभावादेर्हि धर्मिग्राहकमानसिद्धं तथात्वम्। न च नित्यसाक्षिणस्तथात्वे किंचिन्मानमस्ति। प्रत्युत तस्याश्रयानिरूपणादगुणत्वाच्चेत्यप्युक्तम्।

ज्ञानस्यप्रमाऽप्रमात्वमेवेतिनिश्चयनिरासः यत्तु प्रमाऽप्रमाबहिर्भूतज्ञानं नास्तीति। तन्न। पराभिमतनिर्विकल्पकस्य तदुभयविलक्षस्य सत्त्वात्। न हि निर्विकल्पकं तद्वति तत्प्रकारकं तदभाववति तत्प्रकारकंच। तस्य निष्प्रकारकत्वात्। तस्यापि यथार्थत्वमितीतिचेत् तर्हि, यत्र यत्प्रतीयते तत्र तस्य विद्यमानत्वम्। अविद्यमानत्वञ्चायथार्थत्वम्। किंवा तत्र तस्याबाध्यत्वं यथार्थत्वम्। बाध्यत्वं चायथार्थत्वम्।

उक्तप्रकाशविशेषस्याकाशस्य शब्दाश्रयत्ववदर्थप्रकाशकत्वं कादाचित्कमित्याह। तस्य चेति। किञ्चेच्छादिव्यावृत्तये प्रकाशकत्वस्यावश्यकत्वात्तदेव तत्तद्रूप साधारणं लक्षणमस्तु। तच्चास्मन्मतेऽनन्तवृत्तिज्ञानेऽप्यधिष्ठानतयानुगतं प्रकाशबुध्यालम्बनं चैतन्यमेव। तव मते च ज्ञानत्वमित्यर्थपदं व्यर्थमित्याह। अर्थप्रकाशत्वमिति। ज्ञानस्य निर्विषयत्वादिकं धर्मिग्राहकमानविरुद्धमित्युक्तमनूद्य दूषयति। यच्चेत्यादिना। अनादिज्ञानस्य साश्रयत्वे परोक्तं प्रागभावाद्युदाहरणं वैषम्येण दूषयति। यत्त्वित्यादिना। न केवलमाश्रितत्वे मानाभावः। अनाश्रयत्वेऽपि मानमस्तीत्याह। प्रत्युतेति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चोद्यान्तरमनुवदति । यत्त्विति । किं तद्वति तत्प्रकारकं ज्ञानं प्रमा? तदभाववति तत्प्रकारकंज्ञानमप्रमा? । उत यथार्थज्ञानंप्रमा ? । अयथार्थज्ञनमप्रमा ? । आद्यं दूषयति। भन्नेति । द्वितीयं शङ्कते । तस्येति । अस्मिन्पक्षे साक्षि-ज्ञानस्य प्रमाऽप्रमाबहिर्भाव एव नास्तीत्यभिप्रेत्य विक-ल्पयति । तर्हि किमिति ॥

प्रथमकल्पे प्रमैवेत्याह । आद्य इति ।

आद्य आत्मस्वरूपमपि ज्ञानं यथार्थम् । प्रतीतिकाले तद्गोचरप्रत्ययस्य विद्यमानत्वात् । न चैवं तत्प्रतिभास्यस्याविद्यादेर्वास्तवत्वापत्तिः । स्वाधिकरणसम्बन्धाश्रयलक्षणविद्यमानत्वस्य स त्वात् । त्रैकालिकबाधाभावोपलक्षितस्वरूपाख्य सत्वस्यान्यत्वात् । शुक्तिरूप्यादेर्वस्तुनोऽपि साक्षि वेद्यत्वात् । अत एव यथार्थत्वे गुणजन्यत्वं त्वदभिमतेश्वरज्ञाने तद-स्यादिति निरस्तम् । द्वितीये आत्मरूपज्ञानप्रत्ययार्थं तद्-भावाच्च बाध्यत्वाच्च दोषाजन्यज्ञानस्य गोचरप्रपञ्चस्य बाधितार्थविषयज्ञानत्वमनुपपन्नमिति वाच्यम् । न च दोषो हि जन्ममिथ्याज्ञानोत्पत्तौ हेतुः । मिथ्याविषयत्वे मिथ्याज्ञाने सति दोषेण तस्य तदविषयत्वाभावात् । स्वरूपज्ञानं च न विना दोषमपेक्षते । अन्यथा गुण-जन्यमिति न दोषाप्रतिबद्धसामग्रीजन्यस्य वा ज्ञान जन्यस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्य यथार्थत्वमिति नत्वदभिमतेश्वरज्ञानं यथार्थं स्यात् । अपि च त्वदभिमतेश्वरो जीवानां भ्रान्तिं जानाति न वा? । अन्त्ये तस्यासर्वज्ञत्वं जीवभ्रान्त्युच्छेदायोपदेशोऽपि न स्यात् । आद्ये ईश्वरज्ञानमप्यसदर्थविषयं वक्तव्यम् । ज्ञाने विषयनिरूप्यत्वनियमस्य त्वयैवोक्तत्वात् । अन्यथा तस्य भ्रान्तित्वानवगमाच्च ।

तर्हि विद्यमानस्यैव सत्त्वरूपत्वात्प्रपञ्चसत्यतापत्तिरितिचेन्न । विद्यमानत्वापेक्षया सत्त्वस्यान्यत्वादित्याह । न चैवमिति । ननु सत्त्वाभावे साक्षिवेद्यत्वमेवानुपपन्नमित्यत आह । शुक्तिरूप्येति । देशान्तरादौ सतो वाऽसतो वा रूप्यस्य सन्निकर्षाभावेन चाक्षुषत्वायोगादनिर्वचनीयस्य साक्षिवेद्यत्वमेवेति ख्यातिवादे वक्ष्यमाणत्वादिति भावः । शुक्तिरूप्यज्ञानस्य विद्यमानार्थस्य गुणाजन्यत्वाभावादेव चोद्यान्तरं निरस्तमित्याह । अत एवेति । तव मतेऽपि नायं नियम इत्याह । त्वदभिमतेति । द्वितीये कल्पे साक्षिरूपज्ञानस्याप्रमारूपत्वेन न तद्बहिर्भाव इत्याह । द्वितीय इति । साक्षिज्ञानस्यायथार्थत्वे दोषजन्यत्वं स्यात् तस्यैव तत्प्रयोजकत्वादित्याशङ्क्याह । न च दोषाजन्येति । सिद्धान्तदोषो न भ्रान्तिज्ञानकारणम् । तस्य नित्यत्वात् । किन्तु तद्विषयोत्पत्तावेवेति नोक्तानुपपत्तिः । परमतेऽपि भागभावप्रतियोगिभ्रमोत्पत्तावेव प्रयोजको दोषः, नतु तस्य मिथ्यार्थविषयकत्वेऽपि केवलव्यतिरेकाभावादिति हेतुमाह । दोषो हीति । दोषजन्यस्यैव बाधितार्थवि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षयत्वेऽतिप्रसङ्ग इत्याह । अन्यथेति । स्वतः प्रामाण्यमते न दोषाप्रतिबद्धमित्युक्तं दोषाजन्यस्याप्ययथार्थत्वं परमतेऽप्यभ्युपेयमित्यभिप्रेत्य विकल्पयति । अपिचेति । द्वितीये परमतेनेकविरोध इत्याह । अन्त्य इति । आद्ये अयथार्थत्वविशिष्टभ्रान्तिविषयेश्वरज्ञानस्य विशेषणांशे अयथार्थत्वं तवापि संमतम् । भ्रान्तिविषयानवगमे भ्रान्तित्वस्यैव दुर्ज्ञेयत्वादित्याह आद्य इति ।

ननु भ्रान्तिज्ञाने ऽबाधिते भ्रान्तित्वादेरपि प्रकारस्याबाधितत्वात्तद्विषयमीश्वरज्ञानं यथार्थमेवेति चोदयति । ननु तदभावेति ।

भ्रान्तिलक्षणानुपपत्तिप्रतिपादनम् ।

ननु तदभाववति तत्प्रकारकत्वं भ्रान्तित्वं तच्च ज्ञानेऽबाधितमिति चेन्न । तदभाववति तद्वैशिष्ट्यस्यानवगमे ज्ञाने तत्प्रकारकत्वस्यैवाधिगन्तुमशक्यत्वात् । एतेनानात्मस्वरूपंज्ञानं यदि बाधितार्थविषयं स्यात्तर्हि तद्रूप ईश्वरोऽपि भ्रान्त एव स्यादित्यापादनं प्रत्युक्तम् । बाधितमर्थं बाधितत्वेन जानतस्तदभावात् । अत एव पारमेश्वरज्ञानस्यायथार्थत्वे तन्मूलवैदिकव्यवहारः सर्वोपि विप्लवेतेति परास्तम् । तस्याविद्याकाले विद्यमानार्थत्वेन तन्मूलव्यवहारस्य विद्यमानार्थत्वात् ।

यदप्युक्तम्, ज्ञानाविरोधिनो न ज्ञानत्वं तद्विरोधेऽज्ञानं नित्यनिवृत्तं स्यादिति तन्न । वृत्तिसहकृतसाक्षिणोऽज्ञानविरोधित्वमुक्तं न प्रसम-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र्तव्यम् । यच्चान्यदपरोक्षज्ञानस्यैवात्मत्वे न हेतुरिति । तदसत् । वृत्तिमात्रस्यानात्मत्वात् प्रकाशमात्रस्यात्मत्वाच्च ।

यत्त्वज्ञानाश्रयस्यैवात्मनः सुखादिज्ञानाश्रयत्वानुभवादित्यादि । तदस्माकं न प्रतिकूलम् । अज्ञानाश्रयस्यैव साक्षिणोऽन्तःकरणाधिष्ठानस्य सुखादिरूपवृत्त्यधिष्ठानत्वात् । वृत्तौ च चैतन्यप्रतिफलनात्तदाश्रयत्वानुभवः । अत एव संसारस्य स्वसमानाधिकरणज्ञाननिवर्त्यत्वं दुःखादिरूपानर्थस्य मोक्षसामानाधिकरण्यं च सङ्गच्छते । अज्ञाननिवर्तकवृत्तेर्दुःखादेश्चान्तःकरणाधिष्ठानसाक्षिण्यध्यासात् ॥

भ्रान्तित्वस्यायथार्थघटितत्वात्तद्विषयज्ञानस्यायथार्थविषयत्वं दुर्वारमित्याह । नतदभाववतीति । तटस्थेश्वरज्ञानप्रतिबन्ध्येव परिपूर्णेश्वरे दोषारोपणं निरस्तमित्याह । एतेनेति । ननु सर्गाद्यकाले परमेश्वरस्यैव वेदतदर्थोपदेष्टृत्वात्तज्ज्ञानस्यायथार्थत्वे तन्मूलव्यवहारस्यान्धपरत्वादित्याशङ्क्याह । अत एवेति । अतःशब्दार्थमाह । तस्येति । तदुपदर्शितसाध्यसाधनभावादिव्यवहारस्यामोक्षं बाधाभावाद्भोजनादिव्यवहारवत्प्रामाणिकतोपपत्तेरिति भावः । किं साक्षिज्ञानमज्ञानविरोधि उत न । उभयथाप्यनुपपत्तिरित्युक्तं चोद्यमनूद्य दूषयति । यदप्युक्तमित्यादिना । न प्रस्मर्तव्यं न विस्मरणीयमित्यर्थः । ज्ञानविशेषस्यैवात्मत्वे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नियामकं नास्तीत्युक्तं चोद्यमनुवदति। यज्ज्ञान्यदिति ।
दृश्यजन्यपरतन्त्रज्ञानमात्रस्यानात्मत्वं स्वप्रकाशनित्य-
स्वतन्त्रज्ञानस्यात्मत्वमिति नियामकमस्तीत्याह । तद
सदिति । ज्ञानस्यात्मत्वेऽनुभवविरोधमुक्तमनुवदति ।
यत्त्वज्ञानेति । अयसो वह्नितादात्म्याद्दग्धत्वादिवद्भो-
क्तुरपि भोक्तृतादात्म्याद्भोगवत्त्वानुभव इत्याह । तद
स्माकमिति । अशनायाद्यतीतेऽप्यात्मन्यौपाधिकसंसा
राङ्गीकारान्न बन्धमोक्षयोर्वैयधिकरण्यं, न वा बन्धतन्निव
र्तकज्ञानयोरित्याह । अत एवेति । अतःशब्दार्थमाह
अज्ञानेति। अथ "यो वेद इति जिघ्राणि"इत्यादिश्रुतिर-
प्यौपाधिकममातृत्वविषयेत्याह । एवं मन्तृत्वादीति ।
संविद्‌ात्मनोरभेदं एवं मन्तृत्वादिविषया श्रुतिरपि द्र-
प्रतिपादयति
ष्टव्या । तस्माद्देवदत्तोहमनुभवगोचरो देवदत्तोह-
मनुभवे प्रकाशमानस्वव्यतिरिक्तद्रष्टृकः, दृश्यत्वा-
दित्यनुमानाल्लाघवानुभवाभ्यां सहकृतात्संविदा-
त्मनोरभेद इति । किञ्च योऽयमहमाकारादिसाक्ष्य-
नुभवः स आत्मनो न भिद्यते। संवेदनत्वात् । व्यति-
रेकेण घटवत् । नचाप्रयोजकता । आत्मधर्मनित्य-
ज्ञानाभावेनोत्पादविनाशशीलस्य ज्ञानस्यात्मगु-
णत्वे आत्मनः कूटस्थताहानेः । स्यादेतत् आत्मन
उत्पत्तिविनाशानङ्गीकारान्न कूटस्थताहानिः । न-
ह्यन्योत्पत्तिविनाशाभ्यामन्यस्य कौटस्थ्यं हीयते ।
अविद्यानिवृत्त्या त्वदभिमतात्मनोऽपि तत्प्रसङ्गादि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ति । भवेदेवं यदि कार्यसत्त्वं कारणाद्भिद्येत । जायमानं हि कार्य्य प्रागपि सदिति वक्तव्यम् । असत उत्पत्त्यनुपपत्तेः । शशशृङ्गवत् । ननु न नरशृङ्गतुल्यं कार्यं, अपि तु कारणे कार्यस्य प्रागभाव इति चेत् अस्तु प्रागभावः । तत्काले कार्यं किं सत्, तथा सति किं कारणे वर्त्तते, किं वान्यत्र । न सर्वथापि । प्रागभावप्रतियोगिनोरेकदाऽवृत्तेः ।

वस्तुतस्तु अत्र प्रमेयादित्रितयसाक्षी यः स आत्मेति श्रुत्यर्थः । प्रकाशरूपेऽपि तस्मिन् वृत्तिकृतभेदेन प्रकाशवत्त्वसम्भवाद्वेदेति न विरुध्यते । परमते एव वेद्यस्य ज्ञानानुवेत्तृत्वमनुपपन्नम् । कर्त्तुः कर्मत्वविरोधादिति भावः । तर्कितेऽर्थेऽनुमानमाह । तस्मादिति । यज्ञदत्तात्मघटयोः सिद्धसाधनतानिवृत्तये देवदत्ताहमिति विशेषणद्वयम् । यज्ञदत्ताहमनुभवे देवदत्तपरोक्षानुभवयोः प्रकाशमानयज्ञदत्तात्मद्रष्टृकत्वेनार्थान्तरतानिवृत्तये साध्येऽपि तद्विशेषणद्वयम् । लाघवानुभवाभ्यामिति । संविदात्मनोरभेदे लाघवान्ममात्मेति प्रमातृभिन्नात्मनोऽनुभवात्तस्यापि दर्शनाश्रयत्वे स्वव्यतिरिक्तद्रष्टृकत्वापातेनानवस्थाप्रसङ्गाच्चेत्यर्थः । नित्यानुभवस्य साक्षादेवात्मत्वं साधयति । किं चेति । तस्यात्मभेदे ज्ञानगुणकस्यैवात्मत्वं वक्तव्यम् । तथा चात्मन उत्पत्त्यादिप्रसङ्ग इति चोदयति । स्यादेतदिति । कार्यकारणयोर्भेदस्य दुर्निरूपत्वात्प्रपञ्चसत्यत्ववादिना तयोरभेद एव वाच्यः । तथा च कार्यविकारेण कारणमेव विकारवत् स्यादित्यभिप्रेत्याह । भवेदेवमिति । कार्यस्य कारणभेदं निषेद्धुं तस्योत्पत्तेः । प्राग-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सत्त्वं निषेधयति । जायमानं हीति । उत्पत्तेः प्राक्स-त्त्वाभावेऽप्यत्यन्तासत्त्वमपि नास्तीति शङ्कते । ननु न नरशृङ्गेति प्रागभाव एवाप्रामाणिक इति वक्ष्यते तम-ङ्गीकृत्यापि तत्काले कार्यं सदित्यङ्गीकारे दूषणमाह । अस्त्विति । प्रतियोगिनः प्रागभावनिवृत्तिरूपत्वात्तयोः समानकालत्वं विरुद्धमित्याह । प्रागभावेति ।

द्वितीयं दूषयति । कारणादिति ।

ज्ञानात्मनोरभेदविपर्ययप्रयोजनकशङ्कानिरासः।

कारणादन्यत्र कार्यस्यासमवायात् । अन्यसमवायिनोऽन्याऽनुपादेयत्वात् । प्रागभावकाले च प्रतियोगिनः सत्तानभ्युपगमे कथं न नरशृङ्गतुल्यता । न हि प्रागभावसत्त्वैव प्रतियोगिनः सत्ता । अन्यसत्तयाऽन्यस्य सत्त्वेऽतिप्रसङ्गात् । ननु, नरविषाणं कालत्रयेऽप्यसत्, कार्यं तूत्पत्तेः पूर्वमिति वैषम्यमिति चेन्न । किञ्चित्कालमसतः कालभेदेऽपि सत्त्वानुपपत्तेः । किं सत्त्वासत्त्वे पदार्थधर्मौ स्वरूपं वा ? । नाद्यः । असत्त्वकालेऽपि पदार्थसद्भावप्रसङ्गात् । अनित्यधर्मस्याश्रयादृतेऽनवस्थानात् । धर्मत्वेऽसत्त्वव्याघाताच्च । न द्वितीयः । एकस्य सदसदात्मत्वविरोधात् । ननु कालभेदेनाविरुद्धमिति चेन्न । धर्मस्य हि कालभेदेन स्वहेतुसमाजाद्व्यत्ययो न तु स्वरूपस्य । तथासति स्वरूपभेदापत्तेः । न ह्यभावः कालभेदेन भावो भवति । इतःपूर्वमसदित्यसतो बुध्यनुपपत्तेश्च । तस्य निः-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वभावस्यावच्छेदककालासम्बन्धात् । तस्माद्यत्किञ्चित्कालमसत् तत्सर्वदाऽसदेव, यत्सत्तत्सर्वदा सदेव, न तूभयात्मकं किञ्चिदस्ति । तदाह भगवान् । नासतो विद्यते भावो नाभावो विद्यते सत इति ।

अन्यसमवायिनः पटस्य तन्तूपादानकत्वमपि न स्यादिति । उक्तदोषपरिहाराय प्रागभावकाले कार्यसत्त्वानभ्युपगमेऽनिर्वचनीयानङ्गीकारादसत्त्वमेव परिशिष्यत इत्याह । प्रागभावेति । ननु तत्प्रागभावस्य सत्त्वान्न तस्यासत्त्वमिति चेन्न । तत्सत्त्वेऽपि प्रतियोगिनोऽसत्त्वात् । न हि वन्ध्यासत्तया तत्पुत्रोऽपि सद्भवतीत्यभिप्रेत्याह । न हीति । उत्पत्तेः पूर्वमसत्त्वाविशेषेऽपि नरविषाणाद्विशेषोऽप्यस्ति, तत उत्पत्तिरुपपन्नेति चोदयति । नन्विति । उत्पत्तौ सत्यां नरविषाणवैषम्यम्, वैषम्ये च सति परस्पराश्रयः स्यादित्यभिप्रेत्याह । न किञ्चित्कालमिति । कदाचिदसतः कालत्रयेऽप्यसत्त्वमुपपादयितुं विकल्पयति । किमिति । आद्ये असत्त्वमेव धर्मिसत्तां विनानुपपन्नमित्याह । नाद्य इति । ननु प्रलये घटत्वादेरिव विनापि धर्मिणं धर्मोऽस्त्वित्याशङ्क्य कादाचित्कधर्मस्य साश्रयत्वनियमादित्याह । अनित्येति । किञ्च, धर्मिणः सत्त्वाभावे धर्मस्यैवानुपपत्तेस्तत्सत्त्वमावश्यकं, तथाचोपजीव्यसत्त्वविरोधादसत्त्वमेव न स्यादित्याह । धर्मत्वे इति । द्वितीये वस्तुनो द्वैरूप्यं विरुद्धमित्याह । न द्वितीय इति । ननु यथा एक एव घटः श्यामो रक्तश्च कालभेदेन एवं स एव सदसदात्मापीत्याशङ्कते । नन्विति । घटस्तु कालभेदेन पूर्व-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विपरीतरूपाश्रयः न तस्य स्वरूपे द्वैविध्यमस्तीति परिहरति । न धर्मस्येति । व्यत्ययो व्यत्यासः । एकस्य नाश इतरस्योत्पत्तिरिति यावत् । सत्त्वासत्त्वयोर्भेदात्तावन्मात्रस्वरूपोऽपि धर्मो भिद्येतेत्याह । तथा सतीति । असतःकालविशेषसम्बन्धाभिधानमप्ययुक्तमित्याह । इतः । पूर्वमिति । आत्मत्ववत्सत्त्वासत्त्वे व्यवस्थिते एवेति सर्ववादिनः प्रत्याह । तस्मादिति । उक्तेऽर्थे गीतावचनं प्रमाणयति । तदाहेति ॥

असतोऽसत्त्वमेवेतिनियमे ब्रह्मणोऽप्यसत्त्वमेव स्यादिति चोद्यमनुवदति । यत्त्विति ।

असतोअसत्त्वमेवेति नियमे ब्रह्मणोऽप्यसत्त्वापत्तिरित्याशङ्क्य तन्निरसनम् ।

यत्तु तथासति दृश्यात्मनाऽसद्रूपस्य ब्रह्मणः स्वरूपेणाप्यसत्त्वं स्यादिति । तन्न । अस्थूलादिवाक्यैर्निष्प्रपञ्चतया प्रमितस्य ब्रह्मणः सत्यादिवाक्यैः सदादिरूपेणाप्रमितत्वेनात्मनोऽसत्त्वे सर्वशून्यताप्रसङ्गेनास्मीत्यनुभवस्यानन्यथासिद्धत्वेन च रूपान्तरेणासत आत्मनः स्वरूपेणासत्त्वायोगात् । पटरूपेणासतो घटस्य स्वरूपेण सत्त्वेन व्यभिचाराच्च । न च घटादेः सत्त्वेन प्रमितत्वात् किञ्चित्कालमसतो न सर्वकालासत्त्वनियम इति वाच्यम् । घटादिसद्बुद्धेरधिष्ठानविषयतयान्यथासिद्धत्वात् । सत्तान्तरकल्पने गौरवात् । किञ्च कारणे समवायः किमसत उत्पत्तिः, स्वस्मिन् सत्ता-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समवायो वा । आद्येऽपि स्वोपलक्षितसमवायः स्वविशिष्टसमवायो वा ? । नाद्यः । तस्य नित्यसमवायवादिनः सर्वदा सत्त्वेन ज्ञानादौ मनसादेरकारणत्वप्रसङ्गात् । बुद्ध्याद्यनित्यत्ववादिनोऽनित्यसमवाये च न मानमस्ति । नापि द्वितीयः । असतो विशेषणत्वायोगात् ।

यद्येन रूपेण किञ्चित्कालमसत् तत् तेन रूपेण सर्वदाऽप्यसदितिनियमाद् ब्रह्मणः सर्वदा दृश्यरूपेणासत्त्वस्येष्टत्वात् सत्यादिरूपेण कदाचित्तदसत्त्वे प्रमाणाभावात् । प्रत्युत तेन रूपेण सत्त्वस्यैव श्रुतियुक्त्यनुभवसिद्धत्वादित्यभिप्रेत्याह । तन्न । अस्थूलादीति । घटादिषु सदनुभवस्याधिष्ठानसत्तादात्म्यविषयत्ववदात्मनि सदनुभवस्य न तदधिष्ठानसद्विषयत्वम् । तदधिष्ठानाभावात्, भावे वा तस्यैवास्मदात्मत्वादित्यभिप्रेत्यानन्यथासिद्धत्वेनेत्युक्तम् । त्वदुक्तनियमस्य तव मत एव व्यभिचार इत्याह । पटरूपेणेति । घटादेरपि सर्वदाऽसत्त्वापादनं प्रमाणविरुद्धमित्याशङ्क्याह । न च घटादेरिति। ननु प्रतीत्यनुसारेण घट एव स्वाभाविकसत्ता किं न स्यादित्याशङ्क्याह । सत्त्वान्तरेति । न हि "सन् घट" इत्यत्र सत्त्वस्य घटकधर्मत्वं प्रतीयते किं तु "मृद् घट" इतिवत् सत्तादात्म्यमात्रं तच्च तद्रूपेणोभयथादिसम्मतात्मतादात्म्यमेवेति सत्तान्तरकल्पने गौरवं स्यादिति भावः । उत्पत्तिशब्दार्थपर्यालोचनयाप्यसदुत्पत्तिरयुक्तेत्यभिप्रेत्य विकल्पयति । किञ्चेति। किं समवायो नित्य एकः, उतानित्योऽनेकः ? । आद्ये कार्योपलक्षितसमवायस्य तत्प्रा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गभावकालेऽपि सत्त्वात् त्वदभिमतकार्यकारणभावो न स्यादित्यभिप्रेत्याह । तस्य नित्येति । द्वितीये समवायसाधकानुमानस्य स्वरूपसम्बन्धेनार्थान्तरत्वान्नानन्तसमवायः प्रामाणिक इत्याह । बुद्ध्यादीति । कारणे कार्यविशिष्टः समवाय उत्पत्तिरिति पक्षं दूषयति । नापीति । असतो विशेष्यसम्बन्धाभावेन विशेषणत्वायोगादित्यर्थः ।

आद्ये द्वितीयं दूषयति । नापीति ।

नापि स्वस्मिन् सत्तासमवाय उत्पत्तिः । असति स्वस्मिन् तदनुपपत्तेः । कार्यसत्त्वस्योत्पत्तिप्रयोज्यत्वात् । न च कार्यस्याद्यसमयसम्बन्ध उत्पत्तिः । सम्बन्धस्य संयोगत्वे तस्योत्पत्त्यनन्तरभावित्वात् । समवायत्वे घटादेः काले तदभावात् । नापि स्वरूपसम्बन्धः । तस्य स्वरूपद्वयात्मत्वे समयस्यापि घटोत्पत्तित्वप्रसङ्गः । घटस्यापि स्वोत्पत्तित्वेनोत्पन्नो घट इति प्रतीत्यनुपपत्तेः, समयस्याद्यत्वाभावाच्च । न च स्वसमानकालीनपदार्थप्रतियोगिकध्वंसानाधारसमयाधारत्वं कार्यस्याद्यसमयसम्बन्ध इति वाच्यम् । स्वपदेनोत्पद्यमानपदार्थाभिधाने आत्माश्रयात्, उत्पत्तेरेव निरूप्यमाणत्वात् । वस्तुमात्राभिधाने च द्वितीयक्षणावच्छिन्नघटस्याप्युत्पत्तिप्रसङ्गः । तस्यापि द्वितीयक्षणावच्छिन्नस्वसमानकालीनप-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दार्थप्रतियोगिकध्वंसानाधारद्वितीयक्षणे सत्त्वात् । ननु प्रथमक्षणोऽपि तत्क्षण इति तत्कालस्थितिकशब्दादिध्वंसस्य द्वितीयक्षणे सत्त्वात्, न तत्प्रसङ्ग इति चेत् ॥

किमसति स्वस्मिन् सत्तासमवायः उत, सति ? । आद्यं दूषयति । असतीति । द्वितीये परस्पराश्रयः स्यादित्यभिप्रेत्याह । कार्यसत्त्वस्येति । पराभिमतलक्षणान्तरं दूषयति । नचेति । किं कार्यस्याद्यसमये न सम्बन्धः संयोगः समवायो वा स्वरूपसम्बन्धो वा । आद्ये दोषमाह । सम्बन्धस्येति । गुणादौ संयोगाभावाच्चेति द्रष्टव्यम् । द्वितीये कारणे समवाय इत्यत्रोक्तदूषणे सत्येव दोषान्तरमाह । समवायत्व इति । असतो निःस्वरूपत्वात्स्वरूपद्वयात्मकसम्बन्धो न सम्भवतीत्याह । नापीति । दूषणान्तरमाह । तस्येति । घटो घटवानितिवदुत्पत्तिमानित्याद्यनुभवोऽपि न स्यादित्याह । घटस्यापीति । समयस्यैकत्वेनाद्यस्य समयोऽपि नास्तीत्याह । समयस्येति । एकस्यापि समयस्य परैर्विवक्षितमाद्यत्वं निराकरोति । न च स्वसमानेति । स्वं कार्यत्वेनाभिमतं घटादि तत्कालीना ये पदार्थाः शब्दबुद्ध्यादयस्तत्प्रतियोगिको यो ध्वंसः तदनाधारत्वं समयस्याद्यत्वम् । कार्यस्योत्पत्तिरित्यर्थः । किमत्र स्वपदेनोत्पद्यमानं विवक्षितं उत, वस्तुमात्रम् ? । आद्ये आह । स्वपदेनेति । द्वितीयेऽतिव्याप्तिरित्याह । वस्तुमात्रेति । ननु स्वशब्दस्य क्षणविशेषाऽनवच्छिन्नकार्यस्वरूपपरत्वान्नोक्तातिव्याप्तिरिति चोदयति । ननु प्रथमेति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत्र किं स्वसमानकालीनयत्किञ्चित्पदार्थप्रति-
योगिकध्वंसानाधारत्वं विवक्षितं उत, तत्कालीनयाव-
त्पदार्थप्रतियोगिकध्वंसानाधारत्वं, किं वा तत्कालीन-
पदार्थप्रतियोगिकयावत्ध्वंसानाधारत्वम् । आद्ये द्विती-
यक्षणेऽतिव्याप्तिस्तदवस्थैव । घटकालीनमृदादिप्रति-
योगिकध्वंसानाधारत्वस्य तदापि सत्त्वादित्याह । न
यत्किञ्चिदिति ।

न यत्किञ्चित्तत्कालीनपदार्थप्रतियोगिक-
ध्वंसानाधारत्वस्य द्वितीयक्षणेऽपि सत्त्वात् चर-
मध्वंसकालीनकार्यपदार्थाभावेन तद्ध्वंसाभा-
वात् । तदनाधारकालस्याप्रसिद्ध्या चरमध्वंसे
तादृशकालाधारत्वस्यासंभवात् । न च चरमध्वं-
सासिद्धिः । सर्वमुक्तावदृष्टाभावेन कार्यमात्रस्याभा-
वात् । तस्मान्नासत्कार्यवादो युज्यते । सत्कार्य-
वादेऽपि यदि कार्यसत्त्वं कारणाद्भिन्नं तर्हि कार-
णान्वेषणं व्यर्थम् । तेन विनापि तत्सत्त्वात् ।
अनुपलब्धेश्च । अवस्थाविशेषः कार्यमिति पक्षो-
ऽपि विशेषस्य प्राग् सत्त्वासत्त्वाभ्यां प्रतिवक्तव्यः ।
तस्मात्कारणमेव कार्यस्य स्वरूपम् । तेन कार-
णेन तत्तदतर्क्यकार्यरूपमापद्यते । तत्र रूपान्तरं
नानिर्वचनीयं किंतु वास्तवमिति मते आत्मैव
बुद्ध्यादिरूपेण जायते विनश्यति चेति कथं न
कौटस्थ्याहानिः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वितीये घटकालीननित्यपदार्थप्रतियोगिकध्वंसाभावादसंभवः । तृतीये घटकालीनत्रिचतुरपदार्थप्रतियोगिकयावत्ध्वंसानाधारत्वं द्वितीयक्षणे नास्तीत्यतिव्याप्तिरेव । ननु, स्वसमानकालीनयावदनित्यपदार्थप्रतियोगिकध्वंसानाधारत्वं विवक्षितमिति चेत् तत्र किं यावत्ध्वंसानाधारत्वं यावत्ध्वंसाधारभिन्नत्वमुत, यावत्ध्वंसात्यन्ताभाववत्वम् । आद्ये द्वितीयक्षणेऽतिव्याप्तिः । द्वितीये यावत्ध्वंसप्रतियोगिकसामान्याभाववत्त्वं उत, तत्प्रतियोगिकयावद्विशेषाभाववत्त्वम् । नाद्यः । ध्वंसेषु सामान्याभावेन तदवच्छिन्नप्रतियोगिकसामान्याभावायोगात् । न द्वितीयः । भावस्य स्वात्यन्ताभावसमानकालीनत्ववदभावानामपि तथात्वात् । अन्यथा तदत्यन्ताभावस्य त्रैकालिकत्वानुपपत्तेः । तथा च द्वितीयक्षणोत्पन्नध्वंसदेशे तदत्यन्ताभावाभावेऽपि तत्क्षणे तदत्यन्ताभावस्यापि तथात्वादतिव्याप्तिर्दुर्निवारेति भावः । चरमध्वंसोत्पत्तौ अव्याप्तिमप्याह । चरमेति । ननु कार्यप्रवाहस्यानादित्ववदनन्तत्वात्कुतश्चरमध्वंसः, कुतस्तरामव्याप्तिरित्यत आह । न चेति । सर्वमुक्त्यभावे स्वस्य नित्यसंसारित्वशङ्कया कस्यापि निःशङ्कप्रवृत्त्यनुपपत्तेर्मोक्षशास्त्रमनर्थकमेव स्यादिति भावः । असदुत्पत्तिनिराकारणमुपसंहरति । तस्मादिति । सत्कार्यवादेऽपि कार्यकरणयोः सत्त्वभेदे दोषमाह । सत्कार्यवादेऽपीति । उत्पत्तेः पूर्वं कार्यसत्त्वे प्रमाणमपि नास्तीत्याह । अनुपलब्धेश्चेति । आरम्भवादोक्तदोषं परिणामवादेऽप्यतिदिशति । अवस्थाविशेष इति । किं तर्हि कार्यतत्त्वमित्याशङ्क्य कारणमेव वास्तवं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रूपं कार्याकारस्त्वनिर्वचनीय इत्याह । तस्मात्कारण-
मेवेति । तेन तेनेति । तत्तन्निमित्तकारणेनेत्यर्थः । अनि-
र्वचनीयवादे कार्यविकारेणास्याविकारित्वेऽपि कारणा-
भिन्नकार्यसत्यत्वे तद्विकारेणापि विकारि स्यादेवेत्याह ।
तच्च रूपान्तरमिति ।

यदुक्तमविद्यानिवृत्त्याप्यात्मनोऽपि निवृत्तिप्रसङ्गा-
दिति तत्राह ।

ज्ञानिनोऽविद्यानिवृत्तिवदात्मनिवृत्तेर्निरसनम् ।

न चाविद्यानाशेऽप्ययं दोषः
समानः । अविद्याया आत्मव्यतिरेकेणानिर्वचनीय
सत्त्वाभ्युपगमात् । अविद्यानिवृत्तेः कूटस्थात्ममा-
त्रत्वाच्च । किञ्च बुद्ध्यादिरात्मनि व्याप्य वर्तते उत,
तत्प्रदेशे ? । नाद्यः । शरीरबाह्यप्रदेशेऽपि तदुप-
लम्भप्रसङ्गात् । न द्वितीयः । निरवयवस्य प्रदे-
शाभावात् । नन्वौपाधिकः प्रदेशोऽस्तीति चेन्न ।
उपाधिज्ञाप्यस्तज्जन्यस्तदधीनः प्रदेशो निष्प्र-
देशे नास्तीत्युक्तत्वात् । एवमात्मनस्तद्धेतुसम्ब-
न्धानुपपत्तिश्च बाधकस्तर्कः । किं च ज्ञानात्म-
नोस्तादात्म्यं सम्बन्धः, किञ्चासमवायः, उत
स्वरूपं, न वा किमपि ? । आद्ये किं तादात्म्य-
मत्यन्ताभेद एव, उत भेदसमानाधिकरणोऽभेदः ।
आद्ये धर्मधर्मिभावानुपपत्तिः । नहि स्वयमेव
स्वस्मिन् वर्तते । ननु प्रमेयत्वादेरेकत्वेऽपि धर्म-
धर्मिभावो दृष्ट इति चेत् अस्तु । प्रमेयत्वे प्रमेय-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वदर्शनात् । न च तदेकत्वे किञ्चिन्निदानमस्ति । न च प्रसाधितनित्यानुभवस्यात्मधर्मत्वमनुभूयते । जानामीति प्रत्यक्षस्यानित्यवृत्तिज्ञानविषयस्योक्तत्वात् । एतेन दृश्यत्वे दृश्यत्ववदभेदेऽपि धर्मधर्मिभाव इति प्रत्युक्तम् । प्रमेयत्ववद्दृश्यत्वेऽप्येकत्वासिद्धेः ।

न चाविद्येति । अविद्यातदधिष्ठानयोरनिर्वचनीयभेदाङ्गीकारात्तत एव तद्विकारोऽपि व्यवस्थित इत्यर्थः । अधिष्ठानात्मव्यतिरेकेणाविद्यानिवृत्त्यभावान्न ततस्तस्य विकारप्रसङ्ग इत्यत आह । अविद्यानिवृत्तेरिति । बुद्ध्यादेरात्मनि वृत्त्यनिरूपणादपि न तद्गुणत्वमित्याह । किंच बुद्ध्यादिरिति । द्वितीयं पक्षमादाय शङ्कते । नन्वौपाधिक इति । निरवयवसंयोगनिरासेनैवेदं निरस्तमित्याह । न उपाधीति । पराभिमतासमवायिकारणासंभवादपि नात्मनि ज्ञानगुणारम्भ इत्याह । एवमात्मन इति । ज्ञानात्मनोः सम्बन्धानिरूपणादपि न गुणगुणिभाव इत्याह । किंचेति । अत्यन्ताभेदे गुणगुणिभावप्रयोजकधर्मधर्मिभावाभावानुपपत्तिरित्याह । आद्य इति । एकत्वेऽपि धर्मधर्मिभावदर्शनात् प्रकृतेऽपि न तस्य विरोध इति शङ्कते । ननु प्रमेयत्वादेरिति । प्रमेयत्वस्य प्रमातद्विषयरूपत्वेन प्रमाभेदेन तस्यापि भिन्नत्वान्नैकस्य तस्य धर्मिभाव इत्याह । अस्त्वति । वस्तुतस्तदेकत्वेऽपि भेदो भिन्न इतिवत् प्रमेयत्वं प्रमेयमिति बुद्धेरपि धर्मिस्वरूपमात्रविषयत्वोपपत्तेर्न धर्मधर्मिभाव इति द्रष्टव्यम् । प्रमेयत्वात् प्रकृ-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ते वैषम्यमाह । न च प्रबाधितेति । ननु दृश्यत्वे दृश्यत्वभावे तस्मिन् मिथ्यात्वासिद्धेस्तस्य स्ववृत्तित्वमावश्यकमित्यत आह । एतेनेति । एतच्छब्दार्थमाह । प्रमेयत्ववदिति ।

ननु यथा शास्त्रार्थभेदस्य ब्रह्मस्वरूपत्वेऽपि तयोर्विशेषणविशेष्यभावः, यथा वा शोधिततत्त्वंपदार्थयोरभेदं प्रति धर्मिप्रतियोगिभावः, एवमभेदेऽपि गुणगुणिभावोपपत्तिरिति तत्राह । एतेनेति ।

अभेदस्य ब्रह्मस्वरूपत्वेऽपि तयोर्गुणगुणिभावोपपत्तिरित्युक्तिमुज्झित्य निर्णीते ।

एतेन ब्रह्माभेदयोरभेदेऽपि ब्रह्मजीवाभिन्नमित्यबाधितविशेषणविशेष्यभाववदभेदं प्रति एकस्य धर्मिप्रतियोगिभाववच्च गुणगुणिभावोपपत्तेरित्यपि प्रत्युक्तम् । अभेदो न धर्मः किन्तु स्वरूपमिति निश्चयदशायां ब्रह्माभिन्नमिति व्यवहारासिद्धेः, ब्रह्म जीवस्वरूपमित्येवव्यवहारात् । तदनिश्चयदशायां त्वभेदस्य ब्रह्मणो भेदारोपेण तद्व्यवहारोपपत्तेः । एवं धर्मधर्मिभावानुपपत्तेरेव बाधकत्वात् । एकत्वे धर्मिप्रतियोगिभावव्यवहारोऽपि । द्वितीयेऽप्यभेदसमानसत्ताकोऽभेदः, किं वाऽनिर्वचनीयः ? । नाद्यः । विरोधात् । न द्वितीयः । त्वयानुभ्युपगमात् । अभ्युपगमे वा ज्ञानात्मनोरभेद एव वास्तव इति सिद्धं नः समीहितम् । नापि तृतीयः । घटादेरपि बुद्धिगुणत्वप्रसङ्गात् । ननु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानसमवायो घटादौ नास्तीति चेत् किं स्वरूपेण नास्ति, किंवा ज्ञानाभावात् । नाद्यः । घटादावपि रूपादिसमवायसत्त्वात् तस्य च ज्ञानसमवायाभेदात् । नापि द्वितीयः । ज्ञानस्याप्यात्मनि सत्त्वात् । तथापि घटे नास्तीति चेन्न । विद्यमान ज्ञाने तत्समवाये घटे च सति ज्ञानं नास्तीति वचनस्य व्याहतत्वात् । न हि घटसंयोगाश्रये भूतले घटाभावो भवति । यत्र यस्य कार्यस्य समवायसम्बन्धो वर्तते तत्तस्य समवायिकारणमिति घटादेरपि बुद्धिसमवायिकारणत्वात् ।

किमभेदादेर्ब्रह्मस्वरूपत्वनिश्चयदशायां विशेषणविशेष्यभावादिरुतानिश्चयदशायाम् । नाद्य इत्याह । अभेद इति । द्वितीयेऽनिर्वचनीयभेदसंभवाद्विशेषणविशेष्यभावादिरित्याह । तदनिश्चयदशायामिति । विशेषणत्वादेरारोपितत्वे हेतुमाह । एकत्वे इति । आरोपितभेदादेव धर्मिप्रतियोगिभावोऽपीत्याह । एवमिति । भेदसमानाधिकरणाभेदस्तादात्म्यमिति पक्षे भेदः किं पराभिमत उतास्मदभिमत इति विकल्प्य दूषयति । द्वितीय इति । गुणगुणिनोः समवाय इति पक्षं दूषयति । नापि द्वितीय इति । ज्ञानविशिष्टसमवायस्य घटादावसत्त्वान्नोक्तदोष इति शङ्कते । नन्विति । किं विशेष्याभावाद्विशिष्टाभावः उत विशेषणाभावादिति विकल्प्य क्रमेण दूषयति । किं स्वरूपेणेति । आत्मनि सतोऽपि ज्ञानस्यात्मत्ववद्घटेऽभाव इति शङ्कते । तथापीति । तद्वृत्तिप्रयोजकसंबन्धे सति तदभावाभिधानं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्याहतमित्याह । विद्यमान इति । तत्संबन्धवति तेनापि भवितव्यमत्रोदाहरणमाह । न हि घटेति । ननु समवायिकारणस्यैव कार्याश्रयत्वान्न घटे ज्ञानमित्याशङ्क्य तव मते घटोऽपि तथा किं न स्यादित्याह । यत्रेति । यत्र कारणे इत्यर्थः । अतो न गुणादौ प्रसङ्गः ॥

ननु यत्र यदवच्छिन्नसमवाय इति विवक्षितत्वान्न घटादेर्बुद्धिसमवायित्वमिति चोदयति ।

घटादेर्बुद्धिसमवायित्वानिरासः ।

अथ बुद्ध्यवच्छिन्नसमवायाभावात् घटो न बुद्धिसमवायीति चेन्न । बुद्ध्यवच्छिन्नसमवायत्वेन तस्य तत्सम्बन्धत्वे समवायानन्तप्रसङ्गेन तस्यैवासिद्धेः । स्वरूपसम्बन्धेनैव तदनुमानेऽर्थान्तरत्वात् । बुद्ध्यवच्छिन्नसमवायस्य तव मते केवलसमवायादनन्यत्वाच्च । यदत्र केनचिदुक्तम्, समवायस्यैकत्वेऽपि भवन्मते मोक्षे सुखस्फुरणसत्त्वेऽपि दुःखस्फुरणाभाववत् घटेऽन्यसमवायसत्त्वेऽपि संवित्समवायो नास्तीति । तन्न । आत्मन एव निःसुखस्फुरणरूपत्वेऽपि मोक्षे दुःखतादात्म्याभावेन तदस्फुरणात् । न तु स्फुरणविरहात् । यस्मिंस्तु संसारिणि दुःखमस्ति तदपि तन्निष्ठत्वेन ब्रह्मीभूतो मुक्तोऽवगच्छतीति । न तृतीयः । बुद्धेरिदानीं ज्ञानं ज्ञातो घट इत्याद्यनुभवेन कालादिनाऽपि स्वरूपसम्बन्धसत्त्वात् । नापि सम्बन्धं विनैव बुद्धिरात्मगुण इति पक्षः

शोभते । अतिप्रसङ्गात् । यत्तु नवीनोक्तं रूप्यादेर्दृश्यत्वादिना यः सम्बन्धः, अभावद्वैतमते अभावात्मनो यः सम्बन्धः स एव बुद्ध्यात्मनोरिति । तन्न । मिथ्याधर्मिकधर्मकस्यापि मिथ्यात्वेन तदुभयसम्बन्धस्यापि मिथ्यातादात्म्यादिरूपत्वात् । मतान्तरे प्रपञ्चात्यन्तताभावस्यासम्बन्धेऽपि न काचित् क्षतिः । नह्यभावसम्बन्धः शास्त्रेण प्रतिपाद्यते ।

अथेति । समवायस्यावच्छिन्नत्वाकारेण विशिष्टव्यवहारनियामकत्वे सोऽप्रामाणिक एव स्यादित्याह । न बुद्ध्यवच्छिन्नेति । किंच बुद्ध्यवच्छिन्नसमवायोऽपि घटेऽस्तीत्याह । बुद्ध्यवच्छिन्नेति । समवायस्य बुद्धिसंबन्धाभावान्न तदवच्छेदकत्वं स्वरूपसंबन्धेन । तदवच्छेदे समवायमात्रस्यैवाच्छिन्नत्वाद्घटेऽपि तत्प्रसङ्ग इति भावः । अथ नवीनोक्तां प्रतिवन्दीं दूषयितुमनुवदति । यदत्रेति । एकजीववादे मुक्तौ दुःखाभावादेव तद्विशिष्टस्फुरणाभावोपपत्तिरित्याह । तन्न आत्मन एवेति । अनेकजीववादे ईश्वरस्येव मुक्तस्यापि दुःखस्फुरणमस्तीत्याह । यस्मिंस्त्विति । गुणगुणिनोः स्वरूपसंबन्ध इति पक्षं प्रतिक्षिपति । न तृतीय इति । बुद्धेः स्वरूपसंबन्धसत्त्वादित्यन्वयः । नवा किमपीति । पक्षे दोषमाह । नापि संबन्धमिति । बुद्ध्यात्मनोः संयोगादिसंबन्धाभावेऽप्यन्यः संबन्धो भविष्यतीति नवीनोक्तं चोद्यमनुवदति । यस्त्विति । प्रपंचाभावेन सद्वितीयं ब्रह्मेति मते तयोराविद्यकसंबन्धातिरिक्तः स वक्तव्य इत्यभिप्रेत्योक्तमभावद्वैत-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मत इति। दृश्यत्वादिना शुक्तिरूप्यादेर्यः संबन्धः स बुद्ध्यात्मनोर्मतद्वयेऽपि न सम्भवतीत्याह। तन्नेति। अभावद्वैतमते चाभावात्मनोः संबन्ध एव नास्ति। शास्त्रस्याखण्डार्थपरत्वान्मानान्तरस्य च तत्राभावाच्चेत्याह। मतान्तर इति॥

नन्वनुभवत्वेनाश्रितमनुभूते इति चेन्न। भावत्वव दप्रयोजकत्वात्। वस्तुतः शास्त्राप्रतिपाद्यस्वरूपसम्बन्धसत्त्वेऽपि न दोष इत्यपि शब्दप्रयोगः। ज्ञाने सम्बन्धनिराकरणादेः रूपादावपि तुल्यत्वात्तस्यापि गुणत्वादिकं न सिद्ध्यतीत्याशङ्क्याह। न चाभिहितेति।

रूपादिगुणनामवास्तविकत्वम्।

नचाभिहितप्रकारेण रूपादेरपि न घटादिगुणत्वं स्यादिति वाच्यम्। वस्तुतस्तदभावस्येष्टत्वात्। प्रतीतेस्त्वनिर्वचनीयगुणगुणिभाववविषयत्वात्। एतावांस्तु विशेषः। बुद्ध्यारोपोऽन्तःकरणावच्छिन्न आत्मनि सोपाधिकः। "कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव" इति श्रुत्या परिशेषोपोद्बलितया बुद्धेरन्तःकरणधर्मत्वे सिद्धत्वात्। केवलात्मनि च "नान्तःप्रज्ञं न बहिःप्रज्ञं" इत्यादिश्रुत्या दर्शितोपपत्त्या च विज्ञानाभावस्य सिद्धत्वात्। ननु "मनसा ह्येव पश्यति" इति विज्ञानं प्रति मनसः करणत्वश्रुतेस्तस्य मनो-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धर्मत्वश्रुतिरौपचारिकीति चेन्न । विज्ञानधर्मिणो मनस आत्मनि विज्ञानारोपनिमित्ततया करणत्वात् । कुसुमस्य स्फटिकारुणिमारोपे करणत्ववत् । एवं चोभयश्रुतिर्मुख्यार्था । घटादौ तु रूपादिर्न सोपाधिकः । तत्रोपाधेरदर्शनात् । किं तु रज्जुसर्पवन्निरुपाधिक एव । न च रज्जुसर्पवन्न मिथ्यात्वबुद्धिस्तत्रेति वाच्यम् । अविद्यातिरिक्तदोषाजन्यत्वेन घटादिज्ञानानिवर्त्यत्वेन चाविचारदशायां तदभावेऽपि विचारदशायां तत्सत्त्वात् । देहात्मतादात्म्यवत् ॥

अस्तु तर्हि घटादिवदात्मनोऽपि अनिर्वचनीयं बुध्यादिगुणकत्वमेव स्वाभाविकं न निर्गुणत्वमित्याशङ्क्यात्मनि बुद्ध्यादिसंबन्धस्यौपाधिकत्वात् तत्समानसंज्ञावत्त्वाभावात्तदज्ञानजन्यत्वात्तज्ज्ञाननिवर्त्यत्वाच्च न स्वाभाविकमित्याह । एतावांस्त्वति । बुद्ध्यादिकं क्वचिदाश्रितम् । गुणत्वात् । रूपवत् । न चात्मा तदाश्रयः । तस्य निरवयवकूटस्थस्याव्याप्यवृत्तिजन्यबुद्ध्याद्याश्रयत्वानुपपत्तेः । पृथिव्यादेस्तदाश्रयत्वं दूरतो निरस्तमिति परिशेषादन्तःकरणमेव तदाश्रय इति । परिशेषेति । स्वप्नोपलब्धिर्बहिःप्रज्ञा तदुभयरहितमिति श्रुत्यर्थः । "कामः सङ्कल्प" इत्यादिश्रुतेरुपक्रमविरोधादन्यपरत्वं शङ्कते । नन्विति मनसेति । कामादेर्मनोविकारत्वेऽपि करणत्वश्रुतिरविरुद्धेत्याह । न विज्ञानेति । रूपादेर्घटादा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वारोपितत्वेऽप्यात्मन्यारोपितबुद्धयादिवैलक्षण्यमाह । घटादाविति । रज्जुसर्पवद्रूपादेर्निरुपाधिकाध्यासत्वेऽपि व्यवहारदशायां बाधः स्यादित्याशङ्क्याह । न च रज्जुसर्पवदिति । किं मिथ्यात्वनिश्चयो बाधः, उत सविलासाऽविद्यानिवृत्तिः । आद्यस्त्विष्ट एव । द्वितीयस्तु रूपाद्युपादानमूलाज्ञाननिवर्तकज्ञानाभावादेव नास्तीत्यभिप्रेत्याह । अविद्येति ।

घटरूपादेरज्जुसर्पवैलक्षण्याभिधानादेव नवीनप्रलापोऽपि निरस्त इत्याह । एतेनेति

घटरूपादेर्वैलक्षण्येन नवीनमतं निरस्यति ।

एतेन घटतद्रूपादेस्तत्वदुक्तकुतर्कबाधितं चेत् गुणगुणित्वं तर्हि गगनस्येव तत् प्रातिभासिकं स्यात्। व्यावहारिकत्वे तद्ग्राहकयुक्त्यैव तत्पारमार्थिकमित्यस्मन्मतमिति नवीनोक्तं परास्तम् । उक्तयुक्तीनां वास्तवधर्मत्वप्रतिकूलत्वात् । मिथ्यात्वेऽपि व्यवहारकाले तेषामधिष्ठानज्ञानाभावेन वर्तमानतयाऽविद्यातिरिक्तदोषाजन्यतया चार्थक्रियासामर्थ्यात् सत्यत्वायोगात् दुर्निरूपस्याप्येतावता पारमार्थिकत्वोक्तौ काममभिधीयताम् । संज्ञामात्रविवादपर्यवसानात् । प्रतिकुतर्कत्वं चास्मत्तर्कस्य स्वव्याघातकत्वात् प्रतितर्कपराहतत्वाद्वा, नोभयमपि । प्रत्यक्ष प्रतीतिमात्रेणाविवेकिबाधरहितेन गुणगुणिभावं व्यव-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्थापयतस्तवैव तर्कः कुतर्कः । मायिकरजतदेहात्मभावव्यापकत्वात् । यत्तु ज्ञानतादात्म्यं ज्ञानसंबद्धस्य चेत् संबद्धस्य भेदगर्भत्वाद्व्याघातः, असंबद्धस्य चेदतिप्रसङ्ग इति तन्न । धर्मज्ञानवादे ज्ञानस्य स्वेनेव ज्ञानात्मवादेऽपि स्वेन संबन्धान्तरमन्तरेणाभेदसंभवात् । भिन्नयोरेव संबन्धापेक्षणात् । अन्यथा त्वदुक्तयुक्त्या त्वमपि त्वदभिन्नो न भवेदिति तव निरात्मतापत्तिः । ननु भिन्नयोरैक्यं संबन्धं विना न भवतीति चेन्न । भिन्नत्वैकत्वयोरेकासमवायात् । कल्पितभेदयोरिति चेत्तर्हि स एव स इति किं संबन्धेन ॥

एतेनेति । गगनस्येवेति । तद्गतरूपादिवदित्यर्थः । यदुक्तं, व्यावहारिकत्वसाधकयुक्त्या पारमार्थिकत्वसिद्धिरिति तत्राह । उक्तयुक्तीनामिति । ननु रूपादेरारोपितत्वे यावदाश्रयभावित्वमर्थक्रियायोग्यत्वं च न स्यादित्याशङ्क्यान्यथोपपत्त्या दूषयति । मिथ्यात्वेऽपीति । व्यवहारकालेऽधिष्ठानज्ञानाभावाद्यावदाश्रयभावित्वमविद्यारिक्तदोषाजन्यत्वादर्थक्रियासामर्थ्यं च मिथ्यात्वेऽप्युपपद्यत इत्यर्थः । ननु व्यावहारिकत्वप्रयोजकमेव सत्त्वप्रयोजकमित्यत आह । दुर्निरूपस्यापीति । असद्वैलक्षण्यमात्रेणोक्तरूपसंभवान्न युक्तिविरुद्धसत्त्वसिद्धिरित्यर्थः । गुणगुण्यादिभावे बाधकतर्कस्य कुतर्कत्वमुक्तमसहमानः पृच्छति । कुतर्कत्वं चेति । लौकिकवैदिक-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्यवहाराविरुद्धत्वादद्वैतानुकूलत्वाच्च न स्वव्याघात-
कत्वं, प्रतितर्कस्य दूषितत्वान्न तत्पराहतिश्चेत्यभिप्रे-
त्याह । नोभयमपीति । न्यायानुग्रहीतश्रुतिबाधितत्वा-
त्प्रपञ्चसत्त्वसाधकतर्कः कुतर्क इत्याह । प्रत्युतेति ।
भवत्तर्कस्य संप्रतिपन्नमिथ्यापदार्थेऽपि प्रसरात्कुतर्कत्व-
मित्याह । मायिकेति । ज्ञानात्मनोरभेदेऽपि प्रतित-
र्कपराहतिं चोद्यमनुवदति । यत्त्विति । विनाऽपि
सम्बन्धं स्वरूपविशेषादेवाभेद इति मानान्तरेऽपि संमत
मित्याह । तन्नेति । अतर्कत्वद्योतनाह । अन्यथेति ।
अद्यापि ज्ञानात्मनोर्भेदं सिद्धवत्कृत्य शङ्कते । भिन्नयो-
रिति । किं वस्तुतो भिन्नयोरित्यभिप्रेतमुत कल्पितभेद-
योरिति । आद्ये तदेकमेव नास्तीत्याह । न भिन्नेति ।
द्वितीयमनूद्य दूषयति । कल्पितेति ॥

सिद्धान्ताभिमततर्कस्याप्यतिप्रसङ्गमभिमन्यमान-
स्य तस्य नवीनस्य चोद्यमनूद्य निराकरोति । एतेनेति ।

सिद्धान्ताभिमततर्कस्यातिप्रसङ्गं निराकरोति ।

एतेन सम्बन्धाभावेन ज्ञानस्या-
त्मधर्मत्वनिराकरणे ज्ञानत्वमपि ज्ञानधर्मो न
भवेत् । ज्ञानत्वानधिकरणमपि ज्ञानं चेत् ज्ञाना-
नधिकरणमपि ज्ञानात्मकमस्त्विति केन चिदुक्तं
परास्तम् । ज्ञानत्ववन्निर्धर्मकज्ञानाभ्युपगमे बाध-
काभावात् । ज्ञातृत्वं तु सखण्डमेवेति न ज्ञानं
विना तत्सिद्धिरिति विशेषः । न च सुषुप्तौ ज्ञाना-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भावात्कथं स आत्मेति वाच्यम् । तत्रापि तत्सं-भवस्योक्तत्वात् । किञ्च श्रुतौ हि तत्र तत्र ब्रह्मविज्ञानात्सर्वविज्ञानं श्रूयते । जीवश्चानादिः । उत्पत्तिमत्वे विनाशप्रसङ्गात् । कृतहान्यादेरप्यापत्तेः । न चाग्निविस्फुलिङ्गादिदृष्टान्तेन जीवस्योत्पत्तिः श्रूयते इति वाच्यम् । अवयविनः पृथग्भावमात्रमेव हि विस्फुलिङ्गादेर्नतु तस्मिन् प्रागसतउत्पत्तिः । अनभिव्यक्तस्याभिव्यक्तिर्वा । अग्न्यवयवविस्फुलिङ्गानां प्रागपि तथैवानुभवात् ॥

ज्ञानस्यैकत्वात्तत्र ज्ञानत्वाभाव इष्ट इत्याशङ्क्याह । ज्ञानत्वेति । ज्ञाने ज्ञानत्वानभ्युपगमे किमनुगतव्यवहारानुपपत्तिः, किं वा तस्येतरभेदानुपपत्तिः, किं वा तदसाधारणधर्माभावे तस्य वस्तुत्वानुपपत्तिः । नच सर्वथाऽपि पराभिमतज्ञानत्वे तद्भूतासाधारणधर्माभावेऽप्युक्तस्य सर्वस्योपपत्तिवदेकज्ञानस्वरूपादेव तत्सर्वोपपत्तिरित्यभिप्रेत्याह । ज्ञानत्ववदिति । ननु ज्ञानत्वेऽपि ज्ञानत्वतैवासाधारणो धर्मस्तद्व्यावर्तकोऽस्तीति चेन्न । एकव्यक्तौ जातेरयोगात् । ननु ज्ञानेतरावृत्तित्वे सति सकलज्ञानवृत्तित्वलक्षणोपाधिरेव ज्ञानत्वतेति चेन्न । ज्ञानेतराद्यनेकपदार्थात्मकस्य सखण्डोपाधेर्ज्ञानत्वासाधारणधर्मतायोगात् । किञ्च ज्ञानत्वस्य घटत्वादिना भेदग्रहे सत्येव ज्ञानेतरावृत्तित्वलक्षणव्यावर्त्तकधर्मग्रहः । तद्ग्रहे च ज्ञानत्वस्य घटत्वादिनाभेदग्रह

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति परस्पराश्रयापत्तेः । एवं तत्राद्धर्मेषु तथाविधाप्रामाणिकानन्तधर्मकल्पनागौरवात्प्रमेयत्वादावेतादृशधर्मासंभवाच्च । ज्ञानत्वं स्वरूपविशेषादेवेतरव्यावृत्तमनुगतज्ञानालम्बनं चेत्यवश्यमभ्युपेयम्, एवमस्मन्मते ज्ञानमपीति भावः । तर्हि ज्ञानाश्रयं विना ज्ञातृत्वमित्युक्तं दूषयति । ज्ञातृत्वमिति । ननु ज्ञानात्मनोरभेदे सुषुप्तावपि ज्ञानं स्यात् तथा च सुषुप्तित्वभङ्ग इत्याशङ्क्यानित्यज्ञानोपरमस्यैव सुषुप्तित्वान्नित्यज्ञानं तदाप्यस्तीत्याह । न च सुषुप्ताविति । चिद्रूपब्रह्माभेदादपि प्रत्यगात्मा चिद्रूप इति वक्तुमभेदे तावच्छ्रुतार्थापत्तिमुद्भावयति । किञ्चेत्यादिना । जीवस्य घटादिवद्ब्रह्मकार्यत्वेऽपि तद्विज्ञानात्सर्वविज्ञानसिद्धिरित्याशङ्क्य तस्याकार्यत्वमाह । जीवश्चेति । "यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति" इत्यादि श्रुत्यर्थे भ्रान्तस्य तान्त्रिकस्य चोद्यमपवदति । न चाग्नीति । दृष्टान्तश्रुतेः प्रत्यक्षसिद्धार्थानुवादित्वात्प्रत्यक्षेण चाग्न्यवयवानामेव सतां विवक्तानां विस्फुलिङ्गतयोपलम्भान्न तेषां स इति सत्कार्यवादाभिमतोत्पत्तिरित्याह । अवयविन इति ॥

एवमेव "अस्मादात्मन" इति दार्ष्टान्तिकश्रुत्यर्थमाह । एवं जीवस्यापीति ।

अस्मादात्मन इति दार्ष्टान्तिकश्रुत्यर्थनिरूपणम् । एवं जीवस्यापि ब्रह्मसमानस्वभावत्वं विभक्तमात्रं च ततोऽवगम्यते न तु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्विविधाऽप्युत्पत्तिः । ततो जीवोऽपि ज्ञानात्मकब्रह्माभिन्नः । अन्यथैकविज्ञानात्सर्वविज्ञानप्रतिज्ञा पीडेयत । अग्निविस्फुलिङ्गादिदृष्टान्तश्रुतिश्च बाध्येत । तथा च परामर्शसूत्रं ज्ञातमेवेति। "नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इति श्रुतिरपि ज्ञानस्यात्मत्वे प्रमाणं व्यधिकरणषष्ठीतः समानाधिकरणषष्ठ्या अभ्यर्हितत्वात् । अन्यथा द्रष्टुर्या दृष्टिः तस्याः दृष्टेः, यो द्रष्टा तस्य वा, विपरिलोपो निषिध्यते ? । नाद्यः । जीवाश्रितज्ञानस्य प्रत्यक्षविनाशानुभवात् । न द्वितीयः । "तद्वैतन्न पश्यति पश्यन्वै तन्न पश्यति" इति "न हि द्रष्टुर्दृष्टेर्विपरिलोप" इति ज्ञानस्यैव विनाशनिषेधात् । न चेश्वरदृष्टेर्विनाशमियं निषेधतीति वाच्यम् । "पश्यन्वै तन्न पश्यति" इति विशेषविज्ञाननिषेधस्य तस्मिन्नयोगात् । "तीर्णो हि तदा सर्वाञ्छोकान् कान् हृदयस्य भवति" इति पूर्ववाक्यप्रमितस्य सुप्तौ शोकसंतरणस्य सर्वदाशोके परमेश्वरेऽयोगात् । न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यत इत्युत्तरवाक्यात्प्रतिपन्नघ्राणाभिव्यक्तगन्धज्ञानस्य परस्मिन्नयोगाच्च । न हि गन्धज्ञानमात्रं घ्रातेरर्थः । प्रकारान्तरेण गन्धमवगच्छति गन्धं जिघ्रज्जिघ्रतीत्यप्रयोगात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्रह्मसमानस्वभावत्वं सत्यज्ञानादिरूपत्वं अनादे-र्जीवस्य ब्रह्मणो भेदे ऽन्यज्ञानादन्यज्ञानानुपपत्तेरेकवि-ज्ञानात्सर्वविज्ञानप्रतिज्ञा पीड्येत ततस्तदभेदो वक्तव्य-इत्याह । ततो जीवस्य ब्रह्मस्वभावत्वाभावेऽग्निविस्फु-लिङ्गदृष्टान्तानुपपत्तिरित्याह । अग्निविस्फुलिङ्गेति । आत्मनश्चिद्रूपत्वे बादरायणसूत्रमपि प्रमाणयति । तथाचेति । यो नित्यश्चिद्रूप आत्मैव चिद्रूपब्रह्मण एवानाद्यविद्ययाऽनादिर्जीवभावेन स्थितत्वादिति सूत्रा-र्थः । द्रष्टरि दृष्टिशब्दश्रवणादप्यात्मा चिद्रूपइत्याह । न हि द्रष्टुरिति । ननु द्रष्टुः संबन्धिन्या दृष्टेरिति । तयोर्भेद एवास्या अर्थ इत्याशङ्क्याह । व्यधिकरणेति । व्यधिकरणे षष्ठीपरिग्रहोऽपि सिद्धान्ते समञ्जस इति वक्तुं परमते तदसामञ्जस्यमाह । अन्यथेति । सुषुप्तौ करण-व्यापारोपरमात्सर्वज्ञानाभावशङ्कायां रूपादिविषयकवृ-त्तिज्ञानोपरमेऽपि साक्षिरूपज्ञानस्योपरमो नास्तीत्येव-मर्थे स्वप्रसवगम्यमानेऽप्रसक्तद्रष्टृनाशनिषेधपरत्वायो-गादित्यभिप्रेत्याह । न द्वितीय इति । अस्तु तर्हि दृष्टि-विनाशनिषेध एव श्रुत्यर्थः । स च परमतेऽपीश्वरज्ञाने संभवतीति चेन्न । तथात्वे पूर्ववाक्यासामञ्जस्यप्रसङ्गादि-त्याह । न चेश्वरेति । संदंशन्यायेनेयं जीवविषयेत्यभिप्रेत्य पूर्वोत्तरवाक्ये जीवविषये प्रदर्शयति । तीर्णो हीति । तदा सुषुप्तौ हृदयस्यान्तःकरणस्य सम्बन्धिनः शोका-नतिक्रान्तो भवति । आत्मनि तदारोपनिमितस्यान्तः-करणस्य लीनत्वादितिश्रुत्यर्थः । ननु गन्धज्ञानमवघ्रा-तिशब्दार्थो न तु घ्राणाभिव्यक्तत्वविशेषितम् । गौरवात् । न हीति । ईश्वरज्ञानमपि गन्धविषयकमित्यत आह । न हीति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रकारान्तरेणेति । अनुमानादिना गन्धज्ञातरीत्यर्थः ।
ननु सिद्धान्तेऽपि समानाधिकरणषष्ठ्यनुपपत्तिः। दृष्टेर्दर्शनाश्रयत्वं रूपद्रष्टृत्वासंभवादिति चेन्न। रूपादिविषयवृत्त्यधिष्ठानतया कल्पितभेदेन फलरूपदृष्टिसम्बन्धित्वेन वा दृग्रूपस्याप्यात्मनो द्रष्टृत्वोपपत्तेरित्याह । न चैवमिति ।

आत्मानिद्रष्टृत्वाद्यनुपपत्तिशङ्कां निराकरोति । न चैवं दृष्टेः कथं द्रष्टृत्वमिति वाच्यम् । दृग्रूपस्यात्मनो दृष्ट्यभिव्यञ्जकदर्शनाश्रयतया तत्तद्विषयावच्छिन्नतया तदवभासकतया वा द्रष्टृत्वाविरोधात् । द्रष्टुर्वृत्त्याश्रयस्यान्तःकरणस्य या दृष्टिः साक्षिभूता ज्ञप्तिस्तस्या वा, दृष्टेर्वृत्तेर्योऽनुभवो द्रष्टा साक्षी तस्येति वाऽर्थः । ननु मुक्तावपि "विज्ञातारमरे केन विजानीयात्"इति श्रुतेर्विज्ञातृत्वमस्ति नतु तदान्तःकरणमस्तीति चेन्न । आत्मनो भूतपूर्वगत्या तदा ज्ञातृत्वनिर्देशात् । अन्यथा "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्"इति मुक्तौ दर्शनकर्तृत्वनिषेधविरोधात् । अत एव "पश्यंश्चक्षुः शृण्वच्छ्रोत्रम्"इत्यादिश्रुतिर्जीवस्यागन्तुकज्ञानवादिनी शबलात्मविषया । अन्यथा "नान्तःप्रज्ञम्"इत्यादिश्रुतिविरोधात् । तस्मादवस्थात्रयसाक्ष्यनुभव एवात्मेति । सचायमात्मोदासीनो न कर्त्ता भोक्ता वा । असङ्गो ह्ययं पुरुषः । "असङ्गो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न हि सज्जते दृष्ट्वैव पुण्यं च पापं चेत्यादि-
श्रुतेः । स्यादेतत् । अहमनुभवे प्रकाशमान
आत्मा ततोऽन्यो घटवदनात्मा स च ज्ञानरूपो-
ऽपि कर्त्ता भोक्ताऽभ्युपगन्तव्यः । अहं करोमि
भुञ्ज इति तयोरहमनुभवप्रकाशाश्रयत्वानुभवात् ।

सिद्धान्ते व्यधिकरणषष्ठ्याऽर्थमप्युपपादयति ।
द्रष्टुर्वृत्त्याश्रयस्येति । नन्वात्मनोऽन्तःकरणवृत्त्यधिष्ठान-
तया द्रष्टृत्वमुक्तमनुपपन्नम् । तदभावदशायामपि
द्रष्टृत्वश्रवणादिति चोदयति । ननु मुक्ताविति । पर-
मतेऽपि तदा तदनुपपत्तेस्तुल्यत्वाद्विधुरे गृहस्थशब्दवत्त-
त्प्रयोग इत्याह । नात्मन इति । मुक्तावपि शरीरेन्द्रि-
यादेः सत्त्वात् दर्शनकर्तृत्वमस्तीति वदन्तमर्वाचीनं
प्रत्याह । अन्यथेति । द्रष्टृत्वादेः श्रुतिबाधितत्वादेव
क्वचित्तदनुवादश्रुतिरारोपितविषयेत्याह । अत एवेति ।
द्रष्टृत्वादेः स्वाभाविकत्वे श्रुत्यन्तरविरोधमाह । अन्य-
थेति । "नान्तःप्रज्ञं न बहिः प्रज्ञं नोभयतः प्रज्ञम्" इत्या-
दिना प्रपञ्चोपशमं शिवमद्वैतम्" इत्यन्तेन निर्विशेष-
स्वरूपमभिधाय स आत्मेति । तस्यैवात्मत्वनिर्देशा-
दात्मनः स्वाभाविकद्रष्टृत्वादिकं तद्विरुद्धमित्यर्थः ।
आत्मनः संविदभेदमुपसंहरति । तस्मादिति । पूर्वमा-
त्मनः प्रमातृत्वस्यारोपितत्वोपपादनेन तदधीनकर्तृ-
त्वादेरप्यारोपितत्वमर्थसिद्धमपि प्रतिवाद्यभिनिवेशो-
पशमनाय मुखतः साधयितुमुपक्रमते । स चायमिति ।
उदासीनपदार्थमाह । न कर्तेति । तत्र वक्ष्यमाणतर्का-
नुग्राह्यां श्रुतिं प्रमाणयतीत्यर्थः । श्रुतेरन्यपरत्वमभिमेत्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यथाश्रुतेऽनुपपत्तिमुद्भावयति स्यादेतदिति । आत्मनः कर्तृत्वादौ तावत्प्रत्यक्षं प्रमाणमाह । अहङ्करोमीति । अहमनुभवे प्रकाशो यस्य स तथा । तदाश्रयत्वानुभवादित्यर्थः ।

स्थूलोहमित्याद्यनुभववदेतस्य भ्रमत्वान्न श्रुतिविरोधित्वमित्याह । न चेति ।

अनुभवे भ्रमत्वनिरासः । न चायमनुभवो भ्रमः । न तावदात्मनि बाधकानुभवादस्य भ्रमत्वम् । तदभावात् । नहि नाहं करोमि न भुञ्जे किं तु मदन्य एवास्मिंच्छरीरे तद्विध इति कश्चिदनुभवति । ननु मिथ्यात्मधर्मत्वात्, कर्तृत्वादिरपि मिथ्या । अहमनुवेऽनात्मतादात्म्यविशिष्टानुभवस्यैवानुभवादिति चेत् तर्हि केवलानुभवरूप आत्मा न स्यात् । अहमनुभवे तस्याप्रकाशमानत्वात् । अहमनुभवगोचरस्य द्वैरूप्ये प्रमाणाभावाच्च । न च परमप्रेमगोचरत्वदुःखित्वादेरहमनुभवगोचरदर्शनात्तस्य द्वैरूप्यमिति वाच्यम् । नह्यनेकधर्मानुभवो धर्मिणं भिनत्ति । अतिप्रसङ्गात् । न चैतयोर्विरोधोऽस्ति । आत्मा ह्यात्मत्वात् परमप्रेमास्पदं दुःखी च । दुःखसमवायिकारणत्वात् । यस्याहमर्थस्य प्रेमा भूयासमिति तस्यैव सोऽहं दुःखीत्यनुभवात् । ननु प्रेमगोचरत्वं नात्म-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वप्रयुक्तम्, अनात्मन्यपि पुत्रादौ तद्दर्शनात्। न
च तत्राप्यात्मसम्बन्धित्वकृतं तदित्यात्मत्वमेव
प्रयोजकमिति वाच्यम्। शत्रावपि प्रसङ्गात्।
अनिष्टत्वेन तस्य द्वेषगोचरत्वेऽप्यात्मीयत्वेन
प्रेमापि स्यात्। आत्मीयेऽप्युपेक्षणीये तदभावाच्च।

किमेतस्य प्रत्यक्षबाधाद् भ्रमत्वमुत युक्तिबाधात्।
नाद्यइत्याह। न तावदिति। तद्विध इति। कर्ता भो-
क्ता चेत्यर्थः। द्वितीयं शङ्कते। नन्विति। मिथ्येति।
मिथ्याभूतो यः शबलात्मा तद्धर्मत्वादित्यर्थः। शबल-
स्यैवाहमनुभवगोचरत्वे केवलस्यात्मत्वं न स्यात्। अह-
मनुभवगोचरस्यैवात्मत्वादित्याह। तर्हीति। अना-
त्मतादात्म्यस्याप्यहमनुभवगोचरत्वमप्यसिद्धमित्याह।
अहमनुभवेति। नन्वहमनुभवगोचरे प्रतीयमानदुःखित्वा-
दिभेदानुपपत्तिरेव धर्मिभेदे मानमित्याशङ्क्याऽऽह। न
च परमेति। किं धर्मिभेदमन्तरेण धर्ममात्रभेदोऽनुपपन्नः,
उत विरुद्धधर्मभेदः। नाद्यः। रूपरसाद्यनेकधर्मवत्त्वेऽपि
धर्मिणो भेदादर्शनादित्याह। न ह्यनेकेति। द्वितीय-
स्त्वसिद्ध इत्याह। न च तयोरिति। परस्मिन्नात्मन्युभ-
योरपि प्रयोजकप्रदर्शनेनाविरोधमुपपादयति। आत्मा
हीति। धर्म्यभेदस्यानुभूयमानत्वादपि न विरोध इत्याह।
यस्येति। यदुक्तमात्मत्वात्परमप्रेमास्पदमिति तदा
क्षिपति। ननु प्रेमेति। पुत्रादावपि परम्परासंबन्धेना-
त्मत्वमेव तत्प्रयोजकमित्याशङ्क्यातिप्रसङ्गेन दूषयति।
न च तत्रेति। शत्रौ द्वेषप्रयोजके सति कथं प्रेमेत्याशङ्क्य
दुःखित्वप्रेमास्पदत्ववदुभयप्रयोजकवशादुभयमपि स्या-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दित्याह । अनिष्टत्वेनेति । अनिष्टत्वं प्रेमप्रतिबन्धक-मित्याशङ्क्योपेक्षणीये प्रतिबन्धकाभावात् प्रेमा स्यादि-त्याह । आत्मीयेऽपीति ॥

आत्मत्वस्याप्रयोजकत्वेऽप्यन्यदेव प्रयोजकमिति शङ्कते । अस्तु तर्हीति ।

सुखित्वाद्यनुभवे आत्मत्वस्य प्रयोजकत्वं निषेधति । अस्तु तर्हि सुखविशिष्ट-त्वमेव तत्प्रयोजकमिति चेत् तर्हि सुखदुःखयो-र्विरोधात्तद्धर्मिभेदः स्यात् । न चैकस्मिन्नपि तयोः कालभेदेनाविरोध इति वाच्यम् । दुःख-काले आत्मनि प्रेमाभावप्रसङ्गात् । अस्ति च तदापि स इति चेन्न । सुखसमवायित्वं ह्यात्मनः प्रेमगोचरत्वे प्रयोजकम् । तद्धीने तददर्शनात् । तदाश्रये च दर्शनात् । तच्च दुःखाश्रयेऽपि न हीयते । तस्यैव सुखसमवायिकारणत्वात् । पुत्रा-दावप्यात्मोपाधिप्रेमगोचरे स्वसमवेतसुखजन-कत्वं प्रयोजकम् । सुखजनकत्वं तूभयत्रानुगतप्र-योजकम् । सामान्ये सामान्यस्य विशेषे विशेषस्य च प्रयोजकताया न्याय्यत्वात् । न च लाघवादा-त्मनः सुखत्वमेव परमप्रेमगोचरत्वे प्रयोजकं सुखशेषत्वं च पुत्रादेरौपाधिकप्रेमगोचरत्वे इति वाच्यम् । अहं सुखीत्यबाधितानुभवेनात्मनोऽसु-खत्वात् । तथापि दुःखाश्रयत्वाविरोधाच्च । जन्य-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

योरेव सुखदुःखयोर्विरोधाऽनुभवात् । अन्यथौपाधिकेऽप्यात्मनि सुखरूपत्वानपायात् । दुखानुपपत्तेः ।

तथा सति विरुद्धधर्माध्यासाद्धर्मिभेदः स्यादित्याह । तर्हीति । रागद्वेषवदेककालीनत्वविरोधेऽप्येकाधिकरणत्वमविरुद्धमित्याशङ्क्याह । न चैकस्मिन्निति । स प्रेमा । एवं सिद्धान्तिना प्रेमगोचरत्वप्रयोजक आक्षिप्ते पूर्ववादी स्वाभिमतं निरुपाधिप्रेमप्रयोजकं दर्शयति । न सुखसमवायित्वं हीति । तर्हि संजन्यमानदुःखदशायामात्मनि प्रेमा न स्यादित्याशङ्क्य तदापि सुखसमयित्वयोग्यतास्तीत्याह । तच्चेति । एवं निरुपाधिकप्रेमगोचरत्वे प्रयोजकमुक्त्वा सोपाधिकप्रेमगोचरत्वे प्रयोजकमाह । पुत्रादाविति । जनकत्वं निमित्तत्वं तर्हि प्रेमगोचरत्वमात्रे किं प्रयोजकमित्यत आह । सुखजनकत्वमिति । उक्तप्रयोजकस्य यत्सामान्यन्यायोपेततामाह । सामान्य इति । ननु विशेषप्रयोजकयोर्लघुशरीरयोः सतोर्गुरुशरीरे तेन ग्राह्य इत्यत आह । न च लाघवादिति । प्रमाणबाधितेऽर्थे लाघवानवताराद्दिति हेतुमाह । अहमिति । अहमर्थस्य सुखत्वेनैव परमप्रेमगोचरत्वमङ्गीकृत्यापि तस्य द्वैरूप्यं न सिद्ध्यतीत्याह । तथापीति । ननु सुखदुःखयोराधाराधेयभावो विरुद्ध इत्याशङ्क्याह । जन्ययोरिति । नित्यसुखस्य दुःखविरोधे शबलितेऽपि तस्मिन् दुःखं न स्यादित्याह । अन्यथेति ॥

केवलबुद्धेरेव दुःखादिधर्मित्वमिति सांख्यमतं निराकरोति । न च दुःखादिकमिति ।

केवलबुद्धेरेव दुःखादिधर्मित्वमिति निरस्यति । न च दुःखादिकं केवलान्तःकरणधर्म एवप्रतीयते इति वाच्यम् । चैतन्यसामानाधिकरण्यानुभवात् । दुःखादेरन्तःकरणमात्रधर्मत्वे च भौतिकाश्रयतया रूपादिवत् साधारण्यप्रसङ्गाच्च । न च द्वित्वादिवदसाधारण्यमविरुद्धम् । तस्यापि साधारणत्वात् । नियतचेतनधर्मोपग्रहेण तस्यासाधारणत्वाच्च । नन्वहमनुभवगोचरः परिच्छिन्नोऽनुभूयते । इहैवास्मीत्यनुभवात् । न च देहपरिच्छिन्नत्वं केवलात्मनिष्ठम् । तस्य विभुत्वात् । न च देहपरिच्छिन्नोऽनुभूयते नत्वात्मेति वाच्यम् । अहमिहैवास्मि जानान इति परिच्छिन्नत्वस्य ज्ञानसामानाधिकरण्यानुभवात् । तस्मादन्तःकरणतादात्म्यविशिष्ट आत्माहमनुभवगोचर इति चेन्न । देहपरिमाणस्यात्मन्यारोपितस्य स्फटिकलौहित्यस्यानुभवात् । आत्मप्रादेशिकत्वानुभवस्य सिद्धान्तेऽपि भ्रमत्वात् । अन्यथान्तःकरणस्य नियतपरिमाणत्वेन तदवच्छिन्न आत्माऽपि तथैवेति व्यासङ्गः, सर्वाङ्गीणसुखानुभवश्च न स्याताम् । अनियतपरिमाणत्वे वा तदाश्रयभेद-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्याप्योवश्यकतया तदवच्छिन्नात्मनोऽप्येकशरीरे भेदप्रसङ्गात् । विशिष्टस्यात्मनः कर्तृत्वे भोक्तृत्वे वा मुक्तिदशायामप्यस्यावस्थानप्रसङ्गात् । बद्धस्यैव मुक्त्याश्रयत्वात् । तस्मान्मोक्ष्यमाणः केवलात्मैव कर्त्ता भोक्तेति न तस्य मृषाधर्मत्वम् ॥

"अन्नमयं हि सौम्यं मन"इति श्रुतेर्मनसो भौतिकत्वेन तन्मात्रधर्मत्वे सर्वपुरुषसाधारण्यं स्यादित्याह । दुःखादेरिति ॥ भौतिकधर्मत्वेऽपि द्वित्वादिवदसाधारण्यमित्याशङ्क्य दृष्टांतासंप्रतिपत्त्या दूषयति । न चेति । द्वित्वादेरपेक्षाबुद्धिव्यंग्यत्वाद्यावद्द्रव्यभावित्वेन साधारण्यमिति भावः । द्वित्वादेरपेक्षाबुद्धिजन्यत्वमतेऽपि नियतचेतनधर्मभूतज्ञानजन्यत्वमसाधारण्ये प्रयोजकम् । दुःखादौ च न तदस्ति । सांख्यमते चेतनस्य निर्द्धर्मकत्वादित्यभिप्रेत्याह । नियतेति । नन्वहमर्थं प्रत्यक्षशास्त्राभ्यां परिच्छेदापरिच्छेदयोर्विरुद्धधर्मयोरवगमाद्धर्मिभेद आवश्यक इति चोदयति । नन्वहमनुभवेति । परिच्छेदानुभवस्य देहविषयत्वेन तस्यात्मभेद इष्ट इत्यत आह । न च देह इति । अपरिच्छिन्नेऽप्यहमर्थे परिच्छेदानुभवस्य भ्रान्तिरूपस्य संभवान्न तद्वैरूप्यमित्याऽऽह पूर्ववादी । न देहपरिमाणस्येति । ननु परिच्छेदानुभवस्य प्रमात्वे संभवति भ्रांन्तित्वमयुक्तमित्याशङ्क्याऽऽह । आत्मेति । अंतःकरणतादात्म्यापन्न एवात्माऽहमर्थं इति पक्षे किमन्तःकरणमनंतपरिमाणमणुपरिमाणमनियतपरिमाणं वा ?। आद्ययोर्दोषमाह । अन्यथेति । तृतीये परिमाणभेदेनान्तःकरणभेदस्यावश्यकतया तदवच्छिन्ना-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्मनोऽपि भेदापातात् कृतहानादिप्रसङ्ग इत्याह । अनियतेति । कर्तृत्वादिबन्धस्य विशिष्टधर्मत्वे मुक्तिरपि तस्यैवेत्यद्वैतहानिरित्याह विशिष्टस्येति । केवलस्यात्मनो मुक्त्यन्वयित्वात् स एव कर्तृत्वादिबन्धाश्रयः । तथा च न बन्धस्य मिथ्यावस्तुधर्मत्वमित्युपसंहरति तस्मादिति ।

केवलस्यात्मन एव कर्तृत्वात् प्रमातृत्वमपि तस्यैवेत्याह । अत एवेति ।

केवलस्यात्मनः प्रमातृत्वनिरसनम् ।

अत एव श्रवणादिकर्तृत्वमपि तस्यैवेतिसंगच्छते इत्येवमेव पुस्तकान्तरे मुक्त्याश्रयत्वं सङ्गच्छते । मुक्त्याश्रय आत्मा कर्ताऽऽत्मत्वात् व्यतिरेकेण घटवत् । अत एव भोक्ता च । ज्योतिष्टोमादिश्रुतिश्चात्मनः कर्तृत्वे मानम् । परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते । स उत्तमः पुरुषः । स तत्र पर्य्येति यक्षन् क्रीडन् रममाण इति स्वरूपाविर्भावलक्षणमुक्तावपि कर्तृत्वश्रवणात् तच्च परमार्थ एवेति । अत्रोच्यते—आत्मा तावत् ज्ञानरूपः । ज्ञानं च न स्वविषयमिति निरुपितम् । अहमनुभवश्च मामहं जानामीत्यहमर्थविषयोऽनुभूयते । अतो न केवलाऽऽत्मविषयः । न चेदं विषयत्वं तटस्थस्यैवान्तःकरणस्येति वाच्यम् । चैतन्यासंवलितस्याहमनुभवागोचरत्वात् । अहमनुभवगोचरधर्मस्य

सुखादेः कथमप्यनात्मधर्मत्वायोगाच्च । अत एव न देहादिगोचरत्वमपि तस्य ।

तर्कितेऽर्थे प्रमाणान्तरमप्याह । मुक्त्याश्रय इति । शबलात्मनि सिद्धसाधनतानिवृत्तये मुक्त्याश्रय इत्युक्तम् । अत एव—आत्मत्वादेवेत्यर्थः । ज्योतिष्टोमादिश्रुतिश्चेति । क्रियाफलस्य कर्त्रन्वयार्थे आत्मनेपदस्मरणादिति भावः । अविद्याऽभावदशायामपि कर्तृत्वश्रवणात्तदात्मनः पारमार्थिकमित्याह । परं ज्योतिरिति । ममाऽऽत्मा ममान्तःकरणमित्यनुभवद्वयस्यापि विनिगमकाभावेन यथार्थत्वादहमर्थे द्वैरूप्यमनुभवसिद्धं युक्तितोऽपि साधयितुमुपक्रमते । अत्रोच्यत इति । तत्र तावच्चैतन्यविषयत्वाविषयत्वलक्षणविरुद्धधर्माध्यासाद्भेदो वक्तव्य इत्यभिप्रेत्योक्तं स्मारयति । आत्मा तावदिति । तर्ह्यविषय एवात्माऽहमर्थ इत्यत आह । अहमनुभवश्चेति । अस्तु तर्हि जडान्तःकरणस्यात्मतादात्म्यरहितस्यैवाहमनुभवविषयत्वमिति वदन्तं साङ्ख्यं प्रत्याह । न चेदमिति । जडमात्रस्य घटादिवदहमनुभवविषयत्वायोगादिति । हेतुमाह । चैतन्येति । किं चान्तःकरणस्यैवाहमनुभवगोचरत्वे दुःखादेरध्यासेनाप्यात्मधर्मत्वं न स्यात् । न च तद्युज्यते । मुक्तान्वयिनि तस्मिन् बन्धस्यावश्यकत्वादित्याह । अहमनुभवेति । कथमपीति । अध्यासेनाप्यात्मधर्मत्वाभावायोगादित्यर्थः । उक्तहेतोरेवाहमनुभवस्य देहादिमात्रगोचरत्वमप्ययुक्तमित्याह । अत एवेति ।

अहमनुभवगोचरस्य द्विरूपत्वेऽपि कथं मिथ्यात्वमित्याशङ्क्याह । न चेति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनुभवविषयाऽऽत्मनो द्विरूपत्वे मिथ्यात्वेशङ्कानिरासः । न च चिदचितोः संवलनं—तादात्म्यं वास्तवं संभवतीति मिथ्यात्मविषयोऽहमनुभवः । न चैवं केवलस्यात्मनोऽहमनुभवे प्रकाशाभावादनात्मत्वप्रसङ्गः । केवलचिदात्मन एवान्तःकरणाधिष्ठानस्य तादात्म्यतयाऽहमनुभवे स्फुरणात् । दुःखित्वपरमप्रेमास्पदत्वे अपि वस्तुतः परस्परासङ्कीर्णं स्वस्वाश्रयं व्यवस्थापयतः । सुखसमवायित्वेनात्मनः परमप्रेमास्पदत्वे दुःखसमवायित्वेन परमद्वेषगोचरत्वस्यापि प्रसङ्गात् । त्वदुक्तसामान्यविशेषन्यायस्य तत्रापि संभवात् । लाघवेन सुखत्वस्यैव परमप्रेमगोचरत्वप्रयोजकत्वात् । सुखित्वानुभवस्यान्यथासिद्धेर्वक्ष्यमाणत्वात् । अस्त्वानन्द एवात्मा दुःखधर्मीति चेन्न । आनन्दस्य दुःखविरोधात्त्व त्सुखमात्रस्यैव दुःखविरोधाच्च । अन्यथा कादाचित्काभावस्य प्रतियोगिविरोधित्वं दृष्टमित्यत्यन्ताभावस्य तदभावप्रसङ्गात् । न चैवमवच्छिन्नात्मनि दुःखादेश्च तादृग्रूपत्वात् ।

सम्वलनमित्यस्य व्याख्या तादात्म्यम् । यदुक्तमहमनुभवगोचरस्यैवात्मत्वात्केवलस्य तदगोचरत्वेऽनात्मत्वापातात् तद्दूषयति । न चैवमिति दुःखित्वादिविरुद्धधर्मभेदोऽपि धर्मिभेदक इत्याह । दुःखित्वेति । यदप्युक्तं दुःखिनोऽपि प्रेमगोचरत्वमविरुद्धं तत्प्रयोजकसत्त्वादिति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रसङ्गेन दूषयति । सुखसमवायित्वेनेति । ननु व्याप्त्य-भावेन नानयोरापाद्यापादकभाव इत्याशङ्क्य त्वदुक्त-न्यायस्य व्याप्त्येन सह व्याप्तत्वात्तेनैव तदापाद्यत इत्यभिप्रेत्याह त्वदुक्तेति । गौरवादपि त्वदुक्तविशेष-प्रयोजकमयुक्तमित्यभिप्रेत्याह । लाघवेनेति । यदुक्तं प्रामाणिकं गौरवमदोषायेति तत्राह । सुखित्वानुभव-स्येति । सुखरूपस्यापि आत्मनो दुःखित्वमपीत्युक्तमनू-द्यापादयति अस्त्यानन्द एवेत्यादिना । जन्ययोरेव सुखदुःखयोर्विरोध इत्युक्तं गौरवेण दूषयति । जन्ययो-रपीति । दुःखस्य यथा सुखविरोधित्वं दुःखत्वेनैव, एवं सुखस्यापि दुःखविरोधित्वं सुखत्वेनैवेत्याह । नित्येति । सुखत्वाविशेषेऽपि जन्याजन्यविशेषणविरोधाविरोधा भिधानेऽतिप्रसङ्गमाह । अन्यथेति । तर्हि शबलिते सुख-त्वानपायाद् दुःखंनस्यादित्युक्तं दूषयति । न चैवमिति । किं विरुद्धयोर्वास्तवः संसर्गोऽनुपपन्नः, किं वा कल्पितः? । आद्यमङ्गीकरोति-विरोधो हीति । द्वितीये नानुपपत्तिरि-त्याह । न त्विति । अनिर्वचनीयवादे मत्यक्षस्य शुक्तिरज-ततादात्म्यस्य विद्यमानताया वक्ष्यमाणत्वादिति भावः ।

सुखात्मनि दुःखं चेदारोपितं तर्हि केवलात्मनि तदारोपासंभवान्न दुःखादेः शबलात्मधर्मत्वमिति चोद-यति । नन्वेवमपीति ।

दुःखाधिष्ठानस्यान्तःक-रणतादात्म्यकल्पनम् ।

नन्वेवमपि केवलात्मनि दुःख-मारोप्यतां किं तदधिष्ठानस्यान्तःकरणतादा-त्म्यकल्पनयेति चेन्न । आत्मन्यनिष्टदर्शनानन्तरं

हि दुःखमनुभूयत इति तत्र हेतुः । न चानिष्ट-दर्शनं ज्ञानरूप आत्मनि संभवति । न वा केवलजडे । ततान्तःकरणस्य चित्तादात्म्यात्पन्नस्य धर्माणां ज्ञानेच्छासुखदुःखादीनामेव कार्यकारणभावादवच्छिन्नात्मन्येव दुःखानुभवो न त्वंतःकरणतादात्म्यरहिते । तथा चोपपत्तिसहितसमकालैकविषयदुःखिप्रेमास्पदत्वानुभवो दुःखाद्याश्रयाहमर्थस्योभयरूपत्वं व्यवस्थापयति । एवं दुःखाद्याश्रयस्य परिच्छेदानुभवोऽपि तस्योभयरूपत्वे प्रमाणम् । न च देहपरिमाणमेवात्मन्यारोप्यते । अत एव परिमाणे गृह्यमाण एव द्रव्यग्रहणमिति निरस्तम् । देहपरिमाणेन सहैवाऽऽत्मग्रहणात् । न च परिमाणे प्रतीयमान एव द्रव्यग्रहणमिति नियमः । अत्युन्नतगिरिशिखरवृक्षादिग्रहणे तदभावात् आरोपश्चान्यथाख्यातिरनिर्वचनीयख्यातिर्वेत्यन्यदेतदिति वाच्यम् । तद्गतपरिमाणग्राहकस्येन्द्रियस्यैव तद्द्रव्यग्राहकत्वात् । दूरस्थे वृक्षादावपि तद्गतपरिमाणमात्रस्य ग्रहणात् ।

आरोपितस्यापि दुःखस्य स्वसमानाधिकरणानिष्टदर्शनजन्यत्वात्तस्य च केवलात्मन्ययोगेन वृत्तिमदन्तःकरणतादात्म्यापन्नात्मधर्मत्वात्तत्समानाधिकरणदुःखादिकमपि तथेत्याह । न आत्मनीति । युक्तिमात्रस्याप्रमाणत्वात्कथं द्वैरूप्यसिद्धिरित्याशङ्क्य तदुपोद्बलितदुः-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

खित्वाद्यनुभव एव तत्साधक इत्याह । तथाचेति । एवमपरिच्छिन्नेऽहमर्थे परिच्छेदानुभवोऽपि द्वैरूप्ये मानमित्याह । एवं दुःखेति । यदुक्तं स्फटिक इव लौहित्यस्यापरिच्छिन्नात्मन्यत्र परिच्छेदानुभव इति तन्निराकरोति । न चेति । अस्यान्यदेतदिति वाच्यमित्युत्तरेण सम्बन्धः । ननु द्रव्यप्रत्यक्षग्रहस्य परिमाणविषयकत्वनियमान्न विभ्वात्मनोऽहमनुभवविषयत्वमित्याशङ्क्य किं द्रव्यग्रहस्य परिमाणाग्रहणमात्रेणानियमः उत प्रमयाऽपि ? । आद्यस्तु प्रकृतेऽन्यथा संभवतीत्याह । अत एवेति । द्वितीयं व्यभिचारेण दूषयति । न चेति । ननु स्फटिके मयाऽनिर्वचनीयलौहित्योत्पत्त्यङ्गीकारादात्मन्यपि तन्मायेनानिर्वचनीयपरिमाणान्तरमेव स्यात् । तच्च तत्रानिष्टमित्यत आह । आरोपश्चेति । उभयथापि अहमर्थस्य द्विरूपत्वायोगादिति भावः । द्रव्यस्य स्वगतपरिमाणग्रहणयोग्येनैवेन्द्रियेण ग्रहणनियमादात्मपरिमाणस्य च मतद्वयेऽपीन्द्रियायोग्यत्वान्न केवलात्मनोऽहमनुभवगोचरता । कुतस्तत्र देहपरिमाणारोप इत्यभिप्रेत्याह । तद्वतेति । कथं तर्हि दूरस्थवृक्षगतपरिमाणाग्रहेऽपि तद्ग्रह इत्याशङ्क्येन्द्रिययोग्यं तत्परिमाणमेवान्यथा गृह्यत इत्याह । दूरस्थेति ।

विभ्वात्मपरिमाणं तु केनाप्यग्रहादिन्द्रिययोग्यमेव नेत्याह दुःखादीति ।

विभ्वात्मपरिमाणस्यातीन्द्रियत्वनिरूपणम् । दुःखाश्रयस्य परिच्छिन्नपरिमाणातिरिक्त परिमाणमात्रस्याप्यग्रहणात् । तस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

च तव मते देहनिष्ठत्वात् लाघवेन द्रव्यग्राहकेन्द्रियस्यैव परिमाणग्राहकत्वनियमात्। तस्मात्केवलात्मनः प्रत्यक्षत्वायोगादन्तःकरणतादात्म्यविशिष्ट एव परिच्छिन्नोऽनुभूयते। किञ्च सुखादिसमवायितावच्छेदकरूपेण तस्याधिकपरिमाणे प्रमाणाभावान्नायमारोपितदेहपरिमाणगोचरोऽनुभवः। प्रत्यक्षस्य तावदहमिहैवास्मीति तत्परिच्छेदविषयत्वात्। न च सुखाद्याश्रयो विभुः सर्वदास्पर्शशून्यद्रव्यत्वात् नित्येन्द्रियग्राह्यगुणाश्रयत्वाद्वा गगनवदिति वाच्यम्। धर्मिग्राहकप्रत्यक्षविरोधेनानुमानस्याभासत्वात्। नचप्रत्यक्षं भ्रमः, सुखाद्याश्रयपरिच्छेदानुभवस्याबाधात्। न चैतदेवानुमानं बाधकमुपजीव्यविरोधेनास्यैवाप्रमाणत्वात्। अन्योन्याश्रयाच्च। अत एव चन्द्रैकत्वानुमाने तत्तद्भेदप्रत्यक्षबाधवदात्मविभुत्वानुमानेन तत्परिच्छेदविषयप्रत्यक्षस्यापि बाध इति प्रत्युक्तम्। तत्र भेदप्रत्ययं विनापि धर्मिणश्चन्द्रस्य प्रमितत्वात्। अनुमानस्य युक्त्युपोद्बलितत्वाच्च सुखाश्रयस्य विभुत्वे सर्वत्र सुखाद्युपलम्भप्रसङ्गाच्च नित्यदेशात्मधर्मत्वात्॥

नन्वु बहिरिन्द्रियग्राह्यस्यैव द्रव्यस्यायं नियम इत्याशङ्क्याह। लाघवेनेति। परिमाणपदेन तद्गतपरिमाणं विवक्षितम्। पराभिमतात्मन्यहमनुभवायोगात्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परिच्छिन्नमेवान्तःकरणं साक्षितादात्म्यापन्नमहमनुभवविषय इत्याह तस्मादिति । पराभिमतात्मन इन्द्रियग्रहणायोग्यत्वेऽपि तत्र प्रतीयमानपरिच्छिन्नपरिमाणं नारोपितं तत्र तद्बाधकाभावात् । तथा च तत्तादात्म्यादेव सिद्धान्त्यभिमतात्मनि परिच्छेदावभास इत्यभिप्रेत्याह किं चेति । किं जडात्मनो विभुत्वे प्रत्यक्षं प्रमाणमुतानुमानं, किं वाऽऽगमः? । नाद्य इत्याह प्रत्यक्षस्येति । द्वितीयं निराकरोति-न चेति । घटे तद्गतगुणादौ च व्यभिचारवारणाय स्पर्शशून्यद्रव्यत्वादित्युक्तम् । एवमप्युत्पन्नं द्रव्यं क्षणमगुणमिति मते प्रथमक्षणे घटे व्यभिचारः स्यात्तन्निरासाय सर्वदेति । भट्टमतानुसारीदमनुमानमिति न मनसि व्यभिचारः । वैशेषिकाद्यनुमानं नित्येन्द्रियेत्यादि । अनुमानद्वयेऽपि साधारणं दोषमाह धर्मिग्राहकेति । न चाहमनुभवमात्रस्य धर्मिग्राहकत्वात् तस्य च परिच्छेदाविषयत्वान्न तद्विरोध इति वाच्यम् । अहमनुभवस्याऽऽत्मपरिच्छेदविषयत्वनियमाभावे कदाचिद्गृहान्तस्थस्य स्वस्य बहिःसत्त्वसंशयादिप्रसङ्गादिति भावः । तर्ह्यहमनुभवः परिच्छेदांशे भ्रम इत्याशङ्क्य किं प्रत्यक्षबाधाद् भ्रमत्वम्, उतानुमानबाधात् ?, न सर्वथापीत्याह न च प्रत्यक्षमिति । किं च प्रत्यक्षस्य भ्रमत्वे सिद्धे तदविरोधेनानुमानोदयः । तदुदये च विषयापहारात् प्रत्यक्षस्य भ्रमत्वसिद्धिरितीतरेतराश्रयःस्यादित्याह अन्योन्येति । अनुमानस्यापि कुत्रचित्प्रत्यक्षबाधकत्वदर्शनादत्रापि तथा किं न स्यादित्यत आह अत एवेति । अतःशब्दार्थमाह तत्रेति । चन्द्रद्वित्वस्य स्वाभाविकत्वे दोषं विनाऽप्युपलम्भः स्यादित्यादितर्कसचन्द्रद्वित्वप्रत्यक्षबा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धक इत्याह अनुमानस्येति । प्रकृते ऽनुमानमेव युक्ति-बाधितमित्याह सुखेति ॥

ननु शब्दवदेव सुखादेरसमवाय्यवच्छेदेनोत्पत्तेर्नोक्तदोष इत्यत आह न च विभ्विति ।

विभुगुणानां कारणावच्छेदेनोत्पत्तिनिरसनम् ।

न च विभुकार्यत्वात्सुखादिकं स्वासमवाय्यवच्छिन्नप्रदेशगतमिति वाच्यम् । सर्वशरीरव्यापिसुखानुपलम्भप्रसङ्गात्, सर्वत्र वोपलम्भप्रसङ्गात् । न स्याच्च भेर्याद्यवच्छिन्नाकाशप्रदेशनिष्पन्ननिनादस्य ब्रह्मायुषाऽप्युपलम्भः । ननु निमित्तदेशानुसारिणो विभुगुणाः । शब्दे च निमित्तं वायुः, सुखादौ च तत्तद्विषयइति नोक्तदोष इति चेन्न । तथा सति मनःशरीरयोरपि निमित्तत्वेन तद्देशत्वापातात् । न चासाधारणनिमित्तं नियामकं, चंदनादेरपि स्वपरसुखसाधारणत्वात् ज्ञानादिसाधारणत्वाच्च । न च सुखादौ विषयो विषयत्वेनैव नियामक इति वाच्यम् । मानोरथिकसुखादौ नियामकविषयाभावात् । शरीराद्युपाधिकृतात्मप्रदेशाभावाच्च तत्रैव सुखादिरितिवक्तुमशक्यम् । उपाधिकृतस्य तज्ज्ञाप्यस्य वा प्रदेशस्यात्मन्ययोगादित्युक्तत्वात् । विभ्वात्मवादे तस्य सर्वशरीरसंयोगित्वेन पुत्रादिशरीरस्य स्वाद्दृष्टाकृष्टत्वाच्च तदवच्छेदेनापि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्रक्चंदनादिसंयोगे भोगप्रसङ्गात् । कस्यापि स्वादृष्टमात्रजन्यत्वाभावात् । परकायं प्रविष्टस्य पिशाचादेश्च शरीरांतरे भोगाभावप्रसङ्गात् । स्वादृष्टजन्यस्यैव भोगहेतुत्वे आत्ममनसोस्तव मते भोगाजनकत्वप्रसङ्गाच्च ।

मनसोऽणुत्वमते दोषमाह सर्वशरीरेति । तद्विभुत्वे दोषमाह सर्वत्रेति । किं चास्मिन्पक्षे भेर्याकाशसंयोगावच्छेदेनोत्पन्नाद्यशब्दाद्यसमवायिकारणकद्वितीयादिशब्दानामपि तत्रैवोत्पत्तेः श्रोत्रासमवायात्तदनुपलम्भापात इत्याह न स्याच्चेति । अस्तु तर्हि निमित्तसंयोगावच्छेदेन विभुविशेषगुणोत्पत्तिः । तथा च न पूर्वोक्तदोष इतिशङ्कते ननु निमित्तेति । विषयस्य संयोगद्वारा सुखादिनियामकत्वं निमित्तत्वेन, उतासाधारणनिमित्तत्वेन, किं वा विषयत्वेन ?, आद्ये दोषमाह तथा सतीति । मनःसम्बन्धप्रयुक्त्या सुखादेरणुदेशत्वं, शरीरसम्बन्धप्रयुक्त्या तु शरीरव्यापित्वं स्यादित्यर्थः । द्वितीयं दूषयति न चेति । चन्दनादेरसाधारणत्वं किं नियतपुरुषसुखजनकत्वमुत सुखमात्रजनकत्वम्?, उभयथाऽप्यसिद्धमित्याह चन्दनादेरिति । विषयाभावेऽपि तद्ध्यानमात्रात्सुखदर्शनात् तृतीयोऽप्ययुक्त इत्याह न च सुखादावीति । निष्प्रदेशे निमित्तसंयोगतदधीनप्रदेशभेदयोरसंभवान्न ततः सुखादिव्यवस्थेत्याह शरीरेति । औपाधिकप्रदेशभेदाङ्गीकारे ऽप्यतिप्रसङ्गस्तदवस्थ इत्याह विभ्वात्मेति । सर्वशरीरसंयोगित्वेनेत्यस्य तदवच्छेदेनापीत्यनेन सम्बन्धः । ननु स्वादृष्टाकृष्टशरीरमेव स्वसुखे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निमित्तं न सर्वमित्याशङ्क्य तथाप्यतिप्रसङ्ग इत्यभिप्रेत्याह पुत्रादीति । ननु स्वादृष्टमात्रजन्यत्वेन नियामकत्वमिति चेत् न । स्वशरीरस्यापि स्वभार्यादृष्टादिजन्यत्वेनासंभवादित्याह कस्यापीति । स्वशरीरस्य स्वादृष्टमात्रजन्यत्वमङ्गीकृत्यापि दोषमाह परकायमिति । तद्दृष्टाजन्यस्य तद्भोगाजनकत्वे नित्यस्य तज्जनकता न स्यादित्याह स्वादृष्टेति ।

विपक्षे बाधकतर्काभावादप्युक्तहेतुद्वयमप्रयोजकमित्याह । अप्रयोजकं चेति ।

उक्तहेतुद्वयस्याऽप्रयोजकत्वप्रदर्शनम् ।

अप्रयोजकं च सुखाद्याश्रयस्य विभुत्वानुमानम् । न च सर्वत्रादृष्टकार्यदर्शनाददृष्टस्य स्वाश्रयसंयोगद्वारैवान्यसम्बन्धात्तदाश्रयस्यैव सुखाश्रयत्वात्सुखाश्रयोऽपि सर्वगत इति वाच्यम् । स्वाश्रयसम्बन्धं विनापि स्वरूपसंबंधादेवादृष्टस्य शब्दादिजनकत्ववत् सर्वत्र कार्यजनकत्वात् । नच परमाणुक्रियाया अदृष्टवदात्मसंयोगासमवायिकारणत्वादात्मनो विभुत्वमिति वाच्यम् । कार्यस्यासमवायिकारणकत्वाभावात् । अस्तु वा तत्रान्यदसमवायिकारणम् । ननु सर्वशरीरव्यापिसुखाद्युपलम्भादात्मनि सर्वशरीरव्यापिनि सति तस्य मध्यमपरिमाणनिराकरणाद्विभुत्वसिद्धिरितिचेत् । आत्मनोऽन्तःकरणतादात्म्यविशिष्टस्यैव सुखाद्याश्रयत्वेन मध्यमपरिमाण-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वात् । प्रथमहेतोर्भट्टमतेऽन्धकारे व्यभिचारात् । अस्मन्मते श्रोत्रे व्यभिचाराच्च । दुःखाद्याश्रयविभुत्वानुमानस्य तदुत्क्रान्त्यादिश्रुतिविरोधश्च ।

अदृष्टाश्रयस्याविभुत्वे तस्य देशान्तरवर्तिसूर्यगत्यादिकार्यजनकतानुपपत्तिर्बाधिकेत्याशङ्क्याह न च सर्वत्रेति । परमते शब्दाश्रयाकाशेनाऽऽत्मनः संयोगाभावेऽपि तद्गतादृष्टस्य स्वरूपसम्बन्धेनैव शब्दजनकत्ववत् सूर्यात्मसंयोगं विनापि तद्गतिजनकत्वमुपपद्यत इत्याह स्वाश्रयेति । आत्मनो विभुत्वाभावे सर्गाऽऽद्यकालीनाणुक्रियानुपपत्तिरित्याशङ्क्याह न चेति । समवायस्यालीकत्वेन तदधीनासमवायिकारणस्यापि तथात्वमित्यभिप्रेत्याह कार्यस्येति । कार्यस्यासमवायिकारणजन्यत्वनियमेऽपि परमाणुगतपरिमाणादिकमेव किञ्चित्तदसमवायिकारणमस्तु । अस्मत्प्रवृत्त्यनुपयोगिनस्तन्निर्णयस्याभावेऽपि न काचित्क्षतिरित्यभिप्रेत्याह अस्तु वेति । सुखाद्याश्रयस्य परिशेषाद्विभुत्वसिद्धिरितिशङ्कते नन्विति । आत्मनो नित्यत्वे कृतहान्यादिप्रसंगान्न शरीरपरिमाणत्वमपीत्याह तस्येति । स्वतो मध्यमपरिमाणस्य दुःखादिपरिणाम्यन्तःकरणस्यानित्यत्वेऽपि तदुपाधिकमध्यमपरिमाणदुःखाद्याश्रयस्यात्मनो नानित्यत्वादिप्रसङ्ग इत्यभिप्रेत्याह— आत्मन इति । भट्टमते तमसः स्पर्शशून्यद्रव्यत्वेपि मूर्त्तत्वात्तत्र तदीयहेतोर्व्यभिचार इत्याह—प्रथमेति । श्रोत्रेन्द्रियमपञ्चीकृताकाशकार्यमिति मते तत्र व्यभिचार इत्याह अस्मन्मत इति । "एष आत्मा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निष्क्रामति चक्षुषो वा मूर्ध्नो वाऽन्येभ्योवा" इत्यादि-क्रियाभिधायिश्रुतिविरोधश्चेत्याह दुःखेति ।

निर्गमनश्रुतेरन्यपरत्वान्न तद्विरोध इत्याशङ्क्याह-नचेति ।

निष्क्रमणश्रुतेरौपचारिकत्वखण्डनम् ।

नचेदमौपचारिकङ्गमनादिवचन तत्र तत्र पौनःपुन्येन श्रूयमाणस्योपचरितार्थत्वा-योगात् । तथा चाहुर्न्यायविदः—"अभ्यासे हि भूयस्त्वमर्थस्य भवति नाल्पत्वमपि प्रागेवोपच-रितार्थत्वम्"इति । अभ्यासस्य तात्पर्यलिङ्गत्वात् अनिर्गमने वा पारलौकिकभोगोऽपि न स्यात् । न च सर्वगतस्यात्मनस्तत्तत्प्रदेशे कर्मवशाच्छरीरा-रम्भे तत्र मनसो वृत्तिलाभात्पारलौकिकसुखाद्यु-त्पत्तिरिति वाच्यम् । अदृष्टस्य स्वसमवायिप्रदेशे कार्यजनकत्वात् । स्वसमवायिगतगुणारम्भ-काणां तथात्वनियमात् । अन्यथा घटादेरधःप्रदे शसमवेताग्निसंयोगादग्रदेशेऽपि लौहित्यप्रसङ्गात् । अंगुल्यग्रात्मप्रदेशावच्छिन्नकण्टकसंयोगाच्छिर-सोऽपि दुःखप्रसङ्गाच्च । नचादृष्टस्य तथात्वे किं बाधकमिति वाच्यम् । दृष्टस्वभावभङ्गस्यादृष्टकल्प-नस्य च बाधकत्वात् । शरीरानवच्छिन्नप्रदेशेऽपि ततः सुखाद्युत्पत्तिप्रसङ्गाच्च । शरीरावच्छिन्नान-वच्छिन्नयोरनिर्वचनीयभेदस्याप्यनङ्गीकारे तत्रैव

जनयेन्नान्यत्रेति व्यवस्थाऽयोगात् ।

प्रागेवेति । दूरत एवेत्यर्थः । उपपत्तिरपि तत्र तात्पर्यलिङ्गमस्तीत्याह अनिर्गमने वेति । ननु कर्त्तुर्विभुत्वान्मेरुपृष्ठादावपि सतस्तत्तच्छरीरोपहितात्मप्रदेशोत्पन्नकर्मभिरेवाभिनवशरीरादिपुरःसरो भोगो भविष्यतीति चेत् न। प्रदेशान्तरगतादृष्टेन प्रदेशान्तरे भोगायोगादित्याह-न च सर्वगतस्येति । नन्वपेक्षाबुद्ध्यादेः प्रदेशान्तरे द्वित्वाद्यारम्भकत्ववददृष्टस्यापि तथात्वं किं न स्यादित्यत आह-स्वसमवायीति । न चोत्तरशब्दारम्भकपूर्वशब्दे नायं नियम इति वाच्यम् । उक्तनियमादेव तत्रापि निमित्तवायुसंयोगस्यैवारम्भकत्वसम्भवे पूर्वशब्दस्यापि कारणत्वकल्पनाऽयोगादिति भावः । उक्तनियमानङ्गीकारे बाधकमाह अन्यथेति । तद्युक्तबाधकादग्निसंयोगादावेवायं नियमो नादृष्ट इत्याशङ्क्याह-न चेति । अतिप्रसङ्गबाधकश्च प्रकृतेपि तुल्य इत्याह-शरीरानवच्छिन्नेति । ननु शरीरावच्छिन्नप्रदेश एव सुखादिजनकत्वमदृष्टस्य स्वभाव इत्यत आह शरीरावच्छिन्नेति ।

"आत्मैवाधस्तादात्मोपरिष्टादाकाशवत्सर्वगतः" इत्यादिश्रुतित एव दुःखाद्याश्रयस्य विभुत्वमिति तृतीयं पक्षं दूषयति नापीति ।

श्रुत्याऽऽत्मनोविभुत्वाशङ्कापरिहारः ।

नापि श्रुतितः सुखाद्याश्रयस्य सर्वगतत्वसिद्धिः । ब्रह्मत्वेनैव सुखाद्याश्रयस्य सर्वगतत्वप्रतिपादनात् । तस्मात् ज्ञानाद्याश्रयस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वगतत्वे प्रमाणाभावात् । अहमिहैवेत्यनुभवात् परिच्छिन्न एव कर्त्ता भोक्ता । अकर्त्तुरात्मनः स्वाभाविकपरिच्छेदे घटादिवदनित्यत्वप्रसङ्गेन मुक्त्यनुपपत्तेः । अन्तःकरणतादात्म्यात्सर्वगतोपि दृगात्मा परिच्छिन्न इत्यहमर्थो द्विरूपः अन्तःकरणाभेदश्चात्मनो मृषैवेत्यहमर्थधर्मः कर्तृत्वादिरपि मृषाकल्पितधर्मत्वात्संप्रतिपन्नवदिति । नन्वस्तु कर्त्तात्माऽणुः अहमिहैवेत्यनुभवात् । अनित्यत्वदोषाभावाच्च । न चैवं सुखादेरणुधर्मतया सर्वशरीरव्यापित्वानुपपत्तिः अणुगुणस्यापि शरीरव्याप्यविरोधात् । न च गुणस्य गुणिमात्रप्रदेशत्वम् । प्रदीपगुणे प्रभायां व्यभिचारात् । गन्धस्यापि स्वाश्रयं विनाऽन्यत्र गमनादिति चेन्न । न तावदन्यत्रोत्पन्नसुखादि देशान्तरं व्याप्नोति, पूर्वदेशे तदनुपलम्भप्रसङ्गाच्च । न च प्रदीपप्रभादृष्टान्तोपि, तस्या गुणत्वे मानाभावात् । द्रव्यत्वव्यवस्थापकक्रियादेः सत्त्वाच्च ।

आत्मैवेदंसर्वमित्यादि वाक्यशेषपर्यालोचनया ब्रह्मभावेनैव सर्वगतत्वाभिमानान्नाच्च पराभिहितात्मनो विभुत्वसिद्धिरित्याह ब्रह्मत्वेनेति । दुःखादिपरिणामिनि परिच्छेदानुभवस्य बाधकाभावात्तस्य निरुपाधिकः सन्नित्युपसंहरति तस्मादिति । कूटस्थात्मनि परिच्छेदाद्यवभासस्तु विपरीत इत्याह अकर्तुरात्मन इति । अना-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्मतादात्म्यापन्नस्यैवाहमर्थत्वप्रतिपादनफलमाह अन्तः करणेति । कल्पितधर्मत्वादिति । कल्पितस्य धर्मत्वात् स्वप्नकल्पितराजभोगादिवदित्यर्थः । अहमर्थानुभवगोचरे वस्तुनोऽपरिच्छेदाभावान्न द्वैरूप्यमिति । तांचिकश्चोदयति नन्वस्त्विति । सुखाद्याश्रयस्याणुत्वे सर्वाङ्गीणसुखोपलब्ध्यनुपपत्तिरित्युक्तमपवदति नचैवमिति । ननु सुखादिः स्वोपादानातिरिक्तदेशसंसर्गी न भवति गुणत्वाद्रूपादिवदित्यत आह न चेति । प्रभाया द्रव्यत्वान्न व्यभिचार इत्याशंक्य प्रसिद्धगुणे व्यभिचारमाह गन्धस्येति । आत्मनोऽणुत्वे तस्य तद्गतधर्मस्य चाप्रत्यक्षत्वप्रसंगात् । नैतदित्याह नेति । किंच किं सुखादिकं गुणः, उत द्रव्यम् ? । आद्येऽपि किमुत्पन्नं सुखादि प्रदेशान्तरं क्रियया व्याप्नोति, उत तद्व्याप्यैवोत्पद्यते ? । आद्यं दूषयति न तावदिति । पूर्वदेशापरित्यागेनापि देशान्तरप्राप्तिदर्शनान्नोक्तदोष इत्याशंक्य दृष्टांतवैषम्येण दूषयति न च तन्तत्यमेवेति । अस्मिन्पक्षे गुणत्वमप्यनुपपन्नमित्याह क्रियाश्रयत्व इति । प्रदीपप्रभाया गुणत्वेऽपि सावयवत्वादिकं दृष्टमित्याशंक्याह न च प्रदीपेति ।

आद्यविकल्पे द्वितीयपक्षं शङ्कते अस्त्विति ।

सुखादीनां द्रव्यत्वनिरासः । अस्तु सुखादिकमपि द्रव्यमिति चेन्न । कार्यद्रव्यस्यापि गुणवत्त्वसमवायिनं विहायान्यत्र गमनायोगात् प्रदीपस्तु प्रभायां निमित्तमात्र, मुपादानं तु तत्प्रदेशा अवयवा एव । प्रदी-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पजन्यत्वमात्रेणैव प्रभाव्यवहारः । देवदत्तपुत्र इतिवत् । सुखमपि तर्हि स्वावयवारब्धं निमित्तात्मतन्त्रं प्रभावदिति चेत् न । सुखत्वस्यावयवावयविवृत्तित्वे प्रमाणाभावात् । अनेकसुखकल्पने गौरवाच्च । न च गुण एव सुखादिरुत्पद्यमानः शरीरदेशं व्याप्नोतीति वाच्यम् । आश्रयप्रदेशादन्यत्र गुणानुत्पत्तेः । अत एव वाय्वाब्जीतगंधदृष्टान्तोऽपि परास्तः । गन्धस्याश्रयेण सहैव गमनात् । अदृष्टोपनीतावयवान्तरेण पुष्पादिपूरणाच्च । न चैवं नखलूनपुष्पेऽपि तथात्वप्रसङ्गः । अदृष्टस्य कार्यगम्यत्वात् । अन्यथा सद्योऽपचितकुसुमेष्वेकगन्धगमनानन्तरं गन्धान्तरारम्भवत् तत्रैव पर्युषितेषु गन्धप्रसङ्गात् । अणौ चात्मनि शिरःपाण्याद्यवयवच्छेदभेदेन युगपत् तुल्यबलसुखदुःखसामग्रीरूपे सति युगपत्सुखदुःखायोगात् ।

अत्रापि किमयमात्मैव सुखोपादानमुत सुखावयवाः? । आद्ये दोषमाह न कार्येति । जलौकादेरपि स्वोपादानरहितप्रदेशेऽभावादिति भावः । दीपोपादानप्रभाया गृहव्यापित्ववदणवात्मोपादानसुखादेर्देहव्यापित्वमित्याशङ्क्य दृष्टान्तासम्प्रतिपत्त्या दूषयति प्रदीपस्त्विति । ननु पटरूपमितिवत्प्रदीपप्रभेति व्यवहारस्तदुपादानत्वं विनाऽनुपपन्न इत्याशङ्क्याह प्रदीपेति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वितीयं पक्षं शङ्कते सुखमपीति । द्रव्योपादानस्य स्वकार्यवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वनियमात्सुखावयवानामपि सुखत्वं वक्तव्यं, तथा च युगपदनेकसुखानुपलब्धिविरोधः कल्पनागौरवं चेत्याह सुखत्वस्येति । गुणत्वपक्षे देशान्तरं व्याप्यैवोत्पद्यतइति पक्षं दूषयति न च गुणइति । गुणस्य स्वाश्रयसम्बन्धद्वारेणैव देशान्तरसम्बन्धनियमादेव गन्धदृष्टान्तोऽप्यसम्प्रतिपन्न इत्याह अत एवेति । केषांचित्पुष्पावयवानामितस्ततो गमनेऽवयवह्रासात्पुष्पे गुरुत्वपरिमाणादेरपि ह्रासः स्यादित्याशङ्क्याह-अदृष्टेति । अदृष्टमात्रादवयवसन्धाने नखसंछिन्नपुष्पादावपि तथा स्यादित्याशङ्क्य तत्र तादृशादृष्टे प्रमाणाभावान्नैवमित्याह न चैवमिति । अदृष्टस्यानियामकत्वे दृष्टकारणमात्रस्यापि कुसुमेऽपि सत्त्वात्तदाऽपि पूर्वदेव गन्धःस्यादित्याह-अन्यथेति । किंचाणवात्मनो युगपच्छिरःपाण्याद्यवयवावच्छेदाभावादवयवभेदेन व्यवस्थितसुखदुःखयौगपद्यमनुभूयमानं न स्यादित्याह-अणौ चात्मनीति ।

एवमवयवभेदेन प्रयत्नद्वययौगपद्यमपि न स्यादित्याह-एवमिति ।

अवयवभेदे प्रयत्नयौगपद्यनिरासः । एवं हस्तद्वयावच्छिन्ने युगपत्प्रयत्नद्वयायोगात् । न च प्रयत्नोऽप्ययमेक एव । मध्येऽपि तदुपलम्भप्रसङ्गात् । सर्वशरीरचेष्टाप्रसङ्गाच्च । सगुणज्ञानफलस्य युगपदनेकशरीरपरिग्रहस्यानुपपत्तेश्च । भोगातिशयार्थं ह्यात्मनोऽनेकशरीरपरिग्रहः । न च निरात्मशरीरेषु भोगः सम्भवति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तदाश्रयस्यात्मनोऽभावात् । एतेनाणोरप्यात्मनो ज्ञानस्य विभुत्वाद्युगपदनेकशरीरं तद्द्वारात्माधितिष्ठतीति निरस्तम् । तथाप्याश्रयाभावेन तत्तच्छरीरेषु सुखानुत्पत्तेः । न चात्मनोऽनणुत्वे "बालाग्रशतभागस्य आराग्रमात्रो ह्यवरोऽपि दृष्ट" इत्यादिश्रुतिविरोधः । उदाहृतश्रुतावणुत्वबोधकपदाभावात् । न च बालाग्रायुतभागोपमितस्याणुत्वं विना न परिमाणान्तरं कल्पयितुं युक्तमिति वाच्यम् । बालाग्रायुततमभागस्य वैशेषिकाभिमतसिद्धाणोरप्यतिसूक्ष्मत्वापत्त्या श्रुतिबाधप्रसङ्गात् । उदाहृताराग्रश्रुतिविरोधाच्च कल्पनानुपपत्तेः । नह्याराग्रस्य वैशेषिकादिमतसिद्धाणुत्वमस्ति । न च "एषोऽणुरात्मा चेतसा वेदितव्यः" इति श्रुतिविरोधः । तस्याः परमात्मविषयत्वात् । वेदितव्यत्वनिर्देशात् । न हि परस्मादन्यस्य वेदितव्यत्वम् ।

एक एव प्रयत्नोऽवयवद्वयव्यापीत्याशङ्क्याह नचेति । "स एकधा भवति त्रिधा भवति पञ्चधा सप्तधा नवधा" इत्यादिशास्त्रसिद्धानेकशरीरपरिग्रहोऽपि युगपदेवात्मन्यनुपपन्न इत्याह सगुणेति । अनुपपत्तिमेव स्फोरयति भोगातिशयेति । अथवात्मगतज्ञानस्य शरीरान्तरव्यापित्वात् तद्द्वारा भोगसम्भव इत्यत आह एतेनेति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानस्य द्रव्यत्वे गुणत्वे वाप्याश्रयासंसृष्टदेशगामित्वमसम्भवीत्युक्तप्रायम्। तदङ्गीकृत्यापि दूषयति तथापीति। निरात्मकघटादिषु सुखाद्यनुत्पादवत्ताद्दृशशरीरान्तरेऽपि तथा स्यादित्यर्थः। जीवाणुत्वस्य श्रुतिसिद्धस्य कथं युक्तिमात्रेण निरास इत्यत आह न चेति। किमुदाहृतश्रुतिर्मुखतोऽणुत्वं प्रतिपादयति, उत श्रुतार्थानुपपत्त्या ?। नाद्य इत्याह उदाहृतेति। वालाग्रशतभागस्य शततमभागो बालाग्रायुतभागः तदुपमितत्वमणुत्वं विना नेति, द्वितीयं पक्षं निराकरोति नचबालेति। बालाग्रञ्चतुरणुकं पञ्चाणुकं वा स्यात् परमाणोश्च तच्छततमभागत्वस्याप्यसंभवादयुततमभागत्वं बाधितमित्याह बालाग्रेति। बालाग्रायुततमभागत्वेनाणुत्वं लक्ष्यत इत्याशङ्क्याह उदाहृतेति। आराग्रस्यापि सूक्ष्मत्वान्न तद्विरोध इत्याशङ्क्याह न हीति। आरेति। तोत्रप्रोतायःशलाकोच्यते। तदग्रस्य प्रत्यक्षत्वेन महत्त्वात्। इतरथा तदप्रसिद्ध्योपमैव न स्यादित्यर्थः। श्रुत्यन्तरे साक्षादेव जीवाणुत्वं सिद्धमित्यत आह नचैष इति। अस्यां श्रुतौ परमात्मलिङ्गदर्शनान्न जीवपरतेत्याह तस्या इति। जीवस्यापि वेदितव्यत्वमस्तीत्याशङ्क्याह न हीति। यस्मिन् द्यौः पृथिवीरापोऽन्तरिक्षमेतन्मनः सह प्राणैश्च सर्वैः तमेवैकं जानथ आत्मानमन्या वाचो विमुं।यथेति परस्यैव वेदितव्यत्वावधारणादित्यर्थः।

सन्निधानादपि परमात्मैव तदर्थ इत्याह न चक्षुषेति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परमात्मन एव वेदितव्यत्वकथनम् ।

"न चक्षुषा गृह्यते नापि वाचा
नान्यैर्देवैस्तपसा कर्मणा वा ॥
ज्ञानप्रसादेन विशुद्धसत्त्व-
स्ततस्तु तं पश्यति ध्यायमानः" ॥

इतिपूर्ववाक्ये निखिलेन्द्रियाग्राह्यस्य केवलतपआद्यगोचरस्य ध्यानैकलभ्यस्य परस्यैव प्रस्तुतत्वाच्च । न चैष इति प्रत्यक्षत्वनिर्देशात्प्राणधारणनिर्देशाच्च जीव एवायमितिवाच्यम् । अणोरप्रत्यक्षत्वात् । न च तद्गुणस्य प्रत्यक्षत्वात् सोऽपि प्रत्यक्ष इति वाच्यम् । ज्ञानादेरणुवृत्तित्वे तस्याप्यप्रत्यक्षत्वात्, गुणस्य प्रत्यक्षत्वेऽपि ततोऽत्यन्तभिन्नस्य गुणिनः प्रत्यक्षत्वायोगाच्च । अन्यथाऽऽकाशस्यापि प्रत्यक्षत्वप्रसङ्गात् । व्यवहितप्रदीपस्य प्रभायां गृह्यमाणायामप्यग्रहणात् सर्वाधारे परस्मिन्नपि प्राणसंवेशनसंभवाच्च । तस्मादस्मिन्वाक्ये स्वप्रकाशतया प्रत्यक्षसिद्धस्य जीवस्य पराभेदाभिप्रायेणाणुरिति दुर्दर्शत्वमुच्यते । अणोरणीयानित्यादिना परस्य तन्निर्देशवत् । बालाग्रशतभागस्येति श्रुत्यापि स्वतोऽनन्तस्य ब्रह्मात्मना जीवस्याल्पपरिमाणबुद्ध्यवच्छेदकतया ऽल्पत्वमात्रमुच्यते, न त्वणुत्वम् । अन्यथा "स चानंत्या-

य" इति तस्यापरिच्छिन्नत्वविषयवाक्यशेषविरोधात् । एकस्य पारमार्थिकविरुद्धपरिमाणद्वयायोगात् ॥

अन्यैर्देवैरन्यैरपीन्द्रियैरित्यर्थः । ज्ञायतेऽनेनेति ज्ञानं वेदान्तवाक्यं, तस्य प्रसादोऽसंभावनाद्यभिभवाभावः । तपआदिना विशुद्धसत्त्वस्तदनन्तरं श्रवणादिपुरःसरं ध्यायमानो वेदान्तप्रमाणेन तं परमात्मानं साक्षात्कुरुत इत्यर्थः । नन्वेषइति प्रत्यक्षलिङ्गात् "यस्मिन्प्राणः पञ्चधा संविवेश" इति वाक्यशेषावगतप्राणधारणलिङ्गाच्च दुर्बलसंनिध्यनुगृहीतमेतसेकं ब्रह्मलिङ्गं बाध्यत इति चेत् । न, प्रत्यक्षत्वस्य तावदणवात्मलिङ्गत्वानुपपत्तेरित्याह नचैषइति । अप्रत्यक्षत्वादिति । जीवस्याप्यणुत्वेऽप्रत्यक्षत्वापातादिति शेषः । ननु गुणिप्रत्यक्षत्वे 'प्रत्यक्षत्वे प्रत्यक्षगुणवत्त्वं प्रयोजकं न तु महत्त्वादि' इत्याशंक्याणुत्वे प्रत्यक्षगुणवत्त्वमेवानुपपन्नमित्याह न च तद्गुणेति । अन्यप्रत्यक्षत्वेन अन्यस्य प्रत्यक्षत्वेऽतिप्रसङ्ग इत्यभिप्रेत्याह गुणस्येति । गुणगुणिभावस्य नियामकत्वान्नातिप्रसङ्ग इत्याशङ्क्याह अन्यथेति । अणवात्ममते दीपप्रभायास्तद्गुणत्वात्क्वचित्तद्ग्रहेऽपि महानपि दीपो न गृह्यते किमु वक्तव्यमणवात्मनीत्यभिप्रेत्याह व्यवहितेति । द्वितीयलिङ्गस्य परस्मिन्नपि संभवान्न तद्विरोध इत्याह सर्वाधार इति । परमात्मपरिग्रहेऽप्येषोऽणुरिति श्रुतिद्वयानुपपत्तिरित्याशङ्कां निराकुर्वन्नुपसंहरति तस्मादिति । दुर्ज्ञेयत्वाभिप्रायेणाणुशब्दप्रयोगोऽन्यत्रापि दृष्ट इत्याह अणोरिति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महतो महीयानिति वाक्यशेषात् दुर्ज्ञेयत्वमेव तत्राणीयस्त्वमितिभावः। बालाग्रश्रुतिरपि अनेकाद्यन्तःकरणोपाधिकपरिच्छेदानुवादेन जीवस्य ब्रह्मात्मनाऽपरिच्छेदपरेत्याह बालाग्रेति । मात्रचो व्यावर्त्यमाह नत्विति । स्वाभाविकाणुत्वपरत्वे दोषमाह अन्यथेति ।

आनन्त्यमेवौपाधिकमणुत्वं च स्वाभाविकमिति वैपरीत्यमेव किं न स्यादित्यत आह – अण्वात्मनीति ।

आनन्त्यस्यौपाधिकत्वमणुत्वस्य स्वाभाविकत्वम् ।

अण्वात्मन्यौपाधिकमहत्त्वायोगाद्वाक्यशेषेणौपाधिकानन्त्यमनूद्यतइति वक्तुमयोगाच्च । न चानन्त्यमित्यनेकत्वं नित्यत्वं वोच्यते, न त्वपरिच्छिन्नत्वमिति वाच्यम् । न तावत्प्रतिशरीरमनेकत्वं बहूनामेकत्र समवाये विरुद्धदिक्क्रियया सद्य एव शरीरविदारणप्रसङ्गात् स्वीयनिखिलभोगप्रतिसन्धानेनैकत्वावधारणाच्च । नाप्यनन्तेषु शरीरेषु जीवोऽनन्तइति प्रतिपाद्यत इति वाच्यम्। प्रतिशरीरं चेष्टादिलिङ्गादेवाणोरात्मनः प्रतिशरीरं भेदसिद्धौ तदुपदेशवैयर्थ्यात् जीवानेकत्वस्य प्रयोजनाभावेन श्रुत्या प्रतिपाद्यत्वाच्च । न चानधिगतेऽर्थे परिच्छिन्नत्वे तात्पर्ये संभवति अनुवादो युज्यते।श्रुतेरुत्सर्गतो ऽनधिगतार्थत्वात्। अत एव न नित्यत्वमपि तस्यार्थः । तस्याप्यणुत्वसामर्थ्याद्वाक्यशेषप्रतिपन्नापरिच्छिन्नत्वसा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मध्यादेव वा सिद्धेः । आराग्रमात्रश्रुतावपि श्रुत्यै-
व बुद्धेर्गुणेनाऽऽराग्रमात्र इति तस्य बुद्ध्यौपाधि-
कत्वप्रतिपादनात् । न चाऽऽत्मगुणेनाराग्रमात्र
इति योजना बुद्धेर्गुणेनेत्यस्यानन्वयात्। स्वत एवा-
राग्रमात्रस्याराग्रस्येवानित्यताप्रसङ्गात् । तस्मा-
दात्मगुणेन महानपि बुद्धेर्गुणेनाराग्रमात्र इति-
योजना अध्याहारस्य परमतेऽप्यावश्यकत्वात् ।

अपरिच्छिन्नाकाशादेः परिच्छिन्नघटाद्युपाधित्वद-
र्शनाज्जीवापरिच्छेदाननुभवादनुवादायोगाच्चेति भावः ।
जीवस्य नानात्वं नित्यत्वं वा वाक्यशेषार्थः । अतो नाणु-
त्वस्य तद्विरोध इत्याशङ्क्याह न चानन्त्यमिति । नाना-
त्वमानन्त्यमिति पक्षे किं प्रतिशरीरं नानात्वमुतानन्त-
शरीराभिप्रायेण ? । आद्ये व्यवहारानुपपत्तिरित्याह-न
तावदिति । वरगोष्ठीवत्क्रमेण कस्य चित्कश्चिद्भोग इति
नोक्तदोष इत्याशङ्क्य तथात्वे एकशरीरवर्तिनिखिल-
भोगस्यैकेनानुसन्धानानुपपत्तिरित्यभिप्रेत्याह-स्वीयेति ।
द्वितीये किं जीवनानात्वं प्रतिपाद्यते उतानूद्यते ? नाद्यः ।
तस्यान्यतःप्राप्तत्वात्, प्रयोजनाभावाच्चेत्यभिप्रेत्याह ना-
प्यनन्तेष्विति । औत्सर्गिकानधिगतार्थबोधकत्वे बाधका-
भावाद् द्वितीयोऽपि न युक्त इत्याह-न चानधिगत इति ।
अन्यतः प्राप्तत्वादेव न जीवनित्यत्वं तदर्थं इत्याह-अत
एवेति । परमते स्वमते च नित्यत्वस्यान्यतः प्राप्तिं क्रमेण
दर्शयति तस्यापीति । "बुद्धेर्गुणेन" इत्यादिश्रुतिरपरि-
च्छिन्नात्मनि मुख्यैवेत्याह आराग्रेति । सन्निधानादात्मगु-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

णेनैवाराग्रमात्र इति योजनोचितेत्याशङ्क्येतरपदानन्वयप्रसङ्गेन दूषयति न चात्मेति । आराग्रोपमितस्य मध्यमपरिमाणत्वेनानित्यतापातश्चेत्याह स्वत एवेति । तर्हि सिद्धान्तेऽप्यात्मगुणेनेत्यस्यानन्वय इत्यत आह तस्मादिति । अध्याहार एव तर्हि दोष इत्याशङ्क्य परमतेऽपि बुद्धेगुणो न महानपीत्यध्याहारस्यावश्यकत्वात्, तथा चानित्यत्वस्यापरिहार्य्यत्वादित्यभिप्रेत्याह अध्याहारस्येति ॥

ननु बुद्धिगुणशब्देन ज्ञानस्य विवक्षितत्वान्नान्वयानुपपत्तिः, नवाऽध्याहार इत्याशङ्क्याह–न चात्मेति ।

(जीवस्याणुत्वनिरसनम्) न चात्मगुणेनाराग्रमात्रजीवो बुद्धेर्गुणो न दृष्ट इत्यन्वयेनाध्याहार इति वाच्यम् । अनित्यताबाधकस्योक्तत्वात्, गुणेति वैयर्थ्यात्, परमते बुद्धेरेव दर्शनत्वात्, ज्ञाने गुणाभावाच्च । घटसंवृतमाकाशं नीयमाने घटे यथा घटो नीयते नाकाशं, तद्वज्जीवो नभोपमः ।

"यथा ह्ययं ज्योतिरात्मा विवस्वा-
नयोभिन्नो बहुधैकोऽनुगच्छन्" ॥
"उपाधिना क्रियते भेदरूपो
देवः क्षेत्रेष्वेवमजोऽयमात्मा" ॥

इतिश्रुतिद्वयेनाकाशजलसूर्योपमोपादानाज्जीवः सर्वगत एव ब्रह्मरूपेण उपाधिना च परिच्छिन्न इवेति निश्चीयते । एतेन जीवस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वगतत्वश्रुतिः सर्वत्र भोगार्थं तस्य गमनपरा नाणुत्वेऽपि विरुध्यत इति प्रत्युक्तम् । आकाशदृष्टान्तेन स्वतो गमननिषेधात् । तस्मान्न जीवोऽणुरिति । ततः प्रादेशिकात्मविषयोऽहमनुभवः कल्पितात्मविषय इति स एव कर्ता भोक्ता च, न तु केवल उपाधितादात्म्यरहित इति । स चोपाधिर्बुद्धिरन्तःकरणं मनोविज्ञानमित्यादिशब्दाभिधेयः तस्यैवाहंबुद्धिगोचरत्वात् ।

बुद्ध्या दृष्ट इत्येतावता विवक्षितार्थसिद्धेः षष्ठीगुणपदयोर्वैयर्थ्यं चेत्याह-गुणेति । वस्तुतः सिद्धान्ते एवेदृशी योजना घटते । अपरो बुद्धेर्गुणेनाराग्रमात्र आत्मगुणेनैव कल्पितभेदेन गुणवद्गुणः साक्षिचैतन्यं तेनैव दृष्टः, न तु घटादिवत्प्रमाणजन्यवृत्त्येति वक्तुं शक्यत्वादिति भावः । जीवस्य ब्रह्मात्मना सर्वगतत्वस्यानन्यथासिद्धश्रुत्यन्तरेण निश्चितत्वाद्वाराग्रश्रुतिरुक्ताभिप्रायेत्याह-घटसंवृतमिति । आकाशोपमानश्रुतेर्मशकादिक्रमेणानेकदेशगतत्वपरत्वाज्जलसूर्योपमानश्रुतेश्चानेकशरीरेष्वन्तर्याम्यभेदपरत्वान्न जीवस्यापरिच्छेदादिनिश्चय इत्याशङ्क्याह एतेनेति । एतच्छब्दार्थमाह आकाशेति । "देवः क्षेत्रेष्वेवमजोऽयमात्मा"इति प्रत्यक्षसिद्धजीवात्मन एव जलसूर्योपमितत्वादन्तर्यामिनानात्वस्याप्रसक्तेस्तद्भेदस्योपाधिकत्वाभिधानायोगाच्चेति द्रष्टव्यम् । स्वभावतोऽपरिच्छिन्ने जीवे परिच्छिन्नतादात्म्यादेव परिच्छेदानुभव इत्युपसंहरति तस्मादिति । एवकारार्थमाह

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्त्विति । केवलपदार्थमाह उपाधीति । जीवगतकर्तृत्वाद्युपाधेः पराभिमतान्तःकरणादिवैलक्षण्यं वक्तुमाह स चेति । पराभिमतान्तःकरणादेरप्रत्यक्षत्वादस्मदभिमताज्ञानस्य परिच्छिन्नत्वेन प्रतिभासायोगादिन्द्रियाणाञ्चान्धादिसाधारणाहंबुद्ध्ययोग्यत्वात्स्वप्ने मनुष्यशरीराभावेऽप्यहंबुद्धिदर्शनात् । बुद्ध्यादिपदाभिधेयदुःखादिपरिणाम्येव जीवोपाधितयाऽहंबुद्धिगोचर इत्याह तस्यैवेति ।

बुद्धिविज्ञानादिशब्दाभिधेयस्य गुणत्वात्कथं दुःखादिमत्त्वमित्यत आह बुद्धेर्गुणेनेति ।

"बुद्धेर्गुणेनात्मगुणेन च" इत्यादिश्रुतौ परिमाणवत्तावगमात् बुद्धिरपि द्रव्यम् । "विज्ञानं यज्ञं तनुत" इति श्रुत्या कृत्याश्रयत्वावगमात् विज्ञानमपि द्रव्यम् । तच्च मन एव, विज्ञायतेऽनेनेति व्युत्पत्तेः ।

मनसोऽनन्तत्वाणुत्वशङ्कानिरसनपूर्वकसावयवत्वसिद्धिः । ननु बुद्धिरन्तःकरणं मन इत्यादिशब्दानामेकार्थत्वे मनोऽणु, अनन्तपरिमाणं वा ?। उभयथापि न, अहमिति बुद्धेस्तदवच्छिन्नात्मा विषयः अणोरिवाण्ववच्छिन्नस्याप्रत्यक्षत्वात् । अनन्तस्येवानन्तावच्छिन्नस्याप्यपरिमितत्वादिति चेत् । न । मनसोऽणुत्वेऽनंतत्वे वा "तन्मनो कुरुत एतस्माज्जायते प्राणो मन" इत्यादिश्रुतेस्तत्कार्यत्वप्र-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मितिविरोधात् । पञ्चावधानिनां युगपद् गन्धादिविषयानुभवदर्शनाच्च न मनसोऽणुत्वम् । नचानुभवयौगपद्ये मानाभावः । गन्धरूपरसस्पर्शशब्दान् युगपत्प्रत्येमीत्यनुभवात् । न च क्रमानुमानेनानुभवो बाध्यते । अनुमानस्यानुकूलतर्कविरहिणो दुर्बलत्वात् । एवं विभुत्वे व्यासङ्गानुपपत्तिर्बाधिका । न चादृष्टादेव तदुपपत्तिः । दृष्टसंपत्तौ तद्विरहेण कार्यविलम्बायोगात् । न चानणुत्वेऽपि सा तुल्येति वाच्यम् । वृद्धिह्रासधर्मिणो युगपत् क्रमेण वेन्द्रियसन्निकर्षसंभवेन व्यासङ्गपञ्चज्ञानसंभवात् क्रमिकेन्द्रियसंप्रयोगे च निमित्तं–मनोऽणुत्वमते इवादृष्टम् । अत एवैवं सति किं मनसा दृष्टमेवास्त्विति प्रत्युक्तम् । परमतेऽपि तत्पर्यनुयोगस्य तुल्यत्वात् ।

तथापि कथं मनसि विज्ञानशब्द इत्याशङ्क्याधिकरणसाधनस्य करणसाधनस्य वा तस्य वृत्तिज्ञानाधिकरणे आत्मनि तदारोपनिमित्ते च मनसि सम्भवादित्याह तच्चेति ।

उक्तोपाधेरपि परिच्छेदावगाहिप्रत्यक्षविषयत्वानुपपत्तिरिति चोदयति ननु बुद्धिरिति । अनन्तपरिमाणं वेति । नित्यस्य मनसो मध्यमपरिमाणायोगादिति भावः । भवेदेतदेवं यदि मनो नित्यं भवेत्, न त्वेतदस्ति श्रुतियुक्तिभ्यां तस्य कार्यत्वेन मध्यमपरिमा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

णावगमादित्याह मनस इति । तद्-ब्रह्म, मनोऽङ्कुरु-उत्पाद-दयामासेत्यर्थः । अणुत्वे तावद्युक्तिविरोधमप्याह पञ्चेति । गन्धादिविज्ञानयौगपद्यस्यैवाभावान्न तदानुपपत्तिरित्याशङ्क्यानुभवविरोधेन दूषयति न चेति । विमतानि ज्ञानानि क्रमभावीनि एकनिष्ठानेकज्ञानत्वात् संमतवदित्यनुमानविरोधाद्यौगपद्यानुभवो भ्रम इत्यत आह न च क्रमेति । मनोविभुत्वेऽपि युक्तिबाधमाह एवमिति । नन्वस्मिन्पक्षे समनस्केन्द्रियसन्निकर्षे सत्यदृष्ट-विरहप्रयुक्तज्ञानविरह एव व्यासङ्ग इत्यत आह न चादृष्टेति । अत्यन्तं तु संयोगे सति क्वचिदप्यदृष्टाभावात्पटाभावादर्शनादिति भावः । मनसो मध्यमपरिमाणत्वेऽपि तस्य नियतत्वात् ज्ञानयौगपद्यव्यासङ्गान्यतरानुपपत्तिरित्याशङ्क्य तत्परिमाणानियतत्वेन समाधत्ते नचानणुत्वेऽपीति । मनःसङ्कोचविकासावेव निमित्ताभावादनुपपन्नावित्याशङ्क्याणुत्वमते इन्द्रियान्तरसंयोगजनकमनः-क्रियेव दृष्टकारणाभावाददृष्टाधीनावेवैतावित्यभिप्रेत्याह क्रमिकेति । दृष्टनियामकाभाव एवादृष्टस्य नियामकत्वाभिधानादेवापरमपि चोद्यमयुक्तमित्याह अत एवेति । अदृष्टाधीननियमेन परमते चक्षुराद्यपलापश्च प्रसज्येतेत्याह परमतेऽपीति ॥

एतेन मनसः सावयवत्वे कल्पनागौरवमिति प्रत्युक्तम् । कार्यद्रव्यस्य सावयवत्वनियमात् । अहमितिप्रत्यक्षविषयस्य परिच्छिन्नत्वानुभवाच्च । तस्मात्सावयवं वृद्धिह्रासादिधर्मवच्च मन इति । न चान्तःकरणस्यानियतपरिमाणप्रयु-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्तदोषः । एकस्यैव जलूकादिद्रव्यस्य न्यूनाधिकप-
परिमाणदर्शनात् ।

"आत्मेन्द्रियमनोयुक्तं
भोक्तेत्याहुर्मनीषिणः" ॥

इति श्रुतिरपि मनोभिन्नस्यैव भोक्तृत्वं दर्शयति । तत्र चेन्द्रियशरीरयुक्तत्वमात्मनो भोक्तुः । अत एव तत्तदिन्द्रियशरीरसहकृतत्वमात्रम् ।

ननु चक्षुरादितादात्म्यविशिष्टस्यैव भोगः तस्याहंबुद्ध्या गोचरत्वात् तेषां प्रत्येकं व्यभिचारात् । अन्धादेरपि रूपादिभोगप्रतिसन्धानाच्च । मनसस्तु तादात्म्यमेवात्मना योगः । अविशेषेण प्रतिपन्नस्यापि योगस्य पदार्थयोग्यतानुसारेण व्यवस्थासंभवात् स्रुवेणावद्यतीतिवत् "स समानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लिलायतीव" इति श्रुतिः कर्त्तृत्वस्य बुद्ध्युपाधित्वमिवशब्देन तस्य मिथ्यात्वं च दर्शयति "स धीः स्वप्न" इति-श्रुतिनिर्दिष्टबुद्धितादात्म्यस्यैव समानशब्दार्थत्वात् ।

मनसो मध्यमपरिमाणत्वे तदवयवास्तद्धर्माश्चेत्यनेककल्पनागौरवं प्रामाणिकत्वान्न दोषायेत्यभिप्रेत्याह एतेनेति । कार्यद्रव्यस्येति श्रुतित एव कार्यत्वस्य गुणवत्त्वस्य च सिद्धत्वादित्यर्थः । अन्तःकरणस्य कालभेदेन वृद्धिह्रासाभ्युपगमे परिमाणभेदेन धर्मिभेदापत्तेः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्मृत्यनुभवकर्तृत्वभोक्तृत्वादीनां वैयधिकरण्यं स्यादित्यत आह न चेति । ननु प्रतीयमानात्मपरिच्छेदस्योक्तोपाध्यधीनत्वेऽपि भोक्तृत्वादिकमात्मनश्चैतन्यवत्स्वाभाविकमेव किं न स्यादित्यत आह आत्मेति । शरीरमात्मपदार्थः । श्रुत्या विशिष्टस्यैव भोगाभिधानादहं भुञ्जे इति प्रत्यक्षमपि तद्विषयमेवेत्यपिशब्दार्थः । ननु शरीरेन्द्रिययोरप्यत्रोपात्तत्वान्मनोभिन्नस्यैवेति कथमुक्तमित्याशङ्क्य तयोर्भोगोपकरणतयैवात्मसंयोगो विवक्षितः । मनस्तु भोक्त्रुपाधितया तादात्म्येनेति । विशेषमाह तत्र चेति । अहंबुद्धिगोचरोपाधेरेवात्र निरूप्यमाणत्वाज्जाग्रदादिदेहस्य चक्षुरादीन्द्रियस्य च प्रत्येकं वैलक्षण्येनैकरूपाहंबुद्धिविषयत्वायोगादिन्द्रियविशिष्टस्य भोगे तद्रहितान्धादेर्भोगाननुसन्धानापत्तेश्चेत्याह तस्येति । मनस्युक्तदोषाभावात्तादात्म्यमेव योग इत्याह मनसस्त्विति । आत्मभोगप्रयोजकस्य शरीरादियोगस्याविशेषेण श्रुतस्यापि पदार्थयोग्यतानुसारेण व्यवस्थां सदृष्टान्तामुपपादयति अविशेषेणेति । "स्रुवेणावद्यति" "हस्तेनावद्यति" "स्वधितिनावद्यति" इत्यविशेषेणावदानमात्रसाधनतया श्रुतानां हस्तादीनां योग्यतानुसारेण हस्तेन संहतपुरोडाशस्यैवावदानं, स्वधितिना मांसस्यैव स्रुवेणाज्यादिद्रवद्रव्यस्यैवेति यथा व्यवस्था तद्वदित्यर्थः । ऐहिकामुष्मिकभोगार्थसञ्चारस्यौपाधिकत्वनिर्देशादपि भोक्तृत्वादिकमौपाधिकमित्याह स समान इति । स आत्मा समानः बुद्ध्यैक्यमापन्न इत्यर्थः । न त्वत्र सादृश्यं समानपदार्थः चिदात्मनो जग-

त्यहंबुद्धिसादृश्यायोगात् । तत्सादृश्यस्य विश्वात्मनो लोकद्वयसंचारोपपादकतया निर्देशायोगाच्चेति भावः । औपाधिकस्यापि कर्तृत्वादेः पारमार्थिकत्वाशङ्कां श्रुतिरेवापवदतीत्याह ध्यायतीवेति । ननु स समान इत्यत्र कथं बुद्धितादात्म्यावगम इत्याशङ्क्य वाक्यशेषवशादित्याह स धीरिति ।

ध्यायतीवेत्यादाविवशब्दस्यान्यार्थत्वान्न ध्यातृत्वादेर्मिथ्यात्वसिद्धिरिति चोदयति नन्विवेति ।

(इवशब्दस्य मिथ्यात्वार्थकत्वप्रतिपादनम्) नन्विवशब्देन जीवस्य स्वातन्त्र्यं निषिध्यते, न तु मिथ्याकर्तृत्वमुच्यते इति चेन्न। तन्निषेधस्यैव तन्निषेधत्वात् । स्वतन्त्र एव हि कर्त्ता । ननु स्वातन्त्र्यमात्रं न निषेधति, किन्तु भृत्य इव स्वामिनियोगेन, परमेश्वरनियोगेनैवायं करोतीतीवशब्द आहेति चेत् । सत्यम् । अयं परमेश्वरतन्त्र एव निमेषादिव्यापारेऽपि

एष ह्येव साधु कर्म कारयति" इत्यादिश्रुतेः ।

"अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत् श्वभ्रं वा स्वर्गमेव वा" ॥

इतिस्मृतेश्च । विशिष्टप्रज्ञाशालिनामपि मित्रमृत्युप्रभृतीनां "भीषास्माद्वातः पवते भीषोदेति सूर्य्य" इत्यादिश्रुत्या परमेश्वराज्ञाकिंकर-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वश्रवणाच्च । तथापि स्वामिनियोगेन कर्त्तापि-कर्त्तैव भवति । अन्यथा परमेश्वरस्य कारयितृत्वादिव्यपदेशायोगात् । तस्य च कुर्वद्विषयत्वात् । तथा चेवशब्दो न साधुः । न हि राजाज्ञया युद्ध्यमानो भृत्यो युद्ध्यमान इवेति प्रयुज्यते । अस्ति च मिथ्यात्वे तत्प्रयोगः 'अरुण इव स्फटिको दृश्यते' इति । तस्मादिवशब्दस्य मिथ्यात्वमत्रार्थः । भगवानपि कर्त्तृत्वादेरौपाधिकत्वमुक्त्वा केवलात्मनि निषेधति ।

"तत्रैवं सति कर्त्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः" इति ॥

तथा श्रीभागवते भगवद्वचनम्—

शोकहर्षभयक्रोधलोभमोहस्पृहादयः ॥
अहङ्कारस्य दृश्यन्ते जन्म मृत्युश्च नात्मनः" इति ।

चेतनधर्मत्वेनाभिमतानां शोकादीनां जनिमरणधर्म्यहङ्कारधर्मत्वं दर्शयति, केवलात्मनि च प्रतिषेधति । अत एव प्रथमश्लोकेऽकर्त्तारं केवलं यः पश्यति स न पश्यतीति परस्य भ्रमः, स्पष्टं कर्त्तृत्वनिषेधकतद्वचनबाधात् ।

"स्वतन्त्रः कर्त्ता" इत्यनुशासनात्स्वातन्त्र्यनिषेधे कर्त्तृत्वस्यैवनिषेधात्तन्मिथ्यात्वमेवेति दूषयति न तदिति । परेच्छाधीनकर्त्तृत्वमिवशब्दार्थो न तु कर्त्तृत्वनिषेध इति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शङ्कते ननु स्वातन्त्र्यमिति । जीवव्यापारमात्रस्येश्वरेच्छाधीनत्वमङ्गीकरोति सत्यमिति । श्वभ्रं-नरकम् । कैमुतिकन्यायेनाप्यस्मदादिव्यापारस्येश्वराधीनत्वमाह विशिष्टेति । अस्मिन्पक्षे इवशब्दासामञ्जस्यप्रदर्शनाय जीवकर्तृत्वस्य मुख्यतामाह तथापीति । जीवस्य कर्तृत्वाभावे एष एव साधु कर्म कारयतीत्यादेरनुपपत्तिरित्याह अन्यथेति । एवं जीवस्य मुख्यकर्तृत्वमुपपाद्य तत्रैवशब्दोऽनर्थक इत्याह तथा चेति । नन्विवशब्दस्य सादृश्ये प्रयोगात् मिथ्यात्वमपि न तदर्थ इत्यत आह अस्ति चेति । उभयत्र प्रयोगाविशेषे कथं मिथ्यात्वमेव प्रकृते ग्राह्यमित्याशङ्क्य स समान इत्यादिवाक्यपर्यालोचनया मिथ्यात्वमेव तदर्थं इत्याह तस्मादिति ॥

अधिष्ठानं तथा कर्त्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम् ॥
शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः" ॥

इति श्लोकद्वयेन कर्तृत्वादेरौपाधिकत्वाभिधानादनन्तरश्लोकेन च केवलात्मनि तन्निषेधात्तन्मिथ्यात्वमुचितमित्याह भगवानपीति । उक्तार्थंदाढ्यायोद्धवं प्रत्यपि भगवदुक्तं वचनमुदाहरति तथेति । ननु तत्रैवं सति कर्त्तारमित्यत्र कर्त्तारं सन्तं केवलमकर्त्तारं यः पश्यति स न पश्यतीत्येवार्थः किं न स्यादित्यत आह अत एवेति अतःशब्दार्थमाह स्पष्टमिति । श्लोकहर्षभयक्रोधेत्यादिना भगवतैव कर्तृत्वादिप्रयोजकधर्माणामात्मनि निषेधविरोधादित्यर्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

किञ्च केवलं यः पश्यति स न पश्यतीति निषिध्यमानमकर्त्रात्मज्ञानं प्रमा, उत भ्रमः ? । नाद्यः-तन्निषेधायोगात् ? द्वितीयेऽपि किं प्रत्यक्षभ्रमः, उत परोक्षभ्रमः । उभयथाप्यप्रसक्तप्रतिषेधप्रसङ्ग इत्याह आत्मन इति ।

(तत्रैवं सतिकेत्यादिनाऽपरोक्षभ्रमसिद्धस्यैव कर्तृत्वस्य निषेधः)

आत्मनोऽकर्तृत्वज्ञानस्य लोकेऽप्रसिद्धस्य निषेधायोगात् कर्त्रात्मप्रत्यक्षप्रमाविरोधेन परोक्षाकर्त्रात्मभ्रमायोगेन निषेधानुपपत्तेः अपरोक्षभ्रमसिद्धमेव कर्तृत्वं निषिद्ध्यते। एतेन केवलस्यात्मनः कर्तृत्वानुमानं प्रत्युक्तं वर्णितप्रतिकूलतर्कविरोधाच्च । न च विशिष्टस्य कर्तृत्वे मोक्षस्य वैयधिकरण्यम् । अशनायाद्यतीतस्यात्मन एव बुद्धितादात्म्येन कल्पितकर्तृत्वाश्रयत्वात् । न च प्रज्ञया वाचं समारुह्येत्यादिश्रुत्या बुद्धेः करणत्वनिर्देशात्कथं तस्याः कर्तृत्वाद्याश्रयकोटिप्रवेश इति वाच्यम्। कर्तृत्वादिधर्माश्रयस्यापि बुद्धेरात्मनि तदारोपनिमित्तत्वेन करणत्वात् । आरुण्याद्याश्रयस्यापि कुसुमस्य मणाविवारुणिमारोपे । नापि ज्योतिष्टोमादिशास्त्रविरोधः । तस्य कर्तुरपेक्षितोपायपरत्वेन कर्तृत्वादवतत्परत्वात् । न च देवताविग्रहवदन्यपरादपि वाक्यात्कर्तृत्वादि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सिद्धिः । अविरोधे हि देवताविग्रहन्यायावतारः । अत्र च भूयान् श्रुतिन्यायविरोधः । न च परं ज्योतिरुपसंपद्येत्यादिश्रुतिविरोधः । स्वरूपं हि जीवस्य ब्रह्मैवाविद्यया तिरोहितमिव प्रतीयमानं विद्ययाऽऽविर्भवति ततोऽन्यस्य संसारदशायां तिरोहितस्य मुक्तावाविर्भविष्यतोऽभावात् ॥

उक्तदोषेण परपरिकल्पितार्थायोगात्केवलं सन्तमात्मानं कर्त्तारं यः पश्यति स न पश्यतीत्येवार्थ इति निगमयति अपरोक्षेति । मुक्त्याश्रयात्मा कर्त्ता आत्मत्वात् व्यतिरेकेण घटवदित्यनुमानं श्रुत्यादिविरोधादयुक्तमित्याह एतेनेति । कर्त्तृत्वादिबन्धस्य शबलात्मधर्मत्वे मोक्षसामानाधिकरण्यानुपपत्तिरित्युक्तं चोद्यमपवदति न च विशिष्टस्येति । विशिष्टस्वरूपयोर्वास्तवभेदाभावेन केवलस्यापि कल्पितसंसाराश्रयत्वात्तस्य मोक्षसामानाधिकरण्यमित्याह न चेति । युद्धेः श्रुतिन्यायसिद्धकर्त्तृत्वाविरोधिकरणत्वसंभवे तद्विरुद्धकरणत्वायोगादिति । हेतुमाह कर्त्तृत्वादीति । यदुक्तं स्वर्गकामो यजेतेत्यादिविधिवाक्यप्रमेयत्वादात्मकर्त्तृत्वं पारमार्थिकमिति; तन्न । तस्य कर्त्तृत्वस्य यथानुवादेन साध्यसाधनविशेषसम्बन्धपरत्वादित्याह नापीति । ननु विधिपरेणापि मन्त्रार्थवादादिना यथा देवताविग्रहादिपञ्चकसिद्धिः तथान्यपरादप्यात्मकर्त्तृत्वसिद्धिरित्यत आह न च देवतेति । यच्चोक्तं स्वरूपाविर्भावलक्षणमुक्तावपि कर्त्तृत्वश्रवणात् तत्परमार्थ एवेति;तन्न । अविद्यानिवृत्ति-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लक्षणास्वरूपाभिनिष्पत्तेः कृत्यसाध्यतया कर्तृत्वानपेक्षणादित्याह न च परं ज्योतिरिति ।

आगन्तुकस्यैव कस्य चित्स्वरूपस्याभिनिष्पत्तिः कृतिसाध्या भविष्यतीत्याशङ्क्याह प्रागिति ।

(मुक्त्यवस्थायाः कृतिसाध्यत्वनिरसनम्) प्रागविद्यमानस्य स्वरूपत्वाभावेन स्वेन रूपेणेति निर्देशानुपपत्तेः तत्र तावदभिनिष्पद्यते इत्येतन्न मुक्त्यवस्थाकर्तृविधिः अभिनिष्पत्तिर्ह्यहं ब्रह्मेति वृत्तिसाक्षात्कारः। तत्कर्तृकत्वं चाविद्याकालीनमिति बुध्यभिन्नः श्रवणादिकर्ता तत्कर्ता। उपसंपत्तिश्च ततः केवलानन्दब्रह्मरूपेणावस्थानम्। अनुत्क्रान्तप्राणस्य विदुषः स्वस्वरूपब्रह्मसमीपगमनानुपपत्तेः । क्त्वाप्रत्ययश्च स्वरूपेणाभिनिष्पद्य पर ज्योतिरुपसंपद्यत इति संबध्यते । परमिति विशेषणेन ब्रह्मरूपज्योतिष एव गन्तव्यत्वात् । न चानादिब्रह्मात्मनावस्थाने कस्य चित्कर्तृत्वमपेक्षितं भेदोपाधिनिवृत्त्यपेक्षया च परं ज्योतिरुपसंपद्यत इति व्यपदिश्यते । न चास्माच्छरीरात्समुत्थायेति विदुषः समुत्थानकर्तृत्वविधिः अविद्याकार्येऽहङ्काराद्यनर्थे तादात्म्याभिमानेन मग्नस्यासत्कल्पस्य ततो विवेकस्यैव समुत्थानशब्दार्थत्वात् । अन्यथा "न तस्य प्राणा उत्क्रामन्ति"इतिश्रुतिविरोधात् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न च स्वशब्दस्य स्वीयपरत्वादागन्तुकधर्मान्तरविशिष्टरूपेणाभिनिष्पत्तेः कृतिसाध्येति वाच्यम् । भावकार्यस्यानित्यत्वनियमेन मोक्षस्यापि तथात्वापातादिति भावः । किञ्चाभिनिष्पद्यत इत्यनेन किं मुक्त्यवस्थायामात्मकर्तृत्वविधिः उत परं ज्योतिरुपसंपद्येत्यनेन किं वास्माच्छरीरात्समुत्थायेत्यनेन अथवा स तत्र पर्येतीत्यनेन जक्षत् क्रीडन्नित्यादिना वा ? । प्रथमस्याविद्याकालीनकर्तृत्वविषयत्वान्न मुक्तात्मकर्तृत्वपरत्वमित्याह तत्र तावदिति । वृत्तिसाक्षात्कार इति । अनादिस्वरूपस्य उत्पत्त्ययोगादित्यर्थः । द्वितीयं दूषयति उपसंपत्तिश्चेति । तत इति । ब्रह्मसाक्षात्कारादित्यर्थः । ज्योतिरुपसंपद्येति । ज्योतिः समीपगमनकर्तृत्वमेव प्रतीयते इत्याशङ्क्याह अनुत्क्रान्तेति । नन्वेवं समुपसंपद्याभिनिष्पद्यत इत्युपसंपत्तेरभिनिष्पत्तिपूर्वकालीनत्वाभिधायकक्त्वाश्रुत्यनुपपत्तिरित्याशङ्क्य मुखं व्यादाय स्वपितीत्यादिवत्तदुपपत्तिरित्यभिप्रेत्याह क्त्वाप्रत्ययश्चेति । नन्वादित्यादिज्योतिरुपसपद्य स्वेन रूपेणाभिनिष्पद्यत इति यथाश्रुतयोजनैव किं न स्यादित्यत आह परमिति । नन्वेवमपि ब्रह्मस्वरूपेणावस्थानकर्तृत्वं मुक्तस्यावश्यकमित्याशङ्क्य कृत्ययोग्ये कर्तृत्वायोग इत्याह न चानादीति । कथं तर्ह्युपसंपत्तेरागन्तुकत्वादिनिर्देश इत्यत आह भेदोपाधीति । तृतीयेऽपि न मुक्त्यवस्थायां कर्तृत्वविधिरित्याह न चास्मादिति । शरीरत्रयविविक्तात्मज्ञानस्यैव समुत्थानशब्दार्थत्वात्तत्कर्तृत्वस्याविद्याकालीनत्वादिति । हेतुमाह अविद्येति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्रह्मैव सन् ब्रह्माप्येतीत्यादिश्रुतिविरोधादेव चतुर्थेनापि न गमनकर्तृत्वमुच्यते इत्याह । अत एवेति ।

अत एव स तत्र पर्येतीत्यविवक्षितक्रियम् । परितः सर्वत एति सर्वात्मकब्रह्मप्राप्तः स्वयं सर्वात्मा भवतीति तात्पर्यम् । जक्षत् क्रीडन्नित्यादितु ब्रह्मस्वरूपप्राप्तस्यानवाप्तकामाभावादसंभावितार्थतया च स्तुतिः निखिलानन्दप्राप्तिपरा वा । अन्यथा यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यविद्यावस्थायामेव दर्शनादिविशेषप्रतिपादनस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिमुक्त्यवस्थायां सकलविशेषनिषेधस्य चायोगात् । एतेनात्मनोऽकर्तृत्वेऽनात्मनोऽपि तन्नेति काण्डद्वयं निरधिकारादप्रमाणमिति प्रत्युक्तम्। आत्मन एवारोपितमुख्यकर्तृत्वाभ्युपगमात् । तथा च पारमर्षं सूत्रद्वयं "कर्त्ता शास्त्रार्थवत्त्वात्" यथा च "तक्षोभयथा"इति । न चैवं मोक्षोऽपि स्वर्गवन्मृषा स्यादारोपितकर्तृजन्यत्वादिति वाच्यम् । मोक्षस्यात्मस्वरूपतया स्वर्गवन्मिथ्याकर्त्रजन्यत्वात् ।

अविवक्षितक्रियमविक्षितगमनमित्यर्थः । किं परं तर्हीदं वचनमित्यत आह परित इति पञ्चममप्यन्ययति जक्षदिति । मुक्तस्य शरीरेन्द्रियादेरभावाद्भक्षणाद्ययोगादपीयं स्तुतिरित्याह असंभावितेति । सर्वविषयाभिव्यंग्यानन्दाभिव्यक्तिपरा वेयं श्रुतिरित्याह निखि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ळेति । मुक्त्यवस्थायामपि शरीरेन्द्रियादिपूर्वकविषयभोगमङ्गीकुर्वाणं विषयलम्पटमर्वाचीनं प्रत्याह अन्यथेति। मिथ्याकर्तृत्वस्यैवाऽऽमोक्षमनुवर्त्तमानस्य भोगापवर्गादिव्यवस्थापकत्वात्तत्पारमार्थिकत्वस्य श्रुतिप्रामाण्यानुपयोगात्परोक्तं चोद्यान्तरं निरस्तमित्याह एतेनेति । उक्तमर्थं बादरायणाचार्य्यसूत्रसंमतत्वाद्दृढयति तथा चेति । आत्मनो मिथ्याकर्तृत्वमप्यनङ्गीकुर्वाणं सांख्यं प्रति विधिनिषेधादिशास्त्राप्रामाण्यप्रसङ्गादिन्यायैः प्रथमं कर्तृत्वमात्रं निर्णयामास "कर्त्ता शास्त्रार्थवत्त्वात्" इति । पुनश्च वैशेषिकादिमतानुसारेण तत्कर्तृत्वं पारमार्थिकमित्याशङ्क्याह यथा च तक्षोभयथेति । तक्ष्णो यथा वास्यादीतरकारकसमवधानप्रयुक्तं कर्तृत्वं, तदसमवधाने तु स्वाभाविकमकर्तृत्वमेव, तथाऽऽत्मनोऽपि शरीरेन्द्रियादिकर्तृत्वादेरपि मिथ्यात्वे तज्जन्यमोक्षस्यापि तथात्वापातेन स्वर्गवन्मुमुक्ष्वभिलषितत्वानुपपत्तेरपुरुषार्थतेत्याशङ्क्य तस्य मिथ्याकर्तृजन्यत्वमेवासिद्धमिति दूषयति न चैवमिति ।

मोक्षस्य नित्यब्रह्मात्मस्वरूपत्वे श्रवणादेः पुरुषार्थपर्यवसायित्वेन तद्विधानमनर्थकं स्यादिति चोदयति नन्वेवमिति ।

श्रवणादिविधेः सार्थकत्वम् । नन्वेवं ज्ञानाय श्रवणादिविधिर्व्यर्थः । ज्ञानस्यैवानुपयोगात् । नचानर्थहेत्वविद्यानिवृत्तये तदिति वाच्यम्। अविद्यानिवृत्तेरात्मनोऽन्यत्वे जन्यत्वे चारोपितकर्तृसाध्यतया स्वर्गादिवदपु-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रुषार्थत्वापातेन तदर्थज्ञानान्वेषणायोगात् । आत्ममात्रत्वे चासाध्यत्वाज् ज्ञानं व्यर्थमिति; मैवम् । नाविद्यानिवृत्तिरात्मा, अभावत्वात् । सा च न पुरुषार्थः । सद्विलक्षणत्वात्, असुखत्वाच्च । किंत्वात्मैव परमानन्दपुरुषार्थः । न चैवमविद्यानिवृत्तेरप्रार्थ्यत्वात् तदुपायज्ञानप्रयासो व्यर्थः । पुरुषार्थप्रतिबन्धकनिवृत्तित्वेन तस्याः काम्यमानत्वात् । ततस्तन्निवृत्त्युपायज्ञानसाधने नियोगोऽपि युज्यते ।

नन्वविद्या किं प्रतिबध्नाति ?। न तावन्मोक्षस्वरूपम् । तस्याऽऽत्मस्वरूपतया सदाऽनपायात् । नापि तज्ज्ञानं तत एव इति चेन्न । आनन्दात्मस्वरूपो हि मोक्षः । अनर्थश्च दुःखात्मा तत्प्रतिकूलः । अविद्या च तद्धेतुः । एवं चानन्दात्मकब्रह्मविपरीतानर्थदर्शनेन नित्यात्मभूतोऽपि मोक्षो 'असत्कल्पो नास्ति' इत्यादिव्यवहारयोग्यो बभूव, ततश्चाकृतार्थता । निवृत्ते चाज्ञाने निरस्तनिखिलानर्थपरमानन्दात्प्राप्यत इवेत्यविद्यानिवृत्तिरपुरुषार्थोऽपि काम्यते ॥

श्रवणादिसाध्यज्ञानस्य मोक्षेऽनुपयोगेऽपि अनर्थहेतुनिवृत्तावुपयोगान्नोक्तदोष इत्यत आह न चानर्थेति । किमविद्यानिवृत्तिरात्मनो भिन्ना उताभिन्ना?, उभयथाप्यनुपपत्तिरित्याह-अविद्यानिवृत्तेरिति । न सन्नासन्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नसदसन्नानिर्वाच्योऽपि तत्क्षयइति पञ्चमप्रकारमतेना-
विद्यानिवृत्तेरात्मभिन्नत्वं ज्ञानजन्यत्वं चाह नाविद्येति ।
यदुक्तमविद्यानिवृत्तिर्मिथ्याकर्तृजन्यत्वे स्वर्गादिवन्न मुमु-
क्षुपुरुषार्थतेति, तदिष्टापत्त्या परिहरति सा चेति । सुख-
स्यैवाऽऽनन्दवादे पुरुषार्थताया वक्ष्यमाणत्वान्न नेयं पुरु-
षार्थ इत्याह । असुखत्वाच्चेति । कस्तर्हि परमपुरुषार्थ
इत्यतआह । किंत्वात्मेति । तर्ह्यविद्यानिवृत्तेरकाम्यतया
तत्साधनानुष्ठानानुपपत्तिरित्याशङ्क्य पुरुषार्थतया काम-
नाभावेऽपि व्याधिनिवृत्तिवत्प्रतिबन्धकनिवृत्तितया त-
त्कामना घटतइति परिहरति । न चैवमिति । अविद्या-
याः प्रतिबन्धकत्वे सत्येवं स्यात् तदेवानुपपन्नम्, प्रतिबन्धा-
निरूपणादिति चोदयति । नन्विति । किं मोक्षं प्रतिबध्ना-
ति उत तत्त्वज्ञानमिति किं शब्दार्थः । आद्यं दूषयति। न
तावदिति । तज्ज्ञानस्यापि स्वप्रकाशात्ममात्रतया सदा
सिद्धत्वान्न तत्प्रतिबन्धोऽपीत्याह । नापीति । आत्मस्वरू-
पानन्दस्य तदभिव्यक्तेश्च नित्यत्वेऽपि तदनभिव्यक्तरूपा-
या अविद्यायास्तत्प्रतिकूलदुःखसंभेदघटकतया विषसंपृक्ता-
न्नवदपुरुषार्थत्वबुद्धिप्रतिबन्धकतया पुरुषार्थविरोधित्वा-
न्निवृत्तिःकाम्यतइत्याह न आनन्देति । असत्कल्पेत्येतद्विवृ-
णोति नास्तीति । स्वप्रकाशात्मानन्दानभिव्यक्त्यात्मक-
तया पुरुषार्थत्वभ्रमहेतावज्ञाने निवृत्ते स्वाभाविकशु-
द्धपुरुषार्थाभिव्यक्तया कृतार्थतेत्याह । निवृत्ते चेति ॥

स्वप्रकाशमानंदमशून्यं प्रपञ्चोपशमं शिवमद्वैतं यत्र
त्वस्य सर्वमात्मैवाभूदित्यादिश्रुतिशतसम्मतपक्षमाह
अथवेति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अविद्यानिवृत्तेः श्रुतिसिद्धात्मस्वरूपत्वम्ः

अथवा ऽविद्यानिवृत्तिरात्मैव । अस्ति तावच्छुक्तौ रजतभ्रमानंतरमिह रजतं नासीदनुभूतरजतमनुभवदशायां शुक्तौ नास्ति; इदं रजतानुभवकालेऽपितदभाववदित्यादिबुद्धिः सा च प्रमाबाधाभावात् मिथ्यारजताश्रयस्य तदानीमपि तदभाववत्वनियमाच्च तद्घटितत्वात्तत्तल्लक्षणस्य । सत्त्वाधिकरणादन्यश्चेत् न तावत्परमार्थः । अनिर्वचनीयाभावस्य परमार्थत्वायोगात् । अभावस्य प्रतियोगिसमानसत्ताकत्वनियमात् ब्रह्मणोऽद्वितीयत्वश्रुतिविरोधप्रसङ्गाच्च । न च भावाद्वैतविषया सा । श्रुतौ भावपदाभावात् । संकोचकप्रमाणाभावाच्च । तस्य संविदतिरिक्तस्य संवित्सम्बन्धाभावेन ब्रह्मणस्तत्प्रत्यक्षत्वायोगाच्च कल्पिततादात्म्यमस्तीति चेन्न । एवमपि मुक्तौ तदयोगात् । मुक्तौ विद्यमानपदार्थज्ञानाभावे ब्रह्मणोऽपि अज्ञत्वप्रसङ्गात् ॥

अविद्याभावस्यात्ममात्रत्वं वक्तुं लोके कल्पिताभावस्याधिष्ठानात्मतां साधयितुमुपक्रमते । अस्ति तावदिति । इदं रजतमिति ज्ञानविरोधादभावज्ञानं भ्रम इत्याशङ्क्याह-सा चेति । रजतज्ञानात्पूर्वमभावज्ञानानुत्पत्तेः तद्बाधकत्वायोगादभावज्ञानस्य भ्रान्तरजतज्ञानबाधमन्तरेणोत्पत्त्ययोगादभावज्ञानमेव तद्बाधकम् । तथा चोक्तम्-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पूर्वं परमजातत्वादबाधित्वैव जायते ।
परस्यानन्यथोत्पादान्न त्वबाधेन संभवइति ॥

तथा चाभावज्ञानस्य प्रमात्वाद्रजतकालेऽपि तदभावोऽभ्युपेय इत्यर्थः । किं च रजतमिथ्यात्वस्य वक्ष्यमाणत्वात्स्वसमानाधिकरणस्य वा स्ववैयधिकरण्यानधिकरणस्य वात्यन्ताभावस्य प्रतियोगित्वस्य मिथ्यात्वलक्षणत्वात्तत्काले तदभावो वक्तव्य इत्याह मिथ्येति । तस्याधिष्ठानादन्यत्वे पारमार्थिकत्वं, कल्पितं वा स्यात् ?, नाद्यः । प्रतियोगिविरहैकस्वभावस्य प्रतियोगिसमानसत्ताकत्वनियमादित्याह । स चेति । अनन्ताभावानां परमार्थत्वे श्रुतिपीडा च स्यादित्याह । ब्रह्मण इति । अद्वितीयश्रुतेर्भावान्तराभावपरतया नाभावपारमार्थिकत्वेन विरोध इत्याशङ्क्याह न चेति । किं च ब्रह्म स्वव्यतिरिक्तपारमार्थिकत्वं जानाति न वा ? । नाद्यः । दृग्दृश्ययोः सम्बन्धानिरूपणादित्याह । तस्येति । सम्बन्धाभावोऽसिद्ध इति शङ्कते कल्पितमिति । सत्तानवच्छेदकभेदवत्त्वं हि तत्तादात्म्यं तच्चाभावस्य वास्तवत्वे न घटत इत्याह नेति । अविद्यावस्थायां तदङ्गीकृत्यापि मुक्त्यवस्थायां तत्कल्पकाभावात्तदसम्बन्धमाह एवमपीति । द्वितीये ब्रह्मणः सर्वज्ञत्वहानिरित्याह मुक्ताविति ।

अतिरिक्ताभावस्य कल्पितत्वपक्षे व्यावहारिकत्वं वा प्रातीतिकत्वं वा स्यात् ? । नाद्यः । प्रतियोगिविरहात्मनोऽभावस्य प्रतियोगिसमानसत्ताकत्वनियमादित्याह- कल्पितश्चेदिति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अतिरिक्ताभावस्य कल्पितत्वपक्षे व्यावहारिकत्वादिनिरसनम् ।

कल्पितश्चेन्न व्यावहारिकः । रजतस्य प्रातीतिकत्वेन तस्य तदयोगात् । प्रतियोगिसमानसत्ताकभावादभावस्य । व्यावहारिकाविद्यादेर्ब्रह्मणि व्यावहारिकाभावायोगाच्च । अभावस्य स्वाधिकरणे स्वसमानसत्ताकप्रतियोगिविद्यमानत्वविरोधात् । घटात्यन्ताभाववति घटाभावात् । अन्यथा तत्र घटभावबुद्धिः प्रमा स्यात् । अतएव न रजतात्यन्ताभावः प्रातीतिकः । तस्य तदानीमप्रतीतेः । तस्मात्कल्पिताभावोऽधिष्ठानमेव ।

ननु कल्पिताभावः प्रतियोग्यधिकरणं न भवति अभावत्वात् घटाद्यभाववत् । अन्यथा घटाद्यभावोऽपि भूतलादिकमेव स्यात् । तथा च षष्ठप्रमाणव्युत्पादनमसङ्गतं स्यादिति चेन्न । योऽभावः स्वाधिकरणाभिन्नसत्ताकप्रतियोगिकः, स भावान्न भिद्यते । अभिन्नसत्ताकत्वं च प्रतियोगिनोऽधिकरणप्रतियोगिकसत्तानवच्छेदकभेदवत्त्वम् । अतो घटाधिकरणकघटाभावस्य न तदभेदः ।

किं चास्मिन् पक्षेऽवद्यादेर्व्यावहारिकस्य ब्रह्मणि स्थित्यनुपपत्तिः । स्वसमानसत्ताकत्वाभावकालीनतत्सामानाधिकरण्यविरोधादित्याह-व्यावहारिकेति । तत्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षेपपत्तिकं दृष्टान्तमाह-घटेति । अभावस्य स्वसमानसत्ताकप्रतियोगिसाद्रूप्यविरोधादेव प्रातीतिकत्वपक्षोऽपि न सम्भवतीत्याह-अत एवेति । रजतकाले तदभावस्याप्रतीतेश्च न तस्य प्रातीतिकत्वमित्याह-तस्येति । अधिष्ठानातिरेके उक्तदोषानिस्तारादधिष्ठानमेव कल्पिताभाव इत्युपसंहरति । तस्मादिति । कल्पिताभावस्याधिष्ठानमात्रत्वेऽनुमानविरोधं शङ्कते । नन्विति । विपक्षेऽतिप्रसङ्गं बाधकमाह अन्यथेति । इष्टापत्तिमाशङ्क्याह । तथाचेति । भूतलादेरेव घटाद्यभावत्वे तस्य प्रत्यक्षादिगम्यतयाऽनुपलब्धिप्रमाणमभ्युपेतमनर्थकं स्यादित्यर्थः । घटाभावादेः स्वाधिकरणाद्भेदे स्वाधिकरणाभिन्नसत्ताकप्रतियोगिकत्वमुपाधिकरणत्वेनाभिमतं यच्छुक्त्यादि तदभिन्नसत्ताकं यद्रजतादि तत्प्रतियोगि यस्य सोऽभावोऽभावाधारत्वेनाभिन्नत्वान्न भिद्यते । यद्यदभिन्नसत्ताकं तत्प्रतियोगिकाभावस्ततो न भिद्यत इति समुदायार्थः । एवं च सति घटाधिकरणकघटाभावस्य घटमात्रता स्यादित्याशङ्क्याधिकरणाभिन्नताकत्वं निर्वक्ति । अभिन्नसत्ताकत्वं चेति । अधिकरणप्रतियोगिकः सत्ताया अनवच्छेदकः अनिरूपको यो भेदस्तद्वत्त्वमित्यर्थः । इदमोऽधिष्ठानाद्रजतभेदश्च सत्तानवच्छेदक एव । रजतदशायामिदं रजतं नेत्यनुभवादिदं रजतमिति सामानाधिकरण्यानुभवाच्च । घटो घट इति सामानाधिकरण्याभावात्स्वस्मिन् स्वप्रतियोगिकभेदस्य सत्तानवच्छेदकस्याप्यभावात्तन्निष्ठस्तदभावस्ततो भिद्यत इत्याह-अत इति । एतच्चाभावस्य प्रतियोगिवृत्तित्वमभ्युपेत्योक्तम् । वस्तुतस्त्वभावस्य प्रतियोग्यनधिकरणत्व-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वत् प्रतियोगिनोऽप्यभावानधिकरणत्वं तृतीये परिच्छेदे वक्ष्यति । तथा चाभिन्नसत्ताकपदं यथाश्रुतमेवेति द्रष्टव्यम् ।

शुक्तिरजताद्यभावस्याधिष्ठानाभेदप्रयोजकमुक्त्वा भूतले घटाद्यभावस्य तत्प्रयोजकाभावादधिकरणाद्भेद एवेत्याह-घटभूतलयोस्त्विति ।

घटाद्यभावस्याधिकरणाद्भेदत्वंनिश्चिनोति । घटभूतलयोस्तु भेदः सत्तावच्छेदक एव । घटो भूतलमित्यननुभवात् । अतो न तदभावस्य भूतलाभेदः, किं तु भेद एव । योऽभावः स्वाधिकरणाभिन्नसत्ताकप्रतियोगिको न भवति स त्वभावो भावाद्भिद्यते । घटे शुक्तिरजतं नास्तीति प्रतीयमानाभावश्च तस्माद्भिन्नः । शुक्तिरजतस्य घटाद्भिन्नसत्ताकत्वात् । न च भावप्रतियोगिकाभावस्य भावत्वं न दृष्टमिति वाच्यम् । तव प्रागभावस्य जन्यत्ववत् प्रध्वंसस्यानित्यत्ववदन्यत्रादृष्टस्यापि प्रमाणबलादङ्गीकारे विरोधाभावात् न च भावस्य सप्रतियोगित्वं विरुद्धम् । सादृश्यादेरभावप्रसङ्गात् । ब्रह्मणोपि सप्रपञ्चत्ववत्काल्पनिकत्वं तदविरुद्धम् । एवं घटादीनामप्यभावौ व्याख्यातौ । तस्मादधिष्ठानमेव कल्पितात्यन्ताभावाभावः । एवं ध्वंसादिरपि समानन्यायत्वात् । ततः शुक्तिरजतं न शुक्तिनिष्ठान्योन्या-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भवप्रतियोगि । तदभिन्नसत्ताकत्वात् । शुक्तिरिव । न चानुभवविरोधः । तस्यान्यथाऽप्युपपत्तेः । कल्पिताभावस्याधिष्ठानगतस्य वास्तवत्वानुपपत्तिरनुकूलतर्कः । कल्पितत्वे च तद्भेदाभ्युपगमेऽनन्तभेदादिकल्पनागौरवम् ।

अत्रापि सामान्यप्रयोजकमाह-योऽभाव इति । शुक्तिरजताभावस्य शुक्ताविव घटादावपि किमधिकरणादभेद एव ?। नेत्याह- घट इति । नन्वभावप्रतियोगिकाभावस्यैव भावात्मत्वं दृष्टं, न तु भावप्रतियोगिकाभावस्येत्याशङ्क्य ध्वंसप्रागभावात्मकस्य प्रागभावध्वंसात्मकस्य च घटस्य जन्यत्वानित्यत्वयोरन्यत्राद्दृष्टयोरप्यङ्गीकारादत्रापि न दोष इत्याह-न च भावेति । ननु भावप्रतियोगिकोऽभावो भावो न भवति, सप्रतियोगिकत्वाद् व्यतिरेकेण घटवदित्याशङ्क्य सादृश्यादौ व्यभिचारेण दूषयति-न च भावस्येति । तर्हि सादृश्यादेव प्रपञ्चाभावरूपब्रह्मणोऽपि सप्रतियोगिकत्वं स्यादित्याशङ्क्य प्रतियोगिसमसत्ताकं तदविरुद्धमित्याह-ब्रह्मणोऽपीति । एवं घटादेरपि मृदाद्यवच्छिन्नं चैतन्यमधिष्ठानतया एकोऽभावः, भूतलादिवृत्तिश्च प्रतियोगिविरहात्मैवापर इति सिद्ध्यति । प्रपञ्चस्य ब्रह्मविवर्तत्वात्, इत्याह-एवमिति । अधिष्ठाने प्रतीयमानरजताद्यभावस्य ततो ऽभेदे बाधकसद्भावाद् भेदे च बाधकाभावात्तदेव स इत्युपसंहरति-तस्मादिति । एवं ध्वंसान्योन्याभावावपि कल्पितप्रतियोगिकौ भावाभावात्मकावभ्युपेयौ । तयोरप्यधिष्ठानभिन्नयोः पारमार्थिकत्वादि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रूपयोर्दुनिरूपत्वात्, इत्याह-एवं ध्वंसादिरिति । उपपत्तितर्कानुग्राह्यमनुमानमाह-तत इति । शुक्तिरजतं शुक्तितादात्म्यापन्नं रजतम् । न चाश्रयासिद्धिः, तस्य निपुणतरमुपपादयिष्यमाणत्वात्तदभिन्नसत्ताकत्वादिति यथाश्रुत एव हेतुः । तथा च न शुक्तेः साधनविकलतापक्षधर्मतावलाच्चाधिष्ठानरूपान्योन्याभावाप्रतियोगित्वं रजते सिद्ध्यतीति भावः । नन्वेवं सति शुक्ती रजतभिन्नेति विशिष्टप्रत्ययः कथमित्याशङ्क्य रजतभेदस्तद्भिन्न इतिवदुपपद्यत इत्याह-न चानुभवेति । हेतोरप्रयोजकत्वं निराकरोति-कल्पितेति । अधिष्ठानातिरिक्ताभावस्य परमार्थत्वानुपपत्तावपि कल्पितं किन्न स्यादित्यत आह-कल्पितत्वे चेति ।

शुक्तिनिष्ठान्योन्याभावप्रतियोगित्वाभावे शुक्त्यभिन्नत्वमुपाधिर्न संभवति । शुक्तिभेदेऽनवस्थापत्त्या शुक्तिनिष्ठान्योन्याभावप्रतियोगित्वाभावेऽपि शुक्त्यभिन्नत्वाभावादित्याह-न चेति ।

शुक्तीनिष्ठान्योन्याभावप्रतियोगित्वाभावे शुक्त्यभिन्नत्वमुपाधिर्नसंभवतीत्याशङ्क्य नि-।

न च शुक्त्यभिन्नत्वमुपाधिः । शुक्तिभेदे साध्याव्यापकत्वात् । अधिष्ठानमात्रं भेद इति मते न भेदग्रहमात्रं भ्रमविरोधि, किं तु तद्विशेषज्ञानम् । एवं रजतभेदस्य शुक्त्यात्मत्वसिद्धे तदत्यन्ताभावादिरपि न शुक्तिभिन्नः । स्वाधिकरणतया प्रतीयमानाभिन्नसत्ताकप्रतियोगिकाभावत्वात् । तदन्योन्याभाववत् । अत्रापि तद्भेदस्य दुर्निरूप-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वमनुकूलस्तर्कः । श्रुतिरपि यत्र त्वस्य "सर्वमात्मैवाभूत्" इति सर्वस्य तद्भावापत्तिं दर्शयन्ती तदभावस्य तन्मात्रत्वं दर्शयति । अभावस्य ततो भेदे सर्वस्यात्मभावापत्त्यभावात् । तस्मादात्मैवाविद्यानिवृत्तिरिति । नन्वेवं कथं ज्ञानादज्ञाननिवृत्तिः । तस्याः नित्यस्वरूपतया तेन विनाऽपि सत्त्वात् । ततस्तदनिवृत्तौ च किं ज्ञाने ? । न चाविद्याया अदर्शनार्थं तदिति वाच्यम् तस्यां सत्यां तदयोगात् । अदर्शनस्यापुरुषार्थत्वात् । किं चाविद्यानिवृत्तेरात्ममात्रत्वेऽविद्याप्यत्र न स्यात् ध्वंसस्य प्रतियोग्यनाधारत्वादिति चेत् । उच्यते । न तावदविद्यास्थित्यनुपपत्तिः । समानसत्ताकयोरेवाभावप्रतियोगिनोर्विरोधात् । अविद्यायाश्च कल्पितत्वात् । नापि ज्ञानवैयर्थ्यम् । असति ज्ञानेऽनर्थहेत्वज्ञानस्य विद्यमानतयाऽनर्थस्यापि स्थितेः ॥

नन्वस्मिन् पक्षे इदमित्यधिष्ठानरूपभेदस्य ज्ञातत्वात् कथं रजतभ्रम इत्यत आह-अधिष्ठानेति । अधिष्ठानविषयस्य सत्तानिश्चयरूपस्यैव भ्रमविरोधित्वान्नायं दोष इत्यर्थः । एवमन्योन्याभावस्याधिष्ठानात्मकतां प्रसाध्य तद्दृष्टान्तेनात्यन्ताभावादेरपि साधयति-एवं रजतेति । आरोपिताभावस्याधिष्ठानात्मत्वं श्रुतितोऽप्यस्तीत्याह-श्रुतिरपीति । अधिष्ठानभिन्नाभावाङ्गीकारे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रुत्यसामञ्जस्यमाह-अभावस्येति । शुक्तावपि दृश्याभावस्य सत्त्वे कं पश्येदिति कर्माक्षेपायोगाच्चेत्यपि द्रष्टं पदार्थं रजताद्यभावस्याधिष्ठानात्मकत्वमुक्तं तदाह-तस्मादिति । नित्यसिद्धात्मन एवाविद्यानिवृत्तिरूपत्वे ज्ञानवैयर्थ्यमिति चोदयति । नन्वेवमिति । अविद्यानिवृत्तेरसाध्यत्वेऽपि तद्दर्शननिवृतिर्ज्ञानसाध्येत्यनाह-न चाविद्याया इति । अविद्यायां नित्यसाक्षिवेद्य तथा तस्यां सत्यां तद्दर्शनं दुर्निवारमित्याह-तस्यामिति । अविद्यास्वरूपप्रयुक्तत्वादनर्थस्य तद्दर्शनमात्रं न पुरुषार्थ इत्याह-अदर्शनस्येति । किंचास्मिन् पक्षेऽविद्याया एवासंभवान्न तन्निवृत्तिस्तददर्शनं वा ज्ञानसाध्यमित्याह-किं चेति । तत्र तावदविद्याऽप्यात्मनि न स्यादित्युक्तं परिहरति-उच्यते न तावदिति । इदानीं ज्ञानसाध्याभावेऽपि तदभावकालीनानर्थस्य तन्निवर्त्यत्वासंभवान्न ज्ञानविफलमित्याह-नापीति ।

तद्ध्वंसस्य तदजन्यत्वे कथं तस्य तन्निवर्त्यत्वं तज्जन्यध्वंसप्रतियोगिन एव तन्निवर्त्यत्वादित्याशङ्क्याह-येनेति ॥

तद्ध्वंसस्य तदजन्यत्वे तन्निवर्त्यत्वं कथमित्याशङ्क्य निरस्यति । येन विना यत्तिष्ठत्येव यस्मिन् सति च न तिष्ठति तन्निवर्त्त्यम् । प्रतियोगिनो ज्ञाननिवर्तत्वादविद्यानिवृत्तिर्ज्ञानसाध्येत्युपचर्यते । अथवा यस्मिन् सति यस्याग्रिमक्षणेसत्त्वं यद्व्यतिरेके चाभावस्तत् तत्साध्यम् । आत्मस्वरूपाविद्यानिवृत्तेश्च ज्ञाने सति सत्त्वं, तद्व्य-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तिरेकेचाभावः। तत्प्रतियोग्यविद्याया एव तदभावरूपत्वात्, तस्याः ज्ञानात्पूर्वकल्पिताया विद्यमानत्वात् । न च यद्व्यतिरेके चासत्यपीति कार्य्यसात्वाभाव उच्यते स चाविद्यानिवृत्तेर्नास्ति, तस्याः सदात्मरूपत्वादिति वाच्यम् । यस्य सत्त्वाभाव इत्यस्माद्यस्याभाव इत्यस्यैव लघुत्वात् । तस्मान्नित्यसिद्धसत्यात्मस्वरूपैव युक्तिर्ज्ञानसाध्येति न-स्वर्गादिवत् कल्पिता सेत्यसङ्गोदासीनं चैतन्यमात्रमात्मेति ॥

अनन्यथासिद्धस्य यस्योत्तरकालसम्बन्धिध्वंसप्रतियोगी यः स एव तन्निवर्त्यः, न तु ध्वंसस्य प्रागसत्वघटितोत्पत्तिरप्यपेक्ष्यते । गौरवादितिभावः । तत्र येन विनेति । ज्ञानस्यानन्यथासिद्धत्वं दर्शितम् । तस्मिन् सतीत्यज्ञानस्य तदुत्तरकालवर्त्तिध्वंसप्रयोगित्वमितिद्रष्टव्यम् । आत्मरूपाविद्यानिवृत्तेर्ज्ञानसाध्यत्वस्यापि त्यक्तुं शक्यत्वान्न ज्ञानवैयर्थ्यमित्याह-अथवेति । वैशेषिकादिमते प्रायश्चित्तभावे सति दुःखप्रागभावस्याग्रिमक्षणे सत्त्वं तदभावे तदभावो दुःखं भवत्येवेत्यनादेरपि दुःखाभावस्य प्रायश्चित्तसाध्यत्वम् । यथा वा सर्वेषां मते दण्डादौ सत्यग्रिमक्षणे स्वकादाचित्काभावविरोधि घटादिसत्त्वं तदभावे चाभाव इति नतत्साध्यः । अत एव नाकाशादेर्दण्डादिसाध्यता । तस्य दण्डादौ सति स्वकादाचित्काभावसत्त्वविरोधिसत्त्वं तदभावे तस्याभाव इत्यस्याभावात् । एवं तत्वसाक्षात्कारे सत्यग्रिमक्षणे-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऽविद्यात्मकस्वाभावसत्त्वविरोध्यात्मकचैतन्यसत्त्वं तदभावे तदभावोऽविद्यैवेति आत्मरूपाऽप्यविद्यानिवृत्तिर्ज्ञानसाध्या । न च ज्ञानानन्तरं क्षणोपाध्यभावः । वृत्तेरेव तत्त्वात् । वृत्त्यभावे क्षणोपाध्यभावेऽपि ज्ञानार्थवत्त्वस्य सिद्धत्वाच्चरमकार्यं सर्वेषामसत्तुल्यत्वाच्चेति भावः।

ननु, यस्मिन् सति यस्य सत्त्वं यद्व्यतिरेके चासत्त्वं साध्यप्रयोजकं नित्यसदात्मकाविद्यानिवृत्तेस्तदभावात्कथं साध्यतेत्याशङ्क्याह-नच यदिति । यद्व्यतिरेके च यदसत्त्वं यस्य सत्त्वाभाव इत्येतस्माद्यदभाव इत्येतावदेव लघुतया प्रयोजकमित्याह-यस्य सत्त्वेति । वस्तुतस्तु यद्व्यतिरेकेऽसत्वमित्युक्तेऽपि न दोषः । अविद्यानिवृत्तिरूपात्मसत्ताया आत्ममात्रत्वात्तदभावात्मकाविद्यायाः ज्ञानाभावकाले विद्यमानत्वादिति द्रष्टव्यम् । नित्यसिद्धात्मरूपे मोक्षे स्वर्गादिवैलक्षण्यस्य मुमुक्षुप्रवृत्त्युपयोगिसाध्यत्वस्य च सत्त्वाच्चिदेकरस एवायमात्मेत्युपसंहरति-तस्मादिति ॥

अविद्यानिवृत्तिरूपात्मस्वरूपस्यासुखरूपत्वे मुमुक्ष्वभिलषितत्वायोगात्तस्य सुखात्मतां साधयति-स चेति ।

आत्मस्वरूपस्यासुखरूपत्वे मुमुक्ष्वभिलषितत्वायोगेन सुखात्मतां तस्य साधयति ।

सचायमात्मा निरतिशयानन्दस्वरूपः । "को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् एष ह्येवानन्दवान्"इति श्रुतेः । न चात्राकाशशब्दार्थः परमात्मानन्दोऽभिधीयते, नतु जीव इति वाच्यम् । तस्यैव जीवस्वरूपत्वात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अन्यथा जीवस्य प्राणानां आकाशानन्दो हेतुर्नोच्येत। न ह्यन्यानन्देनान्यो जीवति । व्यधिकरणयोस्तयोरहेतुहेतुमत्त्वात् । पुत्राद्यानन्देनापि पितर्यानन्दान्तरस्योत्पादात् । न च जीवस्यापीश्वरानन्दनिमित्तआनन्दोऽस्त्विति वाच्यम्। बिम्बप्रतिबिम्बभावेन हेतुहेतुमज्ज्ञातयोरुच्यते चेत्तत्त्वाभेद एव स्यात् । अविषयस्यापरानन्दस्य प्रकारान्तरेण जीवानन्दाहेतुत्वात् । जीवानन्दस्य परानन्दस्य परानन्दप्रतिबिम्बत्वाभिप्रायैव "आनन्दयति" इति श्रुतिः । "एषोऽस्य परम आनन्द" इति श्रुतिरीश्वरएवजीवस्यानन्द इति दर्शयन्ती जीवस्य तदात्मतामेव दर्शयति । एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति च । परमानन्दांशत्वमेव जीवानन्दस्य दर्शयति । अंशत्वं च प्रतिबिम्बत्वम् । निरंशे तदन्यस्याभावात् ॥

तत्र तावच्छ्रुतिं प्रमाणयति-को ह्येवेति । एष आकाश आसमन्तात्काशते प्रकाशत इत्यात्मा । यद्यानन्दो न स्यात्तर्हि को वा जन्तुश्चेष्टेत । को वा प्राणधारणमल्पायासमनुभूयापि कुर्यादित्यर्थः । नन्वाकाशशब्दस्य परमात्मनि प्रसिद्धत्वात् स एवानन्दः कथ्यते, न तु प्रत्यगात्मेति चेन्न । एष इति प्रत्यक्षसिद्धप्रत्यगात्मन एव परमात्माभेदेनानन्दरूपताभिधानादित्याह-न चात्रे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ति । प्रत्यग्ब्रह्मणोरभेदाभिप्रायाभावे आकाशानन्दस्य जीवस्य प्राणाधारणे व्यतिरेकमुखेन हेतुत्वाभिधानमनुपपन्नं स्यादित्याह-अन्वयेति । पुत्रानन्दं दृष्ट्वाहं जीवामीति केषांचिद् व्यवहारदर्शनाद् व्यधिकरणस्यापि तस्य जीवनहेतुत्वमित्याशङ्क्याह-पुत्रादीति । पुत्रानन्दश्चेत्पितुरिष्टस्तर्हीष्टवस्तुदर्शनेन पितर्यप्यानन्दो जायते स चेदनिष्टः । नैष पितृजीवनहेतुरितिभावः । तर्ह्येवमेवेश्वरानन्दजन्यो जीवानन्दस्तज्जीवनहेतुरिहोच्यत इत्याशङ्क्याह-न च जीवस्येति । किं जीवेश्वरानन्दयोर्बिम्बप्रतिबिम्बभावेन हेतुहेतुमत्ता उत प्रकारान्तरेण ? । आद्ये इष्टापत्तिरित्याह-बिम्बेति । द्वितीयेऽपि किमीश्वरानन्दस्य स्रगादिवज्जीवानन्दहेतुत्वमुतेश्वरज्ञानादिवत् ? । नोभयथापीत्याह-अविषयस्येति । परानन्दस्य ज्ञानादिवत्सर्वनिमित्तत्वे मानाभावादितिभावः । ननु "आनन्दयति" इति श्रुतेराकाशानन्दस्य जीवानन्दहेतुरिहोच्यते इत्यत्राह-जीवानन्दस्येति । श्रुत्यन्तरे जीवानन्देश्वरयोरभेदाभिधानात् "एष ह्येवानन्दयति" इति बिम्बप्रतिबिम्बभावो विवक्षित इत्यभिप्रेत्याह-एषोऽस्येति । किं च जीवानन्दस्य परानन्दांशत्वाभिधानान्निरवयवानन्देऽवयवावयविविभागायोगाद्द्वितीयादिभावेनैवांशांशिभावो वक्तव्य इत्याह-एतस्यैवेति ॥

ननु यदेष आकाश आनन्दो न स्यादित्यत्रानन्दस्य मत्वर्थीयप्रत्ययान्तत्वादानन्दगुणक एवायमात्मेति तत्राह-न चानन्देति ॥

आत्मन आनन्दगुणकत्वं प्रसाध्य निरस्यति । न चानन्दशब्देनानन्दगुणक-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वमुच्यते नत्वात्माभेदइतिवाच्यम् । "उदरमन्तरं कुरुते अथ तस्य भयं भवति" इत्यल्पस्याप्यानन्दभेदस्य श्रुत्यैवाचोदितत्त्वात् । तथाऽन्यत्रापि "स योऽन्यमात्मनः प्रियं ब्रुवाणां ब्रूयात् प्रियं ते रोत्स्येति" इति सुखस्य जीवान्यत्वं प्रतिषिद्ध्यते । अत एवानन्दशब्देन दुःखाभाव एवाभिधेय इति प्रत्युक्तम् । सातिशयस्यानन्दस्य लोके भावरूपत्वात् । प्रतियोगिप्रतीत्यनपेक्षप्रतीतेश्च । अन्यथा वैपरीत्यस्यापि सुखत्वात् । वेदेऽप्यानन्दशब्दार्थः स एव । सति मुख्यार्थे लक्षणाया अयोगात् । अनुमानमपि तत्र मानम् । तत्र यद्यपि नेच्छाविषयत्वम् । सुखत्वेन नियतं तत्साधने व्यभिचारात् । न चेच्छात्वं सुखविषयत्वेन व्याप्तम्, साधनेच्छाया अपि सुखविषयत्वादेवेति वाच्यम् । दुःखाभावेच्छायां व्यभिचारात् । नापीच्छात्वेन सुखदुःखाभावतत्साधनान्यतरविषयत्वं साध्यम् । असुखत्वेनार्थान्तरत्वात् ।

उत अपि अरं अल्पं अन्तरं भेदम् । ईषदपि भेदं यः कुरुते मन्यते तस्य भयं भवतीत्यर्थः । वृहदारण्यकश्रुतिरप्यात्मव्यतिरिक्तप्रियं निराकुर्वन्त्यात्मन एव प्रियत्वमाह-तथान्यत्रापीति । यआत्मनः प्रेयस्त्वदर्शी स प्रियं सुखं आत्मनोऽन्यं, आत्मनो भिन्नं ब्रुवाणं परं प्रत्येवं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्रूयात् ते प्रियं रोत्स्यति नश्यतीति भेदवादिनः श्रापो-देय इतिश्रुत्यर्थः । दुःखाभावस्यैवानन्दत्वात् कथमात्मन आनन्दरूपत्वमिति जरद्वैशेषिकमतं निराकरोति-अत एवेति । दुःखवदेव सुखेऽपि तरतमभावस्यानुभवसिद्धत्वा-दभावे च तदसंभवाल्लौकिकानन्दस्याभावरूप इत्याह-सातिशयस्येति । किं चानन्दो दुःखाभावो न भवति । दुःखप्रतीतिनिरपेक्षप्रतीतिकत्वात् । घटवत्, इत्याह-प्रतियोगीति । विपक्षदण्डमाह-अन्यथेति । दुःखमेव सुखाभावः किं न स्यादित्यर्थः । एवं च लोके आनन्दपदार्थस्य भावरूपत्वात् वेदेऽपि स एवानन्दशब्दार्थः । दुःखाभावे च लोके शक्तिग्रहाभावात् । तत्परिग्रहे लक्षणा प्रसङ्ग इत्याह-वेदेऽपीति । श्रुतौ विप्रतिपन्नं प्रत्यनुमानं प्रमाणयति-अनुमानमिति । तत्र स्वाभिमतानुमानं दर्शयितुं पूर्ववादिमुखेनानुमानान्तरं दूषयति-तत्र यद्यपीति । अस्य तथाप्यात्मा सुखरूपः, निरुपाधिकप्रेमगोचरत्वात्, इत्युत्तरेण सम्बन्धः । तत्रात्मा सुखरूपः । इच्छाविषयत्वात्, इति प्रयोगं दूषयति-नेच्छाविषयत्वमिति । आत्मेच्छा सुखविषया । इच्छात्वात् । संमतवत् । तत इत्यात्मनः सुखत्वसिद्धिः । न च सुखासाधनेच्छयां व्यभिचारः । तस्या अपि विशेषणतया सुखविषत्वात्, इति न वाच्यमित्याह-न चेच्छात्वमिति । नन्वात्मेच्छा सुखतत्साधनदुःखाभावतत्साधनान्यतरविषया । इच्छात्वात् । संमतवत् । तथा चात्मनः परिशेषात् सुखत्वमिति चेन्न । सुखसमवायित्वेनात्मविषयत्वेच्छायाः सुखविषयत्वसंभवादित्याह-नापीति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रेमगोचरत्वस्य पुत्रादौ व्यभिचारेऽपि परमप्रेमगोचरत्वं न व्यभिचरतीति शङ्कते-नन्वात्मेति ।

(आत्मनः सुखरूपत्वे साधकहेतोरप्रयोजकत्वशङ्का)

नन्वात्मासुखरूपः । परमप्रेमास्पदत्वात् इति चेन्न । अप्रयोजकत्वात् । न च सुखसाधने परमप्रेमाभावादात्मनोऽसुखत्वे हेतूच्छित्तिरेव विपक्षे बाधकस्तर्क इति वाच्यम् । सुखसमवायित्वेनापि तदुपपत्तेः । न चैवं दुःखसमवायित्वाद् द्वेषोऽपि स्यादिति वाच्यम् । अन्वयव्यतिरेकाभ्यां द्वेषस्य दुःखतन्निमित्तमात्रविषयत्वात् । न च लाघवेन दुःखतत्साधनत्वमात्रं द्वेषविषयत्वे प्रयोजकमिति वाच्यम् । दुःखसाधनेऽपि स्वस्मिन् तददर्शनेन तस्यैव तत्प्रयोजकत्वात् । अत एव दुःखं तन्मात्रसाधनत्वं द्वेषविषयत्वप्रयोजकम्, आत्मा तु न तथेति प्रत्युक्तम् । अहिकण्टकादेरपि दुःखमात्रहेतुत्वासिद्धेः, सुखं प्रत्यपि तस्य हेतुत्वात् । न च लाघवेन सुखत्वमेव परमप्रेमगोचरत्वे निमित्तमिति वाच्यम् । स्वसमवेतसुखस्य पुरुषार्थत्वेन तद्रूपेणाप्रयोजकत्वात् । किं च हेतावपि परमत्वमिच्छाया न स्वतः, किं तु विषय विशेषप्रयुक्तम् । तच्च सुखविषयत्वमात्मविषयत्वं वा? । आद्ये सुखविषयेच्छाया न स्वतः किं तु विष-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यविशेषप्रयुक्तम् । तत्र सुखविषयत्वमात्मविषयत्वं हेतुः । स चासिद्धः । तत्साधने व्यभिचारी च । आत्मनोऽपि सुखसमवायितया तद्विषयत्वसंभवादप्रयोजकश्च । अत एव न द्वितीयोऽपि ॥

विपक्षे बाधकाभावादप्रयोजक इति दूषयति-नेति । हेतूच्छितिरेव विपक्षे बाधिकेत्याशङ्क्य हेतोरन्यथासिद्ध्या परिहरति-न च सुखेति । इच्छाविषयसुखाश्रयत्वादात्मनः प्रेमगोचरत्वे द्वेषविषयदुःखाश्रयत्वात् द्वेषगोचरताऽपि स्यादित्याशङ्क्य दुःखाश्रयेऽप्यात्मनि द्वेषाभावात् नैवमित्याह-न चैवमिति । निमित्तस्य कारणविशेषत्वेन गौरवात् दुःखतत्कारणमात्रं लाघवेन द्वेषगोचर इत्याशङ्क्य प्रामाणिकं गौरवं न दोषायेत्यभिप्रेत्याह-न च लाघवेनेति । ननु दुःखतन्मात्रकारणत्वे द्वेषगोचरत्वमप्रयोजकम् । आत्मनस्तु सुखं प्रत्यपि कारणत्वान्न द्वेषगोचरतेत्याशङ्क्याह- अत एवेति । अतः शब्दार्थमाह-अपीति । ननु सुखसमवायित्वापेक्षया सुखत्वस्यैव लाघवेन परमप्रेमप्रयोजकत्वादात्मनः सुखत्वसिद्धिरिति चेन्न । सुखस्यात्मरूपत्वे वक्ष्यमाणेनापुरुषार्थत्वप्रसङ्गेन लाघवावतारादित्यभिप्रेत्याह-न च लाघवेनेति । किंच प्रेम्णः परमत्वं जातिरुपाधिर्वा ? । नाद्यः ?। तत्कल्पकाभावात् । तदङ्गीकारेऽप्यप्रयोजकत्वादित्यभिप्रेत्याह-किं चेति । द्वितीयं परिशिनष्टि-किं त्विति । अस्यापि विकल्पासहत्वान्नात्मनः सुखत्वसिद्धिरित्यभिप्रेत्य विकल्पयति-तच्चेति । आत्मविषयत्वं वाऽनन्यशेष-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यत्वं वेत्यपि द्रष्टव्यम्]। आद्ये आत्मेच्छायां सुखविषयत्वमात्मनः सुखत्वे सिद्धे सिद्ध्यति तच्चाद्याप्यसिद्धमिति विशेषणासिद्धो हेतुरित्याह-आद्य इति । किं च सुखसाधनस्यापि स्वविशेषणे सुखविषयत्वमस्ति न सुखत्वमिति तत्र व्यभिचार इत्याह-तत्साधन इति । सुखस्यात्मविशेषणत्वेऽप्युक्तहेतुसंभवादप्रयोजकश्चेत्याह-आत्मनोऽपीति । द्वितीये आत्मविषयेच्छाविषयत्वं हेतुः । सोऽप्यप्रयोजकत्वादयुक्त इत्याह-अत एवेति ॥

तृतीयमुत्थापयति अनन्यशेषेति ।

अनन्यशेषविषयत्वमिच्छायाः परमत्वमिति चेन्न । सुखदृष्टान्ते तदभावात् । तस्यात्मशेषत्वात् । व्यतिरेकित्वे वाऽसाधारण्यम् । सुखस्यैव सपक्षत्वात् । न चात्मव्यतिरिक्तवैषयिकं सुखं नास्तीति वाच्यम् । न तावद्विषयजन्यसुखमेव नास्तीति वक्तुं शक्यम् । विषयसन्निधाने तदनुभवविरोधात् । विषयानुपादानप्रसङ्गाच्च । नापि तदाऽरमेव । जन्याजन्ययोरेकत्वानुपपत्तेः । न च तस्य जन्यताऽसिद्धिविषया । अन्वयव्यतिरेकाभ्यां तस्य तन्निश्चयात् । विषयसन्निधानेनाभिव्यक्तिरेव नोत्पत्तिरिति चेन्न । इदानीं सुखमुत्पन्नं नष्टमिति बुद्धे ज्ञानाख्याभिव्यक्त्यविषयत्वात् । एतेनात्मा सुखरूपः । सुखलक्षणवत्त्वात् । वैषयिकसुखवत् । सुखलक्षणं च सर्वशेषित्वे सत्यनन्यशे-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षत्वमिति प्रत्युक्तम् । दृष्टान्तस्य साधनवैकल्यात् । व्यर्थविशेषणत्वाच्च । यदि च सुखमात्मैव स्यात् तदा दुःखदशायामप्ययं तथैवानुभूयेत । न च तदा दुःखेन सुखमनुभूतमिति वाच्यम् । तर्ह्यात्मापि न प्रकाशेत । तत्प्रकाशे वा किं नामाभिभूतं चेति युज्यते । एतेनान्यदप्यात्मनः सुखाभेदानुमानं निरस्तम् ।

किमस्मिन् हेतौ सुखवदित्यन्वयदृष्टान्तोऽभिमत उत घटवदिति व्यतिरेकिदृष्टान्तः ? । आद्ये साधनवैकल्यमाह-न सुखेति । द्वितीये सति सपक्षे तस्यावर्तमानत्वादसाधारणानैकान्तिक इत्याह-व्यतिरेकि[illegible] इति । ननु पक्षातिरिक्तस्य सुखस्याभावान्न तस्य सपक्षतेत्यत आह-न चात्मेति । किं विषयजन्यं सुखमेव नास्तीत्युच्यते किं वा तस्यात्मभेदो नास्तीति ? । नाद्यइत्याह-न तावदिति । द्वितीयं दूषयति-नापीति । ननु सुखस्य जन्यत्वे मानाभावान्नात्माभेदानुपपत्तिरित्यत आह-न च तस्येति । सुखप्रकाश एव विषयजन्यो न सुखमिति चोदयति-विषयेति । सुखे उत्पत्त्याद्यनुभवस्य बाधाभावात् तदेव विषयाजन्यमित्याह-न इदानीमिति । आत्मनः सुखत्वे संभावितमनुमानान्तरं दूषयति-एतेनेति । एतच्छब्दार्थमाह-दृष्टान्तस्येति । सुखस्य दुःखादिकं प्रति शेषित्वाभावान्न सर्वशेषित्वम्, आत्मशेषत्वाच्च नानन्यशेषत्वमपीत्यर्थः । किं चानन्यशेषत्वादित्येतावता व्यभिचारनिवृत्तेरितरद्व्यर्थमित्याह-व्यर्थेति । उक्तहेतू-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नामनुपलब्धिपराहतिमप्याह-यदीति । ननु दिवोङ्कुगणानुपलम्भवद् दुःखदशायां सुखेऽपि सुखस्यानुपलम्भ इति चेन्न । तदभिन्नात्मन्यनभिभूते तदभिभावायोगादित्याह-न च तदेति । उक्तप्रतिकूलतर्कविरोधादेवात्मा सुखरूपः । आत्मत्वात् । व्यतिरेकेण घटवत्, इत्याद्यनुमानं निरस्तमित्याह-एतेनेति ॥

प्रतिकूलतर्कान्तरपराहतिमप्याह-किं चेति ।

सुखस्य दुःखाभावस्य च पुरुषार्थत्वम् ।

किं च सुखस्याऽऽत्मरूपत्वेऽपुरुषार्थत्वापत्तिः । स्वसमवेतसुखस्यैव पुरुषार्थत्वात् । न च सुखमात्रं पुरुषार्थो लाघवादिति वाच्यम् । परसुखस्यापि पुरुषार्थत्वापत्तेः । मम सुखं भूयादहं सुखी स्यामिति च । स्वसंबन्धिसुखस्यैव काम्यमानत्वाच्च । अन्यथा सुखमहं स्यामिति काम्येत । न च सुखं मे स्यादिति कामना साऽन्यदीयत्वनिवृत्तिपरा न तु स्वसम्बन्धविषयेति वाच्यम् । तात्पर्यं हि शब्दधर्मो न तु कामनायाः । कामना तु यमर्थं यथा गोचरयेत् स तथैव पुरुषार्थः ॥

नन्वेवं मोक्षस्याप्यपुरुषार्थत्वप्रसङ्गः । जन्यसुखस्य तदानीमसत्त्वात्, मोक्षस्याशरीरत्वात्, नित्ये चात्मातिरिक्ते सुखे प्रमाणाभावादिति चेन्न । दुःखाभावस्यैव मोक्षत्वात् । न च दुःखा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भावो ऽपुरुषार्थः । सुखवत्तस्यापि दुखं मे मा भूदिति काम्यमानत्वात् । लक्षणत्वात्पुरुषार्थस्य दुःखाभावः सुखशेषतया काम्यते न तु स्वत इति चेन्न । वैपरीत्यस्यापि वक्तुं शक्यत्वात् । तस्मादुभयमपि पुरुषार्थः ॥

सुखतत्समवाययोः पुरुषार्थत्वे गौरवात् सुखमेव पुरुषार्थ इत्याशङ्क्याह-न च सुखेति । नन्वननुभूयमानसुखस्यापुरुषार्थत्वात् सुखसाक्षात्कार एव पुरुषार्थः, तथा च नातिप्रसङ्ग इत्यत आह-मम सुखमिति । सुखसाक्षात्कारस्यापि काम्यमानत्वात्पुरुषार्थत्वं वक्तव्यम् । एवं सुखसंबन्धस्यापि काम्यमानत्वात् सोऽप्यावश्यक इत्यर्थः । आत्मरूपसुखस्यैव पुरुषार्थत्वे संबन्धे कामना न स्यादित्याह-अन्यथेति । कामनायाः संबन्धविषयत्वप्रतीतावपि तत्र तात्पर्याभावान्न सुखसंबन्धः पुरुषार्थ इत्याशङ्क्याह-न च सुखमिति ।

सुखस्यात्मसमवेतत्वे मुमुक्षुप्रवृत्त्यनुपपत्तिरिति चोदयति-नन्वेवमिति । किं मोक्षदशायां जन्यं सुखमुत नित्यम् ? नाद्यः । तदा तत्कारणस्य शरीरेन्द्रियादेरभावादित्याह-जन्येति । द्वितीयं-दूषयति नित्ये चेति । सर्वत्र सुखस्यैव पुरुषार्थत्वान्न दुःखाभावः पुरुषार्थ इत्यत्राह-न चेति । ननु काम्यमानतामात्रेण कथं दुःखाभावस्य पुरुषार्थत्वमित्यत आह-तल्लक्षणत्वादिति । ननु स्वतः काम्यमानमेव पुरुषार्थः, दुःखाभावस्तु सुखार्थतयैव काम्यतेऽतो न पुरुषार्थ इति शङ्कते-दुःखाभावोऽपि स्वत एव काम्यते । न चोभयोरपि स्वतः काम-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नायां गौरवमिति वाच्यम् । तर्हि सुखमेव दुःखाभावार्थं काम्यत इति किन्न स्यादित्याह-न वैपरीत्यस्येति । तर्हि स्वतस्त्वं कस्येत्याशङ्क्य नियामकाभावादुभयमपि स्वत एव काम्यते पुरुषार्थश्चेत्याह । तस्मादिति ॥

नन्वात्मनः सुखरूपत्वं श्रुतिप्रमितं कथमपह्नूयत इत्याशङ्क्य श्रुतिरन्यपरा इत्याह-श्रुतिश्चेति ।

आत्मनः सुखरूपत्व-समर्थनम् ।

श्रुतिश्चानुभवयुक्तिविरोधात् दुःखाभावपरेति नात्मा सुखरूप इति । तथाप्यात्मा सुखरूपः। निरुपाधिकप्रेमगोचरत्वात् । व्यतिरेकेणानात्मवत् । निरुपाधिकत्वं च प्रेम्णोऽनन्यप्रयुक्तत्वम् । न चासिद्धिः । सर्वदाऽहं भूयासमिति सर्वेषामात्मनि प्रेमदर्शनात् । तस्यान्याप्रयुक्तत्वात् । न हि पतिजायादिप्रेम्णस्तदतिरिक्तात्मप्रयुक्तत्ववदात्मप्रेमान्येन प्रयुज्यते ।

नन्वात्मन्यपि सुखसमवायित्वेन प्रेमेत्यप्रयोजकमनुमानम् । अन्याप्रयुक्तत्वमसिद्धं चेतिचेत् । न, सुखात्मनोर्भेदे आत्मसंबन्धितया प्रेमगोचरस्य सुखस्य तत्प्रेमनिमित्तत्वायोगात् ।

एवमात्मनः सुखरूपत्वे संभावितदोषं प्रदर्श्य तत्परिहारायानुमानं तावदाह-तथाऽपीति । नन्वात्मेच्छायामपि कस्यचिदुपाधेः सत्त्वात् कथं निरुपाधिकत्वमित्यत आह-निरुपाधिकत्वं चेति । अनन्यप्रयुक्तत्वं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चान्येच्छानधीनत्वम् । पुत्रादिसुखसाधनेच्छायाः आत्मसुखेच्छाप्रयुक्तत्वान्न तत्र व्यभिचार इति भावः । साध्यस्यैवेच्छागोचरत्वात् सिद्धस्यात्मनः कथं तद्गोचरत्वमित्यत आह-न चेति । न हि साध्यत्वमात्रमिच्छागोचरत्वे तन्त्रम् । दुःखे तदभावात् । किं तु सुखत्वे सति साध्यत्वमिति वाच्यम् । तथा च गौरवमिति सुखत्वमेव स्वतन्त्रेच्छागोचरत्वे तन्त्रम् । सोपाधिकेच्छायां सुखरूपात्मनोऽपि प्रेमगोचरत्वमुपपद्यत इति भावः । किं च साध्यस्यैव प्रेमगोचरत्वे आत्मनि प्रेमा न स्यात् । स च तत्र सर्वानुभवसिद्ध इत्याह-सर्वदेति । न चात्मनः समयान्तरसंबन्ध एव भूयासमितीच्छागोचरो, न त्वात्मेति वाच्यम् । आत्मनोऽनिष्टत्वे तस्य समयान्तरसम्बन्धेऽपीच्छाऽयोगात् । किं चात्मनस्तर्कितध्वंसे सर्वेषां द्वेषः । स च प्रतियोगिन इष्टत्वमन्तरेणानुपपन्नः । अनिष्टस्य नाशे द्वेषादर्शनात् । तस्मादात्मा सुखत्वेन प्रेमगोचर इति भावः । विशेष्यासिद्धिं परिहृत्य विशेषणासिद्धिं परिहरति-तस्येति । तदेवोपपादयति-न हीति । तथा च श्रुतिः, "आत्मनस्तु कामाय सर्वं प्रियं भवति । तदेतत्प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा"इति । आत्मनः सुखसमवायित्वेनाप्युक्तहेतोः संभवादप्रयोजकत्वम् ।

सुखार्थमेवात्मन इष्यमाणत्वाद्विशेषणासिद्धिश्चेति चोदयति-नन्वात्मन्यपीति । तत्रासिद्धिं तावत् परिहरति-न सुखेति । सुखस्यानिष्टत्वे तदर्थमात्मन इष्यमाणत्वायोगात्तदिष्यमाणमात्मेच्छाप्रयोजकमिति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वाच्यम् । सुखस्य चेष्यमाणत्वं न सुखत्वेन । अन्यदीयसुखे तदभावात् । किं त्वात्मसुखत्वेन । तत आत्मनोऽनिष्टत्वे तत्संबन्धिसुखेऽपि वैरिसुखवदिच्छायोगादात्मेच्छाप्रयुक्तैव तत्संबन्धिसुखेच्छेति परस्य राश्रयस्तव वज्रलेपायते इति भावः ।

यद्युक्तं सुखसमवायित्वेनात्मनि प्रेमसंभवादप्रयोजकत्वमिति । तद् दूषयति । किं चेति ।

किं च सुखसमवायित्वेन चेत् प्रेमा । तदा दुःखदशायां नात्मनि प्रेम स्यात् । तदा तस्मिन् सुखसमवायाभावात् । आत्मनि भाविसुखवैशिष्ट्यस्येदानीन्तनप्रेमाऽनिमित्तत्वात् । भाविसुखे मानाभावेन तत्प्रतिसंधानाभावाच्च । मुक्तिपूर्वकालीने आत्मनि प्रेमायोगाच्च । दुःखाभावस्य पुरुषार्थतया निरतिशयमाणत्वाद् दुःखसमवायित्वेनात्मन्यत्यर्थं द्वेषप्रसङ्गाच्च । सुखसाधनेषु स्नेहतारतम्यनियमवद् दुःखसाधनेषु द्वेषतारतम्यनियमात् ।

ननु हेयगोचरो द्वेषः कथमहेये आत्मनि स्यादिति तर्ह्युपादेयगोचरः स्नेहः कथमनुपादेये आत्मनि स्यादिति तुल्यम् । अथ यत्र ममेदं भूयादितीच्छा सैवोपादेयगोचरा । अहं भूयासमिति तु ततो विलक्षणा सा । सुखसमवायि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तया ऽऽत्मन इष्टत्वमात्रगोचरेति चेत्तर्हि ममेदं मा भूयादिति द्वेषएव हेयविषयः । नाहं भूयासमिति तु ततो विलक्षणः स आत्मनो दुःखसमवायितयाऽहितत्वमात्रगोचरइति तुल्यम् । न च दुःखासमवायिनोऽपि । तत्साधनतयाऽनिष्टत्वात् ।

किं वर्त्तमानसुखसमवायित्वं प्रेम प्रयोजकमुतागामि सुखसमवायित्वं किं वा तत्प्रतिसंधानम् ? । नाद्यः। दुःखदशायां तदभावेऽपि प्रेमदर्शनादित्याह-सुखसमवायित्वेनेति । द्वितीयोऽपि न । भविष्यकारणात्, कार्यायोगादित्याह-आत्मनीति-तृतीयं दूषयति-भावीति । तव मते मुक्त्यनन्तरं सुखाभावनिश्चयात् तत्पूर्वकालीनात्मनि प्रेमा न स्यादित्याह-मुक्तीति । ननु तदा दुःखाभावप्रतिसंधानेनैव प्रेमेत्यत आह-दुःखाभावस्येति । सुखसमवायित्वेनात्मनि प्रेमेत्येतत्प्रतिबन्दिग्रहेणापि दूषयति-दुःखसमवायित्वेनेति । सुखसमवायिनः सुखोत्पत्तिस्थित्योरपेक्षितत्वात् तत्र स्नेहातिशयश्चेत् दुःखोत्पत्तिस्थित्योरपि तस्यापेक्षितत्वात् द्वेषातिशयोऽपि स्यादित्याह-सुखसाधनेष्विति । हानयोग्येष्वेवाहिकण्टकादिदुःखसाधनेषु द्वेषदर्शनाद्धेयत्वमपि द्वेषविषयत्वप्रयोजकं तदभावान्नात्मनि द्वेष इति शङ्कते-ननु हेयेति । तर्हि तव मते यत्नलभ्येष्वेव सुखसाधनेषु स्नेहदर्शनाद्यत्नानपेक्षात्मनि स न स्यादित्याह-तर्हीति । सोपाधिकप्रेम्ण एवोपादेयगोचरत्वादनुपादेयात्मनि निरुपाधिकः प्रेम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

घटत इति शङ्कते । अथेति । तर्ह्युपाधिकृद्वेषस्यैव हेयगोचरत्वादहेयेऽप्यात्मनि निरुपाधिद्वेषो भवेदेवेत्याह-तर्हीति । ननु दुःखस्य दुःखत्वेनैव द्वेषगोचरता तदतिरिक्तस्य दुःखनिमित्तत्वेन । आत्मनस्तु तस्याभावान्न, द्वेषगोचरतेति चेन्न । अनुगतस्यानिष्टत्वस्यैव सर्वत्र द्वेषप्रयोजकत्वे संभवत्यननुगतस्याप्रयोजकत्वादित्याह-न च दुःखेति । ननु दुःखातिरिक्तस्यानिष्टत्वे तन्निमित्तत्वमेव प्रयोजकम् । तथा चात्मनो नानिष्टत्वमित्यत आह-दुःखसमवायिनोऽपीति । लाघवेन दुःखकारणस्यैव दुःखातिरिक्तेऽनिष्टत्वप्रयोजकत्वादात्मनोऽपि तद् दुर्वारमित्यर्थः ।

आत्मनीष्टत्वप्रयोजकसत्त्वान्नानिष्टत्वमित्याशङ्क्य वैपरीत्यमेव किं न स्यादित्याह ।

न च सुखसमवायित्वेनेष्टतयाऽऽत्मा नानिष्ट इति वाच्यम् । दुःखसमवायितयानिष्टत्वान्नेष्ट इत्यपि वक्तुं शक्यत्वात् । दुःखसाधनानां स्वत इच्छाविरोधिनां दुःखसंबन्धितयैव द्वेषविषयत्वात् । समवायिनोऽपि दुःखसंबन्धित्वात्, दुःखसमवाय्यतिरिक्तरूपेण तेषां द्वेषविषयत्वे प्रयोजकगौरवात् । आत्मनि द्वेषाभावस्यान्यथाऽपि संभवात् ।

किं च द्वेषविषयत्वे साक्षात्परम्परासंबन्धेन दुःखत्वमेव प्रयोजकम् । परम्परासंबन्धः समवायिन्यप्यस्तीत्यात्माऽपि द्वेषगोचरः स्यात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आत्मनि द्वेषापादनमनुभवविरुद्धमिति चेन्न । आपादने ऽनुभवविरोधस्यालङ्कारत्वात् । अत एवात्मत्वमेव परमप्रेमास्पदत्वे प्रयोजकमिति निरस्तम् । पुत्रादीच्छाया इवात्मेच्छाया अपि सुखविषयत्वानियमात् । तच्च सुखमात्मैव, तदिच्छाया अन्याप्रयुक्तत्वत् । असुखात्मसंबन्धित्वेनैव तेषां स्नेहविषयत्वे स्वशत्र्वादेरपि तथात्वप्रसङ्गादिरयुक्तत्वात् । अत एव दुःखाभावाश्रयतयाऽप्यात्मनः परमप्रेमास्पदत्वमिति निरस्तम् ।

न च सुखेति । किं चाहिकण्टकादीनां न जात्याऽनिष्टत्वम् । केषांचिदिष्टत्वात्, किन्तु दुःखहेतुतया । तच्चात्मनोऽपि दुःखित्वाङ्गीकारे दुर्वारमित्याह-दुःखसाधनानामिति । अविरोधिनामिति च्छेदः । नन्वात्मनि द्वेषादर्शनात्तद्व्यावर्तनाय गुरुशरीरप्रविष्टद्वेषप्रयोजकमङ्गीकार्यमिति तत्राह-आत्मनीति । अन्यथाऽपीति । सुखरूपतया दुःखसंबन्धाभावेनापीत्यर्थः । न च सिद्धान्तेऽप्यन्तःकरणे द्वेषगोचरता स्यादिति वाच्यम् । विवेकिनां तस्येष्टत्वात् । अविवेकिनां तु सुखरूपात्मतया गृहीतत्वेन तदभावोपपत्तेरिति भावः । किं च परमतेऽपि दुःखत्वमेव स्वसंबन्धिनि द्वेषविषयत्वेऽनुगतप्रयोजकम् । स च संबन्धो दुःखे साक्षात् साधनेषु परम्परयेत्यात्मनोऽपि दुःखसमवायित्वात्तत्र विवेकिनामपि द्वेषो दुर्वार इत्याह-किं चेति । आत्मन इष्टतमत्वानुभविरुद्धं द्वेषापादनमिति शङ्कते- आत्मनीति । न ह्यस्मा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भिरात्मनि द्वेषः साध्यते, किं तु तदभावाय तस्य सुखरूपत्वमित्यभिप्रेत्याह-आपादन इति । दुःखसमवायित्वेन द्वेषस्यापि प्रसङ्गादेवाऽन्यदपि प्रयोजकं प्रत्युक्तमित्याह-अत एवेति । किं चेच्छात्वस्य सुखविषयत्वेन नियतत्वादात्मनः सुखसमवायितया तदनङ्गीकारे सुखत्वसाद्यैव तत् पर्यवस्यतीत्यभिप्रेत्याह-पुत्रादीति । ननु पुत्रादिकं न सुखसाधनत्वेनेच्छाविषयः । येनेच्छात्वं सुखविषयत्वनियतं स्यात् । किं त्वात्मीयत्वेनेत्यत आह-असुखात्मेति । दुखाश्रयतया द्वेषप्रसक्तेरपरिहारात्, दुःखदशायामप्यात्मनि प्रेमदर्शनाच्च न दुःखाभावोऽपि तत्प्रयोजक इत्याह-अत एवेति ।

न चात्मप्रेम्णः परमते ऽन्यथानुपपत्तावपि सिद्धान्तेऽन्यथोपपत्तिसंभवादात्मनो न सुखत्वसिद्धिरिति चोदयति-स्यादेतदिति ।

(दुःखाभावस्य पुरुषार्थत्वनिरसनम् ।) स्यादेतत् । भवन्मते दुःखाभाव आत्मैव । कल्पितप्रतियोगिकाभावत्वात् । ततश्चानन्दोऽप्यात्मा दुःखाभावत्वेन परमप्रेमगोचर इति चेन्न । दुःखाभावस्यापुरुषार्थस्य स्वतः कामनाऽसंभवात् । दुःखं मे मा भूदित्याद्याशिषः पश्वाद्याशिष इवान्यशेषतयाऽप्युपपत्तेः । लाघवेन सुखस्यैव पुरुषार्थत्वे संभवति तस्यापि स्वतः पुरुषार्थत्वकल्पनायोगात् । एवं च प्रवर्तकज्ञानेऽपि लाघवम् । न चैवं वैपरीत्यमस्त्विति वा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

च्यम् । किं दुःखसंसर्गाभावमात्रं पुरुषार्थस्तत्र सुखस्योपयोगः उत तद्ध्वंस एव? । नाद्यः । दुःखबहुले यागादौ पुरुषार्द्धोच्छेदधियाऽप्रवृत्तिप्रसङ्गात् । दुःखप्रागभावस्य ततो विनाशात् । सुखस्य ततोऽधिकस्याप्यपुरुषार्थत्वात् । ननु सुखस्यापुरुषार्थत्वेऽपि तत्कालीनदुःखानुत्पादः । तत्राधिकः पुरुषार्थोऽस्तीति चेन्न । अनिष्टनिषेधशास्त्रात्तत्राप्रवृत्तिमात्रेण तत्सिद्धेः । तात्कालिकसुखसाधने बहुदुःखसाध्येऽपि परस्त्रीगमनादौ प्रवृत्तिदर्शनाच्च । तत्कालीनदुःखाभावस्याल्पत्वात् ।

भवेदेतदेवं यदि दुःखाभावः स्वतः पुरुषार्थः स्यात् । न, त्वेतदस्ति । सुखस्यैव स्वरससुन्दरस्य पुरुषार्थत्वादित्याह-न दुःखाभावस्येति । तर्हि दुःखं मे मा भूदिति कामनानुपपत्तिरित्याशङ्क्याह-दुःखमिति । सुखवद् दुःखाभावस्य स्वत एव पुरुषार्थत्वं किं न स्यादित्यत आह-लाघवेनेति । किं च दुःखाभावस्यापि स्वतः पुरुषार्थत्वे सुखदुःखाभावान्यतरसाधनताज्ञानं प्रवर्तकमिति वाच्यम् । तथा च गौरवम् । सुखस्यैव पुरुषार्थत्वे तु तत्साधनताज्ञानमेव प्रवर्तकमिति लाघवमित्याह-एवं चेति । सुखमेव दुःखाभावशेषतया काम्यत इति किं न स्यादित्याशङ्क्याह-न चैवमिति । किं दुःखाभावोत्पत्तौ सुखस्योपयोगः उत ज्ञप्तौ? आद्येऽपि वक्तव्यमित्याह-किं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दुःखेति । दुःखसंसर्गाभावस्य पुरुषार्थत्वे प्रागभावानामपि तथात्वात्तदुच्छेदभयाद्यागादौ प्रवृत्तिर्न स्यादित्याह-नाद्यइति । ननु यागादिनानेककालसन्तन्यमानसुखोत्पत्तेस्तदर्थं तत्रप्रवृत्तिरित्यत आह-सुखस्येति । स्वर्गादिसुखार्थं न यागादौ प्रवृत्तिः, किन्त्वनेककालदुःखानुत्पत्त्यर्थमिति शङ्कते । ननु सुखस्येति । निषेधशास्त्रपर्यालोचनया निषिद्धपरिवर्जनेनापि दीर्घकालदुःखानुत्पादसंभवात् काम्यविधिरनर्थक एव स्यादित्याह-नानिष्टेति । भाविदुःखाभावमनपेक्ष्यापि बहुदुःखाभावनाशमङ्गीकृत्याल्पसुखार्थं प्रवृत्तिदर्शनान्न दुखाभावः पुरुषार्थ इत्याह-तात्कालिकेति । तत्रापि सुखकाले दुःखानुत्पत्तये प्रवृत्तिरित्यत आह-तत्कालीनेति ।

दुःखध्वंस एव पुरुषार्थइतिपक्षे दुःखस्य स्वध्वंसकारणत्वात्तदपीष्टसाधनतया कामनापूर्वकृतिसाध्यं स्यात् । तथा च तत्र द्वेषो न स्यादित्यभिप्रेत्याह-न द्वितीयोऽपीति ।

न द्वितीयोऽपि । दुःखध्वंसार्थं दुःखसमये कर्मणि प्रवृत्तौ दुःखस्यापि पश्वादिवदुपादेयताप्रसङ्गात् । यागाद्यनुष्ठानजन्यदुःखातिरिक्तदुःखस्य तन्निवर्त्यस्याभावात् । दुःखध्वंसस्यैव पुरुषार्थत्वे तव मते प्रायश्चितानुष्ठानप्रसङ्गात् । उत्पन्नस्य दुःखस्य सुखमन्तरेणापि निवृत्तिसम्भवाच्च । सुखं तत्र न हेतुः । निर्दुःखस्यापि सुखार्थमिष्टचिन्तायां प्रवृत्तिदर्शनाच्च । नापि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दुःखाभावज्ञाने सुखस्योपयोगः । तद्गोचरप्रत्यक्षस्य तदजन्यत्वात् । अनुमितेश्चापुरुषार्थत्वान्निरन्तरसुखधाराकामनाविरहप्रसङ्गाच्च । प्रतिसुखं स्वर्गादौ तद्विनाश्यदुःखासंभवात् ।

किं च दुःखात्यन्ताभावस्यापुरुषार्थत्वात् कादाचित्कदुःखाभावत्वं पुरुषार्थत्वावच्छेदकं वाच्यम् । ततश्च लाघवात् सुखमेव पुरुषार्थः, दुःखाभावकामना तु स्वरूपसुखाभिव्यक्तिप्रतिबन्धकाभावविषयतयाऽन्यथा सिद्धा । दुःखनिवृत्तिं विना सुखाभिव्यक्तेरभावात् ।

अपि च कामनयाऽपि दुःखाभावः सुखशेष एव । एतद्दुखं विना कदाहं सुखं स्थास्यामीति कामनादर्शनात् । तस्मान्न दुःखाभावः स्वतःपुरुषार्थ इति परमप्रेमास्पदत्वे सुखमेव प्रयोजकं लाघवादिति नाप्रयोजको हेतुः ।

किं चास्मिन् पक्षे यागो विफलः स्यात् । अनुष्ठानकालीनदुःखध्वंसस्य दृष्टप्रयत्नमात्रसाध्यत्वात्, स्वर्गे च यागनिर्वर्त्यस्य दुःखस्याभावादित्याह-यागादीति । किं च प्रायश्चित्तानुष्ठानस्य दुःखहेतुविघटनेन दुःखानुत्पाद एव पर्यवसानात्, तस्यापुरुषार्थत्वात्तच्छास्त्रमनर्थकं स्यादित्याह-दुःखेति । एवं दुःखध्वंसस्य पुरुषार्थत्वं निराकृत्य तत्र सुखस्योपयोगोऽपि नास्तीत्याह-उत्पन्नस्येति । स्वविषयज्ञानादेव तन्नाशसंभवादित्यर्थः । दुःख-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रसक्त्यभावेऽपि सुखार्थं प्रवृत्तिदर्शनात् तत्तन्निवृत्तिहेतु-रित्याह-निर्दुःखस्येति । दुःखाभावे सुखस्योपयोग इति पक्षं दूषयित्वा तज्ज्ञप्तावुपयोग इति पक्षे दूषयति-नापीति । किं तत्प्रत्यक्षे तदुपयोगः उत तदनुमितौ ?। नाद्य इत्याह-तद्गोचरेति । अहं दुःखरहितः सुखित्वाद् व्यतिरेकेण दुःख्यहमिवेति । द्वितीयमाशङ्क्याह-अनुमितेश्चेति । सुखकाले दुःखाभावस्य प्रत्यक्षसिद्धत्वाज्ज्ञासन्देहादनुमितिरिति द्रष्टव्यम् । दुःखध्वंसे सुखस्योपयोग इत्यत्र सिंहावलोकनन्यायेन दूषणान्तरमाह-निरन्तरेति । तत्र हेतुमाह-प्रतिसुखमिति । सुखस्यैव पुरुषार्थत्वे लाघवमपि नियामकमस्तीत्याह-किं चेति । अपुरुषार्थत्वादिति । तस्य पाषाणादावपि सत्त्वादात्मन्यसत्त्वाच्चेत्यर्थः । दुःखाभावस्य वा सुखेऽनुपयुक्तस्य कथं कामनेत्याशङ्क्य दुःखस्य स्वरूपसुखाभिव्यञ्जकान्तःकरणवृत्तिप्रतिबन्धकत्वात्तदभावतयैव कामनेत्याह-दुःखाभावेति । एवं सुखदुःखाभावस्वरूपपर्यालोचनया सुखस्यैव पुरुषार्थत्वमुक्त्वा तत्कामनापर्यालोचनेऽप्याह-अपि चेति । प्रकृतमुपसंहरति-तस्मादिति ॥

आत्मनश्चिद्रूपत्वमङ्गीकृत्य सुखत्वमनङ्गीकुर्वाणं सांख्यं प्रत्याह-आत्मन इति ।

(आत्मनः सुखरूपत्वानङ्गीकारिणः सांख्यस्य मतनिरासः) । आत्मनोऽसुखत्वे निर्गुणत्वादीनां तस्मिन् सुखाननुभवप्रसङ्गः । बुद्धिविषयः सुखानुभव इति चेत् । न, अहं सुखीति चैतन्यसामानाधिकरण्येन सुखप्रतीतेः । अहमनु-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भवस्यापीष्टत्वाच्च ।

नन्‌ यदि सुखमात्मा तर्हि दुःखदशाया-मात्मेव सुखमपि प्रतीयेत। आवृत्तत्वान्न तथेति चेत्, तर्हि तन्मात्र आत्मापि न प्रतीयेत । ततः कथमात्माऽऽनन्दरूपः । कथं वा तत्काले प्रेम। इच्छायां ज्ञानमात्रविषयत्वादिति चेन्न । अस्ति तावद्‌ दुःखदशायामप्यात्मन्यनौपाधिकः प्रेमा । साच स्वहेतुतया सुखानुभवमाक्षिपति । न चानुभवबाधः । किं सुखमात्रं नानुभूयते किं वा सुखमित्यनेन रूपेण ? । नाद्यः । अहमनुभवे प्रकाशमानचैतन्यमेव सुखमिति मते तदननुभवा-सिद्धेः । द्वितीयस्त्वङ्गीक्रियते । वृत्तिविशेषप्रति-बिम्बितचैतन्यस्यैव तद्विषयत्वात्। सुखत्वं हि सुखपदप्रवृत्तिनिमित्ततयाऽनुगतव्यवहारविषय-तया वा वृत्तावेव कल्प्यते ॥ ननु सुखरूप आ-त्मनि तत्र तत्कल्पने प्रमाणाभावात्, श्रुतौ-सुखपदस्य वृद्धव्यवहारे वृत्त्यवच्छिन्नचैतन्यात्म-सुखे व्युत्पन्नस्य ज्ञानादिपदवल्लक्षणयात्मनि प्रयोगात्, लोके आत्मनि केवले वृद्धानां सुखप-दाप्रयोगात्, तस्य तदशक्तेः ।

जडात्मकबुद्धेरेव सुखाश्रयतया ऽनुभूयत इति शङ्क-ते-बुद्धीति। सांख्यैश्चिज्जडयोस्तादात्म्याध्यासानभ्युपग-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भाज्जडधर्मसुखचिदात्मसंबन्धानुपयोगाच्चिद्रूपमेव सुखं कल्पितभेदेन तत्संबन्धितया ऽनुभूयत इत्यभिप्रेत्याह-नाहमिति । एवमात्मनः सुखरूपत्वे साधकमुक्त्वा बाधकं परिहर्तुमनुवदति-ननु यदीति । सुखस्यानुभूयमानसत्ताकत्वनियमादनुभवाभावात् सुखमपि नेत्याह-तत इति । दुःखकाले आत्मनोऽननुभवे तत्र प्रेमापि न स्यादित्याह-कथं चेति । आत्मनः सुखरूपत्वे दुःखदशामपि तदानुभवापादनमिष्टमेव । अन्यथा तदात्मनि निरुपाधिकप्रेमानुपपत्तेरित्याह-नास्ति तावदिति । तदा सुखानुभवोऽनुपलब्धिविरुद्ध इत्याशङ्क्याह-न चेति । किं दुःखदशायां सुखप्रकाश एव नास्तीत्युच्येत किं वा सुखत्वविशिष्टतद्विषयसविकल्पकं नास्तीति विकल्प्य क्रमेण दूषयति-किं सुखमात्रमिति । वृत्तिविशेषेति । चन्दनादिविषयविशेषसंपर्कजनितान्तःकरणवृत्तिगतत्वात् सुखत्वस्य तदात्मतयाभिव्यक्त एव स्वरूपसुखे सुखत्ववैशिष्ट्यप्रतीतेरित्यर्थः । सुखत्वस्य वृत्तिविशेषगतत्वमुपपादयति-सुखत्वं हीति । वृत्तिविशेषे सत्येव सुखपदस्य प्रयुज्यमानत्वात्तस्य चाननुगतत्वात्तदनुगतमेव तत्प्रवृत्तिनिमित्ततयानुगतव्यवहारालम्बनं कल्प्यते तदेव सुखत्वम् । तच्च तदनुगतमधिष्ठानचैतन्यमेव वक्ष्यते । आत्मनस्त्वेकव्यक्तित्वान्नानुगतापेक्षेत्याह-नन्विति । आत्मनि सुखत्वधर्माभावे तत्र कथं वैदिकसुखपदप्रयोग इत्यत्राह-श्रुताविति । श्रुतौ सुखपदस्य लक्षणयात्मनि प्रयोगादिति संबन्धः । तर्हि तस्य शक्तिः कुत्रेत्यत आह-वृद्धेति । केवलात्मनि लक्षणायां हेतुमाह-लोक इति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दुःखदशायामात्मनि सुखत्वविशिष्टसविकल्पका भावे तत्र प्रेमाऽपि न स्यात् कारणाभावे कार्यायोगादिति शङ्कते-ननु दुःखेति ।

आत्मनि दुःखदशायामपि प्रेमास्तित्वनिरूपणम् ।

ननु दुःखदशायामात्मा सुखमिति नानुभूयते चेत् कथं तदा तस्मिन् प्रेमा। इच्छाया सुखत्वविशिष्टज्ञानजन्यत्वादिति चेन्न। सुखसाधारणरूपज्ञानस्यात्मनि प्रेमहेतुत्वात् । सुखत्वाविशिष्टज्ञानस्यापि तद्रूपेणैवेच्छाजनकत्वात् । अस्ति च दुःखदशायामप्यनावृत्तचैतन्यानन्दानुभवस्तादृशः । अहं नास्मीति कस्याप्यदर्शनात् । अहमनुभवसाक्षिचैतन्यस्यैव सुखत्वात् । अन्यथा प्रेमानुपपत्तेः । तदेतदाचार्यैरप्युक्तम् । "नासत एव परमप्रेमास्पदत्वलक्षणं सुखम्" इति ।

ननु यद्यात्मनि न सुखत्वं न तर्ह्यात्मा सुखम्। तस्यैव तत्स्वरूपलक्षणत्वादिति चेन्न। न हि सुखत्वं सुखस्य स्वरूपलक्षणम्। तस्य ततोऽन्यत्वात्। अन्यस्यान्यस्वरूपत्वायोगात् । असाधारणजातिरेव व्यक्तिस्वरूपमिति चेन्न । जात्यतिरिक्तव्यक्तिस्वरूपाभावे विश्वस्य सामान्यमात्रात्मत्वप्रसङ्गात् । निःस्वरूपस्य तद्व्यक्तित्वाभावात् सामान्यमपि न स्यात्। किं च सुखत्वाश्रयव्यक्तौ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दुःखादिव्यावृत्तौ विशेषोऽस्ति न वा ? । न चेत्कथं सुखत्वव्यवस्था । व्यक्तिविशेषं विना सुखत्वमस्यैव धर्म इति नियन्तुमशक्यत्वात् । प्रथमेऽपि स विशेषो न धर्मः । तत्रापि व्यवस्थापकाभावात् । व्यक्तिस्वरूपातिरिक्तधर्मानिरूपणाच्च ।

इच्छायाः स्वविषयासाधारणस्वरूपनिश्चयजन्यत्वान्न विशिष्टज्ञानं तत्कारणम् । विशिष्टज्ञानस्यापि संशयस्याकारणत्वात् । सत्तानिश्चयरूपस्यैव तस्याकारणत्वं वाच्यम् । तथा च लाघवात्सत्तानिश्चय एव तत्कारणम् । स्वरूपसुखसत्तानिश्चयश्च स्वप्रकाशात्मचैतन्यमेवेत्याह-न सुखेति । दुःखदशायामपि स्वरूपसुखं भासत इत्यत्र विवरणाचार्यसंमतिमाह-तदेतदिति । परमप्रेमास्पदत्वं लक्षणं गमकं यस्य सुखस्य ततथोक्तम् ।

आत्मा न सुखरूपः । सुखत्वधर्मरहितत्वात् । घटवदिति शङ्कते-नन्विति । हेतोरप्रयोजकत्वं निराकरोति-तस्यैवेति । सुखत्वस्यैव सुखरूपतयाऽन्येभ्यो व्यावर्तकत्वादित्यर्थः । सुखत्वमेव सुखरूपमित्येतत्तावद् दूषयति-न हि सुखत्वमिति । अन्यस्यान्यस्वरूपत्वे घटादिना गगनकुसुमादिकमपि रूपवत्स्यादिति भावः । व्यक्तिस्वरूपमसाधारणजातिरेवेति नोक्तातिप्रसङ्ग इति शङ्कते-असाधारणेति । जातिरेवेत्येवकारेण जात्यतिरिक्तव्यक्तिस्वरूपनिषेधात्, द्रव्यगुणादिविभागो न स्यादिति दूषयति-न जातीति । निर्विशेषसामान्यायोगात् सामान्यपदार्थोऽपि न स्यादित्याह-निःस्वरूपस्येति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

किंच किं सुखत्वं व्यक्तिविशेषे वर्त्तते उत व्यक्तिमात्रे इति विकल्प्य द्वितीये घटादावपि तत्स्यादित्यभिप्रेत्याह-किं चेति । आद्येऽपि व्यक्तेर्विशेषो धर्मः स्वरूपं वा ? । प्रथमेऽपि स जन्यो वा अजन्यो वा ? । नाद्य इत्याह-प्रथमेऽपीति । सुखस्य परमतेऽपि जन्यधर्मानाश्रयत्वादित्यर्थः । द्वितीयेऽपि स जातिरुपाधिर्वा ? नाद्य इत्याह-तत्रापीति । व्यक्तिस्वजन्यत्वादेः स्वरूपातिरिक्तस्य परमतेऽभावादित्यर्थः ।

आत्मातिरिक्तं सुखमेव नास्ति तत्र मानाभावात् कुतस्तस्य व्यक्तिस्वरूपत्वमित्यभिप्रेत्याह-सुखानुगतेति ।

(सुखस्वरूपस्य विज्ञानानतिरिक्तत्वम्) । सुखानुगतबुद्धेर्गोत्वादिविषयानुगतबुद्धेरिव स्वरूपमात्रविषयत्वेन वस्तुतोऽभावाच्च कल्पितभेदाश्रयजातेर्वास्तवसुखलक्षणत्वानुपपत्तेश्च । ततः सुखरूपमेव विशेषः । स एव तल्लक्षणम् । गोत्वादेरिव तत्स्वरूपम्। तच्च सुखस्वरूपं चैतन्यमेव । ततोऽतिरिक्तस्य सुखस्यानिरूपणात्, "विज्ञानमानन्दमिति" श्रुतेश्च विज्ञानातिरिक्तस्य दृश्यतया मिथ्यात्वाच्च न सुखं विज्ञानातिरिक्तम् । न चैवं ज्ञानानन्दपदयोः पर्यायत्वमेकार्थत्वादिति वाच्यम् । तत्तद्वृत्तिविशेषशबलस्य तदुपहितचैतन्यस्य वा ज्ञानानन्दपदवाच्यत्वात्तत्प्रवृत्तिनिमित्तभेदेनापर्यायत्वात् । प्रवृत्तिनिमित्तभेदेऽपि व्यक्त्यभेदेन पर्यायत्वे प्रमेयाभिधेयादि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पदानामपि पर्यायत्वप्रसङ्गात्। न चैवमानन्दपद-लक्ष्यत्वादात्माऽनानन्दःस्यादिति वाच्यम्। क्षत्रिणः क्षत्रिपदलक्ष्यत्वेऽपि क्षत्रित्ववदनौपाधिकप्रीतिविषयतयाऽऽनन्दस्यैवात्मन आनन्दपदलक्ष्यत्वेनानन्दत्वानपायात्।

वास्तवसुखत्वजातेरभावेऽपि कल्पितजातिरेव सुखस्वरूपमित्यत्राह-कल्पितेति । कल्पितो भेदो यस्य सुखस्य तदाश्रयजातेरित्यर्थः। अनुपपत्तेश्चेति। चकारेण तत्कल्पनाऽप्यपार्था, अनुगतबुद्धेर्व्यक्तिविषयत्वेनैवोपपत्तेरिति सूचयति। तस्माद् व्यक्तेः स्वरूपमेव विशेष इति पक्षः परिशिष्यत इत्याह-तत इति। स्वरूपविशेष एवेतरावृत्तित्वे सति तस्येतरव्यावर्तक इत्याह-स एवेति। स्वरूपस्यैव स्वव्यावर्तकत्वे दृष्टान्तमाह-गोत्वादेरिवेति। आदिपदेन प्रमेयत्वादेः संग्रहः। न च गोत्वधर्मे गोत्वत्वैव तद्व्यावर्तिकेति वाच्यम्। गवितरावृत्तित्वे सति सकलगोवृत्तित्वलक्षणगोत्वतया गोतदितरज्ञानमन्तरेण दुर्ज्ञेयत्वेनान्योन्याश्रयतापत्तेरिति भावः। साधितसुखस्वरूपस्य पुरुषार्थत्वाय चैतन्याभेदमाह-तच्चेति। तदभेदेऽपि प्रमाणं नास्तीत्याशङ्क्याह-विज्ञानमिति। आत्मरूपसुखस्य दृश्यत्वायोगाच्च दृग्रूपत्वमित्याह-विज्ञानेति। ज्ञानानन्दयोरभेदे तत्पदयोः पर्यायत्वापत्त्या सहप्रयोगानुपपत्तिरित्याशङ्क्याह-न चैवमिति। यथा द्रव्यात्मकघटस्याद्रव्याघटात्मकद्रव्यत्वघटत्वविशिष्टतया द्रव्यघटपदवाच्यताभेदभ्रमनिरासाय द्रव्यं घट इति सहप्रयोगः। तथा ज्ञानात्मकानन्दस्यैवाज्ञानाऽनान-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इत्याशङ्कामपवदति-एतेनेति । एतच्छब्दार्थमाह-आत्मेति । सांख्यसंमतसुखस्यैवात्मनो भेदनिराकरणात्ततो महान्विशेष इत्यर्थः । सुखस्यात्मरूपत्वे तस्यानित्यत्वगुणत्वानुभवविरोध इत्याशङ्क्याह-न चैवमिति । उत्पत्त्याद्यनुभवस्तावदन्यविषय इत्याह-तस्येति । अहं सुखीति सुखस्याहंकारसम्बन्धमात्रमनुभूयते । अहमसुखीतिवत्, न तु गुणत्वं तत्र । तदनुभवस्यौदासीन्यात् । सम्बन्धश्च सिद्धांतेऽप्यविरुद्ध इत्यभिप्रेत्याह-अहं सुखीति । सुखानित्यत्वमते किं मोक्षे सुखमेव प्रयोजकमुत दुःखध्वंसः ? । नाद्य इत्याह-अनित्यस्येति ।

द्वितीयं शङ्कते-नन्विति । "योऽश्नुते सर्वान् कामान् सच्चिदानन्दमात्रः स स्वराड् भवति"इत्यादिश्रुतिभिः परमानन्दप्राप्तेर्ज्ञानफलत्वाभिधानात् मैवमित्याह-न मोक्ष इति । किं वर्तमानध्वंसो मुमुक्ष्वभिलषित उतागामिदुःखयिध्वंसः ? । उभयथाऽप्यनुपपत्तिरित्याह-वर्त्तमानेति । किं च किमेकैकजीवे दुःखप्राभावाः परिमिताः, उतापरिमिताः ? । आद्ये भाविदुःखध्वंसनिश्चयायोगात्तदुद्देशेन निःशङ्कप्रवृत्त्यनुपपत्तिरित्याह-मुमुक्षानन्तरमिति । अतिदुष्करत्वं वैराग्यविशेषणम् । द्वितीयं शङ्कते-प्रागभावानामिति । अस्मिन् पक्षे दुःखप्रागभावानां कदाप्यसमाप्तेर्न चरमदुःखध्वंसः संभवतीत्याह-तर्हीति ।

संख्यातोऽपरिमिताः स्वरूपतस्तु परिमिता एवेति शङ्कते-कथं चिदिति ।

कथं चित्परिमिताश्चेत् । न, मुमुक्षानन्तरं तत्सत्त्वनिर्णयः । विनापि तत्त्वज्ञानं मोक्ष-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रसङ्गाच्च । ननु मोक्षशास्त्राद्यन्यथानुपपत्त्यैव भावि दुःखं, तस्य ज्ञानैकनिवर्त्यत्वं च निश्चीयत इति चेन्न । तस्यान्यथैवोपपत्तेः । "ब्रह्म वेद ब्रह्मैव भवति" इत्यादिशास्त्रानुरोधेन तत्प्रतिबन्धकस्यैव ज्ञानान्निवृत्तिः । "तरति शोकमात्मवित्" इति फलवचनार्थो न तु त्वदभिमतदुःखनिवृत्तिः । अन्यथा फलद्वयकल्पनागौरवात् । विरोधिगुणमात्रनाश्यस्य दुःखस्य तत्त्वज्ञानापेक्षायोगाच्च । अस्ति चात्र स्वविषयसाक्षात्कारो दुःखस्य विरोधी गुणः । दुःखस्य स्वसत्ताकालीनप्रत्यक्षविषयत्वनियमात् । अत एव दुःखस्थितिकाले तत्त्वज्ञाना सम्भवान्न तस्य तन्निवर्त्यत्वम् । न च दुःखविषयसाक्षात्कार एव सर्वविषयतया तत्त्वसाक्षात्कार इति वाच्यम् । एवमपि विरोधिगुणत्वेनैव तस्य नाशकत्वात् । "तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्, तथर्षीणां, तथा मनुष्याणाम्" इति योग्ययोगिसाधारणमुक्तिश्रुतिविरोधाच्च ।

तर्ह्यनादिकालमारभ्य क्षीयमाणानामेतावता कालेन परिसमाप्तिसम्भावितदुःखाभावेन चरमध्वंसस्याप्ययत्नलभ्यत्वसम्भावनोपपत्तेर्न निःशङ्कप्रवृत्तिरित्याह— न मुमुक्षेति । प्रागभावसमाप्तावप्यसमाप्तत्वभ्रान्त्या प्रवृत्तिरित्याशङ्क्य तथापि तत्त्वज्ञानं व्यर्थमित्याह

विनापीति । मुमुक्षानन्तरं भाविदुःखाभावे तस्य ज्ञानैकनिवर्त्यत्वाभावे च मोक्षशास्त्रमनर्थकं स्यादतो भाविदुःखादिकमस्तीति निश्चयपूर्विका मुमुक्षुप्रवृत्तिरुपपद्यत इति चोदयति नन्विति । मोक्षशास्त्रस्य परमानन्दप्रापकत्वेनान्यथोपपत्तेर्नैवमित्याह-न तस्येति । ननु तरति शोकमात्मविदिति दुःखध्वंसस्यैव ज्ञानाधीनता श्रूयते इत्यत्राह-ब्रह्म वेदेति । आदिपदेन "तरत्यविद्यां विततास्"इत्यादि गृह्यते । तत्प्रतिबन्धकस्येति अनर्थपारंपर्यप्रदर्शनेन स्वाभाविकब्रह्मभावतिरोधायकाज्ञानस्येत्यर्थः । कारणान्तरादपि शोकनिवृत्तेः सम्भववान्न तत्त्वज्ञानस्य तत्फलमित्याह-विरोधीति । तत्त्वज्ञानमेव विरोधिगुणतया निवर्तकमित्याशङ्क्याह-अस्ति चेति। दुःखस्थितिकाले तद्विषयसाक्षात्कारस्यावश्यंभावित्वादेव तदा द्वितीयस्य तत्त्वज्ञानस्यायोगान्न तस्य निवर्तकमित्याशङ्क्याह-अत एवेति । तत्त्वज्ञानस्यैव दुःखविषयत्वे संभवति पृथग्दुःखज्ञानाभावात्तत्त्वज्ञानमेव तन्निवर्त्तकमित्याशङ्क्याह-न च दुःखेति । "तमेव विदित्वा ऽतिमृत्युमेति"इत्यादिशास्त्रादात्मज्ञानमेव तत्त्वज्ञानम्, तन्न दुःखविषयमिति भावः । अङ्गीकृत्याप्याह-एवमपीति । तथा च तत्त्वज्ञानं विनापि तन्नाशः स्यादित्यर्थः । ननु योगजधर्मसामर्थ्यात्सार्वज्ञ्ये सति पुण्यपापदुःखप्रागभावादीनां परिच्छेदसम्भवात्कायव्यूहपरिग्रहेण सर्वदुःखप्रागभावक्षये चरमदुःखध्वंससिद्धिरिति चेन्न । एतस्य मतस्य श्रुतिस्मृतिबाह्यत्वात्तद्विरुद्धत्वाच्चेत्यभिप्रेत्याह-तद्यो य इति । तद् ब्रह्म देवानां मध्ये यो यः प्रत्यबुद्धयत स एव तद्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्रह्माभवत् । तथा ऋषीणां मध्ये, तथा मनुष्याणां च मध्ये यो यः प्रत्यबुद्ध्यत स एव तदभवदिति योगिनामयोगिनां चाज्ञानतिरोहितब्रह्मभावस्य तज्ज्ञानमात्रप्राप्यताभिधानविरोधादित्यर्थः ।

दुःखध्वंसस्यापुरुषार्थत्वादनित्यसुखस्य च मोक्षेऽसंभवान्नित्यमेव सुखं मुमुक्ष्वभिलषितमित्युपसंहरति तस्मादिति ।

तस्मान्न दुःखध्वंसार्थं मुमुक्षुप्रवृत्तिरिति नित्यमेव सुखम् । अत उत्पादविनाशानुभवोऽन्यविषयः । अत एव नासाधारण्यम् । वैषयिकसुखस्यात्मातिरिक्तस्याभावात् ।

सुखस्य नित्यत्वमुपसंहृत्य सुखविशेषाननुभवेन तद्भेदशङ्का

नन्वेवमोत्मन्युदासीनदशायामिव विषयसंबन्धदशायामपि विशेषो नानुभूयेत । आत्मन एकरूपत्वात् । न च सुखाकारान्तःकरणवृत्तिस्तदा विशेष इति वाच्यम् । ज्ञेयातिशयं विना ज्ञानमात्रस्याविशेषत्वात् । अथ वृत्त्या सुखाभिव्यक्तिर्विशेष इति चेन्न । सुखस्यात्मनः स्वप्रकाशचैतन्यतया सदाभिव्यक्तत्वात् । इतरथा ऽन्यदापि तन्मात्रत्वात्सुखं न प्रकाशेत । न च वृत्त्या सुखावरणतिरोधानमिति वाच्यम् । सुखस्यानावृतत्वात् । तस्य प्रतीयमानत्वनियमात् । अन्यथा तन्मात्रचैतन्यमप्यावृतं स्यात् । तयोर्भेदो वा स्यात् । एकत्रैकदा विरुद्ध-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धर्मद्वयानुपपत्तेः ।

सुखनित्यत्वसाधनफलमाह-अत इति । अन्यविषय इति । अवच्छेदकवृत्तिविषय इत्यर्थः । आत्मातिरिक्तसुखाभावे कदाचित्सुखविशेषानुभवानुपपत्तिरिति शङ्कते-नन्वेवमिति । विषयदशायां स्वतो विशेषाभावेऽपि स्वविषयवृत्तेरहमाकारवृत्त्यपेक्षया विशेषो न स्यादित्याह-च्छयेति । अदृष्टविशेषजन्यवृत्तौ सत्यामेवानन्दाभिव्यक्तेः कदाचिदभिव्यक्तिरेव तत्र विशेष इति शङ्कते-अथेति । सुखाभिव्यक्तेरप्यात्मस्वरूपतया सदातनत्वेन कादाचित्कत्वायोगादित्याह-न सुखस्येति । आत्मरूपसुखस्य स्वप्रकाशत्वानङ्गीकारे बाधकमाह-इतरथेति । तन्मात्रत्वात् स्वप्रकाशात्ममात्रत्वादात्मातिरिक्तप्रकाशस्याप्यभावादित्यर्थः । स्वप्रकाशरूपमपि सुखं पूर्वमावृतं वृत्तिविशेषे सत्यभिव्यज्यते इत्याशङ्क्याह-न च वृत्त्येति । सुखस्याभिव्यक्तसत्ताकत्वादाचरणायोगादिति हेत्वर्थः । विपक्षे दण्डमाह-अन्यथेति । चैतन्यस्यावृतत्वे तद्रूपात्मनि कदाचित्संशयादि स्यादित्यत आह-तयोरिति । चैतन्यसुखयोरित्यर्थः । आवरणानावरणरूपविरुद्धधर्मद्वयस्य धर्मिभेदं विनाऽनुपपत्तेरित्याह-एकत्वेति ॥ ८५ ॥

एकस्मिन्नपि शुक्तिशकले ज्ञातत्वाज्ञातत्वदर्शनान्न धर्मिभेदापेक्षेति शङ्कते नन्विति ।

नन्वावृतत्वानावृतत्वयोर्धर्मभेद एव प्रयोजको, न तु धर्मिभेदोऽपीति चेन्न । सुखैकरसे भवदभिमतात्मनि धर्मभेदे प्रमाणाभावात् । ज्ञा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नत्वादीनां वृत्तिप्रतिबिम्बितात्मधर्मत्वेन केव-
लात्मन्यसत्त्वात् । सुखाकारान्तःकरणवृत्तेरवि-
द्यानिवर्त्तकत्वाभावाच्च । न च विषयसम्बन्धद-
शायां सुखविशेष एव नेति वाच्यम् । अनुभवविं
रोधात्, विषयानुपादानप्रसङ्गाच्च इति चेत् ।

(सुखात्मनोर्भेद-शङ्कासमाधिः ।) तत्र किं सुखस्यावृतत्वाच्चैत-
न्याद्भेदः प्रतिपिपादयिषितः, किं वा चैतन्य-
स्यावरणमाहोस्वित्सुखस्यानावरणम् ? । न सर्व-
थापि । 'नास्ति' 'न प्रकाशत' इति व्यवहारयो-
ग्यत्वं ह्यात्मन आवृतत्वं, तदभावोऽनावृतत्वम् ।
ततश्चैकस्मिन्नप्यानन्दो नास्ति, न प्रकाशते
इति व्यवहारानुभवात् तद्योग्यत्वमस्तीत्यान-
न्दरूपेणावृतत्वम् । अहमर्थरूपं चैतन्यं नास्ति, न
प्रकाशते इति व्यवहारानुभवाभावेन न तद्योग्य-
तेति चैतन्यरूपेणानावृतत्वम् । एकार्थकव्यवहारभे-
दश्च वाच्यभेदादुपपन्नः । तस्मादेकमेव निरंशं
निरतिशयानन्दैकरसं चैतन्यमावृतमनावृतं चेत्यु-
पपद्यते । उभयस्याप्यनुभवादविरोधाच्चेति ।
अज्ञानं चाज्ञानान्तःकरणाप्रत्यक्षधर्मावच्छिन्नचै-
तन्यातिरिक्तचैतन्यावरणस्वभावम् । उक्तेषु स्वस-
त्तायामज्ञानावरणकार्यस्य तत्सत्ताप्रकारकसंश-
यादेरभावात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दृष्टान्तवैषम्येण परिहरति–न सुखैकरस इति । एकरसेऽप्यात्मन्यवास्तवा ज्ञानत्वादिधर्माः सन्तीत्याशङ्कय तेषामप्यावरणपूर्वकवृत्तितादात्म्याध्यासद्वाराऽऽत्मधर्मत्वात्केवलात्मन्यावरणस्यैवायोगादित्यभिप्रेत्याह–ज्ञानत्वादीनामिति । अङ्गीकृत्याप्यावरणसुखाकारवृत्तेस्तन्निवर्तकत्वं दूषयति-सुखाकारेति । प्रामाणिकसाक्षात्कारस्यैव तन्निवर्तकत्वादिति भावः । कालविशेषे सुखविशेषानुभवो नास्तीत्याशङ्कयाह-न चेति । उक्तानुपपत्तिपरिहाराय पूर्वपक्ष्याशयं विकल्पयति-तत्र किमिति । चैतन्यानावृतत्वादिति शेषः । चैतन्यस्येति । आवृतत्वं सुखाभेदादित्यर्थः । सुखेति । अनावृतचैतन्यभेदादित्यर्थः । ज्ञानानन्दपदयोर्वाच्यभेदेनापर्यायत्वाभिधानात्तद्घटितचिदानन्दादिव्यवहारोऽपि भिद्यते । तथा चैकव्यवहारयोग्यस्यापीतरव्यवहारयोग्यत्वसंभवात्तदात्मकावरणानावरणयोरेकत्राप्युपपत्तेर्न कोऽपि पक्षः साधयितुं शक्यते इत्यभिप्रेत्याह-न सर्वथेति । एकस्मिन्नपीति । ज्ञानानन्दयोरभेदेऽपीत्यर्थः । अहमर्थरूपचैतन्यमिति । अहमर्थोऽहङ्कारो रूप्यते दृश्यतेऽनेनेति तत्प्रकाशरूपसाक्षिचैतन्यमित्यर्थः । उदासीनदशायामात्मनः सुखरूपेणावृतत्वं चिद्रूपेणानावृतत्वमिति सुखविशेषाननुभवादिरुपपद्यते इत्युपसंहरति–तस्मादिति । चन्दनादिविषयसंपर्कदशायां सुखाकारवृत्तेरावरणाभिभावकत्वं वक्तुमज्ञानस्य न कृत्स्नचैतन्यावरकत्वमित्याह-अज्ञानं चेति । धर्माद्यवच्छिन्नचैतन्यस्यावृतत्वात्प्रत्यक्षेत्युक्तम् । अज्ञानाद्यवच्छिन्नचैतन्येष्वावरणकल्पकस्य तत्कार्यस्याभावादिति । हेतुमाह-उक्तेष्विति । अज्ञा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नादौ भावत्वादिप्रकारकसंशयादिभावेऽपि विद्यमानत्वप्रकारकः स नास्तीत्याह-तत्सत्तेति।

अज्ञानस्य कृत्स्नचैतन्यावरकत्वस्वभाव एव किं न स्यादित्यत आह-अनुभवेति।

(सुखात्मनोरैक्येऽपि सुखविशेषानुभवोपपादनम्) अनुभवानुरोधित्वात्पदार्थस्वभावकल्पनायाः। ततश्च तत्तद्विषयसंबन्धोत्थतत्तद्वृत्तिकवलीकृतमानन्दं विहायैवाज्ञानमानन्दमावृणोतीति तदा सुखविशेषानुभवः सङ्गच्छते। अयमेव वृत्तेरावरणाभिभवः। कारणकृतवृत्तिविशेषतारतम्याच्चावरणाभिभवतारतम्यमिति वैषयिकसुखतारतम्यं चोपपद्यते। अथ वा चिन्मात्राश्रयादज्ञानादनादिचिदानन्दभेदाध्यासादज्ञानमानन्दमावृणोति, न चैतन्यमिति व्यवस्था। अन्तःकरणवृत्त्या च विषयजन्यया ऽऽनन्दस्य चैतन्याभेदापादनाद्विषयदशायां सुखविशेषानुभवः। एतेनाविद्यावरणेनाप्यानन्दप्रकाशस्यानपायान्मुक्तिसंसारयोरविशेष एवानन्दप्रकाशः स्यादिति मुक्त्यर्थिप्रवृत्तिर्न स्यादिति निरस्तम्। इदानीं स्फुरतोऽप्यानन्दस्य 'नास्ति' 'न प्रकाशते' इति व्यवहारयोग्यताप्रतियोगित्तया 'अस्ति' 'प्रकाशते' इति व्यवहारयोग्यत्वाभावेन वा नष्टस्वीयसुखवदाविद्यकभेदप्रतियोगितया वा पुरुषा-

न्तरसुखवदिच्छाविरोधितालक्षणतृप्तिरूपताभावात्। मुक्तौ तदभावेनेच्छाविरोधित्वादिदानीं मुक्त्यर्थिप्रवृत्त्युपपत्तेः। एतेन वन्हौ गुञ्जाद्यारोपेऽपि वन्ह्युचितदाहादिवदात्मानन्दप्रकाशेऽप्रकाशमानत्वारोपेऽपि तदुचितं कार्यं स्यादिति प्रत्युक्तम् ।

एवमज्ञानस्वभावे सति चन्दनादिविषयसंसर्गजनितवृत्तौ सत्यां तदवच्छिन्नसुखात्मकचैतन्यमनावृतं स्पष्टमनुभूयते इत्याह- ततश्चेति। वृत्तौ सत्यां तदवच्छिन्ने चैतन्ये आवरणसंबन्धो नेत्ययमेव वृत्तेर्निमित्तादावरणाभिभव इति वृद्धवचनार्थ इत्याह-अयमेवेति। ननु वृत्तेरावरणाभिभवमात्र एवोपक्षीणत्वात्कथं वैषयिकसुखे तारतम्यमित्यत्राह-कारणेति। उद्भूतसत्त्ववृत्तेरेवावरणाभिभावकत्वात्सत्त्वोद्भवस्य चोद्भावकविषयतारतम्याधीनतरतमभूतत्वात्तदधीनसुखाभिव्यक्तितारतम्योपपत्तिरिति भावः। ज्ञानानन्दयोर्वास्तवाभेदेऽपि जीवेश्वरवत्कल्पितभेदेनावरणानावरणयोः संभवाच्चैतन्याभिव्यक्तावप्यानन्दानभिव्यक्तिर्घटते इत्याह-अथवेति। विषयभोगदशायां कथं तर्ह्यानन्दानुभव इत्यत आह-अन्तः करणेति। स्वस्य स्वाकारवृत्तिद्वाराऽनावृतसाक्षिचैतन्याभेदे संविदभेदादापरोक्ष्यमित्यर्थः। सुखस्वरूपस्यावृतत्वेऽपि तत्स्वरूपभूतः प्रकाशोऽस्त्येव। तथापि तस्येदानीमपुरुषार्थत्ववन्मुक्तावप्यपुरुषार्थत्वं स्यादित्याशङ्क्याह-एतेनेति। एतच्छब्दार्थमेवाह-इदानीमिति। वस्तुतः स्वरूपतया स्फुरतोऽप्यानन्दस्याप्राप्तत्वभ्रान्त्या

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत्प्राप्तिकामनापूर्विका प्रवृत्तिरुपपद्यते इत्यर्थः । अप्राप्तत्वभ्रमे हेतुत्रयमाह-नास्तीत्यादि । आनन्दरूपत्वमिति कर्तृनिर्देशोऽध्याहर्त्तव्यः । हेतुद्वयेनाप्यप्राप्तप्रतीतावुदाहरणमाह-नष्टेति । तृतीयमपि हेतुं सोदाहरणमाह-अविद्यकेति । तदभावेनेति । अज्ञानभ्रान्त्यादेरभावेनेत्यर्थः । एतेनेति । स्पष्टोऽर्थः ।

आनन्दप्रकाशकार्यमापाद्यमानं षोढा विकल्पयति-किं तदिति ।

(आनन्दोचितकार्यैर्विकल्पनिरसनपूर्वकं सुखरूपत्वेऽपुरुषार्थत्वशङ्कानिरसनम् ।)

किं तदुचितकार्य्यमविद्यानिवृत्तिः, उत नास्तीत्यादिव्यवहारविच्छेदः, किं वाऽहमनतिशयानन्द इति व्यवहारः, किं वा सुखेच्छया विषयानन्वेषणम्, अथवाऽऽत्मनि प्रेम, किं वा तृप्तिः ? । नाद्यद्वितीयौ । स्वरूपस्फुरणस्याविद्यातत्कार्याविरोधित्वात् । न तृतीयः । अविद्यावरणेन प्रतिबद्धत्वात् । न चतुर्थः । स्वरूपस्य नास्तीत्यादिव्यवहारयोग्यताप्रतियोगित्वेन पुत्रादेश्च सुखजनकत्वभ्रमेण तदुपपत्तेः । पञ्चमस्त्विष्यते । षष्ठे तूक्त एव परिहारः । दहनादेस्तु स्वरूपसत एव दाहहेतुत्वाद्वैषम्यम् ।

यत्तूक्तं सुखस्यात्मत्वेऽपुरुषार्थत्वप्रसङ्ग इति । तन्न । न तावदात्मस्वरूपं सुखमसुखं भवति । न च सुखमप्यात्मनोऽनन्यत्वादपुरुषार्थः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भेदस्य तत्समवायस्य वा सुखतत्साधनान्यतरान्तर्भूतस्याकाम्यतया पुरुषार्थत्वायोगात् । न चैवमात्मस्वरूपं सुखमपि कामनाविरहादपुरुषार्थः । "सदाऽहंभूयासम्" इति कामानाया एव स्वरूपसुखविषयत्वात् । न च "सुखं मे भूयात्" इति भेदादायुषि कामना दृश्यते इति वाच्यम् । कामनायाः सुखतत्साधनान्यतरभेदादिविषयत्वांशे बाधिततया सुखमात्रविषयत्वात् ।

साक्षिज्ञानस्याविद्यासाधकत्वात्तया तत्कार्य्यरूपेण नास्तीत्यादि व्यवहारेण चाविरोधान्नाद्यावित्याह-नाद्यद्वितीयाविति । अहमनतिशयानन्द इति व्यवहारो विपरीतव्यवहारयोग्यतालक्षणंप्रतिबन्धान्न भवतीत्याह-न तृतीय इति । नित्यप्राप्तेऽपि सुखेऽप्राप्तत्वसाधनपारतन्त्र्यादिभ्रमात्तत्साधनगवेषणेत्याह-न चतुर्थेति । अहं भूयासमित्यात्मनि प्रेमास्त्येवेत्याह-पञ्चमस्त्विति । पूर्वोक्तहेतुत्रयाधीनाप्राप्तत्वभ्रमादेव तृप्तिर्नास्तीत्याह-षष्ठइति । वन्हाववह्नित्वारोपस्य तत्सत्ताप्रयुक्तकार्याप्रतिबन्धकत्वाद्वैषम्यमित्याह-दहनादेरिति ।

चोद्यान्तरं दूषयितुमनुवदति-यत्तूक्तमिति । किं सुखस्यात्मरूपत्वेऽसुखत्वापत्त्याऽपुरुषार्थत्वमुतात्मीयत्वाभावात् ? । नाद्यः । तस्यैव सुखत्वेन साधितत्वादित्यभिप्रेत्याह-न तावदिति । द्वितीयं दूषयति-न चेति । स्वतन्त्रकामनागोचरस्यैव पुरुषार्थत्वात्कामनायाश्च सुखतत्साधनान्यतरविषयत्वाद्भेदसमवाययोश्च तदन्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तरत्वाभावादित्यर्थः । तर्ह्यात्माभिन्नसुखस्यापि कामनाऽभावादपुरुषार्थतेत्याशङ्क्याह-न चैवमिति । ननु सुखकामनाया भेदादिविषयत्वस्याप्यनुभवादात्मभिन्नमेव सुखं पुरुषार्थ इति चेन्न । तव मते भेदादेः सिद्धत्वेनानुपादेयत्वादकारणत्वाच्च कामनायास्तद्विषयत्वायोगात्तदनुभवो भ्रम इत्यभिप्रेत्याह-न च सुखमिति ।

कामनाया अयोग्यविषयत्वेनाप्यनुभवे निदर्शनमाह-अहमिति ।

"अहं स्वर्गी स्याम्"इति कामनाया इव "मम सुखं भूयात्"इत्यादिकामनाया अहमनुभवगोचरातिरिक्तात्मस्वरूपसुखविषयत्वाच्च । न च सुखमात्रस्य पुरुषार्थत्वे पुरुषान्तरसुखमपि तथा किं न स्यादिति वाच्यम् । सुखद्वयाभावात् । पुरुषान्तरीयत्वस्य चापुरुषार्थत्वात् । नन्वात्मा सुखरूप इत्यत्र न 'सुखत्वाश्रय'इति प्रतिज्ञार्थः । केवले आत्मनि तदभावात् । अत एव न सुखत्वविशिष्टाभिन्न इत्यर्थः । केवलस्य सुखस्य सुखत्वविशिष्टाभेदे केवलेऽपि तत्प्रसङ्गात् । नापि दुःखान्यत्वं साध्यं सिद्धसाधनत्वात् । नापि दुःखविरोधित्वम् । दुःखात्यन्ताभावत्वेनार्थान्तरत्वात्; इति चेन्न । निरवयवसुखपदवाच्याभेदस्य परमप्रेमास्पदताप्रयोजकरूपाभेदस्य वा साध्यत्वात् । न च बाधः । सुखव्यक्तेरात्मनश्च भेदमिथ्यात्व-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्याप्यनेनैव सिद्धेः ॥

स्वर्गी स्यामिति कामनायास्तदयोग्याहमर्थविषयत्वानुभवत्वमित्यर्थः । किं चाहमर्थातिरिक्तसुखकामना न सिद्धान्तेऽपि विरुद्धा । आत्मरूपसुखस्य तद्भेदाङ्गीकारादित्याह-ममेति । सुखात्मसंबन्धस्यापुरुषार्थत्वेऽतिप्रसङ्गः स्यादित्याशङ्क्याह-न च सुखमात्रस्येति । किं पुरुषान्तरसुखं स्वरूपेण पुरुषार्थः स्यादित्युच्यते, किं वा पुरुषान्तरीयत्वाकारेण ? । आद्ये इष्टापत्तिरित्यभिप्रेत्याह-सुखदुःखेति । द्वितीयं दूषयति-पुरुषान्तरीयत्वेति । आत्मा सुखरूपः निरुपाधिकप्रेमगोचरत्वादित्यनुमाने प्रकारान्तरेण साध्यानुपपत्तिमाशङ्कते-नन्विति । केवलात्मनीति । निर्विशेषात्मनि सुखत्वधर्माभावादित्यर्थः । अत एव-केवलत्वादेवेत्यर्थः । सुखत्वविशिष्टाभेदेऽपि केवलः किं न स्यादित्याशङ्क्याह-केवलस्येति । विवक्षितसाध्येनोक्तदोष इत्याह-न निरवयवेति । निरवयवं यत् सुखपदवाच्यं तत्प्रतियोगिकभेदाभावस्येत्यर्थः । अत्र सिद्धान्ते सावयववृत्तेरपि सुखपदवाच्यत्वात्तद्भेदसाधने बाध इति निरवयवेत्युक्तम् । वस्तुतस्त्वेतद्विशेषणं विनापि बाधितसुखपदवाच्यांशं विहायाबाधितस्वरूपसुखभेदाभावमादाय साध्यं सिध्यति । तथा च न बाधपरिहाराय विशेषणं, किं तु सुखपदवाच्यवृत्तिभेदस्य साध्यव्यतिरेकस्यात्मनि सत्त्वेऽपि हेतुव्यतिरेकाभावात् तत्र व्यतिरेकव्यभिचारपरिहाराय । न च निरवयवसुखपदवाच्यसुखत्वभेदोऽप्यात्मन्यस्तीति व्यतिरेकव्यभिचारस्तदवस्थ इति वाच्यम् । वृत्तिविशेषानुगतात्मस्वरूपसुखस्यैव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुखानुगतबुद्धिविषयतया सुखत्वरूपत्वेन तस्य तद्भेदा-भावादिति द्रष्टव्यम्। साध्यान्तरमाह-परमेति। सुखस-मवायित्वादेस्तत्प्रयोजकत्वस्य निरस्तत्वात्सुखमेव त-त्प्रयोजकमिति तदभेद एव सिध्यतीति भावः। 'मम सुखम्' इत्यादिभेदप्रत्यक्षविरुद्धमनुमानमित्याशङ्क्याह-न चेति। सुखाहङ्कारभेदस्य मयाप्यङ्गीकारादित्यर्थः। हेत्व न्तरमाह-सुखव्यक्तेरिति। तर्कोपोद्बलितानुमानस्यैव प्रत्यक्षबाधकत्वादित्यर्थः॥

न केवलं प्रत्यक्षाविरोधः। किं तु तदपि तत्र मानमित्याह-तथेति।

(आत्मनः सुखाभेदे सौषुप्तिकानुभवस्यापि प्रामाण्यनिरूपणम्।)

तथाऽऽत्मनः सुखत्वे "सुखमहमस्वाप्सम्" इति परामर्शकल्प्यसौषुप्तिकानुभवोऽपि मानम्। तथा हि-सर्वानुभवसिद्धस्तावदयं परामर्शः। स च सुख-विषय एव। दुःखाभावस्य सुषुप्तौ सतोऽपि प्रतियोगिज्ञानाभावेनानुभवितुमशक्यत्वात्। अननुभूते च परामर्शायोगात्। ननूत्थितस्य स्वापकालीनदुःखाभावानुमितिरियं, न परामर्शो, न वा सुखविषय, इति चेन्न। प्रसिद्धपरामर्शतुल्य-त्वात्सुखविषयत्वे बाधकाभावाच्च-असत्यपि बा-धेऽन्यतोक्तेरन्यविषयत्वेऽतिप्रसङ्गात्। दुःखाभावा-नुमितिलिङ्गानिरूपणाच्च परामर्श एवायम्। न तावत्तत्कालीनदुःखवत्ताऽस्मरणं तत्कालीनदुः-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

खाभावे लिङ्गम्। अनुभूते स्मृतिनियमाभावेनाप्रयोजकत्वात् । न च स्वसत्तायामवश्यानुभवस्य नियमेनास्मरणमभावव्याप्तमिति वाच्यम् । अनुभूतेऽपि सुखादौ कस्मिंश्चित्तदभावदर्शनात् । किं च तदा दुःखवत्तया या स्मृतिस्तदभावो हेतुः । तदा यद्द दुःखं तद्गोचरस्मृतिविरहो वा तदा यो दुःखवत्तया स्मृतिविरहः-स वा ?।

सौषुप्तिकदुःखाभावविषय एवायं परामर्श इत्याशङ्क्याह-स चेति । सुषुप्तौ दुःखस्मरणायोगेन तदभावानुभवाभावात्तत्परामर्शानुपपत्तेरिति। हेतुमाह-दुःखाभावस्येति । सुप्तौ सुखानुभवाङ्गीकारे तद्भङ्गप्रसङ्गात्, तदनुभवाभावे तत्परामर्शस्याप्यनुपपत्तेः "सुखमस्वाप्सम्" इत्युत्थितस्य दुःखाभावानुमितिरेवेति शङ्कते-नन्विति । अनित्यज्ञानोपरमरूपसुषुप्तेः नित्येन सुखानुभवेन विरोधाभावात्तदधीनसुखपरामर्श एवायमित्यभिप्रेत्याह-न प्रसिद्धेति। सुखविषयत्वेन संमतपरामर्शतुल्यत्वादित्यर्थः। सुप्तौ सुखस्याभावात्कथं तद्विषयत्वमस्येत्याशङ्क्याऽनित्यसुखाभावेऽपि नित्यसुखविषयत्वोपपत्तेरित्याह-सुखविषयत्व इति । अनुमितिकरणस्यापि निर्वक्तुमशक्यत्वात्परिशेषादयं परामर्श इत्याह-दुःखाभावेति । "अहं सुषुप्तिकाले दुःखरहितः तत्कालीनदुःखवत्तया स्मरणरहितत्वात्सुख्यहमिव" इत्यादि लिङ्गमस्तीत्याशङ्क्याह-न तावदिति। कदाचिदनुभूतस्य विद्यमानस्यापि घटादेरस्मर्यमाणत्वान्नास्मरणं प्रमेयाभावव्याप्तमित्यर्थः । ननु दुःखस्य ज्ञायमानसत्ताकतया घटादिविल-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षणत्वात्तदस्मरणं तदभावमन्तरेणानुपपन्नमिति चेन्न। चिरातीतसुखादेस्तत्कालीनतया स्मरणाभावेऽपि तदा सत्त्वादित्याह-न च स्वसत्तायामिति।

किं च तत्कालीनत्वं स्मरणस्य विशेषणमुत दुःखस्य किं वा स्मरणविरहस्येति विकल्पयति किं चेति॥

प्रथमद्वितीययोः प्रतियोग्यप्रसिद्ध्या हेत्वसिद्धि-माह-न प्रथमाविति।

प्रतियोग्यप्रसिद्ध्या हेत्वसिद्धिः। न प्रथमौ। सुषुप्तिकालीनदुःखतद्गोचरस्मृत्योरसत्त्वेन तद्विरहासिद्धेर्व्यधिकरणतद्विरहयोरलिङ्गाच्च। नापि तृतीयः। दुःखवत्यात्मनि व्यभिचारात्। दुःखानुभवकाले तत्स्मृतिविरहसत्त्वात्। स्वापकालीनतया स्मृतिविरहस्येदानीमवगन्तुमशक्यत्वाच्च। न च तदापि सुषुप्तिकालीनदुःखाभावोऽस्तीति न व्यभिचार इति वाच्यम्। सुषुप्तिकालीनदुःखस्याभावात्। तत्कालीनत्वेन दुःखाभावस्य पूर्वमज्ञानात्। न चैवं प्रातःकालीनतया चत्वरादौ कथं गजाद्यभावानुमितिरिति वाच्यम्। क्वचिद्ध गजविरोधिपदार्थवत्तया स्मरणात्। क्वचित्प्रतियोगिनो देशान्तरसम्बन्धित्वज्ञाने। तदुभयाभावे तु अभावस्मरणं क्वचित्। संभवति हि पूर्वमप्यालोकविशिष्टे देशे योग्यानुपलब्ध्या अभा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वानुभवः प्रतियोगिज्ञानमप्यभावज्ञानबलात्कल्प्यम् । लिङ्गज्ञानव्याप्तिज्ञानपरामर्शानां कल्पनातोऽभावज्ञानकल्पन एव लाघवात् ॥

नन्वेकस्य सुषुप्तिकालेऽपरस्य दुःखतत्स्मरणयोः संभवान्न तदभावोऽसिद्ध इत्यत आह-व्यधिकरणेति । स्वदुःखे सत्यपि परकीयदुःखतत्स्मरणयोर्विरहस्यापि सत्त्वेन व्यभिचारादित्यर्थः । स्वापकालीनो यो दुःखस्मृतिविरहः तस्य दुःखानुभवकालेऽपि सत्त्वाद् व्यभिचारेण दूषयति-नापीति । स्वापकाले दुःखविरहवत्स्मृतिविरहोऽपि दुर्विज्ञेयत्वादसिद्ध इत्याह स्वापेति । यदुक्तं 'दुःखवत्यात्मनि व्यभिचारादिति, तत्परिहारमाशङ्क्याह-न च तदापीति । किं तदापि सुषुप्तिकालीनं यद् दुःखं तदभावोऽस्तीत्युच्यते, किं वा सुषुप्तिकालीनो यो दुखाभावः सोऽस्तीति ?। नोभयथापीत्याह-सुषुप्तीति । पूर्वमज्ञानादिति । तथा च साध्याप्रसिद्धिरिति भावः । अस्मर्यमाणस्याभावानुमापकत्वे प्रसिद्धाभावोऽपि न सिद्ध्येदिति शङ्कां निराकरोति-न चैवमिति । गजावस्थानविरोधिनी गवादिसंकुलता स्मर्यमाणा तदभावानुमापिकेत्याह-क्वचिदिति । तदभावे गजस्यान्यत्र सत्त्वं स्मर्यमाणं चत्वरे तदभावानुमापकमित्याह-क्वचित्प्रतियोगिन इति । उभयस्याप्यनुमापकस्याभावे का गतिस्तत्राह-तदुभयेति । ननु प्रातश्चत्वरं प्रविष्टेनापि तदभावाननुभवात्कथं सायं तत्स्मृतिरित्याशङ्क्य सामग्रीसत्त्वात्तदभावो ऽनुभूत एवेत्याह-संभवति हीति । तदा गजस्मरणाभावात्कथं तदभावोपलब्धिसामग्रीत्याशङ्क्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तदपि कार्यबलात्कल्प्यमित्याह-प्रतियोगीति । अननुभूयमानज्ञानकल्पनमेव दोष इत्याशङ्क्यानुमानपक्षेऽननुभूयमानबहुकल्पनमस्तीत्याह-लिङ्गज्ञानेति ॥

किं चानुमानपक्षे स्मरणाभावेनानुभवाभावमनुमाय तेन गजाभावोऽनुमातव्यः । तत्रापि नानुपलम्भमात्रं प्रमेयाभावे लिङ्गव्यभिचारात् । किं तु योग्यत्वे सति । योग्यत्वं च प्रतियोगितद्व्याप्येतरतदुपलम्भकसमवधानम् । तथा च गजत्वादिविशेषणज्ञानस्यापि तदुपलम्भकत्वात्तदपि प्रातस्त्वया कल्प्यम् । तथा च प्रतियोगिज्ञानं दुर्वारमित्याह-त्वयापीति ।

अनुमानपक्षे प्रत्यक्षानुभवाभावानुमानपूर्वकं गजाभावानुमानम् ।

त्वयाऽप्यननुभूयमानविशेषणज्ञानस्य पूर्वं कल्प्यत्वात् । अन्यथा प्रतियोगितद्व्याप्येतरविशेषणज्ञानाभावेनानुमाने लिङ्गाभावात् । अत एव क्वचित्तत्तुल्यवत्तया ज्ञायमानेऽपि गृहादौ पिपीलिकाद्यभावसंशयो दृश्यते । अनुमाननियमपक्षे तन्न स्यात् । तत्रापि तल्लिङ्गनिश्चयसंभवात् । न चानुभूते प्राणिधनादौ नियमेन स्मर्यमाणत्वमपि लिङ्गविशेषणं पिपीलिकादेस्तदभावात्तत्र संशय इति वाच्यम् । देवदत्तादेरपि तदज्ञानदशायामभावज्ञानदर्शनात् । तत्र च स्मरणकल्पनायामन्यत्रापि तदस्तु । किं च देवदत्तगोचरप्रत्यक्षप्रागभावविरहाद्वा सामग्र्यन्तरप्रतिबन्धाद्वा वि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्यमानेऽपि तदननुभवसंभवादप्रयोजकमनुमानम्। स्वीक्रियते खलु त्वया प्रागभावेतरकारणसत्त्वेऽपि तद्विरहात्कार्योत्पत्त्यभावः ॥

यत्रास्मदुक्तलिङ्गद्वयं नास्ति । नापि पूर्वानुभवः । तत्राभावनिश्चयोऽपि न नेतव्य इति व्यतिरेकमाह-अत एवेति । तत्तुल्यवत्तयेति । पिपीलिकादितुल्यतुषादिमत्तयेत्यर्थः । प्रातश्चत्वरे गजाभावनिश्चयस्यानुमितित्वनियमपक्षे पिपीलिकाद्यभावसंशयो न स्यात् । तत्तुल्यवत्तया स्मर्यमाणत्वे सति तद्वत्तयाऽस्मर्यमाणत्वलिङ्गस्यात्रापि सत्त्वादित्याह-अनुमानेति । ननु चित्तसमाधाने सत्यनुभूतस्य स्मरणयोग्यत्वमप्युक्तलिङ्गविशेषणं पिपीलिकादेश्चैतदभावान्न तदभावनिश्चय इति चेन्न । उक्तविशेषणविशिष्टलिङ्गाप्रतिसन्धानेऽपि झटिति कालान्तराभावनिश्चयदर्शनादित्याह-न चानुभूत इति । देवदत्ताभावस्य स्मर्यमाणत्वे गजाद्यभावेऽपि तथैव स्यादित्याह-तत्र चेति । परमते कुत्राप्यभावानुमानं न संभवतीत्याह-किं चेति । अधिकरणे प्रतियोगिसत्त्वविरोध्येवानुपलम्भोऽभावानुमापकः । न चात्रानुपलम्भस्य तद्विरोधित्वम् । प्रतियोगिसत्त्वेऽप्युपलम्भप्रागभावाभावात्सामग्र्यन्तरप्रतिबन्धाद्वाऽनुपलम्भोपपत्तेरिति भावः । तत्र प्रागभावाभावेन कार्यासंभवमाह-स्वीक्रियत इति । प्रागभावाभावादेवोत्पन्नस्य पुनरनुत्पत्त्यङ्गीकारादित्यर्थः॥

सामग्र्यन्तरप्रतिबन्धादनुपलब्धावुदाहरणमाह-तुरगादाविति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनुपलब्धौ सामग्र्यः तुरगादौ वेगेन गच्छतः पन- प्रतिबन्धकत्वम् । सत्वादिस्मृतिमतो धर्मीन्द्रिय-सन्निकर्षे समानेऽपि कस्यचित् ज्ञानं कस्य चिन्नेति। एकेन्द्रियग्राह्याणामपि कस्य चित्सामग्र्या कस्य चित्प्रतिबन्धश्च । अनुभवेऽपि प्रमुष्टतत्ताकस्मृतिवदितरस्मरणोपपत्तेश्चाप्रयोजकम् । तस्मादुक्तलिङ्गद्वयाभावे स्मरणमभावस्य । अन्यथा संशय एव । यदि च प्रागभावोऽपि न कारणम् संशयनियमोऽप्यदृष्टादेव, अर्थे च स्मर्यमाणत्वनियमस्तर्हि "देवदत्तः प्रातःकालीने सर्वतोऽवलोकिते गृहे वर्त्तमानाभावप्रतियोगी तदानीं गेहनिष्ठतत्तुल्यस्मरणसमानकालीनस्मरणाविषयत्वे सति विषयविशेषत्वात्, संप्रतिपन्नवत्" इत्यस्तु ।

कस्य चिदिति । वृक्षविशेषस्येत्यर्थः । एकेन्द्रियग्राह्येष्वपि कस्य चित् ज्ञानसामग्र्या कस्य चित् ज्ञानं प्रतिबध्यते, किमु वक्तव्यं भिन्नेन्द्रियग्राह्येष्वित्यभिप्रेत्याह-एकेन्द्रियेति । एवमस्मरणमप्यनुपलम्भे न लिङ्गमित्याह अनुभवेऽपीति । तद्विरुद्धदार्थवत्तया स्मर्यमाणत्वादिलिङ्गद्वयाभावेऽप्यभावनिश्चयः स्मृतिरेव । तस्या अप्यभावे संशय एवेत्युपसंहरति-तस्मादिति । प्रातर्गजाद्यभावस्यानुमेयत्वेऽपि न सौषुप्तिकदुःखाभावस्य तदिति वक्तुं पूर्वोक्ताप्रयोजकत्वबीजाभावमङ्गीकरोति-यदि चेति । पिपीलिकादिसंशयनियम इत्यर्थः । अर्थे चेति । अनुभूत इति शेषः । देवदत्तः प्रातःकालीनेऽव-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लोकिते गृहे सर्वत्र वर्तमानाभावप्रतियोगी प्रातःकालीनगेहनिष्ठा देवदत्ततुल्या ये स्तम्भादयस्तत्स्मरणैककालस्मरणाविषयत्वे समुपेक्षणीयविषयातिरिक्तत्वात् बाह्यवृक्षवदित्यनुमानवाक्यार्थः । समयान्तरे देवदत्तस्य गृहे सत्त्वेन बाधपरिहाराय प्रातःकालीन इति विशेषणम् । गृहैकदेशे देवदत्तसत्त्वेऽपि तन्निष्ठाभावप्रतियोगित्वसम्भवेनार्थान्तरतावारणाय सर्वत इति । सर्वत्र इत्यर्थः । अनवलोकितगृहे देवदत्तस्य सर्वत्र बाधपरिहारायावलोकित इति । गेहनिष्ठोपेक्षणीयविषयेषु व्यभिचारवारणाय विशेषत्वादिति । स्तम्भादौ व्यभिचारवारणायस्मरणाविषयत्वे सतीति । अनुमानकाले देवदत्तस्यापि स्मर्यमाणत्वादसिद्धिवारणाय गेहनिष्ठतत्तुल्यस्मरणकालीनेत्युक्तम् । गेहपदं च सर्वतोऽवलोकितगेहपरम् । तथा च गेहनिष्ठेऽपि गेहानवलोकनप्रयुक्तस्मरणादिविषये न व्यभिचारः । समयान्तरे गेहनिष्ठस्तम्भादिभिः सह स्मर्यमाणत्वादसिद्धिवारणाय तदानीमित्युक्तम् ॥

स्वापकालीनदुःखाभावे पूर्वोक्तलिङ्गद्वयमिदञ्च नास्तीत्याह-न चेति ।

सुषुप्तौदुःखाभावे पूर्वोक्तहेतुद्वय- न च प्रकृते सुषुप्ति-
स्यापनपूर्वकोच्यमानखण्डनम् । कालीनदुःखविरोधि
स्मरणमस्ति न वा दुःखं सुषुप्तिकालीनात्मनिष्ठप्रतियोगि अन्यत्रवर्तमानत्वादित्यनुमानम् । तदभावस्य तत्र सत्त्वेऽपि सकलदुःखाभावस्य तद्वृत्तित्वासिद्धेः । "सुखमहमस्वाप्सम्"इति ज्ञानस्य सकलदुःखाभावविषयकत्वस्यैव वक्तव्यत्वात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एकदुःखवति दुःखाभावे सुखारोपादर्शनात् । नापि स्मरणं पूर्वं तदनुभवाभावात् । कालविशेषनिष्ठसकलज्ञानाभावज्ञानं विना सुषुप्तित्वज्ञानासंभवाच्च । न हि पूर्वकालस्य सकलज्ञानाभाववत्त्वं केन चिदनुभवं विना ज्ञातुं शक्यते । न च सकलज्ञानाभावादेः किञ्चिल्लिङ्गादिकमस्ति । उदासीनपदार्थज्ञानानां नियमेन स्मरणाजनकानामभावस्यानुमातुमशक्यत्वात् । व्यवहाराभावस्य ज्ञानाभावानियतत्वात् । तस्यापि दुर्ग्रहत्वात् । करणव्यापाराभावस्य प्रागसिद्धेः दुःखाभावत्वेन दुःखाभावोपस्थितौ वा तत्सुखारोपासंभवेन सुखाकारपरामर्शो न स्यात् । अस्ति च दुःखाभावस्य सुखविरुद्धत्वज्ञानवतामपि तदाकारपरामर्शः ।

दुःखविरोधीत्युपलक्षणं दुःखतुल्यविषयकस्मरणमपि । नास्तीति नेदमप्यनुमानमित्यर्थः । प्रतियोगिनोऽन्यत्र वर्तमानत्वलिङ्गं दूषयति—नवेति । दुःखम्-अन्यकालीनं दुःखमित्यर्थः । सुषुप्तौ दुःखसत्त्वेऽपि कालान्तरीयदुःखाभावस्यापि संभवान्नानेन सकलदुःखाभावसिद्धिरित्याहतदभावस्येति । माऽस्तु सकलदुःखाभावसिद्धिरित्यत आह-सुखमहमिति । एतस्यानुमितत्वायोगेन स्मृतित्वेऽपि दुःखाभावविषयतया तत्स्मृतित्वमेव किन्न स्यादित्यत आह नापीति । स्वापे दुःखाभावानुभवायोगेन तत्स्मरणस्याप्ययोगादित्यर्थः । सुषुप्तिकालीनोऽहं सकलदुःखरहित इति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पक्षविशेषणमपि दुर्ग्रहमित्याह-कालविशेष इति । सकलज्ञानाभावः प्रत्यक्षेणैव ज्ञायत इत्याशङ्क्य तस्य वर्त्तमानमात्रग्राहकत्वान्नैवमित्याह-न हीति । अनुभवं विनेति। नित्यसाक्षिरूपानुभवं विनेत्यर्थः । अस्तु तर्हि लिङ्गेन तदवगमस्तत्राह-न चेति । किं स्मरणाभावो ज्ञानाभावे लिङ्गमुत व्यवहाराभावः, किं वा सामग्र्यभावः ? । नाद्यः । उपेक्ष्यज्ञानाभावासिद्धेरित्याह-उदासीनेति । न द्वितीयः । मौनिनां व्यवहाराभावेऽपि ज्ञानसत्त्वादित्यभिप्रेत्याह-व्यवहारेति । स्वापे व्यवहाराभावज्ञानायोगादपि न तल्लिङ्गमित्याह-तस्यापीति । तृतीये सामग्र्यभावः किं कार्याभावगम्य उत करणव्यापाराभावगम्यः ?। नाद्यः । परस्पराश्रयात् । अत एव न द्वितीय इत्याह-करणेति । दुःखाभावानुमितिमङ्गीकृत्यापि तस्याः सुखाकारत्वमनुपपन्नमित्याह-दुःखाभावेति । दुःखाभावसुखयोरितरेतरानात्मत्वाज्ञानदशायामेवायमारोप इत्याशङ्क्याह-अस्ति चेति । किं च येन रूपेणाधिष्ठानप्रतीतिः, तत्समानाधिकरणस्यैवारोप्ये प्रतीतिनियमात् दुःखाभावः सुखमित्येवारोपः स्यादित्याह-भवन्नपीति ।

भवन्नपि वा सुखारोपो दुःखाभावः सुखमित्येव स्यात् । एतेन सुषुप्तित्वलिङ्गेन दुःखाभावानुमानं प्रत्युक्तम् । निखिलविशेषविज्ञानविरहलक्षणसुषुप्तित्वस्य ग्रहीतुमशक्यत्वादित्युक्तत्वात् । व्याप्तिलिङ्गादिप्रतिसन्धानं विनापि वर्णितपरामर्शदर्शनाच्च । अत एव पूर्वदिने स्वप्ने चानुभूतजन्यसुखविषयो भवत्विति प्रत्युक्तम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

'सुखमहमस्वाप्सम्, न किञ्चिदवेदिषम्' इति स्वापकालीनत्वनिखिलविषयाज्ञानकालीनत्वयोरपि परामृश्यमानत्वात् तच्च सुखजन्यं न भवति, तदा तत्कारणाभावात् । अजन्ये चात्मधर्मे सुखे प्रमाणाभावादात्मैव तत्सुखम् । कथं तर्हि निर्दुःखमहमस्वाप्समिति परामर्श इति चेत् नायं परामर्शः । तद्धेत्वनुभवाभावादित्युक्तम् । किं तु सुप्तावहं निर्दुःखमासं परामर्शजनकसंस्कारकारणानन्दाभिव्यक्तिरूपत्वात् । परामृश्यमानसुखकालीनजाग्रत्कालीनोऽहमित्येवानुभूयत इति । स चात्मा स्वप्रकाशः । "आत्मैवास्य ज्योतिः । अत्रायं पुरुषः स्वयं ज्योतिः" इति श्रुतेः । एवकारेण स्वयमित्यनेन चात्मव्यवहारानुकूलज्योतिषः प्रकाशस्यान्यात्मत्वाद्व्यावर्तनात् ।

सुषुप्त्यवस्था दुःखरहिता सुषुप्तित्वाद्व्यतिरेकेण जाग्रद्वदित्यनुमानं दूषयति—एतेनेति । अनुपलब्धिबाधितं चेदमनुमानमित्याह-ध्याप्नोतीति । नन्वस्य परामर्शस्य सुखविषयत्वेऽपि न स्वापकालीनसुखसिद्धिः । तदितरकालीनसुखविषयत्वादस्येत्यत आह-अत एवेति । अतःशब्दार्थमाह-सुखमहमिति । ननु स्वापकालीनं सुखं परामृश्यमानमात्मभिन्नमेवेत्याशङ्क्य तत्किं जन्यमुताजन्यम्? उभयथाप्यनुपपत्तिरित्याह-तच्चेति । स्वापे दुःखाभावानुभवाभावे कथं तत्परामर्श इति शङ्कते-कथं तर्हीति । यद्यप्यन्तःकरणतद्वृत्तिविक्षेपतदभावानां केवलसाक्षि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेद्यत्वेन दुःखाभावस्यापि स्वापेऽनुभवान्न तत्परामर्शानुपपत्तिः । न च तदा प्रतियोगिज्ञानाभावात्कथ तदभावानुभव इति वाच्यम् । नित्यानुभवस्य तदनपेक्षत्वात् । इतरथा धाराकाले तदितरज्ञानाभावानुभवायोगात् । तथापि तदनुभवाभावमङ्गीकृत्य परिहारान्तरमाह-नायमिति । असौ तर्हि को वानुभव इत्याशंक्यानुमितिरेवेत्याह—किं त्विति । सर्वविषयाभावरूपाज्ञानलक्षणसुप्तेः साक्षिसिद्धत्वान्न पक्षविशेषणासिद्धिः । सुखपरामर्शो हेतौ परामर्शशब्दार्थः । आनन्दाभिव्यक्तिरूपत्वादित्युक्ते दुःखकालीनात्मनि व्यभिचारः । तन्निवारणाय परामर्शेति । सुषुप्तावानन्दरूपात्मनो ऽनुभूयमानत्वे वेद्यतयाऽनात्मत्वप्रसङ्ग इत्याशङ्क्याह- स चेति । नन्वत्रात्मनो ज्योतिष्ट्वमेवोच्यते न तु ज्योतिरन्तराविषयत्वमित्यत आह—एवकारेणेति । ज्योतिष इत्यस्य व्याख्या प्रकाशस्येति ।

एवकारादेर्द्रष्ट्रन्तरव्यावर्तकत्वान्नात्मनः स्वव्यवहारानुकूलप्रकाशात्मत्वसिद्धिरिति शङ्कते-नन्विति ।

ननु घटादिज्ञानवदात्मज्ञानेऽपि विषयातिरिक्तकर्तृकारकत्वशङ्कां तदेव वार्यते न तु ज्योतिरन्तरमिति चेन्न । ज्योतिष एव विशेष्यत्वात् । मुख्ये संभवत्युपचारस्यान्याय्यत्वाच्च । लाघवेन चैतन्यमात्रस्यैव लक्ष्यत्वाच्च ।

(नवीनमतम्) अत्राह-नवीनः । अत्र नात्मस्वप्रकाशत्वमुच्यते । आदित्यादिज्ञानसाधनानामभावे किं ज्ञानसाधनं जीवस्येतिपृष्टे आत्मैवेत्युत्तरम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आत्मा च परमात्मैव। स्वप्नेन शरीरमभिप्रहत्या-सुप्तः सुप्तानभिचाकशीतीति तल्लिङ्गात्। द्युभ्वाद्यधिकरणन्यायेनात्मशब्दस्य परमात्मनि मुख्यत्वाच्च। अस्यायं पुरुषः स्वयं ज्योतिरित्युपसंह रोऽप्यस्येत्यनुषङ्गेणायमीश्वरोऽस्य जीवस्य स्वयमेव ज्योतिर्ज्ञानहेतुरित्यवं परः। ज्ञानसाधनप्रायपाठात्। आत्मैवास्य ज्योतिरिति ज्योतिरात्मनोर्भेदनिर्देशाच्चेति। तन्न। तथा सति एवेति स्वयमिति च श्रुतिद्वयविरोधात्।

द्रष्टुः श्रवणे तस्यान्यत्वं व्यावर्त्येत। न च स श्रूयते। ज्योतिष एव विशेष्यतया श्रवणादित्याह-नेति। मुख्यवृत्त्याऽश्रवणेऽपि जघन्यवृत्त्या श्रूयत इत्यत आह-मुख्य इति। तेजोवाचिनो ज्योतिःशब्दस्य सिद्धान्तेऽपि ज्ञाने लक्षणैवेत्याशङ्क्य तत्कर्तृलक्षणातस्तन्मात्रलक्षणैव लघीयसीत्याह-लाघवेनेति। ज्योतिःपदस्य चैतन्यकर्तृपरत्वाभावेऽपि न तत्परत्वं प्रश्नप्रायपाठाभ्यां ज्ञानसाधनपरत्वस्यैव वक्तव्यत्वादित्यर्वाचीनमतमनुवदति- अत्राहेति। आदित्यादीति। अस्तमिते आदित्ये याज्ञवल्क्यः। चन्द्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि किं ज्योतिरेवायं पुरुष इति याज्ञवल्क्यं प्रति जनकेन पृष्टे इत्यर्थः। ज्ञानाश्रयस्य जीवस्य कथमादित्यादिवत् ज्ञानसाधनत्वमित्यत आह-आत्मा चेति। आत्मशब्देन कथमीश्वरपरिग्रह इत्यत आह-स्वप्नेनेति। असुप्त एव सुप्तानभिचाकशीति। सर्वज्ञः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पश्यतीत्यसुप्तत्वादिपरमात्मलिङ्गस्यैवोत्तरश्रवणादि-त्यर्थः । यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः तमेवैकं जानथात्मानमिति श्रुतावात्म-शब्दः परमात्मनि मुख्य इति "द्युभ्वाद्यायतनं स्वश-ब्दात्" अ० १ पा० ३ अधि० १ ब्र० सू० १ इत्यधि-करणे निर्णीतत्वात्, अत्रापि स एवात्मशब्दार्थः । तथा च ज्ञानसाधनमेव ज्योतिःपदार्थ इत्याह-द्युभ्वा-दीति । नन्वत्रायं पुरुषः स्वयं ज्योतिरित्युत्तरवाक्ये प्रत्यक्षसिद्धजीवस्य श्रवणात्तद्विरुद्धः परमात्मपरिग्रह इत्यत आह-अत्रायमिति । "आदित्येनैवायं ज्योति-षाऽऽस्ते, चन्द्रमसैवायं ज्योतिषास्ते" इत्यादिना ज्ञान-साधनेषु ज्योतिःशब्दश्रवणादात्मैवेत्यत्रापि स एव तदर्थ इत्याह-ज्ञानसाधनेति । इदं शब्दार्थस्यात्मनो ज्योतिः-शब्दार्थस्य ज्ञानस्य च श्रुत्या भेदनिर्देशान्न तयोरभेद इत्याह-आत्मैवेति । परमात्मा जीवज्ञानसाधनमित्यर्थ-परत्वकल्पनायामेवकारादिवैयर्थ्यप्रसङ्ग इति दूषयति-तन्नेति ॥

किमनयोरयोगव्यवच्छेदकत्वं उतान्ययोगव्यव-च्छेदकत्वम् ? । उभयथाऽप्यसंभव इत्याह-नह्येते इति ।

(एवस्वयंश्रुत्यो-रयोगान्ययोग-व्यवच्छेदकत्वा-सम्भवः ।)

न ह्येते श्रुती ईश्वरस्यायोगं व्यव-च्छिन्तः । निखिलजगन्निर्मातुस्तस्य जैवज्ञानेऽ-योगशङ्काभावात् । नाप्यन्ययोगं, स्वप्नेऽपि मनः-प्रभृतीनां विज्ञानसाधनानां भूयसां सत्त्वात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बाह्यार्थविशेष्यप्रमारूपस्वप्नज्ञानस्य मनःकरणत्वायोगात् । ईश्वरस्यैव करणत्वे ईश्वराख्यप्रमाणान्तरप्रसङ्गाच्च । मनःपदसाधारणसहकारितया बाह्यप्रमां जनयेत् तस्य प्रमाणान्तरत्वनियमात् । ईश्वरस्य साधारणत्वे वा तदतिरिक्तासाधारणकारणाभावात्स्वप्नप्रमाऽयोगात् । अस्त्वीश्वरस्यापि प्रमाणत्वमिति चेन्न । धर्मिग्राहकश्रुत्या सर्वोपादानकर्त्रात्मना स्थितस्य करणत्वायोगात् । ज्ञानसाधनप्रायपाठाभावाच्च ।

तथा हि—नित्यज्ञानस्य करणानपेक्षणादुपक्रमेऽपि व्यवहारनिमित्तप्रकाशविषय एव प्रश्नः । ज्योतिषास्ते पल्ययत इत्याद्युत्तरे तथैव दर्शनात् । न त्वमुकेन जानातीत्युत्तरमस्ति ॥

ननु मनसो बहिरस्वातन्त्र्यात्स्वप्ने कारणान्तरस्योपरमाद्बाह्यार्थविशेष्यकज्ञाने परमात्मैव कारणमित्यन्ययोगव्यवच्छेदेनार्थवत्त्वमित्यत आह-बाह्यार्थेति । तत्र हेतुमाह-मन इति । यन्मानानपेक्षप्रमां यदसाधारणकारणसहकारितया मनो जनयति । ततस्तन्मानान्तरमिति नियमादीश्वरस्यापि प्रत्यक्षाद्यनधीनस्वप्नप्रमायामसाधारणकारणत्वे ततः प्रमाणान्तरत्वं दुर्वारमित्यर्थः । बाह्यप्रमायामेव मनसः करणसहकारित्वं न त्वान्तरप्रमायामिति दर्शयितुं बाह्यप्रमामित्युक्तम् । तर्हीश्वरोऽसाधारणकारणमेव न भवतीत्याशङ्क्याह-ईश्वरस्येति । प्रमायोगादिति । न चेष्टापत्तिः । तस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नवीनमते प्रमात्वादिति भावः । ईश्वराख्यप्रमाणान्तरं नानिष्टमिति शङ्कते-अस्त्विति । स्वप्नसृष्टेः परमार्थत्वात्तत्र मानान्तरत्वाभावाच्चेति भावः । "तदैक्षत यतो वा इमानि भूतानि जायन्ते" इत्यादिश्रुत्या जगत्कर्तृत्वोपादानत्वरूपेण सिद्धस्य कर्तृपरतन्त्रकरणभावो विरुद्ध इत्यभिप्रेत्याह-न धर्मीति । यदुक्तं ज्ञानसाधनप्रायपाठादात्मनो ज्ञानसाधनत्वमेव ज्योतिःपदेनोच्यत इति तदप्यसिद्धमित्याह-ज्ञानसाधनेति । किं नित्यज्ञानसाधनत्वेनादित्यादिप्रायपाठ उत वृत्तिज्ञानसाधनत्वेन ? । नाद्य इत्याह-नित्येति । न द्वितीयः स्वप्ने वृत्तिज्ञानसाधनप्रायपाठ इत्याह-उपक्रमेऽपीति । पल्ययते—परितो गच्छतीत्यर्थः ।

नन्वादित्यादिज्योतिषः स्वतो व्यवहाराजनकत्वेन वृत्तिद्वारेणैव तद्वक्तव्यम् । तद्वदात्मनोऽपीत्यत आह-एवमिति ।

(आत्मशब्दस्य द्युभ्वाधिकरणेन परमात्ममात्रपरत्वाशङ्कानिरसनम् ।) एवं परंपरानिमित्तेषूक्तेषु साक्षाद्व्यवहारनिमित्तप्रश्नस्योत्तरमात्मैवास्य ज्योतिरिति । तथा चात्मैवात्मादिव्यवहारनिमित्तम्—प्रकाश इत्येवार्थः । न त्वस्य ज्ञानकरणमीश्वर इति । आत्मैवास्येति भेदनिर्देशोऽपि अहमर्थातिरिक्तात्मप्रकाश इति न विरुध्यते । अत एवोपसंहारेऽपि नानुषङ्गगौरवम् । अयमिति च प्रश्नेष्विव जीवपरामर्शोऽप्युपपद्यते । यच्चात्मशब्दस्य परमात्मन्येव मुख्यत्व-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मितिः तन्न । किं जीवे शक्तिग्रहनिमित्तप्रचुरप्रयोगाभावादात्मपदस्य न शक्तिः, किं वाऽऽत्मशब्दस्य सति योगे न रूढिः । योगश्च न परिच्छिन्ने जीव इति । अथवाऽऽत्मशब्दाज्जीवप्रत्ययस्य लक्षणयाप्युपपत्तौ न जीवे तच्छक्तिरिति । नाद्यः । श्रुतौ स्मृतौ लोके च जीवेऽप्यात्मशब्दस्य प्रचुरप्रयोगसत्त्वात् । नापि द्वितीयः । जीवस्याणुत्वनिरासेन स्वाभाविकमध्यमपरिमाणस्याप्ययोगाद्योगयुक्तत्वात्

साक्षाद्व्यवहारनिमित्तप्रकाशप्रश्नोत्तरमेवं सति भवतीत्याह-तथा चेति । यदुक्तमस्येति भेदनिर्देशाज्ज्योतिष्ट्वमात्मनोऽनुपपन्नमिति । तन्न । व्यवहर्तुरहमर्थस्यैवेदंशब्दार्थत्वात्तद्भिन्नाकरणात्मनो ज्योतिष्ट्वोपपत्तेरित्याह-आत्मैवेति । अत्रायं पुरुषः स्वयं ज्योतिरित्यस्याप्यस्येत्यनुषंगमंतरेणैवार्थवत्त्वान्न तदनुषंगः कार्य इत्याह-अत एवेति । किं ज्योतिरेवायं पुरुष इति प्रश्नेऽयमिति पदस्य जीवपरत्वादत्रायं पुरुष इत्यत्रापि जीव एवायं पदार्थ इत्याह-अयमिति चेति । यच्चोक्तं द्युभ्वाद्यधिकरणन्यायेनात्मशब्देन परमात्मैव कथ्यत इति, तदनूद्य दूषयति यच्चेति । जीव एवात्मपदस्य शक्तिरितिवक्तुं तत्र शक्त्यभावे बीजं विकल्पयति-किं जीव इति । सति योग इति । अतति व्याप्नोतीत्यात्मेति योगे सति न रूढिः कल्प्या, क्लृप्तयोगस्य कल्प्यरूढिबाधकत्वादित्यर्थः । "यः प्राणेन प्राणिति, स आत्मा सर्वान्तरः । आ-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्मानं रथिनं विद्धि, य आत्मनि तिष्ठन्नात्मानमन्तरोऽयमयमात्मा ब्रह्म" इत्यादिश्रुतौ,—

उद्धरेदात्मनाऽऽत्मानं नात्मानमवसादयेत् ।
यावद्बुद्धीन्द्रियप्राणैरात्मनः सन्निकर्षणम् ॥
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति" ।

इत्यादि स्मृतौ, ममाऽऽत्मा सुखी, तवात्मा दुःखीत्यादिवृद्धप्रयोगे च जीव एवात्मशब्दप्रयोगान्न प्रथम इत्याह-नाद्य इति । यौगिकत्वपक्षेऽपि जीवो मुख्योऽर्थः । तत्रापि योगसंभवादित्याह-नापीति ।

तृतीये आत्मशब्दस्य भेदिमते जीवे शक्तिरीश्वरे तु लक्षणैवेति युक्तम् । जीवे प्रथमगृहीतशक्तिग्रहस्य बाधकाभावादित्यभिप्रेत्याह- नापि तृतीय इति ।

आत्मशब्दस्य जीवे एव शक्तिःपरमात्मप्रतीतिर्लक्षणयेति समर्थनम् ।

नापि तृतीयः । प्राथमिकवृद्धप्रयोगानुरोधेन जीव एव तच्छक्तिः । परमात्मनि त्वाकाशादिशब्दवल्लक्षणैवेति वैपरीत्यस्यैवोचितत्वात् ।

अथ मुख्यार्थसंबधितया ज्ञायमाने लक्षणा । न च परमात्मा शब्दादृते ज्ञातुं शक्यते इति नियोग इव लिङादेरात्मादिपदस्य तत्रैव शक्तिर्न जीवे इति चेत् । किं मानान्तरेण वाच्यार्थसम्बन्धितया ज्ञायमाने लक्षणा, किं वा यद्व वस्तुतो वाच्यार्थसम्बन्धि मानान्तरेण गृह्यते तत्र ? ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नाद्यः । लौकिकानामात्मादिपदाज्जीवादिप्रतीत्यभावप्रसङ्गात् । तेषां त्वदभिमतेश्वराज्ञानात् । न च तेषां जीवे आत्मपदशक्तिभ्रमात्ततस्तदवगम इति वाच्यम् । प्रयोगप्राचुर्येण तदवगतशक्तिज्ञानस्य बाधकाभावात् ।

ननु जीववाचकत्वेऽनेकव्यक्तिवाचकत्वगौरवम्, ईश्वरवाचकत्वे तु लाघवमिति बाधोस्तीति चेत् तर्हि जीवत्वमेवार्थोऽस्तु । प्रथमावगतप्रयोगप्राचुर्यात् । ईश्वरे च सर्वज्ञादिशब्दोपस्थिते तत्सन्निधिपाठाल्लक्षणया तदवगमः । नियन्तृत्वादिविषयाद्वाक्याज्जीवसंबन्धित्वेन परस्यावगतत्वात् । लिङादिशब्दस्य प्रथमावगतधात्वर्थव्युत्पत्तौ तु न किञ्चिद् बाधकम् । गौरवस्य तुल्यत्वादिति न तस्य तत्र शक्तिज्ञानम् । तदभावे च न लौकिकलिङादिश्राविणां ततः क्रियावगमः संभवति । लक्षणाप्रकारस्य तत्रासम्भवात् ॥

मुख्यार्थसंबन्धितया ज्ञायमानत्वस्य लक्षणाबीजस्य शास्त्रैकगम्ये परमात्मन्यभावान्न तत्र लक्षणा, किं तु शक्तिरेव, गुरुमतेऽपूर्वनियोगे लिङादिपदस्येवेति शङ्कते-अथेति । वाच्यार्थसंबन्धित्वस्य ज्ञानत्वमपि लक्षणाबीजमुत तत्संज्ञामात्रमिति विमृशति-किमिति । आद्ये तव मते प्राकृतानामात्मलिङादिपदैर्जीवक्रियाकार्याद्यवगमो न स्यात् । वाच्येश्वरादिसंबन्धित्वेन

जीवादेरज्ञानादित्याह-नाद्य इति । ननु लौकिकानां न लक्षणया जीवावगमः, किं तु शक्तिभ्रमादित्याशङ्क्य शक्तिग्रहस्य बाधकाभावान्न भ्रमत्वमित्याह- न च तेषामिति । बाधकाभावोऽसिद्ध इति शङ्कते-नन्विति । जीवानामनेकत्वेऽपि तदनुगतात्मत्वस्यैव प्रथमावगतस्य वाच्यत्वसम्भवान्न गौरवमिति भेदवादिनं शिक्षयति तर्हीति । ईश्वरस्यापि पूर्वमनुपस्थितस्य कथं लक्षणयाऽवगम इत्यत आह- ईश्वरे चेति । वाच्यार्थसंबन्धित्वेनावगते एव लक्षणेत्यभिनिविशमानं प्रत्याह-नियन्तृत्वादीति । नियोगदृष्टान्तोऽप्यसम्प्रतिपन्न इत्याह-लिङादीति ।-बहूनां धात्वर्थलक्षणाकार्याणां लिङादिपदवाच्यत्वे गौरवमित्याशङ्क्य नियोगस्यापि प्रतिविषयं भिन्नत्वात्तद्वाच्यत्वेऽपि गौरवं तुल्यमित्याह- गौरवस्येति । एवं तर्हि क्रियायामेव शक्तिरित्यत्र किं नियामकमित्यत्राह- तदभाव इति । लक्षणयैव ततः क्रियावगम इत्याशङ्क्याह-लक्षणेति । वाच्यार्थसंबन्धित्वेन मानान्तरेणाधिगतलक्ष्यलक्षणाहेत्वभावादित्यर्थः । न च शक्तिभ्रमादेव क्रियाकार्यावगम इति वाच्यम् । प्राथमिकशक्तिग्रहस्य बाधकाभावेन भ्रमत्वायोगादित्यादिकमत्रापि द्रष्टव्यमिति भावः ।

वस्तुतो वाच्यार्थसंबन्धे सति उपस्थिते लक्षणेति पक्षे ईश्वरे न लक्षणाविरोध इत्याह-नापि द्वितीय इति ।

आत्मशब्दस्योभयत्रापि जीवात्मनोर्मुख्यत्वम् । नापि द्वितीयः । ब्रह्मणि वस्तुतो जीवसंबन्धस्य वाक्यान्तरस्य च सत्त्वात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वज्ञादिरूपं ब्रह्मानवगच्छतामात्मादिपदैः पर-
मात्मबुद्ध्यभावात् । नियोगे च तर्कोपस्थिते
लिङ्गादिनाऽनवगात् तर्को न मानमितिचेन्न ।
यथार्थोपस्थितिमात्रस्यैव लक्षणायामपेक्षित-
त्वात् । तर्कस्यापि नियोगगोचरस्य यथार्थत्वात् ।
ततो भेदिनां मते आत्मत्वप्रवृत्तिनिमित्तकमात्म-
त्वनिष्ठं वाऽऽत्मपदमुभयत्रापि मुख्यम् । सिद्धा-
न्ते त्वेकव्यक्तिजात्यभावाज्जीवेश्वरस्वरूपभूतम-
परिमितत्वविशिष्टं चैतन्यमात्मपदार्थः । लोके-
ऽहमनुभवे प्रकाशमानचैतन्ये "एष ते आत्मा स-
र्वान्तरः । एष ते आत्माऽन्तर्याम्यमृतः । आत्मैवा-
स्य ज्योतिः । अयमात्मा ब्रह्म सर्वानुभूतात्मन आ-
काश" इत्यादौ च सर्वान्तरचैतन्ये जगत्कारणे चा-
त्मशब्दप्रयोगात् । अहमनुभवे प्रकाशमानचैतन्य-
स्याहङ्कारेन्द्रियशरीराद्यधिष्ठानतया सर्वान्तरत्वा-
त् । ईश्वरस्यापि तदभेदेनैव सर्वान्तरत्वम् । अन्यथा
जीवापेक्षया तस्य कथमप्यान्तरत्वानुनपत्तेः ॥

वाक्यान्तरस्येति । सर्वज्ञादिपदयुक्तवाक्यान्तर-
स्येत्यर्थः । नन्वेवं सति वाक्यान्तराश्रुतावात्मपदादी-
श्वरो न प्रतीयेतेत्याशङ्क्येष्टापत्तिरित्याह-सर्वज्ञादी-
ति । नियोगे लिङ्गादिपदव्यतिरिक्ततदुपस्थापकाभावा-
त्कथं लक्षणेत्याशङ्क्याह-नियोगे चेति । यदि क्रियाति-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रिक्तं कार्यं न स्यात्तर्हि स्वर्गकामिकृतिसाध्यं न स्यात् । काम्यमानसाधनस्यैव कामिकृतिसाध्यत्वादित्यादि विमर्शस्तर्कशब्दार्थः । मानेनैवोपस्थितिर्लक्षणाहेतुर्नोपस्थितिमात्रमिति शङ्कते-तर्क इति । विशेषणवैयर्थ्येन परिहरति-न यथार्थेति । एवमात्मपदस्य जीवलक्षकत्वेऽभिमते वैपरीत्यमापाद्य तन्मते वस्तुवृत्तमाह-तत इति । आत्मत्वनिष्ठमिति । जीवपदार्थवादेनोक्तमुभयत्रेति । जीवेश्वरयोरित्यर्थः । सिद्धान्ते तु योगवृत्त्यैव जीवेश्वरस्वरूपभूतचैतन्ये प्रवृत्तिः संभवति । योगे रूढेरकल्प्यत्वात् । योगश्चात्रापरिच्छिन्नत्वम् । तथा चोक्तम्—

"यच्चाप्नोति यदादत्ते यच्चातिविषयादिह ।
यच्चास्य संततो भावस्तस्मादात्मेति गीयते" इति ।

एतदभिप्रेत्याह-सिद्धान्ते त्विति । नन्वेवमाकाशादेरप्यपरिच्छिन्नस्यात्मपदात्प्रतीतिः स्यादित्याशङ्क्य पङ्कजपदेन तामरसवल्लौकिकवैदिकप्रयोगप्राचुर्यादुक्तचैतन्यस्यैव प्रतीतिरित्यभिप्रेत्यात्रैव लौकिकवैदिकप्रयोगप्राचुर्यं दर्शयति-लोके इति । अपरिच्छिन्नचैतन्यस्य कथं सर्वान्तरत्वमित्याशङ्क्य सर्पं प्रति रज्जोरिवेत्याह-अहमनुभवइति । विपदाद्यधिष्ठानेश्वरस्य कथमहंकाराद्यपेक्षयाऽऽन्तरत्वमित्यत आह-ईश्वरस्येति। जीवेश्वराभेदे तदकार्यस्य तद्बाह्यतरत्वमित्याशङ्क्य त्वज्जीवेश्वरयोः परस्परापेक्षयान्तरत्वासंभवेनोभयोरपि सर्वान्तरत्वं न स्यादित्यभिप्रेत्याह-अन्ययेति ॥

फलितमाह-तथाचेति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(योगव्युत्पत्त्या आत्मनः सर्वव्यापकत्वम्) तथा चायमात्मशब्दो यौगिक एव क्लृप्तयोगे सति रूढेरकल्पनात् । योगश्च अतति व्याप्नोतीति व्यापकत्वम् । व्यापकत्वञ्च जीवेश्वरस्वरूपभूतं चैतन्यं, तदेव-रज्जुरिवसर्पं, सर्वं व्याप्नोतीति । यत्तु ब्रह्मलिङ्गमुदाहृतं, तदस्मन्मते न विरुद्ध्यते । जीवस्यैव स्वरूपत्वाद् ब्रह्मणः स्वेन भासा स्वेन ज्योतिषा प्रस्वपतीति प्रस्तुत्य "अत्रायं पुरुषः स्वयं ज्योतिः" इति वाक्ये स्वापो जीवलिङ्गं, तदनात्मनि ब्रह्मणि विरुध्यते । तस्य स्वापायोगात् । अनुमानमप्यहमिति व्यवहारः प्रकाशजन्यो व्यवहारत्वात्संमतवत् । आत्मव्यवहा- इति वा पक्षनिर्देशः व्यवहारस्यान्यविषयप्रकार शाजन्यत्वाद् व्यवहारजनकः प्रकाशसिध्यन् ला घावादात्मैवेति स्वप्रकाशत्वसिद्धिः । स्वाविषय धर्मातिरिक्तप्रकाशजन्य इति वा साध्यम् । अनुभूतिः स्वप्रकाशा अनुभूतित्वात् व्यतिरेकेण-घटवदित्याचार्याः ।

आकाशादेः सापेक्षमेव व्यापकत्वं, सर्वव्यापकत्वं तु सर्वाधिष्ठानचैतन्यस्यैवेत्याह-व्यापकत्वं चेति । न चैवं द्युभ्वाद्यधिकरणविरोधः । तत्रेश्वरव्यावृत्तप्रातीतिककर्त्रादिरूपेण द्युभ्वाद्यधिकरणत्वं जीवस्य निरस्तं नत्वशनायाद्यतीतवास्तवरूपेण । नापीश्वर एवात्मशब्दस्य मुख्योऽर्थ इति व्युत्पादितः । तस्य स्वापाद्यसङ्-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वात् । स्वशब्दादिति सिद्धवन्निर्देशाच्चेति द्रष्टव्यम् । जीववास्तवस्वरूपस्य ब्रह्माभिन्नत्वादसुप्तत्वादिलिङ्गं तन्नोपपद्यत इत्याह-यत्त्वित्यादिना । किं चात्र प्रत्यगभिन्ने ब्रह्मणि परिगृहीते जीवलिङ्गं स्वापः श्रूयमाणोऽनुपपन्नः स्यादित्याह-स्वेनेति । वासनात्मान्तःकरणवृत्तिरूपदृश्यप्रकाशेन चित्प्रकाशेन चेत्यर्थः । आत्मस्वप्रकाशत्वेऽनुमानमपि प्रमाणमित्याह-अनुमानमिति । वेद्यविषयप्रकाशादेवात्मनः स्वव्यवहार इति वदन्तं प्राभाकरं प्रत्याह-व्यवहारस्येति । तर्हि विषयः प्रकाशो जन्योऽस्तु तत्राह-लाघवादिति । आत्मातिरिक्तप्रकाशस्य तदानन्त्यस्य च कल्पने गौरवाल्लाघवानुगृहीतमनुमानमात्मनः स्वव्यवहारहेतुप्रकाशात्मत्वलक्षणस्वप्रकाशत्वमेव साधयति, स्वविषयत्वस्य चासंभवेन दूषितत्वादिति भावः । मुखत एव जन्यज्ञानं व्यावर्तयन् साध्यान्तरमाह-स्वविषयेति । स्वस्यात्मव्यवहारस्य यो विषयस्तस्य धर्मो जन्यज्ञानादि तत्त्वानधिकरणप्रकाशजन्य इत्यर्थः । परमते जन्यज्ञानेनार्थान्तरत्वनिवृत्तये स्वविषयधर्मातिरिक्तेत्युक्तम् । स्वशब्दः समभिव्याहृतपरः । तथा च न घटादिव्यवहारे साध्यवैकल्यम् । न चेश्वरज्ञानजन्यतयाऽर्थान्तरता । तस्यापि जीवाभिन्नतया स्वविषयत्वात् । अथवाऽऽत्मव्यवहारस्यापि पक्षत्वान्नोक्तार्थान्तरता । यद्वा स्वविषयधर्मनिष्ठगुणत्वावान्तरजात्यनधिकरणप्रकाशजन्य इति साध्यं विवक्षितम् । न च गुणव्यवहारे व्यभिचारः । द्रव्यव्यवहारस्यैव हेतुत्वात् । न चाप्रयोजकम् । आत्मातिरिक्तप्रकाशजन्यत्वे गौरवाद्, आत्मनि तत्संबन्धादेर्दुर्निरूपत्वाच्चेति द्रष्टव्यम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चित्सुखाचार्यानुमानमप्याह-अनुभूतिरिति ॥

साध्यादेर्दुर्निरूपत्वान्नेदमनुमानं साधिवत्यर्वाचीनः प्रलपतीत्याह-अत्रेति ॥

पूर्वोक्तानुमाने-नवीनाक्षेपः । अत्र नवीनः—किमिदं स्वप्रकाशत्वम् । न तावद्वृत्त्यव्याप्यत्वम् । आत्मनोऽपि वृत्तिव्याप्यत्वात् । अन्यथा श्रवणादिवैयर्थ्यप्रसङ्गात् । नापि फलाव्याप्यत्वम् । अतीतादौ नित्यातीन्द्रिये चातिव्याप्तेः । नाप्यवेद्यत्वे सत्यपरोक्षव्यवहारविषयत्वम् । सुषुप्तिप्रलयादावात्मव्यवहाराभावेनाव्याप्तेः । नाप्यवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वम् । मोक्षेऽव्याप्तेः । तदानीं योग्यतारूपधर्मस्याप्यभावात् । नाप्यवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वात्यन्ताभावानधिकरणत्वम् । मोक्षदशायां तस्याप्यभावात् । न हि तदा ब्रह्मण्यत्यन्ताभावानधिकरणत्वाख्यः कश्चिद्धर्मोऽस्ति । ब्रह्मणस्तथाभूतयोग्यत्वात्यन्ताभावाधिकरणत्वाच्च । अन्यथा ब्रह्मगततद्योग्यताया मिथ्यात्वन्न स्यात् । स्वात्यन्ताभावसमानाधिकरणस्यैव मिथ्यात्वात् । न च व्यावहारिको योग्यताऽत्यन्ताभावो ब्रह्मणि नेति वाच्यम् । ब्रह्मातिरिक्तस्य तस्य व्यावहारिकत्वात् । नापि ब्रह्मणोऽवेद्यत्वम् । तस्य वृत्तिवेद्यत्वात् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्य प्रलापमेवाह-किमिदमिति । किं वृत्त्यव्याप्यत्वं स्वप्रकाशत्वम्, उत फलाव्याप्यत्वम्, अथवा वेद्यत्वे सत्यपरोक्षव्यवहारविषयत्वम्, तद्योग्यत्वं वा, तद्योग्यत्वात्यन्ताभावानधिकरणत्वं वेति किंशब्दार्थः । आद्यं दूषयति । न तावदिति । केवलात्मनो न वृत्तिव्याप्यत्वमपीति मतमाशङ्क्याह-अन्यथेति । केवलस्यैव वेदान्ततात्पर्यगोचरत्वात् तद्विषयवृत्त्यभावे तच्छ्रवणादिवैयर्थ्यापातादित्यर्थः । द्वितीयं दूषयति नापीति । अभिव्यक्तचैतन्यं फलं तस्य तादात्म्येनावच्छेदकत्वम् । घटादेस्तद्व्याप्यत्वं, तदभावत्वं न स्वप्रकाशत्वम् । अतीतादेर्नित्यातीन्द्रियस्य वाऽभिव्यक्तचैतन्यतादात्म्याभावेऽप्यस्वप्रकाशत्वादित्यर्थः । तृतीयं दूषयति नाप्यवेद्यत्व इति । व्यवहाराभावेन तद्विषयत्वस्याप्यभावादिति शेषः । चतुर्थपञ्चमावप्यव्याप्त्या दूषयति-नाप्यवेद्यत्वे सतीत्यादिना । व्यवहारदशायामपि योग्यत्वात्यन्ताभावस्य ब्रह्मणि सत्त्वादसम्भवश्चेत्याह-ब्रह्मण इति ।

ननु तदा ब्रह्मणि तद्योग्यत्वमेव, न तदत्यन्ताभावइत्याशङ्क्य तस्य मिथ्यात्वनिर्वाहार्थं तदभावोऽपि वक्तव्य इत्याह-अन्यथेति । ननु तद्योग्यताप्रतियोगिकव्यावहारिकात्यन्ताभावानधिकरणत्वमेव तल्लक्षणम् । ब्रह्मणि च न तद्व्यावहारिकात्यन्ताभावः प्रतियोगिसमानसत्ताकाभावस्य तत्सामानाधिकरण्यविरोधात् । किं तु पारमार्थिक एव तदत्यन्ताभावो ब्रह्मणि । तथा च नासम्भव इति चेन्न । ब्रह्मव्यतिरिक्तस्य पारमार्थिकत्वेऽद्वैतहानेः सोऽपि व्यावहारिको वाच्यः । ततश्च तत्समानसत्ताकयोरपि विरोधे ब्रह्मणोऽन्यत्रैव वाच्यः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तथा चासम्भव एवेत्यभिप्रेत्याह-न च व्यावहारिक इति । विशेष्यासम्भवमुक्त्वा विशेषणासम्भवमाह-नापीति । किमवेद्यत्वं वृत्त्यव्याप्यत्वं फलाव्याप्यत्वं वा? । नाद्य इत्याह-तस्येति ॥

न द्वितीय इत्याह-नापीति ॥

वृत्त्यव्याप्यत्वलक्षणं निरस्य फलाव्याप्यत्वं निरस्यति ।

नापि फलाव्याप्यत्वमवेद्यत्वम् । ब्रह्मणोऽपि चरमसाक्षात्कारवृत्तिप्रतिबिम्बितचैतन्यव्याप्यत्वात् । ननु वृत्तिबिम्बितचिदभिव्यक्तचैतन्याश्रयत्वं फलव्याप्यत्वं तच्च घटादावेव न ब्रह्मणीति चेन्न । घटादावपि वृत्तिविषयत्वव्यतिरेकेण तदभिव्यक्तचैतन्याश्रयत्वाभावात् । अपरोक्षव्यवहारश्च न तावदपरोक्षज्ञानजन्यो व्यवहारः । धर्मादावप्यलौकिकापरोक्षज्ञानजन्यव्यवहारस्य सत्त्वात् । अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्यसाक्षात्कारविवक्षायां स्वरूपज्ञानस्य नित्यत्वादसम्भवः । नाप्यपरोक्षोऽयमित्याकारो व्यवहारः । वस्तुनः अपरोक्षत्वम्-अपरोक्षज्ञानविषयत्वं चेद् घटादिवदात्मनोऽपि वेद्यत्वापत्तिः । अपरोक्षव्यवहारविषयत्वं चेद् वस्तुव्यवहारापरोक्षत्वयोरन्योन्यसापेक्षत्वादन्योन्याश्रयः, अभावे ऽतिव्याप्तिश्च । अस्ति हि गजाभावोऽपरोक्ष इति लोके व्यवहारः । अस्ति च फला-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्याप्यत्वम् ॥

फलस्वरूपं वदन् ब्रह्मणस्तद्व्याप्यत्वमेव नेति शङ्कते-नन्विति । घटादावनित्यज्ञानविषयत्वव्यतिरेकेणानित्यज्ञानाश्रयत्वाभावात्सदेव फलं तद्विषयत्वं च ब्रह्मणोऽपि तुल्यमित्याह-न घटादाविति । किं च लक्षणवाक्यगतापरोक्षव्यवहारपदेनापरोक्षज्ञानजन्यो व्यवहारो विवक्षितः, लौकिकापरोक्षज्ञानजन्यो वा, अपरोक्षोऽयमित्याकारो वा ?। प्रथममतिव्याप्त्या दूषयति-अपरोक्षेति । द्वितीयमनूद्य दूषयति-अनागतेति । अनागतगोचरो यः साक्षात्कारः तद्धेतुभूता या प्रत्यासत्तिः सामान्यलक्षणादिरूपा तदजन्यश्च यः साक्षात्कारः लौकिकप्रत्यक्षमिति यावत् । तज्जन्यव्यवहारं विवक्षायामित्यर्थः । ईश्वरज्ञानजन्यधर्मादिव्यवहारव्यावृत्तये जन्यपदम् । स्वरूपज्ञानस्य नित्यत्वादिति । तथा च लौकिकसाक्षात्कारजन्यव्यवहारविषयताभावादसम्भव इत्यर्थः । तृतीयमपवदति-नापीति । 'अपरोक्षोऽयम्'-इति व्यवह्रियमाणं विषयापरोक्ष्यं किमपरोक्षज्ञानविषयत्वमपरोक्षव्यवहारविषयत्वं वा ? । आद्यमनूद्य दूषयति-वस्तुन इति । द्वितीये वस्तुनोऽपरोक्षत्वे सिद्धे व्यवहारस्यापरोक्षत्वम् । व्यवहारापरोक्षत्वे च वस्त्वापरोक्ष्यमिति परस्पराश्रय इत्याह-अपरोक्षेति । नन्वपरोक्षोऽयमित्येवंरूपशब्दव्यवहारस्य स्वज्ञानजन्यस्य विषयापरोक्ष्यज्ञानं विनैव श्रोत्रग्राह्यत्वान्नोक्तदोष इत्याशङ्क्य दूषणान्तरमाह-अभाव इति । अनुपलब्धिरूपपरोक्षमानगम्यत्वान्न फलव्याप्यत्वमभावस्येत्याह- अस्ति चेति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विशेषणविशेष्ययोः परस्परव्याघातादप्यसम्भव इत्याह-यदि चेति ॥

परस्परव्याघातेनाऽसम्भवप्रतिपादनम् । यदि चाऽऽत्माऽवेद्यः न तर्ह्यपरोक्षव्यवहारविषयः स्यात् । फलव्याप्यस्यैवापरोक्षव्यवहारविषयत्वात् । यदि स्फुरणाविषयेऽपि स्फुरणे तद्विषयकापरोक्षवृत्तिस्तदविषयकस्फुरणमेव वा स्वभावविशेषाद्व्यवहारमुत्पादयेत्तर्ह्यवैरूप्याय घटादावपि तथैव स्यात् । अन्यथा प्रमेयत्वमपि स्ववृत्तिं विनैव स्वस्मिन्प्रमेयत्वव्यवहारं कुर्यादिति केवलान्वयि न स्यात् । किं च स्वप्रकाशत्वं न तावदात्मस्वरूपं साध्यम् । इष्टापत्तेः । न ह्यात्मनि कस्य चित्प्रद्वेषोऽस्ति । नापि तद्धर्मः । तस्यातात्त्विकत्वेनास्वयंप्रकाशतापत्त्या स्वप्रकाशत्वसाधकानुमानानां बाधितत्वात् । अप्रसिद्धविशेषणश्च पक्षः । न च वेद्यत्वं किञ्चिन्निष्ठात्यन्ताभावप्रतियोगि धर्मत्वात् शौक्ल्यवदिति सामान्यतस्तत्सिद्धिरिति वाच्यम् । वेद्यत्वाभावमात्रसिद्धावपि विशिष्टसाध्यस्याप्रसिद्धत्वात् । मम मते घटादेः फलाव्याप्यत्वे तत्र साध्यसत्त्वाच्च धर्मत्वं च केवलान्वयि धर्मे व्यभिचारि । किं चात्यन्ताभावप्रतियोगित्वं यदि कुतश्चिन्न व्यावर्तेत । तर्हि तत्रैव व्यभिचारः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्यावर्त्तते चेत् । यतो व्यावर्तते तत्रैव व्यभिचारः । अनुभूतित्वं च न जातिः । जातेर्धर्मिसत्तासमानसत्ताकभेदवद्व्यक्तिसापेक्षत्वात् । नोपाधिः । तदनिरूपणात् ।

फलाव्याप्यत्वलक्षणावेद्यत्वेऽप्यपरोक्षवृत्तिमहिम्नैवापरोक्षव्यवहारोऽस्तु । यदि सुखदुःखादावपरोक्षवृत्तेर्व्यभिचारान्न तद्धेतुत्वं तर्हि स्वरूपस्फुरणं स्वाविषयमेव स्वव्यवहारहेतुरित्यभ्युपगमे घटादावपि तथात्वापातेनातिव्याप्तिः स्यादित्यभिप्रेत्याह-यदीति । स्फुरणस्य स्वव्यतिरिक्ते तद्विषयतयैव व्यवहारहेतुत्वम् । स्वस्मिंस्तु स्वरूपेणैवेत्यभ्युपगमेऽतिप्रसङ्गमाह-अन्यथेति । एवं साध्यनिरुक्तं दूषयित्वा तत्स्वरूपमपि किं पक्षीभूतात्ममात्रं तद्धर्मो वेति विकल्पमभ्युपेत्य प्रथमं दूषयति । किं चेति । न द्वितीय इत्याह-नापीति । स किं तात्त्विको धर्मः, उतातात्त्विकः ? । नाद्यः द्वैतापत्तेः । न द्वितीयः । अधिष्ठानस्यारोपितविपरीतरूपत्वनियमेनास्वप्रकाशत्वापातादित्याह-तस्येति । अवेद्यत्वस्याप्रसिद्धत्वेन तद्घटितसाध्यस्याप्यसिद्धत्वात् । संदेहायोगान्न पक्षताऽपीत्याह-अप्रसिद्धेति । सामान्यतो दृष्टानुमानेन पक्षतदतिरिक्तौदासीन्येनावेद्यत्वसिद्धौ पक्षे संदेहनिवृत्तये केवलव्यतिरेकिप्रवृत्तिरित्याशङ्क्य तथापि विशिष्टसाध्यमप्रसिद्धमेवेति दूषयति-न चेति । असाधारण्यमप्याह-प्रमेति । सामान्यानुमानं च व्यभिचारीत्याह-धर्मत्वं चेति । केवलान्वयि धर्मे विप्रतिपन्नं प्रत्याह-किं चेति । अत्यन्ताभावप्रतियोगित्वं यदि सर्वत्र वर्त्तते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तर्हि तदेव केवलान्वयीति तत्र व्यभिचारः । यदि न वर्तते तदेवात्यन्ताभावाप्रतियोगितया केवलान्वयीति-तत्र व्यभिचार इत्यर्थः । हेतुकृतमनुभूतित्वमपि जातिरूपाधिर्वा ?, नोभयथाऽपीत्याह-अनुभूतित्वं चेत्यादिना । धर्मिसत्तेति सिद्धान्तेऽनुभूतौ तादृशभेदाभावादिति भावः ॥

किं च घटादौ यादृशवेद्यत्वं स्वप्रकाशत्वविरोधि तादृशवेद्यत्वस्याऽऽत्मनि सत्त्वेऽपि तदत्यन्ताभावघटित-साध्यस्याप्युपपत्तेरस्वप्रकाशत्वेनार्थान्तरतेत्याह-अपि चेति ।

स्वप्रकाशत्वविरुद्धवेद्यत्ववत्तयाऽर्थान्तरत्वम् ।

अपि च घटादाविव स्वप्रकाशत्वविरोधिनो व्यावहारिकवेद्यत्वस्य सत्त्वेऽपि तदत्यन्ताभावसंभवेनार्थान्तरमिति । अत्र ब्रूमः । संविदविषयत्वं स्वप्रकाशत्वम् । न चाव्याप्त्यतिव्याप्ती । चिद्रूपस्यात्मनः स्वाविषयत्वात्-स्वातिरिक्तसंविदन्तराभावाच्च । संविद्रूपात्मातिरिक्तस्य सर्वस्य संविद्विषयत्वात् । अतीतादेरतीन्द्रियस्यापि वृत्तिगतसंविदवच्छेदकतया तद्विषयत्वात् । अन्यथा जडवृत्तिमात्रादनात्मव्यवहारायोगात् । न चैवमपि संविदगोचरस्तज्जडमेवास्तीति वाच्यम् । स्वतः परतो वाऽसिद्धस्य शङ्कितुमप्यशक्यत्वात् । संविच्च वृत्त्यतिरिक्ता निरूपितैवेति नासंभवोऽपि । अथवाऽत्रे-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्यत्वे सत्यपरोक्षव्यवहारयोग्यताऽत्यन्ताभावान-धिकरणत्वं स्वप्रकाशत्वमित्याचार्यीयमपि लक्षणमस्तु । तत्र च योग्यतान्तं लक्षणम् । अत्यन्ताभावानधिकरणत्वांशस्तु ब्रह्मणि लक्षणस्यासंभवं व्यावर्त्तयति ।

संविद्विषयत्वाभावः, संविद्विषयान्यत्वं वा संविद-विषयत्वं स्वप्रकाशत्वं, तच्चाऽऽत्मस्वरूपमेवारोपिताभावस्याधिष्ठानमात्रत्वादित्यभिप्रेत्याह-अत्रेति अस्मिन् लक्षणे न पूर्वोक्तदोषावसर इत्याह-न चेति । आत्मधर्मज्ञानविषयत्वादव्याप्तिरित्यत आह संविदन्तरेति । अतिव्याप्त्यभावे हेतुमाह-संविद्रूपेति । अतीतादेः फलाव्याप्यत्वेऽपि संविद्विषयत्वान्न तत्रातिव्याप्तिरित्याह-अतीतादेरिति । अतीतादेर्वृत्तिविषयत्वमेव न चित्प्रकाशविषयत्वमित्यभ्युपगमे दोषमाह-अन्यथेति । हेतुगर्भविशेषणं दुःखादौ व्यभिचारादपि न वृत्तिमात्रस्य व्यवहारहेतुतेति द्रष्टव्यम् । जडस्यापि संविदविषयत्वसंभवात्तत्वेनार्थान्तरतेत्याशङ्क्याह-न चैवमिति । अयमभिसंधिः-संविदविषयत्वे सति प्रकाशमानत्वं स्वप्रकाशत्वम् । प्रकाशमानत्वं च स्वसत्तायां स्वसत्ताप्रकारकसंशयाद्यगोचरत्वम् तस्य घटादिवत्संविद्विषयत्वम् । प्रयुक्तत्वनिषेधे स्वरूपप्रयुक्तत्वमेवेति पर्यवस्यति । तथा च न जडत्वेनार्थान्तरतेति । ननु वृत्त्यतिरिक्ता संविदेव नास्ति वृत्तिविषयत्वञ्चात्मनोऽपीत्यसंभव इत्यत आह-संविच्चेति । चित्सुखाचार्यलक्षणमप्यनवद्यमित्याह-अथवेति । अत्रावेद्यत्वं फलाव्याप्यत्वम् । तच्च घटादावति-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्याप्तिवारणाय । इतरञ्च धर्मादौ । अत्र सर्वलक्षणमिति न भ्रमितव्यमित्याह-तत्र चेति । लक्षणस्यासम्भवमिति । लक्षणैकदेशयोग्यत्वासंभवमित्यर्थः । अत्यन्ताभावानधिकरणत्वस्य तत्प्रतियोग्यधिकरणत्वनियमादिति भावः । न च योग्यताया मिथ्यात्वात्तदत्यन्ताभावाधिकरणमेवाऽऽत्मेति वाच्यम् । प्रतियोगिसमानसत्ताकात्यन्ताभावस्य तत्सादेश्यविरोधादिति द्रष्टव्यम् ॥

अत्रोक्ताव्याप्तिमपवदति-न चैवमिति ॥

अव्याप्तिनिरसनम् । न चैवं मुक्तिकालीन आत्मनि लक्षणाव्याप्तिः । नहीदं स्वप्रकाशस्य स्वरूपलक्षणं, किन्तु जगत्कारणत्ववत्तटस्थलक्षणम् । स्वरूपलक्षणं तु प्रागुक्तमेव । कदाचिद्वेद्यत्वविरुद्धधर्माधिकरणस्यैवात्मनो मुक्तावपि सत्त्वात् । एतेन "स्वप्रकाशत्वं वास्तवमवास्तवं वा ?। आद्ये ऽद्वैतक्षतिः। द्वितीये ब्रह्मणो वस्तुतोऽस्वप्रकाशत्वप्रसङ्गः कल्पितविरुद्धस्वभावत्वादधिष्ठानस्य" इति निरस्तम् । एकस्य त्वदभिमतात्मविलक्षणस्वरूपत्वात्, अन्यस्य कल्पितत्वात् ।

किं च किमस्वप्रकाशत्वम् । स्वप्रकाशत्वधर्मराहित्यं, वेद्यत्वं वा ?। आद्ये इष्टापत्तिः । ब्रह्मणो निर्धर्मकत्वात् । द्वितीयेऽपि वास्तवं न संभवति । ज्ञानात्मनो ब्रह्मणः स्वपरविषयत्वानिराकरणात् । अवास्तवं तु वेद्यत्वं स्वप्रकाशत्वस-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मानसत्ताकं तद्विरोधात्तत्र न संभवति । तदसमानसत्ताकमवास्तवं तु वेद्यत्वं काममिष्यतां, न नः क्षतिः । अत एव व्यावहारिकवेद्यत्वेऽपि पारमार्थिकवेद्यत्वेनार्थान्तरतेति निरस्तम् । व्यावहारिकवेद्यत्वस्य व्यावहारिकघटादिस्वप्रकाशत्वविरुद्धत्वेऽपि पारमार्थिकब्रह्मस्वप्रकाशत्वविरोधित्वं कथमिति च परिभावनीयम् ॥

स्वरूपलक्षणस्यैव कदाचिदभावो दोषः । न तटस्थलक्षणस्य । इदं च ब्रह्मणो जगत्कारणत्ववत्तटस्थलक्षणमेवेत्याह-न हीदमिति । तटस्थलक्षणस्य कदाचित्त्वमात्रेण त्रिकालमितरेभ्यः स्वाश्रयव्यावर्त्तकत्वात्कदाचित्कत्वमेव प्रयोजकमित्यभिप्रेत्याह-कदाचिदिति । लक्षणद्वैविध्यकथनादेव तस्य वास्तवत्वादिविकल्पप्रयुक्तदोषो नेत्याह-एतेनेति । स्वरूपलक्षणस्य संविद्विषयात्मसाक्षित्वान्नाद्वैतक्षतिः । न चेष्टापत्तिरित्यभिप्रेत्याह--एकस्येति । तटस्थलक्षणं तु मिथ्या, तदधिष्ठानं तु सत्यतया तद्विपरीतमेवेत्याह-अन्यस्येति ।

स्वप्रकाशत्वस्य मिथ्यात्वे यदापाद्यमानमस्वप्रकाशत्वं तन्निर्वक्तव्यमित्याह-किञ्चेति । अधिष्ठानस्य वस्तुत आरोप्यरहितत्वादाद्यमिष्टमेवेत्याह-आद्य इति । द्वितीये तद्वेद्यत्वं वास्तवमवास्तवं वा ? नाद्य इत्याह-द्वितीये इति । द्वितीये ऽपि किं तद्व्यावहारिकं प्रातीतिकं वा ? । नाद्यः । समानसत्ताकयोर्भावाभावयोर्विरोधादित्याह-अवास्तवमिति । द्वितीयमिष्टमेवेत्याह—तदसमानेति । यदुक्तं घटादौ व्यावहारिकवेद्यत्वस्यैव स्व-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रकाशत्वविरोधित्वात्तत्संभवेनाप्यर्थान्तरतेति, तत्राह-अत एवेति । समानसत्ताकयोर्भावाभावयोर्विरोधादेवेत्यर्थः । तदङ्गीकृत्यापि स्वरूपलक्षणालक्षितस्वप्रकाशत्वस्य न हानिरित्याह-व्यावहारिकेति । कथमिति । न कथमपीत्यर्थः ॥

यच्चोक्तं ब्रह्मणो वृत्तिवेद्यत्वान्नावेद्यत्वमिति तत्राह-नापीति ।

ब्रह्मणोवेद्यत्वप्रतिपादनम् । नापि ब्रह्मण्यवेद्यत्वस्यानिरूपणं फलाव्याप्यत्वस्यैव तस्य सर्वप्रमाणफलात्मनि तस्मिन्सत्त्वात्, फलस्य चाभिव्यक्तविषयावच्छिन्नचैतन्यात्मनस्तस्मिन्नभावात्, घटः स्फुरति पटः स्फुरतीतिफलस्य विषयावच्छेदव्यवहारात् । चैतन्यात्मनो ब्रह्मणः स्वस्वरूपचैतन्यानवच्छेदकत्वात् । चैतन्यान्तरस्य चाभावात् । घटादेश्च चैतन्यावच्छेदकत्वं निरूपितमिति न तदभावः । अन्तःकरणादि चाभिव्यक्तचैतन्यावच्छेदकम् । न चाविद्यानिवृत्तिरेव फलम् । तस्या एव ज्ञानजन्यत्वात् । तदाश्रयश्च ब्रह्मैवेति तदेव फलव्याप्यं न घटादिरितिवाच्यम् । अविद्यानिवृत्तेश्चैतन्यमात्रत्वेनाश्रयाश्रयिभावाभावात् । अस्तु वा तदपि न फलव्याप्यत्वं विवक्षितम्, किन्त्वभिव्यक्तचैतन्यावच्छेदकत्वमेव । न च ब्रह्मणः फलव्याप्यत्वाभावेऽपरोक्षत्वं न स्यादिति वाच्यम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रमात्रव्यवधानेन प्रकाशमानत्वमात्रेणापरोक्षत्वोपपत्तेः ।

प्रमाणफलात्मनीति । तदुक्तमत्र भवद्भिः सुरेश्वराचार्यैः—

"परागर्थप्रमेयेषु या फलत्वेन संमता ।
संवित् सैवेह मे येऽर्थो वेदान्तोक्तिप्रमाणतः" इति ।

फलस्वरूपं प्रदर्शयंस्तदव्याप्यत्वमाह-फलस्य चेति । प्रमातृधर्मवृत्त्यतिरिक्तफलमेव नास्तीत्याशङ्क्याह-घट इति । आत्मा फलव्याप्यः अपरोक्षत्वात् संमतवदित्याशङ्क्य किं स्वरूपचैतन्यव्याप्यत्वं साध्यते उत स्वातिरिक्तचैतन्यव्याप्यत्वम् ? । नाद्यः । भिन्नयोरेवावच्छेद्यावच्छेदकभावादित्यभिप्रेत्याह-चैतन्येति । द्वितीयं दूषयति-चैतन्यान्तरस्येति । घटादेरपि वृत्तिविषयत्वव्यतिरेकेण न फलव्याप्यत्वम् । तथा च तत्रातिव्याप्तिरित्याशङ्क्याह-घटादेरिति । अनावृतप्रमातृचैतन्यतादात्म्यं विना तदापरोक्ष्यानुपपत्तिरित्यादिकं निरूपितमित्यर्थः । अज्ञानान्तःकरणतद्धर्मेष्वतिव्याप्तिमाशङ्क्याह-अन्तःकरणेति । ननु क्रियासाध्यस्यैव फलत्वात्, ज्ञानक्रियासाध्याविद्यानिवृत्तिरेव फलम् । तथा च ब्रह्मैव फलव्याप्यमिति न वाच्यमित्याह-न चेति । हेतुमाह-अविद्येति । आरोपिताभावस्याधिष्ठानमात्रत्वप्रसाधनादिति भावः । अविद्यानिवृत्तिरधिष्ठानाद्भिन्नेतिमतेनाह-अस्तु चेति । अभिव्यक्तचैतन्यावच्छेदकत्वलक्षणफलव्याप्यत्वस्यैव घटाद्यपरोक्षत्वप्रयोजकत्वाद् ब्रह्मण आपरोक्ष्यं तदभावे न स्यादित्याशङ्क्य हेत्वसिद्ध्या दूषयति-न चेति । अनावृतचैतन्याव्यवधानमेवा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परोक्षत्वमप्रयोजकम् । तच्च घटादौ तेनाध्यासिकतादा-त्म्यप्रयुक्तम् । ब्रह्मणस्तु स्वत एवेति भावः ।

सामान्यादिप्रत्यासत्तिमङ्गीकृत्य लक्षणगतापरोक्षव्यवहारं निर्वक्ति-व्यवहारस्येति ।

व्यवहारस्यापरोक्षत्वमनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यसहकृतप्रमाणजन्यप्रत्यक्षजन्यत्वं घटादिव्यवहारस्यैवंरूपत्वात्, 'अहं ब्रह्मास्मि' इतिव्यवहारस्यापि वाक्यजन्यप्रत्यक्षज्ञानजन्यत्वात्, उक्तप्रत्यासत्तिजज्ञानाजन्यज्ञानाकरणकवृत्तिजन्यत्वं वा व्यवहारापरोक्षत्वम् । अहमिति व्यवहारश्चैवंरूपः । धर्मादिव्यवहारश्च नैवम् । न चैवमात्मनो ज्ञानविषयत्वापत्तिः । वृत्तिविषयत्वस्येष्टत्वात् । पूर्णात्मनः स्वातिरिक्तचैतन्याभावेन तद्विषयत्वस्यैवास्माभिरनङ्गीकारात् । व्यवहारमात्रे प्रकाशमात्रं कारणं, न तु तद्विषयप्रकाशत्वेन, गौरवात् । आत्मव्यवहारे आत्माभिन्नप्रकाशस्याऽनात्मत्वव्यवहारे च तद्विषयप्रकाशत्वेन कारणत्वम् । न च घटादेरपि प्रकाशविषयत्वं मास्त्विति वाच्यम् । प्रकाशमात्रस्य तद्व्यवहारकारणत्वेऽतिप्रसङ्गात् ॥

अत्रानागतगोचरसाक्षात्कारजनकप्रत्यासत्तिपदेन सामान्यादिप्रत्यासत्तिर्विवक्षिता । तथा च वर्तमानत्वप्रत्यासत्त्या इदं वर्तमानमितिज्ञानविषयधर्मादिव्यव-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हारे नातिव्याप्तिः । वस्तुतस्तु सामान्यादिप्रत्यासत्ते-र्निरसिष्यमाणत्वादपरोक्षज्ञानजन्यत्वं व्यवहारापरोक्षत्वं, अपरोक्षार्थविषयत्वं वा । अर्थापरोक्षं तु संविदभेदादिति नान्योन्याश्रयादिरिति भावः ।

नन्वात्मव्यवहारस्य नित्यसाक्षिजन्यतया जन्यप्रत्यक्षजन्यत्वाभावादसंभव इति तत्राह-अहं ब्रह्मास्मीति । नित्यसाक्षिजन्यात्मव्यवहारसंग्रहाय लक्षणान्तरमाह-उक्तेति । अनुमित्यादिजन्यव्यवहारवारणाय ज्ञानाकरणकेत्यादि । अत्राव्याप्त्यतिव्याप्तिशङ्कैव नेत्याह-अहमितीति । आद्यलक्षणे प्रत्यक्षज्ञानविषयत्वादात्मनो दृश्यत्वापत्तिरित्याशङ्क्य न वृत्तिविषयत्वं दृश्यत्वं, किं तु चिद्विषयत्वमेव । तच्च न चिद्रूपात्मन इत्याह-न चैवमिति ।

नन्वात्मनश्चित्प्रकाशविषयत्वमपि वाच्यम् । इतरथा तद्व्यवहारायोगादित्याशङ्क्य पूर्वोक्तन्यायं स्मारयति-व्यवहारेति । तथाप्यात्मव्यवहाररूपकार्यविशेषे तद्विषयप्रकाशरूपकारणविशेषो वाच्य इत्याशङ्क्याह-आत्मव्यवहार इति । आत्मनः प्रकाशविषयत्वासंभवाद् "विज्ञातारमरे केन" इत्यादिश्रुतिप्रसिद्धत्वाच्च प्रकाशाभेद एवात्र विशेषकारणम् । स च यावद्व्यवहारं भेदाभावात्मा कल्पित आत्मातिरिक्तोऽस्तीति भावः । यद्वा यथा ज्ञानसामान्यसामग्रीत एवासति संस्कारेऽनुभवरूपविशेषकार्यम् । यथा वा तत एवासति दोषे स्वतस्त्वमते प्रमारूपकार्यविशेषः एवं प्रकाशमात्रादेवासति संस्कारे सति भेदे व्यवहारविशेष इत्यर्थः । तर्हि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

घटादावपि सामान्यकारणादेव व्यवहारविशेष्यमित्याशङ्कामतिप्रसङ्गेन दूषयति-न चेति ।

घटादावपि प्रकाशाभेद एव विशेषकारणमिति मन्वानं सुगतं प्रत्याह-घटस्येति ।

घटस्य प्रकाश इत्यनुभवस्यासति बाधके प्रामाण्यत्यागायोगाच्च । न च साध्याप्रसिद्धिः । प्रथमसाध्याभावस्य भावरूपस्य चैतन्यविषयत्वस्य घटादौ प्रसिद्धत्वात् । अत्र गृहीतव्यतिरेकव्याप्तिकस्य पुंसो विनाऽपि साध्यप्रसिद्धिं पक्षे तदनुमानसंभवात् । द्वितीयसाध्ये चापरोक्षव्यवहारविषयसंविद् वेद्या न भवतीति साध्यम् । वेद्यत्वं च संविद्विषयत्वमिति । तदभावसिद्धावर्थात्फलव्याप्यत्वाभावः पक्षे सिद्ध्यति ।

अथ वा वेद्यत्वे सत्यपरोक्षव्यवहारविषयत्वादेर्घटादौ प्रसिद्धस्यानुभूतापरोक्षव्यवहारविषयेऽनुभूतित्वेन हेतुनाऽभावानुमानात् । अर्थादवेद्यत्वे सत्यपरोक्षव्यवहारविषयत्वस्यापि पक्ष एव सिद्धेः । न चादृष्टादावसाधारण्यम् । तस्य तर्कानवतारदशायामेव दोषत्वात् । आचार्यानुमाने तु वेद्यत्वमपरोक्षव्यवहारयोग्यं किं चिन्निष्ठात्यन्ताभावप्रतियोगिभावधर्मत्वादिति विवक्षितम् ।

चिज्जडयोर्वास्तवाभेदायोगाद्भेदानुभवविरोधाच्चेत्यर्थः । यच्चोक्तमप्रसिद्धविशेषणः पक्ष इति तद् दूषयति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न चेति । साध्याप्रसिद्धिरिति । दोषायेति शेषः । अभावप्रसिद्धौ प्रतियोगिप्रसिद्धेस्तन्त्रत्वात्संविद्विषयत्वरूपप्रतियोगिनो घटादावनुभूतित्वाभावेन व्याप्ततया गृहीतत्वादनुभूतित्वहेतोर्व्यतिरेकव्याप्तिपक्षधर्मतयोः-सत्त्वादाद्यलक्षणलक्षितसाध्ये साम्राज्यमित्यभिप्रेत्याह प्रथमेति । द्वितीयलक्षणे विशेष्यस्यात्मनि सिद्धस्य पक्षकोटौ निवेशसंभवाद्विशेषणमात्रस्यावेद्यत्वस्य व्यतिरेकव्याप्तिमद्धेतुबलात्सिद्धावर्थाद्विशिष्टलक्षणसिद्धिरित्यभिप्रेत्याह-द्वितीयेति । अर्थादिति । फलविषयत्वे संविद्विषयत्वायोगादित्यर्थः । फलाव्याप्यत्वस्य मुखतः साध्यत्वेऽपि न दोषः । इदानीमत्रापि विशिष्टाभावस्यैव साध्यत्वात्, विशिष्टस्य च घटादौ हेत्वभावेन व्याप्तत्वात्, प्रथमलक्षणवन्न साध्याप्रसिद्धिर्दोषायेत्याह-अथ वेति । विशेष्यवति विशिष्टाभावो विशेषणभूतवेद्यत्वाभावमादायैव पर्यवस्यति । तथा चावेद्यत्वविशिष्टलक्षणसिद्धिरित्याह-अर्थादिति । ननु विशेष्याभावो विशेषणविशिष्टाभाववत्यदृष्टादौ सपक्षे हेतोरभावादसाधारण्यमित्याशङ्क्य तस्यानित्यदोषत्वान्नैतद् दूषकत्वमित्याह-न चादृष्टेति । यदप्युक्तं वेद्यत्वं किञ्चिन्निष्ठात्यन्ताभावप्रतियोगिधर्मत्वादिति सामान्यतो दृष्टानुमानान्न विशिष्टसाध्यसिद्धिरिति । तत्राह-आचार्येति । परोक्षव्यवहारविषयत्वात्यन्ताभावे व्यभिचारवारणाय भावेत्युक्तम् । न चापरोक्षव्यवहारविषयत्वे व्यभिचारः । परमते तस्मिन्नेव तदत्यन्ताभावसत्त्वात् । अस्मन्मते तस्य मिथ्यात्वेन पक्षसमत्वान्न व्यभिचार इति भावः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रमेयत्वादावुक्तव्यभिचारमनूद्य दूषयति-यत्त्वि-
त्यादिना।

यत्तु केवलान्वयिधर्मे व्यभिचार इति।
तदसत्। केवलान्वयिधर्मासिद्धेः प्रमेयत्वादेरपि
स्वस्मिन् सम्बन्धाभावेन स्ववृत्त्यत्यन्ताभावव-
त्त्वात्। न 'चैवं प्रमेयत्वं प्रमेयम्'इति धीर्न
स्यादिति वाच्यम्। तस्यास्तद्वृत्तिप्रमेयत्वान्त-
रविषयत्वात्।

अथवा भेदो भिन्नः घटाभावे घटो नास्ती-
त्यादिबुद्धिवत्। प्रमेयत्वस्वरूपमेव तद्बुद्धिविष-
यः। एवमत्यन्ताभावप्रतियोगित्वेऽपि द्रष्टव्यम्।
न च प्रमाविषयत्वाख्यप्रमेयत्वं केवलान्वयिप्रमा
तद्विषयातिरिक्तस्य प्रमाविषयत्वस्यैवाभावात्।
तयोश्चाकेवलान्वयित्वात्। अतिरिक्तविषयता-
याश्च तैरेव निराकरणात्।

यच्च प्रमात्वमेव प्रमेयत्वम्। परम्परासम्ब-
न्धेन तस्य घटादावपि सत्त्वादिति। तन्न। वृत्ति-
मदत्यन्ताभावप्रतियोगित्वेनाकेवलान्वयित्वात्॥

प्रमेयत्वात्यन्ताभावस्य कुत्राप्यभावाद्वृत्तिमदत्य-
न्ता-भावाप्रतियोगित्वेन तस्य केवलान्वयित्वमित्याश-
ङ्क्याह-प्रमेयत्वादेरिति। संबन्धाभावेनेति। स्ववृत्ति-
त्वायोगादितिशेषः। प्रमेयत्वस्य स्वस्मिन्नभावे प्रमेयत्व-
स्य नानात्वादेकस्यापरवैशिष्ट्यमुपपद्यत इति भावः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रमेयत्वस्यैकत्वेऽपि तत्स्वरूपमेव विशिष्टप्रत्ययविषय इति सदृष्टान्तमाह—यथ वेति । यथा घटभेदो घटभिन्न इति विशिष्टप्रत्ययविषयो घटभेदस्वरूपमेव, भेदे भेदान्तराङ्गीकारेऽनवस्थापत्तेः । यथा वा घटाभावे घटो नास्तीति प्रतीतेस्तत्स्वरूपमेव विषयः । घटाभावे तदभावाकारस्याभावादेवमत्रापीत्यर्थः । सदुक्तमत्यन्ताभावप्रतियोगित्वाच्चेत्यर्थः । प्रमेयत्वस्यापि नानात्वे नाकेवलान्वयित्वमित्याह—न चेति । अत्र केन चिन्तार्किकापशदेनोत्प्रेक्षितं प्रमात्वमेव प्रमेयत्वम् । तच्च केवलान्वयीति तदनुवदति-यच्चेति । परम्परासम्बन्धेनेति । प्रमात्वाश्रयप्रमाविषयत्वसम्बन्धेनेत्यर्थः । किं प्रमात्वं साक्षादेव केवलान्वयि उत परम्परासम्बन्धेन किं वा तदुभयसाधारण्येन ? । नाद्यः । घटादौ साक्षात्तदभावात् । न द्वितीयः । प्रमायां परम्पराया अभावात् । न तृतीयः । स्वस्मिन्नेवोभयथाऽप्यभावात् । घटत्वादेरपि साक्षात्परम्परासम्बन्धेन केवलान्वयित्वापातात् । तद्वृत्तितत्प्रकारकज्ञानत्वादिरूपस्य तत्तद्वैशिष्ट्यप्रतिभासाद्यनेकात्मकस्य प्रतिप्रमायां भिन्नत्वेनैकत्वायोगाच्चेत्यभिप्रेत्याह तन्नेति ॥

दूषणान्तरमाह-किं चेति ।

किं च प्रमात्वमेव यदि प्रमेयत्वं तर्हि सर्वमुक्तौ न प्रमेयत्वम् । प्रमाव्यक्तिघटितप्रमात्वस्य तदभावेऽभावात् । ईश्वरज्ञाने तदाऽपि प्रमात्वमस्तीति चेत् तस्याप्रमात्वात् ।

किं च यदि प्रमात्वं घटेऽपि स्यात् तर्हि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रमायास्तत इतरभेदानुमानं न स्यात् । विपक्षे-
ऽपि तद्वृत्तेः । न च प्रमात्वसमवायित्वमितरभे-
दानुमितौ लिङ्गम् । असिद्धेः । स्वरूपसंबन्धस्तु
घटेऽपि तुल्यः । लाघवेन प्रमात्वाभावस्यैव तदि-
तरभेदाभावव्यापकत्वाच्च । यत्र यत्संबन्धेन यद-
त्यन्ताभावस्तत्रैव तद्वृत्तौ विरोधो दत्तजलाञ्जलिः
स्यात् । एतेन शब्दप्रतिपाद्यत्वादेरपि केवलान्व-
यित्वं निरस्तम् । शब्दजन्यज्ञानविषयत्वादेस्तस्य
व्यावृत्तत्वात् । प्रमेयत्वादेरात्मन्यभावाच्च न केव-
लान्वयित्वम् । अनुभूतित्वं च जातिः । कल्पि-
तभेदवत्संविन्निष्ठत्वात् । जातौ च स्वसमानस-
त्ताको व्यक्तिभेदोऽपेक्ष्यते न तु धर्मिसमानस-
त्ताकः । अनुभूतिश्च वृत्त्युपहितचैतन्यमिति न
वृत्तिभागे व्यभिचारः ॥

व्यक्तिघटितेति । तस्य यथार्थज्ञानत्वादिरूपो-
पाधित्वादित्यर्थः । मुक्तावनित्यज्ञानाभावेऽपि नित्य-
प्रमात्वमस्तीति शङ्कते-ईश्वरेति । ईश्वरज्ञानस्य गुण-
दोषाजन्यत्वात् प्रमाऽप्रमाबहिर्भूतत्वमेवेत्यभिमेत्याह-
न तस्येति ।

प्रमात्वस्य घटादिवृत्तौ ततः प्रमाव्यावर्तकत्वं
न स्यादित्याह-किं चेति । तत इति । प्रमात्वहेतो-
रित्यर्थः । प्रमात्वस्य घटादौ परम्परासंबन्ध एव
लिङ्गमिति
न तु समवायः । तद्वृत्त्वमेवेतरभेदानुमाने

चेन्न । प्रमात्वस्योपाधित्वेन प्रमायामपि तत्समवायासिद्धेरित्याह-न च प्रमात्वेति । अस्तु तर्हि तत्स्वरूपसंबन्ध एव लिङ्गमित्यत आह-स्वरूपेति । किं च यत्र प्रमेतरभेदाभावस्तत्र प्रमात्वाभाव इत्येव लाघवाद् व्यतिरेकव्याप्तिर्वाच्या । तथा च प्रमात्वस्य घटादिवृत्तावियं व्याप्तिर्न संभवेदित्याह-लाघवेनेति । घटादौ प्रमात्ववत्तदत्यन्ताभावोऽप्यस्त्येव । तथा च नोक्तव्याप्त्यसंभव इत्याशङ्क्याह-यत्रेति । उक्तन्यायेनाभिधेयत्वादिकमपि न केवलान्वयीत्याह-एतेनेति । अभिधेयत्वादेः सखण्डत्वेन प्रतिपदार्थभिन्नत्वान्न सर्वत्रानुगम इत्याह-शब्देति । स्वमतेनाह-प्रमेयत्वादेरिति । यदुक्तम् अनुभूतित्वं जातिरुपाधिर्वा न संभवतीति । तत्राह-अनुभूतित्वं चेति । यच्चोक्तं जातेर्धर्मिसमसत्ताकव्यक्तिभेदनियतत्वादिति । तत्र धर्मिग्रहापेक्षया धर्मत्वस्य ग्रहे लाघवम् । अनुभूतौ चानिर्वचनीयजातिसमसत्ताकभेदस्त्विष्ट एवेत्यभिप्रेत्याह-जातौ चेति । अनुभूतित्वस्य जडवृत्तावपि सत्त्वेन व्यभिचारमाशङ्क्याह-अनुभूतिश्चेति । श्रोत्रोपाधौ कर्णे श्रोत्रव्यवहारवदनुभूत्युपाधिवृत्तावनुभूतिव्यवहार इति भावः ।

आत्मनः स्वप्रकाशत्वसाधकप्रमाणविषयत्वेऽविषयत्वे वा न स्वप्रकाशत्वमित्यादिप्राकृतचोद्यस्य नात्रावसर इत्याह-एतेनेति ।

एतेन 'यदि स्वप्रकाशत्वसाधकानुमानमनुभूतिं विषयीकरोति, तर्हि तस्याः वेद्यत्वम् । अथ न विषयीकरोति । तर्ह्यसत्त्वं स्वप्रकाश-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वस्य । न च स्वप्रकाशत्वधर्मोऽपि स्वप्रकाशः । अथ स्वप्रकाशत्वस्यानुमितिवेद्यत्वेऽपि नानुभूतेस्तद्वेद्यत्वम् । धर्मिणं विनाऽपि शब्दादेर्ग्रहणादिति चेत्; न । अनुमानस्य पक्षविशिष्टसाध्यविषयत्वात्, इति निरस्तम् । अनुभूतेरनुमितिरूपवृत्तिवेद्यत्वेऽपि चैतन्यवेद्यत्वफलव्याप्यत्वयोरभावात् ।

अथ ज्ञानं वेद्यं वस्तुत्वाद्, व्यवहारविषयत्वाद्वा घटवत् । विपर्यये च नरशृङ्गादिवदवस्तुत्वप्रसङ्ग इति चेन्न । प्रकाशमानत्वमात्रेणैव तन्निवृत्तेरप्रयोजकत्वात् । अनुभूतेः स्वपरवेद्यत्वायोगस्योक्तत्वाच्च ।

किं च स्वात्मन्यस्तित्वादिविषयः संशयो विपर्यासो वा नेति सर्वं संप्रतिपन्नम् । स च नियमेन तत्कारणाभावप्रयोज्यः । तत्कारणं चात्र विशेषादर्शनमेव नास्तीति वाच्यम् । तदन्यस्य धर्मीन्द्रियसन्निकर्षकोटिस्मरणादेः सर्वस्य सत्त्वात् ।

अस्य निरस्तमित्युत्तरेण संबन्धः । तर्ह्यसत्त्वमिति । मानाभावे मेयासत्त्वादित्यर्थः । मानासिद्धत्वेऽपि स्वतःसिद्धत्वात् सत्त्वमित्याशङ्क्याह-न चेति । धर्मस्य मिथ्यात्वेन जडत्वादिति भावः । स्वप्रकाशत्वधर्मस्यानुमितिवेद्यत्वेऽपि न धर्मिणः स्वप्रकाशत्व-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षतिरिति शङ्कते-अथेति । धर्मिग्रहणं विना कथं धर्ममात्रग्रहणमित्याशङ्क्याह-धर्मिणमिति । धर्मिणः प्रत्यक्षाविषयत्वेऽप्यनुमितिविषयत्वमावश्यकमित्याह पूर्ववादी-न अनुमानस्येति । अनुभूतेरनुमितिविषयत्वेऽपि नोक्तलक्षणद्वयविरोध इत्याह-अनुभूतेरिति ।

स्वप्रकाशानुमानस्य प्रतिप्रयोगमाशङ्कते-अथेति । स्वसंज्ञाप्रकारकसंशयाद्यगोचरत्वेनैवावस्तुत्वनिवृत्तेर्वेद्यत्वं विना न वस्तुत्वाद्यनुपपत्तिरिति दूषयति-न प्रकाकाशे । प्रतिकूलतर्कपराहतं चेदमनुमानमित्यभिप्रेत्याह-अनुभूतेरिति ।

आत्मनः कदाप्यस्तित्वादिप्रकारकसंशयाद्यभावानुपपत्तिरूपार्थापत्तिरपि स्वप्रकाशत्वे मानमित्यभिप्रेत्याह-किं चेति । यावत्कालं संशयाद्यभावस्तावत्कालं तत्कारणाभावो वक्तव्य इत्याह-स चेति । अत्र संशयादिकारणस्य विशेषादर्शनस्यैवाभावो विशेषदर्शनं वाच्यम् । अन्यस्य कारणस्य कदाचिद्भावात् । तच्च विशेषदर्शनमागन्तुकं सर्वदा न संभवतीति स्वप्रकाशत्वसिद्धिरित्यभिप्रेत्याह-तत्कारणमिति ॥

ननु वर्त्तमानकालीनात्मन्यहंप्रत्ययेन निश्चितत्वान्न संशयः । अतीतकालीनात्मनि धर्मिज्ञानाभावादेव न संशय इति शङ्कते नन्विति ।

ननु धर्मिज्ञानविरहात् संशयविरह इति चेन्न । एतत्कालावच्छिन्ने आत्मनि ज्ञायमानेऽप्यहं प्रातःकालीनो न वेति संशयादर्शनात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत्कालस्य च घटज्ञानधाराधारत्वेन तदानीमात्मज्ञानाभावात् । अहमिति ज्ञानानन्तरमहं ज्ञानवान्न वेति संशयप्रसङ्गाच्च । आत्मस्वरूपज्ञानस्यास्वप्रकाशत्वे स्वयंदृष्टगजादेरपरोक्षत्वाभावापत्तेश्च । वएतेन संशयाभावो न स्वप्रकाशत्वनियतः शरीरादिषु तदभावादिति निरस्तम् । शरीरस्यापि स्वप्रकाशात्माभेदाध्यासेन स्वसत्तायां प्रकाशाव्यभिचारात् । तस्मान्न वेद्यत्वानुमानं साधु । अतस्सिद्धं स्वप्रकाश आत्मेति । एतेन साक्षी चेता केवलो निर्गुण इत्यादिश्रुतिसिद्धं साक्षित्वं व्याख्यातम् ।

अकर्तृत्वे सति द्रष्टृत्वं हि साक्षित्वम् । लोके तथैव प्रसिद्धेः । अहमर्थप्रकाशश्चित्स्वरूपात्माऽप्यकर्त्तेत्युक्तमित्यौदासीन्यबोधाभ्यामात्मा साक्षी भवति । न च द्रष्टृत्वं दर्शनक्रियाकर्तृत्वमतो व्याघात इति वाच्यम् । दर्शनस्य नित्यत्वेनात्मनस्तदकर्तृत्वात् । स्वरूपचैतन्यस्यैव तत्तद्विषयावच्छिन्नं तत्तद्वृत्त्यवच्छिन्नं वा प्रतिसंबन्धित्वमिति द्रष्टव्यम् ।

वर्त्तमानतया निश्चितेऽपि घटे प्रातःकालीनत्वादिसंशयवदात्मन्यस्वप्रकाशे कालान्तरीयत्वसंशयः स्यादेवेत्याह-न एतत्कालेति । प्रातःकालेऽप्यात्मनोऽहं-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षतिरिति शङ्कते-अथेति । धर्मिग्रहणं विना कथं धर्ममात्रग्रहणमित्याशङ्क्याह-धर्मिणमिति । धर्मिणः प्रत्यक्षविषयत्वेऽप्यनुमितिविषयत्वमावश्यकमित्याह पूर्ववादी-न अनुमानस्येति । अनुभूतेरनुमितिविषयत्वेऽपि नोक्तलक्षणद्वयविरोध इत्याह-अनुभूतेरिति ।

स्वप्रकाशानुमानस्य प्रतिप्रयोगमाशङ्कते-अथेति । स्वसंज्ञाप्रकारकसंशयाद्यगोचरत्वेनैवावस्तुत्वनिवृत्तेर्वेद्यत्वं विना न वस्तुत्वाद्यनुपपत्तिरिति दूषयति-न प्रकाशे । प्रतिकूलतर्कपराहतं चेदमनुमानमित्यभिप्रेत्याह-अनुभूतेरिति ।

आत्मनः कदाप्यस्तित्वादिप्रकारकसंशयाद्यभावानुपपत्तिरूपार्थापत्तिरपि स्वप्रकाशत्वे मानमित्यभिप्रेत्याह-किं चेति । यावत्कालं संशयाद्यभावस्तावत्कालं तत्कारणाभावो वक्तव्य इत्याह-स चेति । अत्र संशयादिकारणस्य विशेषादर्शनस्यैवाभावो विशेषदर्शनं वाच्यम् । अन्यस्य कारणस्य कदाचिद्भावात् । तच्च विशेषदर्शनमागन्तुकं सर्वदा न संभवतीति स्वप्रकाशत्वसिद्धिरित्यभिप्रेत्याह-तत्कारणमिति ॥

ननु वर्त्तमानकालीनात्मन्यहंप्रत्ययेन निश्चितत्वान्न संशयः । अतीतकालीनात्मनि धर्मिज्ञानाभावादेव न संशय इति शङ्कते नन्विति ।

ननु धर्मिज्ञानविरहात् संशयविरह इति चेन्न । एतत्कालावच्छिन्ने आत्मनि ज्ञायमानेऽप्यहं प्रातःकालीनो न वेति संशयादर्शनात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत्कालस्य च घटज्ञानधाराधारत्वेन तदानीमात्मज्ञानाभावात् । अहमिति ज्ञानानन्तरमहं ज्ञानवान्न वेति संशयप्रसङ्गाच्च । आत्मस्वरूपज्ञानस्यास्वप्रकाशत्वे स्वयंदृष्टगजादेरपरोक्षत्वाभावापत्तेश्च । वएतेन संशयाभावो न स्वप्रकाशत्वनियतः शरीरादिषु तदभावादिति निरस्तम् । शरीरस्यापि स्वप्रकाशात्माभेदाध्यासेन स्वसत्तायां प्रकाशाव्यभिचारात । तस्मान्न वेद्यत्वानुमानं साधु । अतस्सिद्धं स्वप्रकाश आत्मेति । एतेन साक्षी चेता केवलो निर्गुण इत्यादिश्रुतिसिद्धं साक्षित्वं व्याख्यातम् ।

अकर्तृत्वे सति द्रष्टृत्वं हि साक्षित्वम् । लोके तथैव प्रसिद्धेः । अहमर्थप्रकाशाश्रितस्वरूपात्माऽप्यकर्तृत्युक्तमित्यौदासीन्यबोधाभ्यामात्मा साक्षी भवति । न च द्रष्टृत्वं दर्शनक्रियाकर्तृत्वमतो व्याघात इति वाच्यम् । दर्शनस्य स्वरूपचैतन्यनित्यत्वेनात्मनस्तदकर्तृत्वात् । स्यैव तत्तद्विषयावच्छिन्नं तत्तद्वृत्त्यवच्छिन्नं वा प्रतिसंधत्वमिति द्रष्टव्यम् ।

वर्त्तमानतया निश्चितेऽपि घटे प्रातःकालीनत्वादिसंशयवदात्मन्यस्वप्रकाशे कालान्तरीयत्वसंशयः स्यादेवेत्याह-न एतत्कालेति । प्रातःकालेऽप्यात्मनोऽहं-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रत्ययेन निश्चितत्वान्न संशय इत्यत आह-तत्कालस्य चेति । सर्वदाऽहंप्रत्ययधारायां बाह्यज्ञानविलोपप्रसङ्गा-दिति चशब्दार्थः । ज्ञानस्यास्वप्रकाशत्वे तदुत्पत्त्यन-न्तरं तत्र कदाचित्संशयः स्यात् । धर्मिज्ञानादेः सत्त्वादि-त्यभिप्रेत्याह-अहमिति । अर्थापत्त्यन्तरमाह-आत्मेति । एतच्च स्वप्नसाक्षिवादे निरूपितमिति भावः । शरीराह-ङ्कारदुःखादीनां यथा जडत्वेऽपि संशयाद्यभावस्तथा ऽऽत्मनोऽपि किं न स्यादित्याशङ्क्याह-एतेनेति । न हि वयं स्वप्रकाशत्वं संशयाद्यभावे प्रयोजकं ब्रूमः । किं तु प्रकाशमानत्वम् । तच्च परिशेषादात्मनः स्वप्रकाशत्वेन शरीरादेस्तत्तादात्म्याध्यासेनेत्यभिप्रेत्याह-शरीरस्येति अनेकप्रमाणविरोधादप्रयोजकत्वाच्च प्रतिपक्षानुमानं दुर्बलमित्याह-तस्मादिति । फलितमाह-अत इति । इय-ता प्रबन्धेनोपपादितमात्मतत्त्वमेव त्वंपदार्थशोधकवा-क्यप्रमेयमित्यभिप्रेत्याह-एतेनेति ।

आत्मनः साक्षित्वं दर्शयितुं तत्स्वरूपमाह-अक-र्तृत्वे इति । लोक इति । विवादादिकं यस्तु न करोति अथ च जानाति तस्मिन्नेव साक्षित्वप्रसिद्धेरि-त्यर्थः । आत्मनः कर्तृत्वान्न साक्षित्वमित्याशङ्क्याह-अह-मर्थेति । औदासीन्यबोधाभ्यामिति-इत्थंभावे तृतीया । नन्वकर्तृत्वद्रष्टृत्वयोः परस्परव्याघातादसंभव इति चेन्न । न हि द्रष्टृत्वन्दर्शनकर्तृत्वं किं तु पराभिमते-श्वरवद्दर्शनं प्रति संबन्धित्वमित्यभिप्रेत्याह-न चेति । आत्मनो दर्शनसंबन्धित्वं वा कथंभेदाभावादित्याशङ्क्य कल्पितभेदेनेत्याह-स्वरूपेति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इदं च साक्षित्वमविद्यादशायामेव दृश्यापेक्ष-त्वात्। सदातनं तु निर्विकारबोधात्मकमेवेत्याह-अत एवेति।

अत एव द्रष्टृत्वघटितं साक्षित्वं न स्वरूपम्। अपि तूदासीनबोधात्मकमेव साक्षित्वं स्वरूपम्। तस्य निष्प्रतियोगिकस्वरूपत्वात्। अयमेवात्मा "एष ते आत्मा सर्वान्तरः" इति श्रुत्याऽप्युच्यते। अहमनुभवे प्रकाशमानस्यैव चैतन्यात्मनोऽन्तःक-रणादेरधिष्ठानतया सर्वान्तरत्वात्। चैतन्याति-रिक्तस्य सर्वस्य कल्पितत्तया बाह्यत्वात्। तथा च श्रुतिः "अतोऽन्यदार्तमिति पराञ्चि खानि व्यतृ-णत्स्वयंभूः। तस्मात्पराङ् पश्यति नान्तरात्मन् कश्चिद्धीरः प्रत्यगात्मानम्" इत्यादिश्रुत्याप्ययमेव प्रत्यगात्मेत्युच्यते। अस्यैव सदानन्दकूटस्थ-चिदात्मनोऽनृतदुःखजडपरिणाम्यहङ्कारादिप्राति-कूल्येन प्रकाशनात्। तस्मादहमनुभवगोचरदुःखा-द्याश्रयातिरिक्तः सत्यज्ञानानन्दात्मकोऽकर्तृ प्रका-शरूपेण साक्षी सर्वान्तरः प्रत्यगात्मा जीवस्य वा-स्तवं रूपं त्वंपदलक्ष्यमिति सिद्धम्।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीज-गन्नाथाश्रमभगवच्छिष्यश्रीनृसिंहाश्रमकृताद्वैतदी-पिकायां साक्षिविवेको नाम प्रथमः परिच्छेदः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वान्तरत्वश्रुतिरप्यत्रैवोपपद्यते, न पराभिमता त्मनीत्यभिप्रेत्याह-अयमेवेति। आत्माऽन्यस्य कल्पितत्वे तद्वाक्यं शेषं प्रमाणयति-तथा चेति। आर्तम्-अनृतमित्यर्थः। स्वयंभूः-ब्रह्मा। खानि-इन्द्रियाणि पराञ्चि बाह्य विषयप्रवणानि कृत्वा व्यतृणत्-हिंसितवान्। तस्मात्-हेतोः सर्वो लोकः पराङेव बहिरेव पश्यति न त्वन्तरात्मानम्। तर्हि मोक्षशास्त्रमनर्थकं स्यादित्याशङ्क्याह-कश्चिद्धीर इति। अत एव पराङ्विषयेभ्यः प्रत्याहृतेन्द्रियो मुमुक्षुः श्रुत्याचार्येश्वरप्रसादात्प्रत्यगात्मानं पश्यतीतिश्रुत्यर्थः। प्रतिजडं प्रातिलोम्येन अञ्चति प्रकाशत इति प्रत्यक्शब्दार्थः। स चात्मा निरूपितस्वरूपमेवेत्याह-असौवेति। त्वंपदार्थशोधनमुपसंहरति-तस्मादिति।

इतिश्रीमत्परमहंसपरिव्राजकाचार्यभगवन्नृसिंहाश्रमपूज्यपादशिष्यनारायणाश्रमविरचितेऽद्वैतदीपिकाविवरणे प्रथमः परिच्छेदः।

श्रीरामचन्द्राय परब्रह्मणेऽर्पणमस्तु।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri